DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

VOLUME IV (B)

ŚĀNTI - PŪJĀ
(EXTRACTS)

General Editor

Vidwan Dr. H.P. Malledevaru, M.A.[illegible],

Professor & Head of the [illegible] Sanskrit &
Director, Oriental Resea[illegible] Institute,
University of Mysore, MYSORE.

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE

1984

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

VOLUME IV (B)

ŚĀNTI - PŪJĀ
(EXTRACTS)

General Editor

Vidwan Dr. H.P. Malledevaru, M.A, Ph.D.,
Professor & Head of the Dept. of P.G. Studies in Sanskrit &
Director, Oriental Research Institute,
University of Mysore, MYSORE.

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE

1984

ACKNOWLEDGEMENT

We acknowledge with thanks the Grant-in-Aid given by the Ministry of Education and Social Welfare, Government of India which has made possible this publication.

Price: Rs. 110-00

Printed in India

Sri Vijayalakshmi Press, 355, D. Subbiah Road, Mysore-570001

ORIENTAL RESEARCH INSTITUTE SERIES

Sl. No. 143

DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS

PREFACE

The long-felt desire of publishing Descriptive Catalogues of more than 65,000 manuscripts preserved in the Oriental Research Institute, is being fulfilled by the publication of the present series of catalogues. So far nine volumes are published and the present volume is the fourth-B, in this series.

In this volume details of Extracts of rare and unpublished manuscripts pertaining to Śānti and Pūjā are given.

The munificent grant in aid by the Government of India, the Ministry of Education and Social Welfare (SKT) has made possible the publication of these catalogues. Hence my greatful thanks are due to the Government of India, Ministry of Education and Social Welfare, New Delhi.

I am thankful to the authorities of the University of Mysore, for having permitted me to take up this work under this scheme. I thank all the scholars of this Institute who have helped in correcting the compilation sheets of external scholars.

I thank Vidwan B. V. Narasimhacharya who has worked earlier and Vidwan P. Maribasavaradhya who is working at present as Co-ordinator in this scheme.

I also thank proprietor, Sri Vijayalakshmi Press, Mysore, foi thoeir neat printing and nice get up. Finally my thanks are due to all those who have helped in bringing out the present volume.

Mysose-570005 H. P. Malledevaru
24-2-1934

The following staff members of Oriental Research Institute, Mysore, have helped in this scheme

Sriyuths :

Vidwan, Dr. H. P. Malledevaru,
Professor and Head of the Post-graduate Department of Sanskrit and Director, Oriental Research Institute Mysore.

Late Dr G. Marulasiddaiah,
Ex-Professor & Head of the Post-graduate Department of Sanskrit and Director, Oriental Research Institute, Mysore.

R.G. Malagi, M A.,
Nyaya, Vedantha Vidwan, Deputy Director, Oriental Research Institute, Mysore

N. S. Venkatanathacharya.
Nyaya, Vyakarana, Alankara Vidwan

P. Maribasavaradhya
Visarada, Vedanta Vidwan

B. V. Narasimhacharya.
Navinanyaya Vidwan Prachinanyaya Visharada,

H. Shankara Ganapathi Phatak, M.A.,
Sahityasiromani, Dharmasastra Vidwan

H. V. Nagaraja Rao, M. A.,
Alankara, Vyakarana Vidwan

Dr. R. S. Shivaganeshamurthy, M. A , Ph. D.

Panditaratnam K. S Varadacharya
Nyaya, Vedanta Vidwan

C S Srinivasan

Late Vidyalankara R. Ramasastry
Navinanyaya Vidwan

Late C. Rajashekharamurthy, M A ,
Vedanta Vidwan

CONTENTS

APPENDIX

EXTRACT – 1

शान्तिः

Extracts from the Manuscripts of Sānti and Pūjā vol. IV(A)

1

Sl. No. 9691 **अंशबलिशान्तिः** **Ms. No. P. 2914/31**

Beginning :

अतः परं प्रवक्ष्यामि अंशकारव्यबलिं क्रमात् ।
महारोगहतानां च आयुरारोग्यसिद्धये ॥
तिथिवारर्क्ष्यंवल्यादौ पश्यन्ति श्चेनृणां (?) यदि ।
अंशकादिबलिं कुर्यात् भक्त्या तद्गतमानसः ॥

End:

कृष्णगन्धाक्षतैः पुष्पैः शम्यग्निरिति पूजयेत् ।
कृसरान्नं तिलमिश्रं वायव्यां निक्षिपेन्निशि ॥
व्याधीनां चैव सर्वेषां — — — बलिमाचरेत् ।
महदज्ञानतो लोभात् न कुर्यान्नैव शाम्यति ॥

Colophon :

इत्यंशबलिः ।।

2

Sl·No· 9696 **अकालफलितोत्पातशान्तिः** **Ms. No. P. 5635/107**

Beginning :

शौनकोऽहं प्रवक्ष्यामि शान्तिं लोकहिताय च ।
अकालफलितेष्वेषु तरुगुल्मलतादिषु ॥
यस्य क्षेत्रे गृहे वाऽपि केदारे वा विशेषतः ॥

End :

ब्राह्मणास्तत्र सम्पूज्य मृष्टान्नेन यथाविधि ।
स्मृत्वा विष्णुं जगन्नाथं यजमानस्सुखी भवेत् ॥

Colophon :

इति शौनकीये अकालफलितोत्पातशान्तिः ॥

3

Sl. No. 9697 **अकालिकस्त्रीमज्जमशान्तिः** **Ms. No. P. 734/46**

Beginning :

जन्मर्क्षतीर्थकगतानि × × × ×
× × × × × × × × × ।
× × × × × विषस्या
× × × पूर्वर्कसङ्क्रान्तिहतेषु नैव ॥
जन्मनक्षत्रघटिका सङ्ग × × यदा भवेत् ।
वृद्धौ × × × × × × × × × ॥
× हि वारे जन्मनक्षत्रे यस्मिन् सङ्गतोऽधिके ।
तस्मिन् दिने स्नानदानं विपरीते विनश्यति ॥

End :

बलिं तस्य प्रवक्ष्यामि येन मुच्यति × × री ।
तण्डुलं प्रस्थमेकमिति × × × × × ॥
गन्धं पञ्चविंशतिस्वस्तिकां पञ्चविंशतिध्वजाः ।
अष्टदीपं दक्षिणस्यां × × × × × ॥
× × × कुर्वीत यत इन्द्रेति मन्त्रतः ॥

Colophon :

— — —

4

Sl. No. 9699 अगस्त्यदानपद्धतिः Ms. No. P. 9428/115

Beginning :

रचनाप्रकारः –

जन्मानुजन्मत्रिजन्मनक्षत्रव्यतीपातसङ्क्रान्तिग्रहणयोगाष्टमीद्वादश्यमावास्यादि + + + + + + + यामलोक्तप्रकारेण कृत्रिमादिदोषपरिहाराय अगस्त्यदानं करिष्ये ॥

End :

गन्धपुष्पाञ्जलिं कृत्वा अगस्त्यमुनिप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । सुवर्णत्रयदक्षिणां दद्यात् । यस्य स्मृत्येत्यादि ॥

Colophon :

इति यामलोक्तप्रकारेण कृत्रिमरोगहरागस्त्यदानपद्धतिः ॥

5

Sl. No. 9700 अग्निमान्द्यशान्तिः (वृद्धबोधायनीयः) Ms. No. P. 604/40

Beginning :

अथाग्निमान्द्यरोगस्य अजीर्णस्य विशेषतः ।
अरुच्यादिमहारोगयुक्तस्य वमनस्य च ॥
अन्नदर्शनमात्रेण असह्योपद्रवस्य च
प्रतीकारं प्रवक्ष्यामि वृद्धबोधायनोक्तितः ॥

End :

नीरोगी नात्र सन्देहः जाठराग्नियुतो नरः ।
तेजस्वी दृढकायश्च जीवेत्तु शरदां शतम् ॥
सहस्रामेति मन्त्रेण तदन्नं भोजयेदथ ॥

Colophon :

इति बोधायनोक्ता अग्निमान्द्यशान्तिः समाप्ता ॥

6

Sl. No. 97 02 अग्निमान्द्यशान्तिः (मेषदानम्) Ms. No. P. 3804/81

Beginning :

अथ मेषदानमाह भगवान् बोधायनः —

अग्निमन्द्यं भवेत्तस्य यस्त्रेताग्निविनाशकः ।
वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा पुरा ।।

End :

एवं विप्राय यो दद्यात् अग्नेर्वाहनमुत्तमम् ।
बलवानग्निमान् मर्त्यः जीवेद्वर्षशतं भुवि ॥
सुखी स्वबन्धुभिर्विप्रैः स्थित्वा भुञ्जीत मानवः ॥

Colophon :

इत्यग्निमान्द्यहरमेषदानम् ।।

7

Sl. No. 9707 अघोरमूर्तिदानपद्धतिः Ms. No. P. 9428/96

Beginning :

रचनाप्रकारः—

पुण्यनक्षत्र-जन्मनक्षत्र-ग्रहण-सङ्क्रमणादिपुण्यकालेषु गोमयेनानुलेपितरङ्गबल्यादिरचित-भूभागोपरि दर्भानास्तीर्य तत्र आर्द्रेण द्व्यशोणार्धतण्डुलराशिं कृत्वा ॥

End :

गन्धपुष्पाद्यलङ्कृतां अघोरप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे नममेति दद्यात् । सुवर्णद्वयदक्षिणां दद्यात् । यस्य स्मृत्येत्यादि ।।

Colophon :

इति यामलोक्तप्रकारेण अघोरमूर्तिदानपद्धतिः ॥

8

Sl. No. 9712 अङ्गस्पन्दनशान्तिः Ms. No. P 4180/50

Beginning :

अथातः सम्प्रवक्ष्यामि अङ्गस्पन्दननिर्णयम् ।
शिरस्पन्दे महाभाग्यं स्थानलाभं धनाकरम् ।।
भ्रूमध्ये धनलाभं च भ्रुवोः स्पन्देङ्गनागमः ।
नासिका शत्रुसंभोगावाप्तिर्दक्षे सुदर्शनम् ।।

End :

तत्पुरुषायेति मन्त्रेण अम्बयो यन्ति सूक्तकम् ।
जापयित्वापोहिष्ठेति येन देवा इ ति क्रमात् ।।
सवस्त्रप्रतिमां धेनुं आचार्याय निवेदयेत् ।
सर्वदोषविनिर्मुक्तः सुखी भवति नान्यथा ।।

Colophon:

इति अङ्गस्पन्दनशान्तिः ।।

9

Sl. No. 9714 अङ्गस्पन्दनशान्तिः (शौनकीयः) Ms. No. P. 5293/57

Beginning :

× कायां स्पन्दने चैव भूषणं सुपराक्रमः ।
दक्षहस्ततलेर्घाप्तिः वराङ्गुल्ये तु शोभनम् ।।
\+ \+ \+ \+ \+
वामाङ्गस्पन्दने रोगं दुःखालिङ्गनकं भुजे ।
मणिवन्धे सर्वहानिः तापं हस्ततलेऽपि च ।।

End :

अजीत्यामितिमन्त्रेण तत्पुरुषायेति सूक्ततः ।
अपेतु मृत्युरमृतं न आगन – – – – ।
आपोहिष्ठेति मन्त्रेण येन देवादयः क्रमात् ।।

सवस्त्रप्रतिमां धेनुं आचार्याय निवेदयेत् ।
सर्वदोषविनिर्मुक्तः सुखी भवति नान्यथा ॥

Colophon :

इति शौनकीये अङ्गस्पन्दनशान्तिः ॥

10

Sl. No. 9715 **अङ्गस्पन्दनशान्तिः (हेमाद्रीया)** **Ms No P. 5587/57**

Beginning :

अथाङ्गस्पन्दनफलमाह–

अथातः सम्प्रवक्ष्यामि अङ्गस्पन्दस्य निर्णयम् ।
शिरःस्पन्दे महाभाग्यं स्थानलाभं ललाटके ॥

End :

सवस्त्रप्रतिमां कृष्णधेनुमाचार्याय निवेदयेत् ।
सर्वदोषविनिर्मुक्तः सुखी भवति नान्यथा ।
सर्वपापविनिर्मुक्तः सर्वान् कामान् अवाप्नुयात् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शान्तिप्रकरणे अङ्गस्पन्दनशान्तिः समाप्ता ॥

11

Sl No. 9719 **अङ्गस्पन्दनशान्तिः (यामलीया)** **Ms No. P. 9428/108**

Beginning :

रचनाप्रकारः –

दुष्टाङ्गस्पन्दनकाले देवालयादिपुण्यदेशेषु गोमयानुलेपितरङ्गवल्यादिरचितभूभागोपरि यथासम्भवं तण्डुलराशिं कृत्वा + + + यामलोक्तप्रकारेण दुष्टाङ्गस्पन्दशान्तिं करिष्ये ॥

End :

विष्णुमहितप्रतिमां गन्धपुष्पाद्यलङ्कृतां महेश्वरप्रतिमां मम· पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । यस्येत्यादि ॥

Colophon :

इति यामलोक्तप्रकारेण अङ्गस्पन्दनशान्तिः ॥

12

Sl. No· 9721 अङ्गारकप्रीतिदानविधिः Ms. No. P. 604/11a

Beginning :

अथातः सम्प्रवक्ष्यामि भौमदोषोपशान्तये ।
महाभयहरं सर्वं रिपुरोगऋणापहम् ॥
त्रिषड्डायान्वितान्मेषस्थानेषु धरणीसुतः ॥

End:

ददामि भौमदोषोत्थपीडां दहतु सर्वदा ।
ततः शक्त्यनुसारेण दक्षिणादानमाचरेत् ॥
ग्रहदोषविनिर्मुक्तः सर्वकण्टकवर्जितः ॥

Colophon :

इति यामलोक्ताङ्गारकप्रीतिदानविधिः ॥

13

Sl. No. 9729 अङ्गारकशान्तिः (शौनकीयः) Ms. No· P· 734/21

Beginning:

अथाङ्गारकशान्तिरुच्यते । शौनकः –

अथातस्सम्प्रवक्षामि भौमदोषोपशान्तये ।
महाभयहरं सम्यक् × × × भयापहम् ॥

End :

दशदानं ततः कृत्वा ब्राह्मणान् भोजयेत्सुधीः ।
एवं यः कुरुते दानं पुत्रपौत्राभिवृद्धये ॥
अरोगी मतिमान् नित्यं धनधान्यसमृद्धिभाक् ॥

Colophon :

— — —

14

Sl. No. 9731 अङ्गारकशान्तिः (ब्रह्मयामलीया) **Ms. No. P. 2914/57**

Beginning :

अथातः सम्प्रवक्ष्यामि भौमदोषापनुत्तये ।
बलहीने तथा पुत्रदेहपीडा भवेत्तदा ॥
व्रणरोगादिदोषश्च युद्धायुद्धंसमेव च ।
सर्वदा सर्वकर्येषु विघ्नानां फलमेव च ॥

End :

तुवरीभारसंयुक्ता रक्तोक्षमपि दापयेत् ।
गुडान्नसहितं शक्त्या ब्राह्मणेभ्यः प्रदापयेत् ॥
ऋणदारिद्र्यदुःखादिरोगदोषभयापहः ॥
इह लोके सुखी भूत्वा पश्चाच्छिवपुरं व्रजेत् ॥

Colophon :

इति ब्रह्मयामले कुजशान्तिस्समाप्ता ॥

15

Sl. No. 9738 अङ्गारकशान्तिः **Ms.No. P. 7970/126(a)**

Beginning:

अथ शान्तिं प्रवक्ष्यामि भौमदोषोपशान्तिदम् ।
बलहीने धरापुत्रे देहपीडां च वै तथा ।
व्रणरोगादिदोषश्च युद्धादिभयमेव च ।
सर्वदा सर्वकार्येषु विघ्नं निष्फलमेव च ॥

End :

गुडान्नसहितं भक्त्या ब्राह्मणान् भोजयेत्तदा ।
बन्धुभिः सह भुञ्जीत सदा सन्तुष्टमानसः ॥
एवं यः कुरुते भक्त्या धनधान्यसमन्वितः ।
इह लोके सुखी भूत्वा पश्चात् शिवपुरं व्रजेत् ॥

Colophon :

इत्यङ्गारकशान्तिः ॥

16

Sl. No. 9740 अङ्गारकशान्तिः (प्रयोगात्मकः) Ms. No. P. 9428/89

Beginning :

रचनाप्रकारः—

जन्मनक्षत्रभौमवारा × × योगे दिने गृहस्येशानदिग्भागे समस्थले शुद्धदेशे गोमयानुलेपितं कृत्वा रङ्गवल्यादि रचयित्वा तत्र यथाशक्ति + + + + कुम्भोपरि × × ताम्बुपात्रं करिष्ये ॥

End :

अङ्गारकप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । तदभावे यथाशक्ति दक्षिणां दद्यात् । यस्य स्मृत्येत्यादि ॥

Colophon :

यामलोक्तप्रकारेण अङ्गारकशान्तिप्रयोगः ॥

17

Sl No. 9743 अङ्गारकातिथ्यविधिः Ms. No P. 3023/164

Beginning :

तुवरीराश्युपरि वारुणं कलशं निधाय इमं मे वरुणेति षोडशोपचारपूजा । + + +
तस्य पश्चिमदिग्भागे स्थण्डिलं तण्डुलेन तु ॥
धर्मस्त्वं वृष × × जगदा × × × !

End :

अष्टमूर्तेरधिष्ठानं अतश्शान्तिं प्रयच्छ मे ॥
ब्राह्मणान् भोजयेत्पश्चात् गृह्णीयादाशिषः स्वयम् ॥

Colophon :

— — —

18

Sl. No. 9744 **अजदानविधिः (रुद्रयामलीयः)** **Ms. No. P. 4720/39**

Beginning

अथ अजदानम् –

अजदानं प्रवक्ष्यामि यदुक्तं रुद्रयामले ।
ग्रहदोषसमुत्पन्ने नानारोगाद्युपद्रवे ॥
दुस्स्वप्नाच्छूतसम्बन्धे ज्वरपीडाद्युपद्रवे ।
मृत्युना बाधते यस्य तस्य बाधा प्रमुच्यते ॥
× + + +

End :

सर्वसङ्कटनिर्मुक्तः सर्वोपद्रववर्जितः ।
ग्रहदोषविनिर्मुक्तः जीवेद्वर्ष ं नरः ॥

Colophon :

इति रुद्रयामले मृत्योरुपहारेण सर्वव्याधिविमोचने अजदानविधिः समाप्तः ॥

19

Sl. No. 9746 **अद्भुतशान्तिः (शौनकीयः)** **Ms. No. P 3128/16**

Beginning :

अद्भुतानां च सर्वेषां शान्तिं वक्ष्यामि शौनकः ।
अचार्यमद्भुतं पश्येल्लक्षणेन समाहितः ॥
दिव्यानि चान्तरिक्षाणि भौमानीति तथा भवेत् ।
रश्मिहीनं रविं पश्येत् रविं छिद्रं च भेदनम् ॥

End :

देवाः कपोत इत्येताः कपोतावेशने भवेत् ।
सौविष्टकृतमारभ्य होमशेषं समापयेत् ॥
वासो हिरण्यमन्नं च प्रयच्छेद्दक्षिणां ततः ।
ब्राह्मणान् भोजयेत्तत्र कारयेत्स्वस्तिवाचनम् ॥

Colophon :

इति शौनकीये अद्भुतशान्तिविधिः समाप्तः ॥

20

Sl. No. 9754 अद्भुतशान्तिः (प्रयोगात्मकः) Ms. No. P. 8178/17

Beginning :

अथाद्भुतशान्तिः –

पालाशसमिधमष्टोत्तरसमिधा सहस्राहुतिपरिमितं पायसं चापि आज्यं च दर्भान् विवर्ण सदधिसर्पिसर्षपपालाशविति एष मार्गशाखामिति ॥

End :

शतं जीव शरदः इत्येतैः सम्भारण्यामुपस्थानं (?) कृत्वा ब्राह्मणान् स्वस्ति वाचयेत् । ततो यजमानः आचार्यब्राह्मणेभ्यो दक्षिणां दद्यात् ॥

Colophon :

— — —

21

Sl. No. 9756 अधिगण्डजननशान्तिः Ms. No. P. 7401/9

Beginning :

अथातस्सम्प्रवक्ष्यामि लोकोपहितकारकम् ।
सर्वारिष्टहरं नृणां आयुरारोग्यदायकम् ॥
अधिगण्डे जातशिशोः शान्तिं वक्ष्यमि × दशत् ।

तिथ्यर्क्षगण्डे पितृमातृहन्ता — — — — — — ।
— — — — — — लग्ने तु सन्धौ तनयस्य नाशः ॥
पर्वणि प्रतिपन्मध्ये पञ्चमी षष्ठिकान्तरे ।
दशम्येकादशीमध्ये गण्डान्ते घटिकाद्वयम् ॥

End :

प्रागादिषु च × ध्येवं लोकपाल × × येत् ।
नैवेद्य × × × स्पृष्ट्वा जपशतं गुरुः ॥
इन्द्र × × येनैव तिथीशं च त्रयं × × ।
× × × × ॥
× × × माचरेत् ।
× × × × पदादाय × × ॥
× × मन्त्रेण × × त्रितिलाक्षतैः ।
× × × × × × ॥

Colophon :

— — —

22

Sl. No. 9757 अधोवायुविण्मूत्रपतनशान्तिः **Ms No. P. 4180/105**

Beginning :

राजालये तथा स्थाने सभामध्ये गृहेऽथवा ।
देवालये विवाहादौ कर्ममध्ये विशेषतः ॥
अधोवायुवऽथविण्मूत्रं यदि प्राप्नोत्कथं भवेत् (?) ।
राजालये तु षण्मासं आस्थाने सर्वनाशनम् ॥

End:

अकृत्वा यस्य तत्कर्म सदा मृत्युसमाकुलः ।
तस्मात्सर्वप्रयत्नेन शान्तिमेव समाचरेत् ॥
विषूचिनं वायुबद्धं कुक्षिरोगिं न दोषभाक् (?) ।
दरिद्रं चाध्वगञ्चैव श्रान्तं सन्यासिनं स्त्रियम् ॥

Colophon:

इति ज्योतिषार्णवे अधोवायुविण्मूत्रपतनशान्तिः ॥

23

Sl· No· 9758 अनड्वाहदानविधिः Ms. No· P. 8178/49

Beginning:

अथ अनड्वाहदानम् –

व × × × स्ततः स्वर्गं रोमसंख्याप्रमाणतः ।
यो ददाति बलीवर्दं उक्तेन विधिना शुभम् ।
दिव्यकल्पसहस्राणि शिवलोके महीयते ॥

End :

अलङ्कृत्य द्विजे दत्वा मृत्युं हि तरते नरः ।
यस्मात्त्वं पृथिवी सर्वा धेनुर्वै कृष्णसन्निभे ॥
सर्वमृत्युहरान्नेतुं अतः शान्ति प्रयच्छ मे ॥

Colophon :

इति अनड्वाहदानविधिः ॥

24

Sl· No: 9759 अनड्वाहप्रवेशशान्तिः Ms· No· P· 4720/40

Beginning :

अथानड्वाहप्रवेशशान्तिः –

शौनकोह प्रवक्ष्यामि अनड्वान् प्रविशेद्गृहम् ॥
गृहं विसर्जयेद्धीमान् पुत्रजायासमान्वितम् ॥
प्रवेशद्वारके × × न्मासमेकं विवर्जयेत् ।
यदि द्वारान्तरं गच्छेत् षण्मासं तु विवर्जयेत् ॥

End :

श्रीसूक्तं यत इन्द्रेति स्वस्तिदा विश पकया ।
देवस्य त्वेति मन्त्रेण भद्रं न इति पादतः ॥

अभिषेकाद्भुतं वस्त्रमाचार्याय निवेदयेत् ।
एवं कृत्वा विधानेन वेदोक्तायुर्भविष्यति ॥
एवं यः कुरुते शान्तिं शौनकोक्तविधानतः ।
नापमृत्युर्भवेत्तस्य सर्वत्र विजयी भवेत् ॥

Colophon :

इत्यनड्वाहप्रवेशशान्तिः समाप्ता ॥

25

Sl. No. 9762 अनपत्यत्वहरशान्तिः **Ms. No. P 909/14**

Beginning

शातातपप्रोक्ते –

विप्रस्वापहारी च सोनपत्यः प्रजायते ।
तेन कार्यं विशुद्ध्यर्थं महारुद्रजपादिकम् ॥

End :

अतो व्याधिप्रमुक्त्यर्थं वक्ता स्तोत्रायुतं जपेत् ॥
कृच्छ्राद्वित्येतानित्यादि गुरुलघुत्वापेक्षया वा व्यस्तानि समस्तानि वा योज्यानि ।

Colophon :

— —

26

Sl. No. 9765 अनावृष्टिशान्तिविधिः **Ms. No. P.9764/15**

Beginning :

शौनकः –

वर्षर्तौ तु यदा भूमावनावृष्टिस्तु वर्तते ।
कोऽपि होमं तदा कुर्यात्तदर्धं लक्षमेव वा ॥
अयुतं वा प्रकुर्वीत ऐन्द्रैर्वारुणसूक्तकैः ।
देवालये तटाकस्य समीपे वा सुशोभने ॥

End :

सर्वान् देवान् समुच्चार्य तत्तन्मन्त्रैश्च तर्पयेत् ।
शान्तिसूक्तान् पठेन्नित्यं सर्वोपद्रवशान्तये ॥
ऋत्विग्भ्यो दक्षिणां दद्याद्यथाविभवसारतः ।
एवं कृते सुवृष्टिस्स्यात्सम्पूर्णहितकारिणी ॥

Colophon :

इति शौनकोक्तानावृष्टिशान्तिः ॥

27

Sl. No. 9761 **अनूराधानक्षत्रशान्तिः** **Mf. No. P. 5930/98**

Beginning :

अनुराधायां दिनानि दश-पञ्चदश-विंशतिदिनानि वा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः ॥

End :

करवीरपल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां च दद्यात्; ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Coloohon :

इत्यनूराधानक्षत्रशान्तिः ॥

28

Sl. No. 9768 **अनूराधानक्षत्रशान्तिः (गार्ग्यीयः)** **Ms. No. P. 9254/102**

Beginning :

अथानूराधानक्षत्रशान्तिः— अनूराधायां दिनानि दश पञ्चदश विंशतिदिनानि वा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये मित्रा वानूराधानक्षत्रदेवतेति भेदः । मित्रदेवता स्वरूपम् ॥

End :

करवीरपल्लवोदकेन अभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां च दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति अनूराधानक्षत्रशान्तिः ॥

29

Sl. No. 9771 अपमृत्युञ्जयशान्तिः **Ms. No p. 2914/10**

Beginning :

अपमृत्युञ्जयं होमं वक्ष्यामीह द्विजन्मनाम् ।
कुर्यात्त्रिजन्मनक्षत्रे विषुवे सङ्क्रमे तथा ॥
पौर्णमास्याममावास्यां ग्रहणे चन्द्रसूर्ययोः ।
समस्तक्लेशकालेषु यथाविधि समाहितः ॥

End :

अभिषेकं ततः पश्चात्कुर्यादाज्यावलोकनम् ।
स्वर्णप्रतिमां दद्यात् यथाशक्त्यानुदक्षिणाम् ॥
धन्यं यशस्यमायुष्यमारोग्यं पुष्टिवर्धनम् ।
अपमृत्युञ्जयं होममारभेत पुन :पुनः ॥

Colophon :

इति शौनकोक्तापमृत्युञ्जयशान्तिहोमविधिः ॥

30

Sl No 9773 अपमृत्युञ्जयशान्तिः (शौनकीया) **Ms. No. P. 3646/16**

Beginning :

अपमृत्युञ्जयं वक्ष्ये प्राणिनां हितकाम्यया ।
अकालमारणं प्राप्तं × × × × त् ॥
× × × × × × × भविष्यति ।
होमैर्दानैर्जपैर्ध्यानैर्देवतानां च पूजनैः ॥
पापक्षयाय कर्तव्यं क्षीणवा × स्तुज × ॥

End :

अरोगि स्यात्फलं सिद्धं विपुलां श्रियमाप्नुयात् ।
अपमृत्युं जयत्याशु इति गौतमभाषितम् ।।

Colophon :

— — —

31

Sl.No. 9778 अपस्मारहरविनायकदानशान्तिः Ms. No. P. 2282/27

Beginning :

अथ अपस्मारहरविनायकदानम् । तत्र बोधायनः —
× × × × रोधेन अपस्मारी भवेन्नरः ।
वक्ष्ये तस्य प्रतीकारं दानहोमक्रियादिभिः ।।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ।
विनायकप्रतिकृतिं कुर्यात् स्वर्णमयीं शुभाम् ।।

End :

विनायक प्रपन्नोऽस्मि हर विघ्न विनायक ।
त्वं देवैः प्रापितः पूर्वं विघ्नं विघ्नपरायणैः ।।
ब्राह्मणश्चानुरोधेन यज्जातं मम वै कृतम् ।।

Colophon :

— — —

32

Sl. No. 9781 अब्दपूर्तिशान्तिः Ms. No. P. 5635/110

Beginning :

सर्वोऽपि जन्मदिवसे स्नातो मण्डनवानिति ।
गुरुदेवांश्च विप्रांश्च पूजयेत्तु प्रयत्नतः ।।
स्वनक्षत्रे च पितरं मातरं बान्धवानपि ।।

End :

वस्त्राण्याभरणांश्चैव दत्त्वा विप्रान् प्रपूजयेत् ।
पुण्यान्यन्यानि कुर्वीत पापकर्म न कारयेत् ॥

Colophon :

इत्यब्दपूर्तिविधिः ॥

33

Sl. No. 9782 **अब्दपूर्तिशान्तिः** (मानवीया) **Ms. No. P. 5930/63**

Beginning :

अथातस्संप्रवक्ष्यामि अब्दपूर्तिविधिक्रमम् ।
नृपाणामभिषिक्तानां बालानां तु विशेषतः ॥

End :

बन्धुभिस्सह भुञ्जीत स्वगृहे संवसेत्सदा ।
अनिन्द्यभोजनं कुर्यात् अन्ये × × मचरेत् ॥

Colophon :

इति मानवीये वर्षान्तजन्मतिथौ वर्धापनविधिः ॥

34

Sl. No. 9783 **अभयङ्करदानपद्धतिः** (मानवीयः) **Ms. No. P. 9428/105**

Beginning :

रचनाप्रकारः —

तिलराशिं कृत्वा तदुपरि वस्त्रं प्रसार्य यथाशक्ति स्वर्णनिर्मितं देवेन्द्रप्रतिमां निधाय, यामलोक्तप्रकारेणाभयङ्करदानं करिष्ये ॥

End :

गन्धपुष्पाद्यलङ्कृतां देवेन्द्रप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । यथाशक्ति दक्षिणां दद्यात् । यस्येत्यदि ॥

Colophon :

इति यामलोक्तप्रकारेणाभयंकरदानपद्धतिः ॥

35

Sl. No. 9784 अभिचारशान्तिः (शत्रुशान्तिः शौनकीया) Ms. No. P. 2914/40

Beginning :

अथातस्सम्प्रवक्ष्यामि शत्रुशान्तिमनुत्तमम् ।
अभिचाराप्रणाशार्थं शौनकोऽहं द्विजन्मनाम् ॥
कुर्यात्स्वजन्मनक्षत्रे मासि मासे समाहितः ।
सुस्नातः शुद्धवस्त्रं चाच्छाद्य × × लंकृतः ॥

End:

जपेदेतानि सूक्तानि नियतात्मा समाहितः ।
नैनं नृत्यानि हसन्ति (?) क्रूराणि चरितं × रैः ॥
प्रत्याङ्गिरसेन कल्पेन सद्यस्तत्र × वाध्यते ।
प्रत्यङ्गिर कृतिं विद्वान् न कुयात्तत्कदाचन ॥

Colophon

इति शौनकीये परकृत्याभिचारशान्तिः ॥

36

Sl. No. 9789 अभिजिन्नक्षत्रशान्तिः Ms No. P. 9254/107

Beginning: –

अथाभिजिन्नक्षत्रशान्तिः

अभिजिता च दशदिनेषु पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये ब्रह्म अभिजिन्नक्षत्रदेवतेति भेदः ॥

End:

कदलीफलोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :
इति अभिजिन्नक्षत्रशान्तिः ॥

37

Sl.No. 9791 अभिवृद्धिशान्तिः Ms. No. P. 3374/40

Beginning :

ग्रामगृहक्षेत्राणां अभिवृद्धये शान्तिं कुर्यात् । पूर्वपक्षे पुण्ये नक्षत्रे स्थिरलग्ने स्थिरमुहूर्ते देवगृहादीनां मध्ये पैज्ञाम्यैशानारण्यां (?) वा अनुप्रमाणव × खात्वा गोमयेनानुलिप्य × × × मध्ये श्रियं कल्पयामीति ॥

End :

स्विष्टकृतादिपञ्च ाव्यं मथित्वा प्रक्षालितेन पद्मपात्रेण पूरयित्वा गन्धादिभिः अभ्यर्च्य तेन पञ्चगव्येन श्रीसूक्तं पठन् गृहादिकं प्रोक्षेत् ॥

Colophon :

इत्यभिवृद्धिहोमः ॥

38

Sl. No. 9792 अभिषेकशान्तिः Ms. No. P. 5930/13

Beginning :

अभिषेकः—

आपोहिष्ठादितिसृभिः पञ्चदुर्गादिकैरपि ।
कुहूराकासिनीवालीमन्त्राद्यैर्लोकपालकैः ॥
मृतसञ्जीवमन्त्रेण मुञ्चामस्त्वेति मन्त्रतः ।
इदं विष्णुवतिमन्त्रेण त्रियम्बकमृचेन च ।
\+ \+ \+
येन देवा तृचेनैव ग्रहस्त्वामभिषिञ्चतु ॥

End :

वैवस्वतम् । सर्वभूतक्षयकरम् । उदुम्बरम् । दध्ना नीलं परमेष्ठिनं वृकोदरम् । चित्रं चित्रगुप्तं रौद्रम् ॥

Colophon :

— — —

39

Sl. No. 9793 अभिषेकशान्तिः Ms. No. P. 2613/14

Beginning :

ग्रहाणादिरादित्यो लोकरक्षणकारकः ।
दि × मस्थानसम्भूतां पीडामत्र व्यपोहतु ॥ १ ॥
रोहिणीशः सुधामूर्तिः सुधासारः सुधामनः ।
विषमस्थानसम्भूतां पीडां हरतु ते विधुः ॥ २ ॥

End :

अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालाख्या वायवः शुभाः ॥ ८ ॥
सरितः सागराः शौचाः तीर्थानि जलदा नदाः ।
एतास्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥ ९ ॥

Colophon :

— — —

40

Sl No. 9795 अमावास्याप्रसूतिशान्तिः Ms. No. P. 60/25

Beginning :

अथातोमावास्यायां प्रसूतिर्यत्र सम्भवति, तत्र शान्तिश्च कर्तव्या। सुवर्णेन तिलदर्भपाणि प्रकृतिं कृत्वा , पञ्चकलशं दशवस्त्रां शतच्छिद्रसहितां वृहत्कुम्भश्च सम्पाद्य + + + + कर्कं वरयेत् ॥

End :

दक्षिणां दद्यात् । आचार्याय पयस्विनीं दद्यात् । गण्डदोषो निवार्यते । ब्राह्मण-भोजनं कृत्वा, अनेन विधानेन शान्तिं कृत्वा, सर्वदोपनिवृत्तिर्भवतीति आह- भगवान् बोधायनः ॥

Colophon :

इत्यमावास्याप्रसूतिशान्तिः ॥

41

Sl. No. 9799 अमावस्याप्रसूतिशान्तिः (नारदीयः) Ms. No. P. 6297/33

Beginning :

अमावस्याप्रसूतस्तु सर्वान्नाशयति क्षणात् ।
पितरं मातरं भ्रातॄन् गोहिरण्यादिसम्पदः ॥
प्रत्यहं वर्धमानोऽसौ सर्वनाशकरो भवेत् ।
तद्दोषशमनार्थाय शान्तिं कुर्यात् प्रयत्नतः ॥

End:

हिरण्यं रजतं चैव कृष्णां धेनुं सदक्षिणाम् ।
अन्येभ्योऽपि यथा शास्त्रं दातव्या दक्षिणा सदा ॥
ब्राह्मणात् भोजयेत् पश्चात् वाचयेत् स्वस्तिवाचनम् ।
सर्वारिष्टमतिक्रम्य सर्वैश्वर्यो भविष्यति ॥

Colophon : इति नारदपुराणे अमावास्याशान्तिः ॥

42

No. 9801 अमावस्याप्रसूतिशान्तिः (मार्कण्डेयीयः) Ms. No. 8000/18

Beginning:

अमावास्याप्रसूता च गजानां वाजिनां तथा ।
गवाञ्च महिषाणाञ्च मनुष्याणां विशेषतः ॥
देशान्वयमहोत्थानां जायमानं फलं ब्रुवे ।
सिनीवालीप्रसूतानां त्याग एवाभिधीयते ॥

End :

दशदानादिकं कुर्यात शक्त्या ब्राह्मणभोजनम् ।
तत्कालजातदोषस्य महतः शान्तये ध्रुवम् ॥

शान्तिकृत्वा भवेत्सर्वसम्पदायतनं भुवि ।
प्रीताश्च देवताः सर्वाः पितरश्चापि सर्वदा ॥

Colophon :

इति मार्कण्डेयपुराणे अमावास्याप्रसूतिशान्तिः समाप्ता ॥

43

Sl. No. 9802 अमावास्याप्रसूतिशान्तिः (शौनकीयः) Ms. No. P 9428/27

Beginning :

अमायामथ जातानां फलं वक्ष्यामि यत्नतः ।
शान्तिकर्मापि विधिना तिथि × × गमुच्यते ॥
आद्यौ तु पितृगण्डं च द्वितीयं मातरं तथा ॥

End :

पालाशसमिधश्चाद्धैः अष्टोत्तरशतं तथा ।
दूर्वाहोमं ततः कुर्यात् सर्वं पूर्ववदाचरेत् ॥
एवं यः कुरुते शान्ति गण्डदोषात्प्रमुच्यते ॥

Colophon :

इति शौनकीये अमावास्याजननशान्तिः ॥

44

Sl. No. 9805 अमावास्यार्तवशान्तिः (रुद्रयामलीयः) Ms No. P. 2239/10

Beginning:

अमायां यदि नारीणां प्रथमार्तवसंभवः ।
कलहो द्रव्यहानिश्च मानहानिः पतिक्षयः ॥
तस्माच्छास्त्रोक्तविधिना × × शान्ति समाचरेत् ॥

End :

अयः पिण्डं च कार्पासं ब्राह्मणाय प्रदापयेत् ।
एवं यः कुरुते भक्त्या सर्वदोष × × × × ॥
धनधान्यसमायुक्तः बहुसन्तानवान् सुखी ॥

Colophon :

इति रुद्रयामले अमावास्यारजस्वलाशांतिः ॥

45

Sl. No. 980९ अमावास्यार्तवशान्तिः (शौनकीयः) **Ms. No. P 5313/44**

Beginning :

अमायाञ्चापि नारीणां प्रथमार्तवसम्भवे ।
कुलहानिः द्रव्यहानिः.........पतिक्षयः ।
तस्माच्छास्त्रोक्तविधिना भक्त्य शांतिं समाचरेत् ।
तिलपात्रं पितृप्रीत्यै दत्वा शान्तिं समाचरेत् ॥

End :

आचार्याय च गां दद्यात्सवस्त्रप्रतिमान्वितम् ।
आज्यावलोकनं कुर्याद्ब्राह्मणान् भोजयेदथ ॥
एवं यः कुरुते भक्त्या तस्य दोषो न विद्यते ।
धनधान्यसमायुक्तो बहुसन्तानवान् भवेत् ॥

Colophon :

इतिशौनकीये अमावास्याप्रथमार्तवशांतिविधिः समाप्ता ।

46

Sl. No. 9814 अमावास्याशान्तिः (स्मृतिसारसमुच्चयीयः) **Ms. No. P. 5587/46**

Beginning

अथामावास्यातिलहोमविधिरुच्यते – आग्नेयभागे स्थण्डिलनिर्वापप्रोक्षणं कृत्वा, अग्निमुखान्तं कृत्वा, आज्यभागं कृत्वा ॥

End :

अमावास्यायै स्वाहेति तिसृभिराज्याहुतीर्जुहोति । गायत्र्या चाधान् - - - - मष्टोत्तरशतं जुहुयात् । गायत्र्यष्टोत्तरशतं दूर्वाहोमः ।

Colophon :

इति स्मृतिसारसमुच्चये अमावास्याहोमविधिः समाप्तः ॥

47

Sl. No. 9815 अमावास्याशान्तिहोमः Ms. No. P. 9254/117

Beginning :

तदानीमेवामावास्याख्यं कर्म करिष्ये । निर्वापप्रोक्षणञ्च तदवधिचरौ । निवेशनी सङ्गमनीति पुरोनुवाक्यामनूच्य, यत्ते देवा अदधुरिति याज्यया जुहोति । अथाज्याहुतीरुपजुहोति ॥

End :

स्विष्टकृत्प्रभृत्यवदानान्तं कृत्वा धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा, आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इत्यामवास्या ॥

48

Sl. No. 9816 अयुतहोमपद्धतिः (गृह्यसमुच्चयान्तर्गतः) Ms. No. P. 9254/218
योगीश्वरीयः

Beginning :

अयुतहोमः –

तत्र ग्रहतिथ्यात्मकरणेत्यस्य स्थाने अयुतहोमसमन्वितेन ग्रहयज्ञेन यक्ष्ये ; इति सङ्कल्प्य , विशेषऋत्विजान्तरं अथायोऽग्निकुण्डे प्रतिष्ठाप्य वेद्यां ग्रहवन्मध्ये + + + + जुहोति ॥

End :

निर्विघ्नार्थं मुनिश्रेष्ठास्ततोद्भूताद्भुतेषु च ।
द्वादशाहमहस्तद्भवग्रहमखः स्मृतः ॥

तस्मान्न दक्षिणाहीनं कर्तव्यं भूतिमिच्छता ।
सम्पूर्णा दक्षिणा यस्मै वैकुण्ठोऽपि च तुष्यति ।।

Colophon :

इति योगीश्वरकृते ग्रहयज्ञसमुच्चये ग्रहतिथिप्रकृतिरयुतहोमपद्धतिः समाप्ता ॥

49

Sl. No. 9817. **अयुतहोमपद्धतिः** (मात्स्यान्तर्गतः) **Ms. No. P. 9764/62**

Beginning

मत्स्यपुराणे सूतः –

वैशम्पायनमासीनं पुरा पप्रच्छ शौनकः ।
सर्वशास्त्राण्यनुक्रम्य संक्षिप्य बहुविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिभाषिताम् ।
पुण्येह्नि विप्र कथिते कृत्वा पुण्याहवाचनम् ।।

End :

यत्र एकस्यैव ग्रहस्य यागः क्रियते , तत्र तस्यैवाधिदेवताप्रत्यधिदेवताविनायकादीनाञ्च आवाहनस्थापनादि कुर्यात् । चतुर्होमादि उक्तवत्कार्यम् । अयुतादिसंख्यया पूर्णं व्याहृतिभिः कार्यम ।

सदैवायुतहोमोऽयं नवग्रहमखे स्मृतः ॥

Colophon :

— — —

50

Sl. No. 9819 **अवेक्षिताज्यदानविधिः** **Ms. No. P. 9254/2**

Beginning :

अवेक्षिताज्यदानम् –

स्वर्णयुक्तं कांस्यपात्रं गोघृतेन सुपूरितम् ।
तस्यावलोकनं कृत्वा ब्राह्मणाय निवेदयेत् ।।

End :

आज्यं स्वर्णसमायुक्तं कांस्यपात्रप्रपूरितम् ।
तस्मादस्य प्रदानेन सर्वं हरतु दुष्कृतम् ।।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतश्शान्ति प्रयच्छ मे ।।

एतद्दानं प्रतिष्ठासिध्यर्थं आग्नेयहिरण्यं तुभ्यमहं सम्प्रददे ; न मम ।।

Colophon : — — —

51

Sl. No. 9821 अशनिघातशान्तिः (शौनकीयः) Ms. No. P. 604/58

Beginning :

गृहक्षेत्रादिविघ्नेषु वैधृतेयाग्निना यदि ।
तेषां शान्तिं प्रवक्ष्यामि शौनकोऽहं द्विजातये ।।
आचार्यं वरयेदादौ वेदशास्त्रार्थकोविदम् ।।

End :

तस्योत्पातभयं नास्ति स जीवेन् शरदां शतम् ।
ऐश्वर्यं कीर्तिमायुश्च पुत्रादीन् सुखमाप्नुयात् ।।

Copohon

इति शौनकीये अशनिघातशान्तिः समाप्ता ।।

52

Sl. No. 9825 अशनिघातशान्तिः (बोधायनीयः) Ms. No. P. 2117/3

Beginning :

अशनिहतकल्पं व्याख्यास्यामः-

× × × × × दिक × × ना देवगृहे प्रासादे राजगृहे ग्राममध्ये गोष्ठे जन-समूहेऽश्वसमूहे धनधान्य × × बृन्दावने पनस-नालिकेर-क्रमुकतरूनवधूत + + प्रायश्चित्तार्थ-ान्तिकरिष्ये ।।

End :

ब्राह्मणान् भोजयित्वा यथाशक्ति दक्षिणां ददाति ; आचार्याय दक्षिणां ददाति । अशनि हतस्य शान्तिर्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon :

इति बोधायनोक्ताशनिशान्तिः ॥

53

Sl·No· 9836 अशनिघातशान्तिः(बोधायनीया) M·sNo· P· 7893/7

Beginning :

अशनिघातशान्तिविधिं व्याख्यास्यामः—

वसन्ते ग्रीष्मे शरदि वा × नवग्रहे प्रासादे राजगृहे ग्राममध्ये गोष्ठे जनसमूहे धन-धान्यसमूहे ब्राह्मणसमूहे बृन्दावने पनस-नारिकेळ क्रमुकतरु + + + + अशनिघातदोष शांतिं करिष्ये ॥

End :

ब्राह्मणान् भोजयित्वा यथाशक्ति दक्षिणां ददाति ; आचार्याय सहस्रदक्षिणां ददाति । अशनिहतशांतिर्भवति ; इत्याह भगवान् बोधायनः ॥

Colophon :

इति अशनिपातशान्तिः समाप्ता ॥

54

SlNo· 9840 अशनिशिथिलीशान्तिः (बोधायनीयः) Ms· No P· 3924/9

Beginning :

गृहमध्ये ग्राममध्ये आराममध्ये क्षेत्रमध्ये देवालयमध्ये अशनिर्वा शिथिल्युद्भवो वा मधु त्पत्तिः × × तद्भवेत् सप्ताहं रात्रादशुभं भवति ; अत ऊर्ध्वे प्रजानां व्याधिरुद्भवति । तद्दोषपरि हारार्थममावास्यायां निशायां शांतिं कुर्यात् ॥

End :

शं न इन्द्राग्निक्रया नश्चित्र जातु वर्तते युद्धं ते भवतः सुमनसाविति स्विष्टकृच्च होम-समाप्तिश्चरुशेषमाज्यसमाप्तिशेषमुदकशेषं च पात्रे निनीय उत्तरे निनयेत् ॥

Colophon :

इति बोधायनोक्ताशनिशिथिलीशान्तिः समाप्ता ॥

55

Sl. No. 9842 अश्वघर्जनखड्गपतनशान्तिः **Ms. No. P. 4180/103**
(ज्योतिपार्णवान्तर्गता)

Beginning :

अथ प्रयाणकाले अश्वघर्जनखड्गादिपतनशान्तिः -

अथातः सम्प्रवक्ष्यामि प्रयाणेरद्भुतं क्रमात् ॥
ब्राह्मणक्षत्रियौ वैश्याः शूद्रा याः सर्वजातयः ॥
गृहान्निष्क्राम समये सङ्ग्रामार्थे विशेषतः ।
अग्रतः पृष्ठतो वापि श्रूयेते बाजिघर्जने ॥

End :

गौर्दातव्या प्रयत्नेन ऋत्विग्भ्यो दक्षिणां दिशेत् ।
दशदानं च दातव्यं भूरिदानं विशेषतः ॥
ब्राह्मणान् भोजयेत्पश्चाद्यथाविचानुसारतः ।
एवं यः कुरुते शान्ति सर्वदोषापनुत्तये ॥

Colophon :

इति ज्योतिषार्णवे अश्वघर्जनखड्गपतनादिशान्तिः ॥

56

Sl. No. 9843 अश्वशान्तिः (नारदीयसंहितांतर्गता) **Ms. No. P. 734/26**

Beginning :

अश्व × × × × × ।
× × × × व्यतीपाते द्वादश्यामसितेऽपि बा ॥
अथवा भास्करे स्वातिं सम्प्राप्ते तु विशेषतः ॥

End :

आदित्यादिग्रहास्सर्वे प्रीतास्स्युर्मातरोऽखिलाः ।
लोकपालास्सुसन्तुष्टाः पिशाचा डाकिनीगणाः ॥
× × × प्रभाश्च × × सप × × गाः ॥

Colophon :

इति नारदीयसंहितायां अश्वशान्तिस्समाप्ता ॥

57

Sl. No. 9846 अश्वशान्तिः (शौनकीयः) **Ms. No. P. 4180/11**

Beginning :

अथातः सम्प्रवक्ष्यामि नराणां हितकाम्यया ।
प्रत्यब्दं कारयेद्राजा स्वयं वाजिविवर्धनम् ॥
रोगोपद्रवशमनं सर्वकृत्रिमनाशनम् ।
आश्वयेयुज्ये सिते पक्षे प्रतिपद्यां समारभेत् ॥

End :

ऋत्विग्भ्यः शुद्धवस्त्राणि दक्षिणाश्च विशेषतः ।
ब्राह्मणैर्हेमरूपेण .... ॥
अन्येषां चैव विप्राणां होमं दद्यात्स्वशक्तितः ॥
आयुरारोग्यमैश्वर्यं प्राथमेवं (?) च शाश्वतम् ॥
परचक्रभयं नैव स्वराष्ट्रैर्नैव बाध्यते ॥

Colophon :

इति शौनकीये अश्वशान्तिः समाप्ता ॥

58

Sl. No. 9850 अश्वशान्तिः **Ms No P. 7970/113a**

Beginning :

अथाश्वशान्तिं व्याख्यास्यामः –

देवयजनोल्लेखनप्रभृति अग्निमुखान्तं हुत्वा पक्त्वा जुहोति तदश्विनावश्वयुजोपयातामिति पुरोऽनुवाक्यामनुयाज्यया जुहोति ॥

End :

स्थालीसंस्थान्नं आज्यशेषमुदकशेषं च पात्र्यां समानीय अश्वत्थशाख्या प्रोक्ष्य त्रिः प्रदक्षिणमश्वत्थं × × × यो वा अश्वस्य मेध्यस्याम्नेय यदित्येतेनानुवाकेनेत्याह भगवान् बोधायनः ॥

Colophon:

इति बोधायनोक्ताश्वशांतिः ॥

59

Sl. No. 9652 अश्विनीनक्षत्रजननशांतिः Ms. No P.4863/71

Beginning :

अश्विन्यां दशदिनमहोरात्रं वा पीडा भवतीति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः – अग्न्यनुमत्योर्मध्ये अश्विनौ अश्विनीनक्षत्रदेवतेति भेदः ॥

End:

पञ्चपल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै हिरण्मयीं गां च दक्षिणां दद्यात् । ब्राम्हणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

— — —

60

Sl. No. 9857 अश्विनीनक्षत्रजननशांतिः(गार्ग्यीयः) Mss. No. P. 954/11

Beginning :

अश्विनीनक्षत्रशांतिः । अश्विन्यां दशदिनमहोरात्रं वा पीडा भवति । अथ होमनक्षत्र देवताराधनं पूर्ववत् । तत्र विशेषः । अश्विन्यनुमत्योर्मध्ये अश्विन्यां अश्विनीनक्षत्रदेवतेति भेदः ॥

End:

पञ्चपल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै हिरण्मयीं गां दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon:

इत्यश्विनीनक्षत्रशांतिः॥

61

Sl. No. 9859 अष्टग्रहयोगशांतिः (कात्यायनीया) Ms. No P. 604/24

Beginning :

अतःपरं प्रवक्ष्यामि ग्रहाणामष्टशांतये ।
एकराशिस्थिताः सर्वे प्रत्येकं स्थाननामभिः ॥
जन्मस्थाने मृत्युः स्यात् द्वितीये धननाशनम् ।
तृतीये श्रियमाप्नोति चतुर्थे धननाशनम् ॥

End :

ब्राम्हणान् भोजयेत्पश्चात् यथावित्तानुसारतः ।
भक्तिभावेन यः कुर्यात् सर्वदोषविवर्जितः ॥
ग्रहयोगोत्थदोषैश्च र्युक्तः सर्वसुखान्वितः ।
धनवान् पुत्रवांश्चैव नीरोगी जायते ध्रुवम् ॥

Colophon :

इति कात्यायनोक्ता अष्टग्रहशांतिः समाप्ता ॥

62

Sl. No. 9862 अष्टग्रहयोगशांतिः Ms. No. A. 5930/73

Beginning :

अभिषेकः-

योगग्रहोक्तमन्त्रैश्च अधिप्रत्यधिमंत्रतः ।
नवग्रहोक्तमंत्रैर्वा जातवेदसमन्त्रकैः ॥

End :

शिवसङ्कल्पमन्त्रेण पृथ्वीशांतादिमन्त्रकैः ।
सुरास्त्वामितिमन्त्रैश्च अभिषेकं च कारयेत् ॥

Colophon :

इति यामलोक्ताष्टग्रहयोगशांतिविधिस्समाप्ता ।

63

Sl·No· 9866 अष्टमातृकादानपद्धतिः Ms· No·P.9428/110

Beginning

रचनाप्रकारः—

अष्टमातृकादानम् – अयन × × दिषु ग्रहणातिपातजन्मनक्षत्राष्टमीव्यतीपातचतुर्दशीपञ्च-
दशेषु देवालयादिषु प्रदेशेषु + + + अष्टमातृकादानं करिष्ये ॥

End :

स्वर्णनिर्मितां प्रतिमां स्वर्ण + + + + + +
+ + + चतुर्थांशस्वर्णनिर्मितक्रोधप्रतिमां सदक्षिणां गन्धपुष्पाद्यलंकृतां माहेश्वरीप्रतिमां
मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् ॥

Colophon:

इति अष्टमातृकादानपद्धतिः ॥

64

Sl. No· 9867 अष्टमीप्रथमार्तवशांतिः Mss· No· P·4396/42

Beginning :

अष्टम्यां यदि नारीणां प्रथमार्तवसंभवः ।
पशुबन्ध्वादिनाशश्च पशुपत्न्योर्विरोधकृत् ॥
आचरेच्छांतिमत्रापि भक्तो भक्तिसमन्वितः ॥

End :

पूजां जपं तथा होमं अभिषेकं तथैव च ।
अर्ककाष्ठैस्तथा चाज्यैः होमो मन्त्रद्वयेन च ॥
आचार्याय वृषं दद्यात् सवस्त्रप्रतिमां तथा ॥

Colophon :

इत्यष्टम्यां प्रथमार्तवशांतिः ॥

65

Sl. No. 9868 अष्टम्यार्तवशांतिः Ms. No. P. 2239/7

Beginning:

अष्टम्यां यदि नारीणां प्रथमार्तवसंभवः ।
× न्यामध्यादिचतु × × प्रति × × प्रतिविरोधकृत् ॥
आचार्यः शांतिमन्त्रा × × × × समन्वितः ॥

End :

तव मूर्तिप्रदानेन मृत्युर्नश्यतु मे सदा ।
इति दत्वा विधानेन ब्राह्मणान्नमो जयेत्ततः ॥
एवंशांतिं प्रकुर्वीत जीवेच्च शरदां शतम् ॥

Colophon :

इति रुद्रयामलेऽष्टमीरजस्वलाशांतिः ॥

66

Sl. No. 9873 अष्टम्यार्तवशांतिः Ms. No. P. 9254/170

Beginning :

अष्टम्यां यदि नारीणां प्रथमार्तवसंभवः ।
पशुबन्धवादिनाशश्च पतिपत्न्योर्विरोधकृत् ॥
आचारेच्छान्तिमत्रापि भर्तुर्भक्तिसमन्वितः ।
प्रतिपच्छान्तिमार्गेण सर्वमस्मिन् समाचरेत् ॥

End:

पूजां जपं च होमं च अभिषेकं तथैव च ।
अर्ककाष्ठैस्तथा चाज्यैः होममन्त्रद्वयेन च ॥
आचार्याय वृषं दद्यात्सवस्त्रप्रतिमां च गाम् ॥

Colophon :

इत्यष्टम्यां प्रथमार्तवशांतिः ॥

67

Sl. No. 9875 अष्टाक्षरशान्तिः Ms. No. P. 4396/36

Beginning :

श्रीपांचरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे षोडशोऽध्याये--

ब्रह्मोवाच--

भगवन् भविनां कर्मफलानामशुभात्मनाम् ।
सूचनेषु निमित्तेषु संजातेष्वशुभात्मसु ॥
ग्रहभेदादिषु नृणामधिपस्य च भूपतेः ।
तेषामकस्माज्जातानां कर्म यच्छमनं परम् ॥

End :

कर्मण्यधिकृतानां च कर्मगौरवलाघवम् ।
अपेक्ष्यपोषणं वृत्तेः ऋत्विजां चोपकुर्वताम् ॥
दिनादिष्वनुकूलेषु प्रारभ्या पौष्टिकक्रिया ।
शांतिक प्रतिकूलेषु यजमानस्य पद्मज ॥

Coloohon :

इत्यष्टाक्षरशांतिकल्पः ॥

68

Sl. No. 9877 अर्कविवाहविधिः Ms. No. P. 5293/60

Beginning

ग्रामात्प्रतीचीमुदीचीं वा ब्राह्मणैः ब्रह्मवादिभिः।
वनेषु चापि द्रुमाकीर्णैः सुपुष्पफलसंयुते ॥
अर्कवृक्षं समासाद्य तत्र शोभां प्रकल्पयेत् ।
मण्टपं समलंकृत्य स्थण्डिलं तत्र कारयेत् ॥

End :

ब्राह्मणेभ्यो दक्षिणां दद्यात् । ततः पुनः प्रार्थयेत्--

69

Sl· No· 9878 अर्कविवाहविधि Ms·No· P· 740

Beginning:

तृतीये यस्य सम्प्राप्त विवाहे पुरुषस्य च ।
अर्क विवाहं वक्ष्यामि शौनकोऽहं विधानतः ।।

End :

हिरण तमस्मभ्यं कामं दत्वा वेदान्तं घृतं पीत्वाह स्विष्टकृदादिहोमशेषं समापयेत् । वस्त्रालङ्कायादि ब्राह्मणेभ्यो दद्यात् ।।

Colophon :

इति शैानकीये अर्कविवाहविधिः ॥

70

Sl· No· 9880 आज्यावेक्षणविधिः Ms No· P· 4180/5

Beginning :

अथ दानं प्रवक्ष्यामि नृणां मृत्युविनाशनम् ।
अलक्ष्मीरोगनिर्मुक्तः सर्वोपद्रवनाशनम् ॥
देहरोगहरं सर्वं सर्वसौभाग्यदायकम् ।
होमाज्यदमिति ख्यातं मृत्युरोगोपहारकम् ।।

End :

मम सर्वकामप्रदोऽस्त्वन्तुभ्यमहं संप्रददेति ब्राह्मणाय सहिरण्योदकं दत्वा विसृजेत्; महाशान्तिं पठेत् । तं विप्रं मासं न दर्शयेत् । सर्वरोगविनिर्मुक्तः सुखमश्नुत इति ॥

Colophon :

इति यामिले आज्यावेक्षणहोमदानविधिः ।।

71

Sl. No. 9883 आज्यावेक्षणदानविधिः Ms. No. P. 7970/69

Beginning :

स्वर्णयुक्तं कांस्यपात्रं गोतेन चघृ पूरितम् ।
तस्यावलोकनं कृत्वा ब्राह्मणाय निवेदयेत् ।।

देव देव सुरश्रेष्ठ त्वमेव भगवान् हरिः ।
अन आज्यसुधां वेत्त (?) कुरुश्रेष्ठं कुरुष्व माम्।।

End :

तस्मादस्य प्रदानेन सर्वं हरतु दुष्कृतम् ।
हिरण्यगर्भगर्भस्थ हेमबीजं विभावसोः ।।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।
एतद्दानप्रतिष्ठासिध्यर्थं तुभ्यमहं संप्रददे न मम ।।

Colophon :

इत्याज्यावेक्षणविधिः समाप्तः ।।

72

Sl No. 9884 आदित्यशान्तिः Ms. No. P. 5635/83

Beginning :

आदित्यादिनवग्रहाः एककाले प्रवर्तकाः ।
ग्रहशान्तिं प्रवक्ष्यामि ग्रहपीडा × × × ।
तत्रादित्यं सुवर्णेन निष्कमात्रं तदर्धकम् ।:

End :

अशक्तश्चेन्नमस्कारैः अर्घ्यैस्तं पूजयेद्रविम् ।
तथापि कृपया भानुः दोषांस्तस्य विनाशयेत् ।।

Colophon :

इति सारावल्यामादित्यशान्तिः ।।

73

Sl. No. 9885 आन्त्रवृद्धिरोगशान्तिः Ms. No. P. 2077/1

Beginning :

आन्त्रवृद्धिहरम्– आन्त्रवृद्धिमूर्तिदानम् । तल्लक्षणं कर्मविपाकसङ्ग्रहे–

आन्त्रवृद्धि क्रशोन्यत्यान्मेदिनीमवलोकयन् (?) ।

प्रलम्बधारी सततं कपालेन पिवन्मधु ॥

प्रलम्वशब्देन अन्त्राण्युच्यन्ते । अथवा सिरादि । अत्र इतिकर्तव्यता कलारोग-प्रतिमादानविधौ ॥

End :

रोगी तथार्चयेद्देवं नारायणमनामयम् ।

मूलमन्त्रेण विधिवत् नैवेद्यं चतुरिष्यते ॥ + + +

अस्य मन्त्रस्य साध्यनारायणऋषिः ; देवी गायत्री छन्दः ; नारायणः परमात्मा देवता । + + व्याहृतीनामृष्यादिकूश्माण्डहोमे × × × × × ॥

Colopohon

-- -- --

74

Sl. No. 9886 आम्रपल्लवशान्तिः Ms. No. P. 4720/26

Beginning :

अथाम्रफलहोमः शौनकेन विनिर्मितम् ।

साध्यासाध्यादिरोगैश्च बध्यतेऽहर्निशं सदा ॥

न चिकित्सां च तत्रैव शान्त्यर्थं कारयेन्नृणाम् ।

स्नात्वा शुक्लाम्बरधरः स्वस्तिवाचनपूर्वकम् ॥

End :

सुवर्णं वाथ दातव्यं तस्य शान्तिमवाप्नुयात् ।

श्रीकामः शान्तिकामश्च आयुष्कामोऽथवा जपेत् ।

सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति शौनकीये आम्रपल्लवशान्तिः समाप्तः ॥

75

Sl. No. 9888 आम्रपल्लवशान्तिः (आथर्वणिकः) Ms. No. P. 9764/57

Beginning :

अथाथर्वणहोमः—

अष्टमवर्गप्रथमस्याङ्गिरा ऋषिः । अनुष्टुप् छन्दः कालमृत्युर्देवता । ज्वरनिवारणार्थे विनियोगः । ध्यानम्—

त्रिपाद्भस्मप्रहरणस्त्रिशिरा रक्तलोचनः ।
स मे प्रीतस्सुखं दद्यात्सर्वामयपतिर्ज्वरः ॥

End :

तरुणाम्रपल्लवतिलतण्डुलसंयुक्तपयसाज्येन अष्टोत्तरशतं जुहुयात् । महाज्वरसन्निपातादिज्वराः शमं यान्ति । अष्टोत्तरसहस्रतर्पणं कुर्यात् । सद्यः सुखी भवति ॥

Colophon :

इत्याथर्वणकाम्रपल्लवहोमः ॥

76

Sl. No. 9890 आयुष्यहोमविधिः Ms. No. P. 4720/22

Beginning

अथायुष्यहोमः—

आयुष्यहोमं वक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।
कुर्यात्तज्जन्मनक्षत्रे विषुवेऽयनसङ्क्रमे ॥
पौर्णमास्याममावास्यां ग्रहणे चन्द्रसूर्ययोः ।
स्नातः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥

End :

सर्वान् कामानवाप्नोति सञ्जीवेच्छरदां शतम् ।
ऐश्वर्यं राजसन्मानं पुत्रपौत्रप्रवर्धनम् ।
अपमृत्युविनाशाय दीर्घमायुरवाप्नुयात् ॥

Colophon:

इति शौनकीये आयुष्यहोमविधिः समाप्तः ॥

77

Sl. No. 9894 आयुष्यहोमविधिः (कुण्डमण्डपविधिः) Ms. No. p. 9428/42

Beginning :

अथ ग्रहद्विजस्तत्वात् विधितो वेदपारगः।
तोषये ×न्मृदुहस्तैर्वा तद्विदु × × विसर्जयेत् ॥
जन्म × × × ×ष्टं मन्त्रहीनास्तु ऋत्विजः ॥

End:

गेहोष्ठसदृशी × द्वा शयता × ×संयुता ।
नेदपलोपरि (?)सर्वत्र ह्यदू × × ×विस्तृताः ॥
कर्म × × × मतः कार्याद्धोमसतोऽश्य × ॥

सर्वान् कामानवाप्नोति इत्याह भगवान् बोधायनः ।

Colohhon :

इति कुण्डमण्टपविधिः

78

SlNo. 9895 अरामाद्भुतशान्तिः (वनोत्पातशांतिः) Ms. No P. 3804/80

Beginning :

अथारामवनोत्पातशांतिविधिं वक्ष्यामः –

ब्राह्मणाश्विवत्सा यदि निर्निमित्तं शुष्यन्ति तत्तत्स्वासो भवान् (?) यदि वा विपरीतदशा, फलानि जायन्ते क्षीरजकानि यदि स्रवन्ति ॥

End :

तत्रपुर्वोक्तशांतिं कुर्यात् । तत्तत्फलानि हिरण्येन कृत्वा ब्राह्मणाय दद्यात् । घोपशांतिं यो जयत्यनुवाकं जपेदिति ॥

Colophon :

इति वसिष्ठबोधायनोक्तवनोत्पातशांतिः ॥

79

Sl. No. 9896 आरोग्यकरेन्द्रपूजनशान्तिः Ms No P. 7401/93

Beginning :

× × × × × ।
× × × × × ॥
× × × × × ।
पद्मं च तण्डुलेनैव वर्तुलमा × × × ॥
× × × × × इन्द्रद्वयेनैव पूजयेदभयङ्करम् ।
वरदाभय × × × × ॥
× × × × × ।
× × वर्णेन तदर्धार्धेन वा पुनः ॥
पूजयेदत्र इन्द्रसा × × × × ।
××× इन्द्राणिमामानं – – – – मन्त्रेण पूरयेत् ॥

End :

वज्री शचीपतिर्देवो बलारोग्यं प्रयच्छ मे ।
धनं देहि सुखं देहि आरोग्यं देहि मे प्रभो ॥
सुतसन्तानसौभाग्यं चिरायुत्वं प्रयच्छ मे ॥
बलं देहीति मन्त्रेण नमस्कारमथामाचरेत् ॥

Colophon :

— — —

80

Sl. No: 9897 आरोग्यबलिविधिः Ms. No. P. 3023/126

Beginning :

योऽसौ सरस्वतीतीरे मृतो गोविन्दसंज्ञकः ।
कश्यपायानपत्याय ददाम्येतत्तिलोदकम् ॥
अथारोग्यबलिं कुर्यात् बलारोग्यप्रदायकम् ॥

End:

बद्रे (?) शचीपतिर्देव बलारोग्यं प्रयच्छ मे ।
धनं देहि सुखं देहि आरोग्यं देहि मे प्रभो ॥
सुतसन्तानसौभा × × × × × × × ॥

Colophon

— — —

81

Sl. No. 9898 आरोग्यस्नानविधिः **Ms No. P. 3023/139**

Beginning:

अथारोग्यस्नानविधिं व्याख्यास्यामः –

यस्मिन्नक्षत्रे तिथौ रोगो जायते तन्नक्षत्र × × × × × × × तारावल × × × × दिवसे तत्तिथिनक्षत्रवारदेवतां – – – – अथ ऋत्विजश्चतुरो वृणे ॥

End :

ततो ब्राह्मणात् भोजयित्वा यथाशक्ति दक्षिणां दद्यात्। प्रणिपत्य विसर्जयेत् । एवं कृते रोगो भवति । अथ पुनरगदो भवतीत्याह भगवान् बोधायनः ॥

Colophon :

इत्यारोग्यस्नानम् ॥

82

Sl. No. 9900 आर्तवभुवनेश्वरीशान्तिः **Ms. No. P. 3023/32**

Beginning :

आर्तवानां तु नारीणां शान्ति वक्ष्याम्यतः परम् ।
तिथिवारर्क्षयोगेभ्यः लग्नात्संग्रहसंस्थिते ॥
ग्रहेभ्यो दुस्स्थितेभ्यश्च तत्तद्दोपक्षयाय च ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् सर्वेभ्यो दक्षिणां ततः ।
ब्राह्मणान् भोजयेत्पश्चात् भुञ्जीत स्वजनैः सह ॥
अरिष्टदोष × × × × दम्पत्योः सुखमाप्नुयात् ॥

Colophon :

इति रुद्रयामले आर्तवभुवनेश्वरीशान्तिः ॥

83.

Sl. No. 9901 आर्तवभुवनेश्वरीशान्तिः Ms. No. P. 4720/7

Beginning:

अथार्तवभुवनेश्वरीशान्तिः । आर्तवशान्तिविधिमाह शौनकः—

आर्तवानां तु नारीणां शान्तिं वक्ष्यामि शौनकः ।
तिथिवारर्क्षयोगेभ्यो लग्नसङ्ग्रहसमात् ॥
ग्रहेभ्य उत्थितेभ्यश्च तत्र दोषक्षयाय च ।
अर्थपुत्रादिलाभाय दम्पत्योरभिवृद्धये ॥

End :

इमा आपः शिवतमा इत्येतेन ऋचा देवस्यत्वेति च यजुषा ऋमु × × रित्येताभिश्च व्याहृतिभिश्च कलशोदकेन कुशाग्रैः पल्लवैरभिषिञ्चेयुः ॥

Colophon :

इति शौनकीये आर्तवभुवनेश्वरीशान्तिः समाप्ता ॥

84

Sl.No. 9905 आर्द्रानक्षत्रजननशान्तिः Ms. No. P. 3804/58

Beginning :

अथार्द्रानक्षत्रजननशान्तिविधिरुच्यते । गार्ग्यः—

प्रवक्ष्यामि क्रमेणैव शान्तिकर्म विधानतः ।
आर्द्रानक्षत्रजातस्य सुतः सर्वस्वहारकः ॥

End :

एवं शान्ति गोमुखस्य जननं च विशेषः ।
ताम्बूलं दक्षिणां दत्त्वा अशीर्वचनमाचरेत् ॥

Colophon :

इति ज्योतिषार्णवे वृद्धगार्ग्यप्रोक्ते आर्द्रानक्षत्रजननशान्तिः समाप्ता ।।

४5

Sl. No. 9907 आर्द्रानक्षत्रजननशान्तिः Ms. No. P. 5930/87

Beginning :

आर्द्रायां मृत्युः सन्देहो वा त्रिषट्सप्तदिनानि पीडा भवति । अथ होमनक्षत्रदेवताराधनम् ॥

End :

नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति आर्द्रानक्षत्रशान्तिविधिः ॥

86

Sl. No. 9910 आर्द्रानक्षत्रजननशान्तिः Ms. No. P. 9254/90

Beginning :

अथ आर्द्रानक्षत्रशान्तिः– आर्द्रायां मृत्युसन्देहो वा त्रिषट्सप्तदिननि वा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये रुद्र आर्द्रादेवतेति भेदः ॥

End:

नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति आर्द्रानक्षत्रशान्तिविधिः ॥

87

Sl·No. 9911 आर्द्रार्तवशान्तिः Ms. No P. 2239/16

Beginning :

दरिद्रा दुःखशीला वा आर्द्रायां भर्तृहा भवेत् ।
कुम्भस्थापनमित्यादि सर्वं पूर्ववदाचरेत् ॥
कुम्भोपरि न्यसेद्वस्त्रं रुद्रमूर्तिं समर्चयेत् ॥

End :

अनेनैव तु मन्त्रेण दद्याच्च प्रतिमात्रयम् ।
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यतः ॥
महामृत्युहरं सौख्यं दम्पत्योरभिवृद्धये ॥

Colophon :

इति रुद्रयामले अर्द्रार्तवशान्तिः ॥

88

Sl· No· 9915 आर्द्रार्तवशान्तिः Ms· No· P· 5672/22

Beginning :

दारिद्र्यदुःखशीला वा आर्द्रायां भर्तृहा भवेत् ।
कुम्भस्थापनमित्यादिसर्वं पूर्ववदाचरेत् ॥
कुम्भोपरि न्यसेद्वस्त्रं रुद्रमूर्तिं समर्चयेत् ॥

End :

ब्राह्मणाम् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यतः ।
महामृत्युहरं सौख्यं दम्पत्योरभिवृद्धिदम् ॥

Colophon : -- -- --

89

Sl. No. 9917 आश्लेषानक्षत्रजननशान्तिः Mf. No. P. 60/6

Beginning :

आश्लेषाऋक्षजातानां मातापित्रोर्धनस्य च ।
सर्वदोषप्रशान्त्यर्थं शान्तिं कुर्वीत यत्नतः ॥
जातस्य द्वादशाहे च शान्तिहोमं समाचरेत् ।
असम्भवे च जन्मर्क्षे अन्यस्मिन् वा शुभे दिने ॥

End :

गोमुखप्रसवं कुर्यात् गोदानं वा विशेषतः ।
षस्याहे (?) × पञ्चमे शुद्धिरार्तस्याप्येव समाचरेत ॥

इत्याह भगवान् बोधायनः ॥

Colophon :

इत्याश्लेषाशान्तिः ॥

90

Sl. No. 9918 आश्लेषानक्षत्रजननशान्तिः Ms No. P. 1723/13

Beginning :

अथ आश्लेषाशान्तिविधिरुच्यते–

आश्लेषायां तु जातानां शान्तिं वक्ष्याम्यशेषतः ।
जातस्य द्वादशाहे न शान्तिहोमं समाचरेत् ॥
आसंभवेत्तज्जन्मर्क्षे अन्यस्मिन् वा शुभे दिने ॥

End :

सर्पाधीश नमस्तुभ्यं नागानां च गणाधिप ।
गृहणार्घ्यं मया दत्तं सर्वारिष्टप्रशान्तये ॥

इत्यर्घ्यमन्त्रः ।

मूलानक्षत्रवत् कुर्यात् सर्पगण्डे स्वनामतः ॥

Colophon :

इति मानवीयसंहितायां अश्लेषानक्षत्रशान्तिः सम्पूर्णा ॥

91

Sl. No. 9929 आश्लेपानक्षत्रजननशान्तिः (शौनकीया) Ms. No. P. 5313/19

B eginning

अथाश्लेषानक्षत्रशान्तिरुच्यते——

पुष्याश्विनीमघात्वष्टृसर्पमूलेषु ज्येष्ठभे ।
एषु पादेषु जातस्तु कुलक्षयकरो भवेत् ॥
उत्तराप्रथमे पादे पुष्ये चैव तु मध्यमे ।
पादे तृतीये चित्रायां पूर्वाषाढाचतुर्थके ॥

End :

सहस्रं भोजयेद्विप्रान् शतं वाथ स्वशक्तितः ।
एवं कृते विधानेन सर्वदोषो व्यपोहति ॥
सवकामप्रद तेषां वेदोक्तायुर्भावेष्यति ॥

Colophon :

इति शौनकीये आश्लेषानक्षत्रजननशांतिः समाप्ता ॥

92

Sl. No. 9931 आश्लेषानक्षत्रजननशान्तिः (बृहस्पतिप्रोक्ता) Ms. No. P. 5635/27

Beginning :

अथ आश्लेषाशांतिप्रयोगः

मूलोक्तग्रन्थमार्गेण पूजाहोमं प्रचक्षते ।
द्वादशाहे वा जन्मर्क्षे शांतिं कुर्यात् विचक्षणः ॥

गृहमलंकृत्य दम्पती अभ्यङ्गस्नानं कृत्वा ॥

End :

जपाकुम्भस्थं सर्वं जापकाय दद्यात्; ब्राह्मणानामाशीर्वचनंगृहीयात् ।
एवं यः कुरुते शांतिं तस्य दोषो विनश्यति ॥

Colophon :

इति बृहस्पतिप्रोक्ताश्लेषाशान्तिः ॥

93

Sl. No. 9946 आश्लेषार्तवशान्तिः (रुद्रयामलांतर्गता) Mss. No. P.2239/18

Beginning :

सार्पभे मृतपुत्रा वा भर्तुः दुःखावहा भवेत् ।
कर्षमात्रसुवर्णेन सर्पमूर्तिं च दापयेत् ॥
तदर्धपरिमाणेन अधिप्रत्यधिदेवतौ ।
तस्य शांतिं प्रकुर्वीत यदुक्तं रुद्रयामले ॥

End :

देवमन्त्री महातेजाः सर्वशास्त्रविशारदः ।
तस्मात्त्वद्रूपदानेन ममाभीष्टपरा – – – – मे ॥
\+ \+ \+ \+ \+
त्वद्रूपदानतो भक्त्या मम सन्तु मनोरथाः ।
इति दत्वा दक्षिणार्थं नवरत्नानि गां ददेत् (?)॥
एवं शन्तिं प्रकुर्वीत दम्पत्योस्सुखसिद्धये ॥

Colopon

इति रुद्रयामळे आश्लेषार्तवशांतिः ॥

94

Sl. No. 9950 आश्लेषार्तवशांतिः Ms. No. P. 7935/34

Beginning :

सर्वसम्मतपुत्रा वा र्भतुः दुखावहा भवेत् ।
तस्य शांतिं प्रकुर्वीत यदुक्तं रुद्रयामळे ॥

End:

इति दत्वा दक्षिणार्थं नवरत्तानि गां दद्यात् ।
इदं शान्तिं प्रकुर्वीत दम्पत्योस्सुखवृद्धये ॥

Colophon :

इति आश्लेषानक्षत्रशांतिः ॥

95

Sl. No. 9951 इन्द्रप्रतिमादानम् भार्गवसंहितीयां **Ms. No. P. 9254/134**

Beginning :

इन्द्रगन्धर्वसिद्धैश्च पूजितोऽसि शचीपते ॥

End :

दानेनानेन देवेश गण्डदोषं विनाशय ॥

Colophon :

इतीन्द्रप्रतिमादानम् ॥

96

No. 9953 इन्द्रलुप्तशान्तिः(भार्गवसंहितीया) **Ms. No. P. 9254/16**

Beginning:

इन्द्रलुप्तशान्तिः –

श्रीरग्निबन्धुहानिं च वित्तहानिर्महायशः ।
वन्धुहानिर्मृत्युहानिः भूषिता महती गवा ॥
पूर्वादीनि फलान्येतानि इन्द्रलुप्ते च मस्तके ।
पञ्चत्वक्पल्लवर्णपञ्चामृतफलोदकैः ॥
अब्लिङ्गैर्मन्त्रितैर्मन्त्रैः स्नातो दोषादि नश्यति ॥

End :

लक्ष्मीर्वह्निर्बन्धुनाशोऽर्थहानिः पुत्रप्राप्तिः बान्धवाप्तिः सुतस्य ।
नाशो भूमेश्चैव चिन्ता मृतस्य पूर्वादीनामिन्द्रलुप्तः फलं स्यात् ॥
श्वेतकुम्भेन सम्पूर्य च गन्धेन वारिणा ।
तीर्थाम्बुना च संस्नाप्य तिलहोमेन शाम्यति ॥
ब्राह्मणान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥

Colophon :

इति भार्गवसंहितायां इन्द्रलुप्तशान्तिः समाप्ता ॥

97

Sl·No 9956 उग्ररथशान्तिः (षष्टिपूर्तिशान्तिः) Ms. No. P. 905/8
(मार्कण्डेयपुराणान्तर्गतः)

Beginning :

उग्ररथ्यं प्रवक्ष्यामि लोकानां हितकाम्यया ।
मण्डले नगरे वाऽपि महान् कलहसम्भवः ॥
प्रधानराजमन्त्रीणां पुत्रदारधनक्षयः ।
गजाश्वपशुनाशस्स्यात् कोशनाशादिसम्भवः ॥

End :

शत्रवोऽपि विनश्यन्ति सर्वदा सुखमेधते ।
सर्वारिष्टविनाशश्च दीर्घमायुर्लभेध्द्रुवम् ॥
पुत्रपौत्राभिवृद्धिश्च ग्रहपीडानिवारणम् ॥
धनधान्यसमृद्धिश्च सम्पदायुर्विवर्धनम् ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे षष्ठिपूर्तिशान्तिः समाप्ता ॥

98

Sl. No. 9958 उग्ररथशान्तिः (शैवागमान्तर्गत) Ms. No. P 1723/3

Beginning :

शौनकोऽहं प्रवक्ष्यामि उग्ररथ्यं यथाविधि ।
वर्षे षष्टिंगाते प्राप्ते सर्वेषाञ्च भवेद्भयम् ॥
साम्राज्याधिपतेः सा चेत् विशेषस्तत उच्यते ।
मण्डलं नागरे वापि ज्वरादिस्स्यान्महद्भयम् ॥

End :

ततः गवादिदशदानञ्च भूदान-हस्त्यश्व-धान्य रथ-रत्न-गृहकन्यादान-ब्रह्मप्रतिष्ठापन-कस्वर्थ हिरण्यदान-भूरिदामानि च कुर्यात । अयुतं सहस्रं शतं वा ब्राह्मणान् भोजयेत् ॥

Colophon :

इति शैवागमे उग्ररथशान्तिः समाप्ता ॥

99

Sl. No. 9966 उग्ररथशांतिः (ब्रह्मप्रोक्ता) Ms. No. P. 4720/48

Beginning :

षष्टिवर्षे तु सम्प्राप्ते नराणां मृत्यु × × गते ।
धनहानिर्यशोहानिरायुर्हानिः पशुक्षयः ॥
मानहानिक्षयादीनि अतिदुःखं महत्तरम् ।
अयुर्वृद्धिकरं पुण्यं शान्ति कुर्याद्विधानतः ॥

End :

गोदानं कृत्वा पिण्डकार्पासऊर्णादानानि दत्वा, दिक्पालमन्त्रेण दिग्बलिं कृत्वा, अग्निप्रार्थनं कृत्वा होमशेषं समापयेत् । ब्राह्मणान् भोजयित्वा, एवमेव कृते एति शतं आयुः सम्पूर्णविधिनान्यवृद्धिर्भवेत् ॥

Colophon :

इति ब्रह्मोक्तोग्ररथशान्तिः समाप्ता ॥

100

Sl. No. 9967 उग्ररथशांतिः (सकलर्षिप्रोक्ता) Ms. No. P. 5313/7

Beginning :

अथ उग्ररथशान्तिः –

अथातः सम्प्रवक्षामि शांतिमुग्ररथाह्वयाम् ।
षष्ठ्यब्दपूर्तौ कुर्वीत तन्नक्षत्रे विशेषतः ॥
षष्टिश्च सप्ततिश्चैव अशीतिर्नवतिस्तथा ।
नराणां मृत्युदः सद्यः तस्माच्छांतिं समाचरेत् ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् घृतभक्ष्यादिकैर्बहु ।
स्वयं भुञ्जीत हर्षेण बन्धुभिः सह संयुतः ॥

अतोऽस्मि पुनरित्युक्त्वा बन्धूनां पुरतस्ततः ।
एवं कृत्वा तु मनुजः स रिष्टं निरस्य च ॥
पुत्रमित्रादिभिर्युक्तो जीवेच्च शरदां शतम् ॥

Colophon :

इति शौनकादिसकलर्षिप्रोक्तषष्ट्यब्दपूर्तिकोग्ररथशान्तिः समाप्ता ॥

101

Sl. No. 9968 उग्ररथशांतिः (ज्यौतिषार्णवोक्ता) **Ms. No P. 5313/8**

Beginning :

अथोच्यते समासेन शान्तिरुग्ररथाह्वया ।
नृणां षष्टितमो वर्षः सद्यो मृत्युप्रदस्तथा ॥
कालमृत्युसमः प्रोक्तो ऋषिभिः शौनकादिभिः ।
पुत्रमित्रकलत्रादिबन्धूनां च तथैव च ॥

End :

ततो देवालयं गत्वा साष्टाङ्गं प्रणिपत्य च ।
आशिषो विप्रवर्याणां गृहीत्वा नतिपूर्वकम् ॥
एवं शांतिविधिं कृत्वा सर्वारिष्टं व्यपोह्य च ।
शतमायुः स आप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति ज्यौतिषार्णवोक्तोग्ररथशान्तिः समाप्ता ॥

102

Sl. No. 9970 उग्ररथशान्तिः (शौनकोक्ता) **Ms. No. P. 5587/2**

Beginning :

अथोग्ररथशान्तिं वक्ष्ये शौनकोऽहं द्विजन्मनाम् ।
प्रवक्ष्यामि समासेन सर्वारिष्टनिवृत्तये ॥
जन्मतः षष्टिके वर्षे मृत्युरुग्ररथो नृणाम् ॥

End :

सर्वान् कामानवाप्नोति पुत्रपौत्रैः समन्वितः ।
हरिमेव स्मरेन्नित्यं सर्वपूर्वपारत्र च ।।
इह भुक्त्वाखिलान् भोगान् अन्ते विष्णुपदं व्रजेत् ।।

Colophon :

इति शौनकोक्ता उग्ररथशान्तिः समाप्ता ।।

103

Sl. No. 9972 उग्ररथशान्तिः (बोधायनोक्ता) Ms. No. P.5587/38

Beginning :

अथातः उग्ररथशान्तिविधिं व्याख्यास्यामो ब्राह्मणराजन्यवैश्यानां जन्मदिनादारभ्य षष्टिसंवत्सरे जन्ममासे + + + कृत्वा ॥

End:

प्रतिमां कृतमाचार्याय दद्यात् । ऋत्विग्भ्यो यथाशक्ति दक्षिणां दत्त्वा ब्राह्मणान् भोजयेत् ; इत्याह भगवान् बोधायनः ॥

Colophon :

इति बोधायनोक्ता उग्ररथशान्तिः समाप्ता ॥

104

Sl. No. 9989 उग्ररथशांतिः (मनुप्रोक्ता) Mss. No. P. 7970/123

Beginning :

अथातोग्ररथं शान्तिं भगवान् मनुरब्रवीन् ।
षष्ठ्यामुग्ररथो ज्ञेयः सप्तत्यां भीमरथ्यपि ॥
अष्टषष्ठ्यां जयरथः अष्टाशीत्यां महारथः ।
एताश्च मृत्युदाः प्रोक्ताः वसिष्ठादिमुनीश्वरैः ॥

End:

पुत्रानारोग्यमैश्वर्य लभते नात्र संशयः ।
ब्राह्मणान् भोजयेत् पश्चात् चत्वारिंशत्सहस्रकान् ॥
एकैकेन सहस्रेण आयुस्तस्याभिवर्धते ।
शतं जीवति वर्षाणि वित्तशाठ्यं न कारयेत् ॥

Colophon :

इति मनुप्रोक्तोग्ररथशांतिः ॥

105

Sl. No. 9997 उग्ररथशान्तिः (बृहच्छौनकीया) Mf. No. P-9428/143

Beginning :

यजमानस्स्थलङ्कृत्य आज्यावेक्षणमाचरेत् ।
अयःपिण्डादिकं कृत्वा कम्बलं लवणं तथा ॥
कुम्भदानं ततः कुर्यात् जलदानं तथैव च ॥

End :

दिन × × × × × भूरिदानं समाचरेत् ।
सर्व × × प्रनिवृत्तिः स्यात् राजराष्ट्रविवर्धनम् ॥
दीर्घायुः पु × पौत्राश्च सर्वदा सु × मेधते ।
हरिमेव स्मरेन्नित्यं कर्म पूर्वापरेति च ॥

Colophon :

इति बृहच्छौनकोक्ता उग्ररथशांतिः समाप्ता ॥

106

Sl. No. 10001 उग्ररथशान्तिः Ms. No. B. 117/6

Beginning :

अथ उग्ररथशांतिविधिं व्याख्यास्यामः । ब्राह्मणक्षत्रियवैश्यानां जन्मदिनादारभ्य षष्टिसंवत्सरे जन्ममासे जन्मनक्षत्रे + + षष्टिवर्षशांतिः ॥

End :

कलशोदकेनाभिषिच्य यथाशक्ति दक्षिणां दद्यात् । ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

Colophon :

इत्युग्ररथशान्तिः ॥

107

Sl. No. 10002 उग्ररथशान्तिः (शैवागमीया) Ms. No. C. 496/2

Beginning:

शैवागमोक्त-उग्ररथशान्तिप्रयोगो लिख्यते । जन्मादिषष्टिवर्षे प्रविष्टे जन्मनक्षत्रे अनुकूलनक्षत्रे वा शुभदिवसे कर्ता पत्न्या सह + + प्राणानायम्य + + + करिष्ये ॥

End :

प्रत्यधिदेवताप्रतिमादानमन्त्रः—

मृत्युञ्जय नमस्तेऽस्तु वृषवाहन शङ्कर ।
तव मूर्तिप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

Colophon :

इत्युग्ररथशान्तिपद्धतिः ॥

108

Sl. No. 10006 उग्ररथशान्तिः (पद्मपुराणान्तर्गता) Ms. No. C. 2778/5

Beginning :

पाद्मोक्तोग्ररथशान्तिः लिख्यते । श्रीराम उवाच—

ब्रह्मपुत्र गुरो स्वामिन् आचार्यकुलपूजित ।
केन कर्मविपाकेन आयुः क्षीणं नृणां भवेत् ॥

End :

धनस्य चायुषः पोषो भविष्यति न संशयः ।
शरीरमाद्यं धर्मस्य मूलकारणमुच्यते ॥
तस्मात्कार्यं प्रयत्नेन सहसैव विपश्चिता ॥ १२० ॥

Colophon :

इति पद्मपुराणे वसिष्ठराघवसंवादे शान्तिखण्डे षष्टिपूर्तिको × × × उग्ररथशान्तिर्नाम पञ्चचत्वारिंशः ॥

109

Sl. No. 10009 उग्ररथशांतिः Ms. No. C. 3438

Beginning:

स्योना पृथि × त्तदयेन तोकाय × नन आकलशेषु × × घातन्तुं नन्दन् रजय ओषधास्सो धान्यमसीतिं धान्यं उष्व्हता सति मृत्तिका + + +

ಜ ಗ್ರಂಥಶಾಂತಿಮಂತ್ರಗಳು—

१) ಉಗ್ರರಥಪ್ರಧಾನದೇವತೆ मृत्युः परं मृत्युरे — — — न् ।

२) तस्य दक्षिणे— ಅಧಿ ದೇವತೆ उग्रः। स्तुहिश्रुनम् - सेनाः ।

३) प्र उत्तरे— प्रत्यधिदेवताः मृत्युञ्जयः । त्रियम्बकं — — — तान् ।।

End :

२१ तमे पत्रे—

रथस्य रथाय रथानाथाय नमस्ते विश्वकर्मणे ।

विश्वभूताय नाथाय अरङ्गाय नमो नमः ।।

\+ + + +

१२ तमे पत्रे—

१ हरिसूक्तम्— अयं ते अस्तु दयितः वर्गः २

१ प्रतेमहे विरघे शंसिषं हरी वर्गः २

अन्ते द्वितीयवर्गीये ७ तमे पत्रे—

२३) विष्णव इदं २४) यज्ञवेदं २५) प्रतिष्ठाया इदम् । आहत्य —१५१

अन्तिमे एकपत्रात्मकवर्गे —

कर्णदेवते ११ नवदुर्गा १

० ० ० ० ० ० ० ० ० ०

० ० ० ० ० ० ० ० ० ० ० ०

निरऋतिः

०

वरुणः

०

Colophon:

— — —

110

Sl. No. 10010 उग्ररथशांतिरचनाप्रयोगविधिः Ms.No.P. 7970/168a

(शैवागमीया)

Beginning :

शैवागमानुसारेण प्रयोगोऽत्र विधीयते ।
सर्वलोकहितार्थाय सुलभः कथ्यते क्रमः ॥

रचनाक्रमः--

जन्मादिषष्टिवर्षप्रवेशे जन्मनक्षत्रे अनुकूलनक्षत्रे शुभदिवसे कर्ता पत्न्या सह मङ्गलस्नानं कृत्वा ॥

End :

सर्वतः सागराः शैलाः तीर्थानि जलदाश्च ये ।
एतास्त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥
य एतामाचरेदुग्ररथशान्तिं षडानन ।
शत्रवोऽस्य विनश्यन्ति सर्वदा सुखमेधते ॥

Colophon :

इति शैवागमे उग्ररथशांतिरचनाप्रयोगविधिः समाप्ता ॥

111

Sl. No. 10011 उग्ररथशान्त्यन्वाधानविधिः Ms. No. P. 5949/2

Beginning :

× × × × × पूर्वोक्त + + शुभतिथौ + + षष्टिसंवत्सरे उग्ररथकाल आगते सति यो दोषः उग्ररथकालापमृत्युपरिहारार्थं नान्दी देवता ॥

End :

पृथक् पृथक् यथासंभवसंख्यया लाजादिद्रव्यैः वरुणं पायसान्नादिद्रव्येण शेषेण स्विष्ट-कृतमित्यादि सद्यो यक्ष्येत्यन्वाधाय × × × ॥

Colophon :

-- -- --

112

Sl. No. 10012 उत्तरफल्गुनीजननशांतिः (रुद्रयामलीया) Ms. No. P. 2239/35

Beginning

अथातः संप्रवक्ष्यामि शान्तिकर्म विधानतः ।
शृणुष्वेन्द्र मुनिश्रेष्ठ शौनकाय महात्मने ।
उत्तराप्रथमे पादे पुष्ये चैव तु मध्यमे ॥

End :

इति दत्त्वा दक्षिणार्थं रक्तधेनुं च दापयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥
एवं यः कुरुते शान्ति चिरंजीवी सुखी भवेत् ॥

Colophon:

इति रुद्रयामले उत्तरानक्षत्रजननशान्तिः ॥

113

Sl. No. 10015 उत्तरफल्गुनीशांतिः Mss. No. P. 4180/45

Beginning :

अथातः संप्रवक्ष्यामि उत्तरर्क्षस्य सम्भवः ।
जननी शोकमाप्नोति पुत्रनाशो न संशयः ॥
तत्र दोषविनाशाय शान्तिमेव समाचरेत् ।
उत्तराधिपतिं देवं अर्चयेत्स्वर्णरूपकम् ॥

End :

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।
अभिषेकं च पूर्वोक्तैः आचार्यं पूजयेत्क्रमात् ॥
गावं सदक्षिणां वस्त्रमाचार्याय निवेदयेत् ।
ब्राह्मणान् भोजयेच्छक्त्या सर्वदोषैः प्रमुच्यते ॥

Colophon :

इत्युत्तरर्क्षजननशान्तिः ॥

114

Sl. No. 10020 उत्तरफल्गुनीजननशान्तिविधिः Ms. No. P. 9254/97

Beginning :

अथ उत्तरानक्षत्रशान्तिः—

उत्तरफल्गुन्यामेकविंशतिः पञ्चदशदिनानि वा पीडा भवति। अथ होमनक्षत्रदेवताराधनं पूर्ववत्। तत्र विशेषः। अग्न्यनुमत्योर्मध्ये भगः फल्गुनी दैवतेति भेदः॥

End :

श्वेतपल्लवोदकेनाभिषेकं कुर्यात्। नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात्। ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति॥

Colophon :

इति उत्तरानक्षत्रशान्तिः॥

115

Sl. No. 10028 उत्तरभाद्रानक्षत्रशान्तिः Ms. No. P. 5930/108

Beginning:

उत्तराभाद्रपदायां द्वादशदिनानि पक्षं वा विंशति दिनानि वा पीडा भवति। अथ होमनक्षत्रदेवताराधनं पूर्ववत्। तत्र विशेषः॥

End :

पल्लवोदकेनाभिषेकं कुर्यात्। नक्षत्रदेवता प्रीत्यै धेनुं दक्षिणां दद्यात्। ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वाऽऽयुरारोग्यं भवति॥

Colophon:

इत्युत्तराभाद्राशान्तिः॥

116

Sl. No. 10029 उत्तरभाद्रानक्षत्रशान्तिः (गार्ग्यीया) Ms. No. P. 9254/112

Beginning :

अथ उत्तराभाद्रानक्षत्रशान्तिः—

उत्तराभाद्रपदायां द्वादशदिनानि वा पीडा भवति। अथ होमनक्षत्रदेवताराधनं पूर्ववत्। तत्र विशेषः अग्न्यनुमत्योर्मध्ये अहिर्बुध्न्यः प्रोष्ठपदा नक्षत्रदेवतेति भेदः॥

End :

पल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colopohon

इति उत्तराभाद्रानक्षत्रशांतिः ॥

117

Sl. No. 10032 उत्तराषाढानक्षत्रशान्तिः Ms. No. P 5930/102

Beginning :

उत्तराषाढायां पंचविंशति-षड्विंशति-एकादशरात्रं वा पीडा भवति । अथ होमनक्षत्र-देवताराधनं पूर्ववत् । तत्र विशेषः ॥

End :

सुवर्णरजतेन नक्षत्रदेवताराधनं धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

उत्तराषाढानक्षत्रशांतिः ॥

118

Sl. No. 10033 उत्तराषाढानक्षत्रशांतिः(गार्ग्यीया) Ms. No. P. 9254/106

Beginning :

अथ उत्तराषाढानक्षत्रशान्तिः—

अथ उत्तराषाढायां पञ्चविंशति-षड्विंशतिरात्रं वा पीडा भवति । अथ होमनक्षत्रदेवता-राधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये विश्वेदेवा उत्तराषाढानक्षत्रदेवतेति भेदः ॥

End :

सुवर्णरजतेन नक्षत्रदेवताराधनम् । धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति उत्तराषाढानक्षत्रशांतिः ॥

119

Sl. No. 10038 उत्पलशान्तिः Ms. No. P. 4863/94

Beginning :

अथातः सम्प्रवक्ष्यामि लोकानां हितकाम्यया ।
उत्पलो जायते दोषात् शान्तिं पैतामहादिकम् ॥
देवालये ग्राममध्ये शेते वीथ्यां बहिः पुरात् ॥

End:

शत शतार्धमर्धं वा ब्राह्मणान् भोजयेत् सुधीः ।
इत्येवं क्रियते शान्तिःसु × × षस्य प्रशान्तये ॥

Colohhen :

इति भविष्यत्पुराणे उत्पलशांतिकल्पः ॥

120

SlNo. 10039 उत्पलशांतिः (दैवज्ञवल्लभान्तर्गता) Ms. No. P. 5313/35

Beginning :

गृहद्वारेषु दन्तीनां गृहेषु नगरेषु च ।
क्षेत्रेषु गोष्ठगेहेषु कृषिस्थानेषु सर्वसु ॥
गृहाङ्कणेषु मध्ये वा उत्पलं यदि जायते ।
तदा द्रव्यादिनाशः स्याद्दरिद्रश्चाभिजयते ॥

End :

ब्राह्मणन् भोजयेत्पश्चाच्छतं वा तु तदर्धकम् ।
तेभ्यः प्रदक्षिणां दद्याद्वित्तशाठ्यं न कारयेत् ॥
वस्त्रं धान्यं तिलं दद्याद्यथाविधानुसारतः ।
अनेन विधिना शांतिं यः कुर्याद्भक्तितो नरः ॥
दीर्घायुष्यं च भोगांश्च सम्पद्वृद्धिं च विन्दति ॥

Colophon :

इति श्रीदैवज्ञवल्लभे सर्वोत्पलशांतिपटले उत्पलशांतिविधिर्नाम त्रयोदशोऽध्यायः ॥

121

Sl. No. 10044 उत्पलशान्तिः Ms. No. P 10285/9

Beginning :

अथोत्पलकल्पं व्याख्यास्यामः–

गृहसीमाचतुरश्रं नवदिक्षु × × × × विधानेन × × .... यथा।

उत्पलगृहमध्ये तु ससाहाच्च शुभं भवेत् ॥

अत ऊर्ध्वं प्रजाव्याधि शांति कुर्याद्विधानतः ॥

ब्रह्म × × × मन्त्रण पलाशसमि × × × ॥

× × त्तरशतं हुत्वा अनेन मन्त्रेण व्याहृतीरष्टाहुतीश्च जुहुयात्।

उत्पलं चद्र× × ×त्राणे कुटुंबस्य भयं भवेत्।

अथवा गृहशून्यं स्यात् एकविंशतिवासरात् ॥

End :

वारुण्यां धान्यलाभः तत ऊर्ध्वं चोरभम्। दूर्वाभिर्गणानां त्विति जुहोति। वायव्यं वस्त्रघातस्तथा धान्यनाशः। प्लक्षसमिद्भिस्तदेति मन्त्रेण। वैश्रवण्यां दशाहाद्धान्यलाभः। इदं विष्णुर्विचक्रम इत्याज्याहुतिः। ऐशान्ये गृहपतेर्व्याधिः। शमीसमिद्भिर्येषामीश इति। एवं कृते शान्तिर्भवति ॥

Colophon :

— — --

122

Sl No 10045 उत्पातदर्शनशांतिः Ms. No. P. 7401/80

Beginning :

उत्पातशांतिं वक्ष्यामि नृपाणामभिवृद्धये।

माघ × × मासेषु मध्याह्नात्पूर्वतो यदि ॥

ग्रहनक्षत्रताराणां दर्शनं नृपनाशनम् ॥

अपराह्णे देशनाशः स्त्रीगर्भपशुनाशनम् ॥

End :

जयस्विष्टकृतं होमशेषं चैव समापयेत ।
पुनः पूजां प्रकुर्वीत कलशोद्वासनादिकम् ॥
अभिषेकं तु देवस्य × × × × × ।
× × × × × × × × ।

Colophon :

× × × × × × × × × × ×
× × × दर्शनशांतिः ॥

123

Sl. No. 10046 उत्पातशांतिः Ms. No. P. 604/31

Beginning

गर्गः—

उत्पातशान्तिं वक्ष्यामि सर्वाचार्यमतेन तु ।
प्रविशंति यदा ग्रामं अरण्यमृगपक्षिणः ॥
अरण्यं याति तद्ग्रामं स्थलं याति जलोद्भवम् ।
स्थलजीवा जलं याति जलजीवाः स्थले विना ॥

End :

धनधान्यमहिष्यश्च गोकुलादिप्रजान्वितः ।
राजाग्निशत्रु शस्त्रादिसर्वोपद्रवसंशयः ॥

Coloohon :

इति सर्वाचार्यसम्मता गार्ग्यप्रोक्ता उत्पातशांतिः समाप्ता ॥

124

Sl. No. 10047 उत्पातशान्तिः Ms. No. P. 604/51

Beginning :

अथ यागतगारे स्वर्णा वा विरोहेत् । क (?) प्रोतो वा सागरमध्ये त्रिगतयः वायसो वा गृहं प्रवेशयेत् गौर्वा गां धयेत् + + + एते उत्पातसंज्ञकाः ॥

End :

आंशिषो वाचयित्वा शिथिरयुत्पातनिमित्तेन सूचितसर्वदोषान् नाशयति; सर्वारिष्टशांतिः इत्याह भगवान् बोधायनः ॥

Colophon :

इति बोधायनोक्तोत्पातशिथिलीशांतिः समाप्ता ॥

125

Sl. No. 10051 उत्पातशांतिः **Ms. No. P. 2581/5**

Beginning:

अथ विविधोत्पातशान्तिविधिरुच्यते । कश्यपः –

उत्पाता विविधा लोके दिव्यभौमान्तरिक्षके ।
जातरूपाणि नामानि शान्ति वक्ष्ये पृथक् पृथक् ॥
दिवा वा यदि × त्रौ यः पश्येत्काकमैथुनम् ।
लौकिकं चोपचारं च अपमृत्युविनाशनम् ॥

End :

यथावित्तानुसारेण न्यूनाधिक्यं विकल्पयेत् ।
ब्राह्मणैः इपिकैस्तस्य (?) दद्याद्वित्तानुसारतः ॥
ब्राह्मणान् भोजयेत्पश्चात् दद्याद्वित्तानुसारतः ।
एवं यः कुरुते भक्त्या तस्माद्दोषापनुत्तये ॥

Colophon :

इति ज्योतिषार्णवे विविधोत्पातशान्तिः ॥

126

Sl. No. 10052 उत्पातशांतिः **Ms. No. P. 3024/110**

Beginning :

उत्पातशांति वक्ष्यामि सर्वाचार्यमतेन तु ।
प्रविशंति यदा ग्रामं आरण्यमृगपक्षिणः ॥
अरण्यं याति तद्ग्रामः स्थलं यान्ति जलोद्भवाः ॥

End :

घनधान्यमहिष्यश्वगोकुलादिप्रजान्वितः ।
राजाग्निशत्रुशस्त्रादिसर्वोपद्रवसंक्षयः ।।

Colophon :

इति सर्वाचार्यसम्मतगार्ग्यप्रोक्तोत्पातशांतिः ।।

127

Sl. No. 10060 उत्पातशांतिः (पौराणिकी) **Ms. No. P. 6297/42**

Beginning :

आयुःक्षयकरान् घोरान् उत्पातान् कमलासनः ।
पक्षवातप्रवेशोऽपि नराणामायुषः क्षयः ।
तेषां चैवोक्तशांतिं च वक्ष्यामि चतुरानन ।
गृध्रवायसमार्जारनकुलग्रामकुक्कटान् ।।

End :

रुक्मकुण्डलवस्त्रेण गां दद्याच्च पयस्विनीम् ।
ब्राह्मणान् भोजयेत्तत्र महाशांतिर्दशावरान् ।
पुण्याहं वाचयेत् पश्चात् सर्वशांतिर्भविष्यति ।।

Colophon :

इति × × पुराणे उत्पातशांतिः समाप्ता ।।

128

Sl. No: 10066 उदकशान्तिः **Ms. No. P. 4180/38**

Beginning:

शौनक × × प्रव × मि × द × शांतिमनुत्तमम् ।
सर्वोत्पातनिवृत्यर्थं सर्वशांतिप्रदायकम ।।
जन्मत्रये चाष्टमस्थे वधप्रत्यरक्षि च नैधने (!) ।
× × × दर्दौ चाष्टमे तेन × चारिग्रहपीडिने ।। (!)

End :

× युवंच कुर्वीन सर्वारिष्ट विनश्यति ।
सर्वबाधानिवृत्तिस्स्यात् सर्वोपद्रवनाशनम् ।
ग्रहैः सुस्थानफलदं सर्वसंपद्भविष्यति ॥
सर्वान्कामा × वाप्नोति नात्र काया विचारणा ॥

Colophon :

इति शौनकीये उदकशांतिः ॥

129

Sl. No. 10087 ग्रहणप्रसवप्रथमार्तवशांतिविधिः Ms. No. P. 4720/15

Beginning :

अथ ग्रहणप्रसवप्रथमार्तवशांतिः । तत्र शौनकः –

ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते ।
व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥
इत्थं संजायते यस्तु तस्य मृत्युर्न संशयः ।
व्याधिपीडा च दारिद्र्यं शोकश्च कलहो भवेत् ॥

End :

तत्त्वायामीति मन्त्रस्य अजगर्मः शुनश्शेपस्त्रिष्टुप् समुद्रज्येष्ठा ; इति चतुष्कस्य सूक्तस्य वसिष्ठ आपस्त्रिष्टुप् । एतैर्मन्त्रैरभिषिञ्चेयुः ।

Colophon :

— — —

130

Sl No 10088 उपरागशान्तिः (यामलान्तर्गता) Ms. No. P. 4720/20

Beginning :

अथग्रहणशांतिविधिमाह यामले–

अथशांतिं प्रवक्ष्यामि सोमसूर्यग्रहस्य च ।
फलमाद्यौ प्रवक्ष्यामि धर्मशास्त्रोक्तमार्गतः ।
यस्य राशिं समुद्दिश्य भवेद्ग्रहणसम्भवः ॥

\+ \+ \+ \+

End :

सञ्जातदोषान् दिक्पाला नाशयन्तु च सर्वदा ।
रुद्राभिषेकं देवस्य अश्वत्थस्य प्रदक्षिणम् ॥
ततो नीराजनं पश्चाद्वाशिग्रहणमाचरेत् ।
इति लोके सुखी भूत्वा ग्रहदोषविवर्जितः ॥
मृत्युरोगभयान्मर्त्यो जीवेच्च शरदां शतम् ॥

Colophon :

इति यामलोक्तोपरागशांतिः ॥

131

Sl. No. 10094 उपरागशांतिः (हेमाद्रीया ग्रहणशांतिः) **Ms. No. P. 5587/40**

Beginning

ग्रहणोत्पातजं दोषं सशोकादिभयदिकम् ।
क्षिप्रं निवार्य कृपया शंङ्करः पट्टबन्धनात् ॥
योऽसौ विश्वधरो देवः आदित्यानां प्रभुर्मतः ॥

End :

सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ।
तिलमध्ये लिखेच्चक्रं त्रिशूलंच त्रिकोणकम् ।
ग्रहणे शूलदोषं मे निवारय दिवाकर ॥

Colophon :

इति ग्रहणदानमूलमन्त्रः । इति हेमाद्रौ पैतमहोक्ता उपरागशांतिः समाप्ता ॥

132

Sl. No. 10098 उपरागशांतिः (मत्स्यपुराणीया) **Ms. No. P. 6297/31**

Beginning :

मनुरुवाच –

चन्द्रादित्योपरागे तु यत् स्नानमभिधीयते ।
तदहं श्रोतुमिच्छामि द्रव्यमन्त्रविधानतः ॥
यस्य राशिं समासाद्य भवेत् ग्रहणसंभवः ।
तस्य स्नानं प्रवक्ष्यामि मन्त्राश्च विधिना ततः ॥

End ;

परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ।
सूर्यग्रहे सूर्यनाम सदा मन्त्रेषु कीर्तयेत् ॥
य इदं शुणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥

Colophon :

इति मत्स्यपुराणे चन्द्रसूर्योपरागशांतिविधिः ॥

133

Sl. No. 10099 (ज्योतिषार्णवीया) उपरागशान्तिः Ms. No. P. 6297/31a

Beginning :

यस्य त्रिजन्मनक्षत्रे ग्रहणं चन्द्रसूर्ययोः ।
व्याधिं प्रवासं मृत्युं च मरणं च महद्भयम् ॥
राशौ दशगुणं दोषः नक्षत्रे सप्तविंशतिः ।
अंशके तत्र मासं स्यात् लग्नमासे तथैव तु ॥

End :

सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ।
रूपं विधाय भुजगस्य हि कांचनेन पिष्टेन याभिमकरे दिवसाधिपे वा ।
ग्रस्ते तु × × दिवसे प्रदद्यात् विप्राय दोषमखिलं शममभ्युपैति ॥

Colophon

इति ज्योतिषार्णवे षटत्रिंशोऽध्यायः ॥

134

Sl. No 10100 उपरागशांतिः (ग्रहणशांतिः) Ms No. P. 6504/1

Beginning :

काशीकाण्डे दिवोदासोऽपि–

शांतिकर्म प्रवक्ष्यामि चन्द्रसूर्योपरागयोः ।
किं × × × लिङ्गस्य माने स्नानादूर्ध्वं समाचरन् ॥

+ + + + + +

End :

एवं यः कुरुते भक्त्या सर्वसौभाग्यकारकम् ।
सर्वपापप्रशमनं चिरायुष्यं लभेद्भुवि ॥

Colophon:

इति श्रीकाशीकाण्डे दिवोदासनि × × × × × × × ॥

135

Sl. No. 10104 उपरागशांतिः **Ms. No. P. 9254/84**
(उत्पलपरिमलीया ग्रहणशांतिः)

Biginning :

अथ उपरागशांतिः मत्स्यपुराणे--

यस्य त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ ।
तज्जातानां भवेत्पीडा ये नराः शांतिवर्जिताः ॥
तस्माद्दानेन होमेन देवार्चनजपैस्तथा ।
उपरागाभिषेकं च कुर्याच्छांतिर्भविष्यति ॥

End :

प्रेक्ष्य शांतिं प्रकुर्वीत तत्काले बुद्धिमान्नरः ।
पुण्याहवाचनं कृत्वा ततः सङ्कल्पमाचरेत् ॥
आचार्यवरणं कुर्यात्कुलीनं च कुटुम्बिनम् ।

Colopnon :

इत्युत्पलपरिमले ग्रहशांतिविधिः समाप्तः ॥

136

Sl No 10111 उभयतोमुखीगोदानविधिः **Ms. No. P. 4180/59**

Beginning :

अथोभयतोमुखीदानविधिरभिधीयते-- दानमात्रेण सर्वसुखमश्नुते । अथ चायं विधिः । कपिलोक्त-वर्णगवां प्रसूतिद्वित्रिदिनपूर्वं प्रतिदिनं गावं देवालये स्वगृहे वा गोष्ठस्थले बध्नीत; तृण-जलं दत्वा प्रतिदिनं गावं पूजयित्वा ॥

End :

गां दशपूर्वां दशापरान् दत्वा सर्वभोगसुखमश्नुते; सुखमश्नुत; इति तद्वस्त्रप्रतिमां सदक्षिणां सर्वोपस्कारसंयुक्तान् आचार्येभ्यो दत्वा नमः शौनकाय; नमः शौनकाय इति जपेत् ॥

Colopon :

इत्युभयतोमुखीगोदानविधिः ॥

137

Sl. No. 10112 उभयतोमुखीगोदानविधिः (मात्स्यान्तर्गतः) Mss. No. 5313/19

Beginning :

अथ उभयतोमुखीगोदानविधिरुच्यते मात्स्ये—

रुक्मश‍ृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ॥
कांस्योपदोहिनीं राजन् सवत्सां द्विजपुङ्गव ।
प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ॥

End:

कर्म ईश्वरार्पणं कृत्वा, विप्रान् भोजयित्वा, सुहृद्युतो भुञ्जीतेति । अस्मिन दिने दाता पयोमात्राशनः पायसाहारो वा । दाने जाते गोविपत्तावपि दानफलमस्त्येव । वत्सः मृतः येन चेदुत्पद्यते कालान्तरे अन्यं दद्यात् ॥

Colophon :

इति उभयतोमुखीगोदानविधिः ॥

138

Sl. No. 10114 उभयतोमुखीगोदानविधिः (शौनकीयः) Ms. No. P. 6866/40

Beginning :

अथातः सम्प्रवक्ष्यामि दानं सर्वार्थसाधकम् ।
गौं × × × × × × × × ॥
× × × दानं प्रकुर्वन्ति यान्ति गङ्गावगाहनम् ॥
गास्स्तुत्वाथ नमस्कृत्य एकवारं च तादृशीम् ॥

End:

तस्य पुण्यफलं वक्तुं कः शक्तो दिवि वा भुवि ।
एवं विधिविहीनोऽपि दृष्ट्वा दद्यात्प्रयत्नतः ॥
सर्वैः सम्पूज्यते सोपिऽ भुक्त्वा भोगान् मनोरथान् ।
दैवतैः स्तूयमानः सन् अन्मे याति परां गतिम् ॥

Colohhen :

इति शौनकीये उभयतोमुखीगोदानविधिः ॥

139

Sl. No. 10115 उभयतोमुखीगोदानविधिः (हेमाद्रीया) **Ms. No. P. 7408/9**

Beginning :

हेमाद्रौ दानखण्डे उभयमुखीदानप्रकरणदानविधिगोपूजाप्रकारदानमन्त्रसङ्कल्पप्रकारविधिः—

सङ्कल्प्य; एवङ्गुगेत्यादि मम समस्तपापक्षयार्थं सकलपुराणोक्तफलावाप्त्यर्थं तत्रादौ गोपूजा करिष्ये । ध्यानम् –

सर्वदेवमयीं देवीं सर्वलोकैकमातरम् ।
सर्वपापक्षयकरीं नित्यं ध्यायामीष्टार्थदां शुभाम्? ॥

End :

प्राङ्मुखीमवस्थाप्य सवत्सां च स × × रितां पुच्छदेशे तु श × × वै स्थितो बद्धशिखो भवेत् । आजपात्रं करे कृत्वा इमामुभयतोमुखीम् । + + + + स्वस्ति भवते नित्यं रुद्रमातर्नमोस्तु ते × × तिगृ × × × ति ॥

Colophon :

इति हेमाद्रौ उभयमुखीगोदानपद्धतिः समाप्ता ॥

140

SlNo. 10119 उभयतोमुखीगोदानविधिः (स्कान्दीया) **Ms. No. C. 3423 2**

Beginning :

प्रकारान्तरेणोभयतोमुखीगोदानम् - हेमाद्रौ स्कान्दोक्तोभयतोमुखीगोदानप्रयोगः, तदर्चनाप्रकारः अयनादिपुण्यकालेषु देवालयादिपुण्यदेशेषु ॥

End :

दक्षिणां तुभ्यमहं सम्प्रददे न मम । यस्य स्मृत्येत्यादि । अनन्तरं कर्ता स्वस्तिपुण्याहवाचनं कृत्वा फलताम्बूलदानं कुर्यात् ॥

Colophon :

इति स्कन्दपुराणोक्तोउभतोमुखीगोदानपद्धतिः ॥

141

Sl. No. 10120 उलूकगृध्रकपोतशांतिः **Ms. No. P. 3085/67**

Beginning :

उलूकश्येनगृध्राश्च कपोतक्रूरपक्षिणः ।
प्रविशन्ति गृहं यस्य क्रीडन्ते तन्मृतिर्भवेत् ॥
+ + +
अतस्तीव्रं तदा शान्ति कुर्याद्दोषविनाशिनीम् ।

End :

एवं यः कुरुते शान्ति मत्पापस्य विनाशनम् ।
सर्वदोषविनिर्मुक्तः परांसि द्धिमवाप्नुयात् ॥
+ × + +
कपोतमन्त्रः । गृध्रमन्त्रः ॥

Colopohon

— — —

142

Sl. No. 10121 उलूकगृध्रकपोतशांतिः (गार्ग्यीया) **Ms. No. P. 9764/44**

Beginning :

उलूकः श्येनगृध्रो वा कपोतः क्रूरपक्षिणः ।
प्रविशन्ति गृहं यस्य क्रोशन्ति च मृतिर्भवेत् ॥
क्रोशन्ति बहुशो गेहे प्रकाशादिषु सर्वशः ।
तिष्ठन्ति निर्भयास्तेषु उलूकादिमहाखगाः ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणाय विशेषतः ।
ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ॥
एवं शान्ति नरः कुर्याद्भक्तियुक्तेन चेतसा ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥

Colophon :

इति गार्ग्योक्तोल्लूकादिः शान्तिः

143

Sl. No. 10122 उलूकप्रवेशशांतिः(शौनकीया) Ms. No. P.499229

Beginning :

हरि × × × मारम्भाणादिकृष्णगृध्रप्रवेशे दोषो नास्ति । अन्यथ व्याघ्रादिदुष्टमृगप्रवेशे गर्दभप्रवेशशांति वत।

\+ + + +

उलूकगृ × × यदक्षिगामिलो यदि ।
बातपीडा × मृत्युर्वा स्थानभ्रंशमथापि वा ॥

End :

पञ्चाङ्गदेवता यास्तु सुप्रसन्ना भवन्तु ते ।

अभिषेकमन्त्रः—

स्नाने यद्धारितं वस्त्रं ब्राह्मणाय निवेदयेत् ॥

Colophon:

इति शौनकीये उलूकशांतिः ॥

144

Sl. No. 10130 ऊर्ध्वदन्तजननशान्तिः Ms. No. P.60/60

Beginning:

प्राणायामाद्येवं गुणतिथौ अस्य कुमारस्य सदन्तजननदोषपरिहारार्थं शांतिहोमं करिष्ये ।

End :

आज्यद्रव्यैश्च शेषेण स्विष्टकृतमित्यादि । इदं विष्णुरिति विष्णुं अग्निं दूतमित्यग्निं, सोमो धेनुमिति सोमं, तत्र वायुमिति वायुम् ।।

Colophon :

इति ऊर्ध्वदन्तजननशांतिः ।।

145

Sl.No. 10131 ऊर्ध्वदन्तजननशान्तिः (बोधायनीया) **Ms. No. P. 2239/58**

Beginning :

अथ ऊर्ध्वदन्तजननशांतिः –

शिशोर्यस्योच × × × दन्ताः पूर्वं तथा कुलम् ।
विनाशयति तत् क्षिप्रं तस्माच्छान्तिं समाचरेत् ।।
प्रथमे मासि दन्तानां उत्पत्तिः कलहाग्निदा ।

End :

ताम्बूलं × × नात् स कुर्यात्तु विचक्षणः ।
एवं कृते न संदेहः न दोषो न प्रणश्यति ।।
कुलं च वर्धयेत्तस्य दीर्घमायुश्च विन्दति ।।

Colophon :

इति बोधायनोक्तोर्ध्वदन्तजननशान्तिः ।।

Extra information:

वरुणं पाशहस्तं × × × पूजयाम्यहम् ।
इतिग्रन्थान्ते दृश्यते ।।

146

Sl .No. 10137 ऊर्ध्वदन्तजननशांतिः (शांतिसारावलीया) **Ms. No.P. 5930/27**

Beginning:

यस्योपरि शिशोर्जाताः दन्ताः पूर्वं यथाकुलम ।
विनाशयति तन् क्षिप्रं शान्तिकर्म समारभेत ।।

End :

एवं कृते न सन्देहः सर्वारिष्टं विनश्यति ।
कुलं च वर्धते तस्य दीर्घमायुश्च विन्दति ॥

Colophon :

इति शान्तिसारावल्यां ऊर्ध्वदन्तजननशान्तिः समाप्ता ॥

147

Sl. No. 10142 ऊर्ध्वदन्तजनशान्तिः (विष्णुधर्मोत्तरीया) Ms. No. P. 9764/9

Beginning :

उपरि प्रथमं यस्य जायन्ते च द्विजाः शिशोः ।
दन्तैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम ॥
मातरं पितरं वापि पिशाचात्मानमेव वा ।
तत्र शान्तिं प्रवक्ष्यामि तन्मे निगदतश्शृणु ।

End :

ब्राह्मणेभ्यश्च दातव्या ततः शक्त्या च दक्षिणा ।
ततस्त्वलंकृतं बालमासने तूपवेशयेत् ॥
बालानाहूय सहसा तैश्च कार्यं तु पूजनम् ।
पूज्यांश्च विधवा नार्यो ब्राह्मणाः सुहृदस्तथा ॥

Colophon :

इति विष्णुधर्मोत्तरे उपरिदन्तजननशान्तिः ॥

148

Sl. No. 10146 ऋतुजामित्रशान्तिः (रुद्रयामलीया) Ms. No. P. 2239/26

Beginning :

अथातः संप्रवक्ष्यामि लग्नजामित्रगे सिते ।
ऋतुलग्नात्सप्तमस्थसूर्यादीनां फलं शृणु ॥
अन्त × × दयसप्तमस्थे प्रवेशे निर्गमेऽपि वा ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् कारयेद्विप्रभोजनम् ।
एवं यः कुरुते शान्ति सर्वदोषहरां शुभाम्॥
दम्पत्योस्सुखमाप्नोति(?) पुत्रपौत्राभिवृद्धये॥

Colophon :

इति रुद्रयामले ऋतुजामित्रशांतिः ॥

149

Sl. No. 10151 **ऋतुशान्तिः (शौनकीया)** **Ms. No. P. 60/22**

Beginning :

आर्ते वै प्रस्त्रीतमे णां शांतिं वक्ष्यति शौनक ।
तिथिवारर्क्षयोगेभ्यो लग्नाच्च गृहसप्तमा ॥
गृहेभ्योश्चोत्थितेभ्यश्च तत्तद्दोषजयाय च ।
अर्थपुत्रादिलाभार्थं दम्पत्योरभिवृध्दये ॥

End :

महाशांतिं प्रजप्याथ विप्राशीर्वचनं भवेत् ।
ब्राह्मणान् भोजयेत् पश्चात् भुञ्जीते स्वजनस्सह ॥
एवं यः कुरुते शांतिं शौनकोक्तप्रकारतः ।
अनिष्टदोषजफलं सदा चैव विनश्यति ॥

Colophon :

इति शौनकीये प्रथमार्तवशान्तिः ॥

150

Sl. No. 10152 **ऋतुशांतिः (छन्दोगीया)** **Ms. No. P. 2503/16**

Beginning :

अथातः प्रथमार्तवशान्तिं व्याख्यास्यामः-नारीणां प्रथमरजोदर्शनकाले तिथिवारनक्षत्रयोग-करणेषु चतुर्थे पञ्चमेवाऽह्नि कुर्यात् + + ऋतुशांतिं विचक्षणः ॥

End :

गर्भं धेहीति मन्त्रेण ऋतुस्त्री भक्षयेत् । अस्यां रात्रौ दक्षिणेन पाणिना उरस्थलमालभते- विष्णुर्योनिं कल्पयत्विति समाप्यां संगमेत् ॥

Colophon :

ऋतुशांतिः समाप्ता ॥

151

Sl. No. 10155 ऋतुशांतिः (बोधायनीया) Ms. No. P. 3128/29

Beginning :

अथातो बोधायनोक्तऋतुशांतिविधिं व्याख्यास्यामः - गोमयेन गोचर्ममात्रं चतुरस्रंस्थण्डिलं कल्पयित्वा, अष्टपत्रपद्मं लिखित्वा, व्रीहितण्डुलतिलान् विक्षिप्य तदुपरि कुम्भं निधाय ॥

End :

सह यज्ञं ततः कुर्यात् ब्राह्मणान् भोजयेत्सुधीः ।
रात्रौ चौपासनं कृत्वा शयने सूक्तवाचनम् ॥

विष्णुर्योनिरिति त्रयोदशमन्त्रान् जपेत् । एवं कृत्वा तु निर्दोषः इत्याह भगवान् बोधायनः ॥

Colophon:

-- -- --

152

Sl. No. 10166 एकदन्तजननशांतिः (रत्नाकरीया) Ms. No. P. 9428/43

Beginning :

एकदन्तनरे × × ति पितृमातृहरा स्मृताः
अथवा भ्रातृनाशश्च षण्मासाभ्यन्तरे भवेत् ॥
मार्जन सा ×त्तरिकाश्वेत्थं तिलादि × × ×लकम्।

End :

श्वेतमृत्स्नाकङ्कुशैः × × × मूलमद्वत्तदा ॥
वामं भांडोदकं वर्ह्यं स्नानं द्वौ प्रहरौ भवेत् ॥

Colopoon :

इति रत्नाकरे एकदन्तजननशांतिः ॥

153

Sl. No. 10168 एकनक्षत्रजननशांतिः (गार्ग्यीयः) Ms. No. P.60/8

Beginning

अथ एकनक्षत्रजननशांतिविधिरुच्यते—

एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा मातृपुत्रयोः ।
प्रसूतिश्चेत्ततो मृत्युर्भवेदेकस्य निश्चयः ।।
तद्दोषशमनार्थाय प्रशस्ता शांतिरुच्यते ।

End :

ऋत्विजां दक्षिणां दद्यात् निष्कत्रयसुवर्णकम् ।
देवताप्रतिमादानं धान्यं वस्त्रादिभिस्सह ।।
यानशय्यासनादीनि दद्यात्तद्दोषशान्तये ।
भोजयेत् ब्राह्मणान् सर्वान् वित्तशाठ्यविवर्जितः ।।

Colophon :

इति गार्ग्योक्तैकनक्षत्रशांतिः ।।

154

Sl. No. 10169 एकनक्षत्रजननशांतिः (वृद्धगार्ग्योया) Ms.No.P. 604/75

Beginning :

एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः ।
प्रसूतिश्चेत् × × मृत्युः भवेदेकस्य निश्चयः ।।
तत् दोषनाशाय तदाप्रशस्तं शान्ति च कुर्यादभिषेचनं च ।।

End:

देवताप्रतिमादानं धान्यदानादिभिः सह ।
यानशय्यासनादीनि दद्यात् तद्दोषशान्तये ।।
भोजयेत् ब्राह्मणान् सर्वान् वित्तशाठ्यविवार्जितः ।।

Colophon :

इति वृद्धगार्ग्येण विरचिता एकनक्षत्रजननशान्तिः समाप्ता ।।

155

Sl. No. 10187 एकनक्षत्रजननशांतिः Ms. No. P. 6314/7

Beginning :

रचनाप्रकारः। पितृपुत्रैकनक्षत्रजननशान्तिः ।
सूतकान्ते शुभे वारे चन्द्रतारावलान्विते शुभदिवसे स्वगृहे शुद्धदेशे गोमयेनानुलिप्य रङ्गवल्या दिरचयित्वा ॥

End :

यथाशक्ति दक्षिणां दद्यात् अन्येषामप्येवंदद्यात् । 'अस्माकं' इत्यादिवाक्यं समानम् । ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् । यथाशक्ति ब्राह्मणान् भोजयेत् ।यस्येत्यादि ॥
यस्येत्यादि ।

Colophon :

इति पितृपुत्रैकनक्षत्रजननशान्तिपद्धतिः ॥

156

Sl. No. 10189 एकनक्षत्रजननशांतिः(पराशरसंहितान्तर्गता) Ms. No. P. 7401/20

Beginning :

अतःपरं प्रवक्ष्यामि शांतिकर्मविधिं शृणु ।
यस्मिन्राशे पितुर्जन्म तन्मासेऽपि च तत्तिथौ ॥
तन्नक्षत्रेऽथ तद्राशौ यदि चेज्जायते सुतः ।
षण्मासैरेव जनकः तस्य नूनं विनश्यति ॥ + ×
तदा शांतिं प्रकुर्वीत सर्वारिष्टप्रशान्तये ॥

End:

एवं कृते च तत्पापं तत्क्षणादेव नश्यति ।
जायते पूर्णकामश्च सर्वान् प्राप्नोति सम्पदः ॥

Colophon :

इतिपराशरसंहितायां पितृपुत्रैकतिथिमासलग्नजननशांतिः ॥

157

Sl·No.10195 एकनक्षत्रजननशान्तिः (वृद्धगार्ग्यीय) Ms. No P. 9951/89

Beginning :

कः कस्मिन्नेव नक्षत्रे ततो वापि तु पुत्रयोः ।
प्रसूतश्चेत्तत्र मृत्युः स्यात् द्वयोरेकस्य निश्चयः ।।
तत्र शांतिं प्रवक्ष्यामि पूर्वाचार्यमतेन तु ।
शुभाहे शुभवारे च चन्द्रताराबलान्विते ।।

End :

ऋत्विजां दक्षिणां दद्यात् माषत्रयसुवर्णकम् ।
देवताप्रतिमादानं धनधान्यादिभिः सह ।।
या न शान्त्या समाधाति तत्तद्दोषोपशान्तये ।
भोजयेत् ब्राह्मणान् सर्वान् वित्तशाठ्यविवर्जितः

Colophon:

इति वृद्धगार्ग्येण विरचिता एकनक्षत्रजननशान्तिः ॥

158

Sl. No. 10199 एकनक्षत्रजननशांतिः Ms. No C.2675/3

Beginning :

एकस्मिन्नेव नक्षत्रे जातयोः पितृपुत्रयोः ।
प्रसूतिश्चेत्तयोर्मृत्युः भवेदेकस्य निश्चयः ।।
तद्दोषनाशाय तत्प्रशस्ते शान्तिं च कुर्यादभिषेचनञ्च ।।

End :

ऋत्विग्भ्यो दक्षिणां दद्याद्यथावित्तानुसारतः ।
नक्षत्रप्रतिमादानं धान्यवस्त्रादिस्सह ।।
यानशय्यासनादीनि दद्यात् तद्दोषशान्तये ।
ब्राह्मणान्भोजयेत्तंश्चाद्विचशाठ्यंविवर्जितः ।।

Colophon :

इति श्री रुद्रयामले एकनक्षत्रजननशांतिः ।

159

Sl. No. 10201 एकमासाधिजननशान्तिः Ms. No. P. 2239/56

(तत्तन्मासाधिदेवतापूजाविचारः)

Beginning:

अरुणो माघमासे तु सूर्यो वै फाल्गुने तथा ।
चैत्रमासे रविः पूज्यः भानुर्वैशाख एव च ॥

End :

सुवर्चसं चाश्वयुजि कार्तिके च दिवाकरः ।
मार्गे मित्रेण संपूज्य पुष्ये विष्णुस्तथा क्रमात् ॥

Colophon :

इत्येकमासजननशान्तिदेवताः ॥

160

Sl. No. 10205 एकमासाधिजननशान्तिः Ms. No. P. 5672/58

(पराशरसंहितान्तर्गता)

Beginning:

अतःपरं प्रवक्ष्यामि शान्तिकर्मविधिं शृणु ।
यस्मिन् मासे पितुर्जन्म तन्मासेऽपि च तत्तिथौ ॥
तन्नक्षत्रेऽथ तद्राशौ यदि चेज्जायते सुतः ॥

End :

एवं कृते तु तत्पापं तत्क्षणादेव नश्यति ।
जायते पूर्णकामश्च सर्वान् प्राप्नोति संपदः ॥

Colophon :

इति पराशरसंहितायां पितृपुत्रैकनक्षत्रतिथिमासजननराशिजननशान्तिः ॥

161

Sl. No. 10209 एकादशीप्रथमार्तवशान्तिः Ms. No. P. 2239/6

Beginning :

एकादश्यां यदि भवेत् नारीणां प्रथमार्तवम् ।
महद्दारिद्र्यमाप्नोति व्याधियुक्त भवेत्तथा ॥
पार्वतीशं सुवर्णेन वृषभोपरि विन्यसेत् ॥

End :

तत्र मूर्तिप्रदानेन शम्भो मे भाग्यसंपदः ।
सतीगोमिथुनं दद्यात् × ×य विशेषतः ॥
सर्वदोषविनिर्मुक्ता सुखमक्षयमाप्नुयात् ॥

Colophon :

इति रुद्रयामले एकादशीरजस्वलाशान्तिः ॥

162

Sl. No. 10221 कदलीफलशान्तिः Mf. No. P. 7970/19

Beginning :

कदलीभस्म वक्ष्यामि शुभाशुभफलं क्रमात् ।
इन्द्रे तु पुत्रलाभं च गृहदाहो हुताशने ॥
याम्ये प्राणहति कर्तुः निरृत्यां स्त्रीविनाशनम् ।
वारुण्यां पुत्रलाभस्यात् वायव्ये राजपूजनम् ॥

End :

जपहोमार्चनेनैव सहस्रमिति शीर्षकम् ।
सहस्रशीर्षसूक्तं च जपेदष्टशतं सुधीः ॥
ग्रहशान्त्युक्तदेवानां मध्ये विष्णुं समर्चयेत् ।
सर्वशान्तिरिति ख्यातं द्विजानां भोजयेच्छतम् ॥

Colophon :

इति कदलीफलशान्तिः ॥

163

Sl. No. 10223 कदलीविवाहः (आङ्गीरसीयः) Ms. No. P. 4396/6

Beginning :

तृतीये परिणयेत् कन्यां सा त्वनर्थाय कल्पते ।
तस्य × × याविवाहेन सा तु संपन्नकारिणी ॥
वक्ष्ये मायाविवाहस्य कर्म चाङ्गीरसोदितम् ।
कालो मायाविवाहस्य विवाहोक्तक्रमेण वै ॥
अपुष्पां कदलीं गत्वा पूर्णां स्वकुलमूलगाम्॥

End :

कदलीसुताया आशौचं पितुरप्युक्तं त्रिरात्रम् । कदल्युक्तं त्रिरात्रं तु कदली मृतौ ।
इत्थं मायाविवाहोक्तं मुनिनाऽङ्गिरसोदितम् ।
ततो मानुषकन्याया विवाहविधिरिष्यते ॥

Colophon :

इत्यङ्गिरसोदक्तकलीविवाहविधिः ॥

164

Sl. No. 10224 कदलीविवाहः (आङ्गिरसीयः) Mss No P. 6298/14

Beginning :

तृती येपरिणयेत् कन्यां सा त्वनर्थाय कल्पते ।
तसन्मया विवाहे नसा तु:सम्पन्नकारिणी ॥
वक्ष्ये मायविवःहस्य क्रममाङ्गीरसोदितम् ।
कालोमायाविवाहस्य वि:ाहोक्तक्रमेण वै ॥

End :

चन्द्ररूपो द्वि जः कश्चित् प्रयच्छेत् कदलीसुताम् ।
आशौच तु पितु × × जयः स्त्रिपुचजम्मसु ॥

इत्थं मायविवाहोक्तं मुनिनाङ्गिरसोदितम् ।
ततो मानुषकन्याया विवाहविधिरिष्यते ॥

Colophon:

इति कदलीविवाहविधिः ॥

165

Sl. No. 10225 कदलीविवाहः (हेमाद्रीयः) **Ms.No. P. 9553/4**

Beginning :

पतितं क्लीबमुन्मत्तं कुण्डजं काणं रुजार्जितम् ।
अपस्मारं परित्यज्य विवाहो न च दोषभाक् ॥

कात्यायनः—

काणं रुजार्चितं कुब्जं पतितं क्लीबमेव च ॥

End :

तत्कुलं संकरं भूयात् संकरो नरकाय वै ।
युगान्तेन च मुक्तिः स्यात् पुत्रा अस्य च शौनकः ॥

Colopoon :

इति हेमाद्रौ पतितानां कदलीविवाहः ॥

166

Sl. No. 10227 कदलीशान्तिः (शौनकीय।) **Ms.No. P. 604/44**

Beginning:

अथ कदलीशान्तिविधिरुच्यते– ।

कदलीफलसम्भूतं वक्ष्यामि शुभलक्षणम् ।
उद्यानस्थापिता रम्भा कदली प्रथमे फले ॥
ऐन्द्रे तु पुत्रलाभः स्यात् गृहदाहे हुताशने ॥

End :

पुरुषसूक्तेन विष्णोर्नुकसूक्तेनाभिषेचयेत् ॥ आचार्याय गोहिरण्य सहितां वस्त्रप्रतिमादिकां दद्यात् । अथ ब्राह्मणान् भोजयेत् । एवं कृते सति सर्वदोषो विनश्यति ॥

Colophon :

इति शौनकोक्तकदलीशांतिः

167

Sl. No. 10232 कदलीशांतिः (वसिष्ठोक्ता) Ms. No. P.5587/71

Beginning

अथ वसिष्ठप्रोक्तकदलीशांतिमाह वसिष्ठः--

ग्रहशान्त्युक्तदेवता × चरुः समित् ।
उदुम्बरमपामार्गपलाशाश्वत्थमेव च ॥

End :

सहस्रशीर्षेति सूक्तं जपेदष्टशतं सुधीः ।
ग्रहशान्त्युक्तमन्त्राणां मध्ये विष्णुं समर्चयेत् ॥

Colophon :

इति वसिष्ठप्रोक्तकदलीशान्तिः समाप्ता ॥

168

Sl. No. 10242 कदल्यादिशांतिः (कदलीक्रमुकनालिकेरशांतिः) Ms.No.P. 734/36

[बोधायनीया]

Beginning :

× × × × . ।
× × × स्थाने शुभाशुभम् ॥
ऐन्द्रं श्रियं पुत्रलाभं धनलाभं तथैव च ॥
× × ग्नेय्यां मृत्युमाप्नोति महाव्याधिभयं भवेत् ॥

End:

ब्राह्मणानां शतं भोजयित्वा कृतकृत्या भवन्ति × × सर्वारिष्टविनाशादः सर्वसमृद्धि-
× × शांतिर्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon :

इति कदलीक्रमुकनालिकेरशांतिः समाप्ता ॥

169

Sl. No. 10244 कदल्यातालशांतिः Ms. No. P. 604/45

Beginning :

कदलीकुसुमं प्राच्यां उद्भवं सर्वसम्पदम् ।
आग्नेय्यामर्थहानिः स्यात् यमे मृत्युभयं भवेत् ॥
नैऋते सर्वहानिः स्यात् वारुणे बहुनाशनम् ।
वायव्ये पशुनाशं च सोमे मन्त्रसमागमः ॥

End :

त्रियम्बकस्य प्रतिमां कारयेदरुणस्य च ।
यस्यां दिशि समुद्भूते तद्दिगीशस्य शक्तितः ।
उत्पलांश्च सुवर्णेन सर्वं पूर्ववदाचरेत् ॥

Coloohon :

इति कदल्यातालशांतिः ॥

170

Sl. No. 10245 कनकाज्यावेक्षणदानविधिः Ms. No. P. 5587/61

Beginning :

अथ कनकाज्यावेक्षणदानविधिरुच्यते--

अथ दानं प्रवक्ष्यामि नृणां सर्वार्थसिद्धये ।
अलक्ष्मीरोगनिर्मुक्तो सर्वसौभाग्यवर्धनम् ॥

End :

अभिलाषपरिहारार्थं तुभ्यमहं संप्रददे न मम इति ; दत्त्वा दिनत्रयं नावलोकयेत् । समस्तपीडापमृत्युपापानां विमुक्तिर्भूयादिति आशीर्वचनं गृह्णीयात् ॥

Colophon :

इति कनकाज्यावेक्षणदानविधिः समाप्तः ॥

171

Sl. No. 10246 कपोतपिङ्गल्यादिशांतिः Ms. No. P. 9764/11

Beginning :

आरुह्य मन्दिरं यस्य कपोतः स्वरुदेथदि ।
स्थानहानिर्भवेत्तस्य यद्वानर्थपरम्परा ॥
दोषाय धनिनां गेहे दरिद्राणां धनाय च ।
तस्य शांतिश्च कर्तव्या जपहोमविधानतः ॥

End :

सम्पूर्णमन्दिरे हनिः शून्ये सद्मनि मङ्गलम् ।
प्राकारे च पुरद्वारे प्राकाराद्यविदिक्षु च ॥
तत्फलं गुरुमध्ये वा गुरुकल्पनया ततः ।
शांतिकर्माखिलं कार्यं पूर्वोक्तेन क्रमेण तु ॥

Colophon:

इति कपोतपिङ्गल्यादीनां शांतिविधिः ॥

172

Sl. No. 10248 कपोतमधुवल्मीकशांतिः (ज्योतिषार्णवीया) Ms. No. P. 2581/6

Beginning :

अथ कपोतशांतिविधिरुच्यते । कश्यपः—

गृहमारोहयेद्यस्य कपोता वा प्रवेशयेत् ।
स्थानहानिर्भवेत्तस्य यद्वानर्थपम्परा ॥
दोषाय धनिनां गेहे दरिद्राणां शिवाय च ।
तद्दोपशमनार्थाय शांति पूर्ववदाचरेत् ॥

End :

तत्फलं ग्रामदेशस्य गृहसीमान्तिकेऽपि वा ।
मध्योत्पातं यशो मृत्युः क्षयः कीर्तिः शुभाशुभम् ॥

ऐश्वर्यधनलाभे च मधुकुत्रि (?) च वाल्मिकम् ।
तद्दोषशमनार्थाय शांतिं पूर्ववदाचरेत् ।।

Colophon :

इति श्रीज्योतिषार्णवे कपोतमधुवल्मीकशांतिः ।।

173

Sl. No. 10249 कपोतमधुवाल्मीकशांतिः (बृहच्छौनकीया) Ms. No. P. 734/23

Beginning :

× × × मि भगवान् शौनकोऽब्रवीत् ।
कपोतोऽप्यपरस्सर्पो वल्मीकं सपिपीलिकम् ।।
गृहमध्ये भवेन्मृत्युः पूर्वं चेद्व्याधिपीडनम् ।।

End :

× × दक्षिणां दद्यात् स्वस्तिवाचाम × × ।
ब्राह्मणान् भोजयेत्पश्चात् हरिमेव स्मरेद्बुध ।।

Colophon :

इति बृहच्छौ × × × × × × शांतिः ।।

174

Sl. No. 10253 कपोतशांतिः (वसिष्ठोक्ता) Ms. No. P. 9428/32

Beginning :

अथेह × × × यस्य कपोतं वा प्रवेशयेत् ।
स्थाननाशो भवेत्तस्य वध्वा × × परं × × ।।
दोषाय वृजिनां गेहे दारिद्र्यां शि × य च ।
तेन शान्ति प्रकुर्वीत जपहोमादिदानतः ।।

End :

प्राकारे च पुरद्वारे प्रासादेषु च वीथिषु ॥
तत्फलं ग्राम × × × गुरुकल्पमयोक्तः ॥
शांतिकर्माखिलं कार्यं पूर्वा × × × मेण तु ॥

Colophon :

इति वशिष्ठोक्तकपोतशांतिः ॥

175

Sl. No. 10256 काककपोतप्रवेशशांतिः Ms. No. P. 7401/73
(काककपोतोलूकगृध्रप्रवेशशांतिः)

Beginning :

× × × × काको वा कपोतो वा प्रवेशनम् ।
आरोहेच्च गृहं यस्य गृध्रोलूकौ × × × ॥
× × × × णं भक्षयो (?) भवेत् ।
तस्मात्सर्वप्रयत्नेन शांतिं कुर्यात् समाहितः ॥

End :

देवाः कपो × × × कपोतं समर्चयेत् ॥
× × × × × × × × ॥
× × × × × × × क्तविधानतः ।
पिचुमन्दषडश्वत्थ × × × × ॥

Colophon :

-- -- --

176

Sl. No: 10257 काकपतनशान्तिः Ms. No. P. 5635/33

Beginning:

काकसंयोगे दृष्टे तु अब्दार्धे मरणं ध्रुवम् ।
पुरमध्ये श्वेतकाकं तद्राष्ट्रं परिवर्जयेत् ॥
काकप्रवेशभवने पुण्ये व्याधिः प्रजायते ॥

End :

× × प्रवेशदुरितं ब्रूयाद्गौतमविस्तरात् ।
पुण्याहवाचनं कुर्यात् ब्राह्मणानपि भोजयेत् ॥
× × × × × × ×

Colophon :

+ + × × नशान्तिः ॥

177

Sl. No. 10258 काकप्रवेशशान्तिः (मानवीयसंहितीया) Ms. No. P. 734/22

Beginning :

काके गृहप्रविष्टे तु प्रायश्चित्तं विधीयते ।
प्रातः पुत्रविनाशाय सं × × वेगो विनाशनः ॥

End :

× × × × कृत्वाथ ब्राह्मणेभ्यस्सदक्षिणः ।
एवं कृते न सन्देहः काकशान्तिर्भवेत् ध्रुवम् ॥

Colophon :

इति मानवीयसंहितायां काकप्रवेशशान्तिस्समाप्ता ॥

178

Sl. No. 10259 काकप्रवेशनशांतिः (रुद्रयामलीया) Ms. No. P. 2914/2

Beginning :

× × × × त्पल्लवादिकान् ।
नववस्त्रेण × ष्ट्य तत्वायामीति पूजयेत् ॥
तस्य दक्षिणदिग्भागे स्थण्डिलं शितितण्डुलैः ।
चतुरश्रं समं कृत्वा पद्ममष्टदलं लिखेत् ॥

End :

दीनान्धकृपणादीनां भोजनं भूरिदक्षिणाम् ।
एवं यः कुरुते भक्त्या काकोत्पाताघवर्जितः ॥
धनधान्ययुतो मर्त्यो राज्यसौभाग्यसम्पदः ।
पुत्रपौत्रैः परिवृतः सुखी भवति सर्वदा ॥

Colophon :

इति रुद्रयामले काकप्रवेशनशान्तिः ॥

179

Sl. No. 10261 काकप्रवेशशान्तिः (ज्योतिषार्णवीया) Ms. No. P. 5587/16

Beginning :

अथातः संप्रवक्ष्यामि वायसोत्पातशान्तिकम् ।
मृत्योर्वक्त्रेण संजाताः वायसा बहुरूपतः ॥

End :

एवं यः कुरुते भक्त्या काकोत्पातविवर्जितः ।
धनधान्ययुतो राजा राज्यसौभाग्यसंयुतः ॥
पुत्रपौत्रैः परिवृतः सुखी भवति सर्वदा ॥

Colophon :

इति ज्योतिषार्णवे यामलोक्तकाकप्रवेशशान्तिः समाप्ता ॥

180

Sl. No. 10266 काकप्रवेशशान्तिः (वायवीयसंहितीया) Ms. No. P.8178/19

Beginning :

अतः परं प्रवक्ष्यामि वायुः प्रविशेत् ग्रहप्रवेशं द्वारभागेषु मासमेकं चिवर्जयेत् (?) ।

अतः परं प्रवक्षामि वायुः प्रविशेद्गृहे ।
प्रवेशं द्वारभागेषु मासमेकं विवर्जयेत् ॥
देवालये गृहे वापि शीघ्रं मृत्युमवाप्नुयात् ॥

End :

तदर्थ ब्रह्मणे दद्यात् सदस्याय तदर्धकम् ।
ऋत्विग्भ्यो दक्षिणां दद्यात् ततः शांतिर्भविष्यति ॥
आयुरारोग्यमैश्वर्य पुत्रपौत्रश्च विन्दति ॥

Colophon :

इति वायवीयसंहितायां काकप्रवेशशांतिः समाप्ता ॥

Extra information:

ग्रन्थान्ते इन्द्रः, प्रतिमादानमन्त्रः, इन्द्रस्वरूपः + + + शांतिकं इति दृश्यते ॥

181

Sl No 10271 काकप्रवेशशांतिः (वायवीयसंहितोक्ता) Ms. No. P. 10041/14

Beginning :

अथातः सम्प्रवक्ष्यामि वायसः प्रविशेद्गृहम् ।
प्रवेशं द्वारमार्गेषु मासमेकं विवर्जयेत् ।
यदि द्वारान्तरं गच्छे × × क्षणा(?)सन्तु विवर्जयेत् ।
देवालये गृहे वापि शीघ्रं मृत्युमवाप्नुयात् ॥

End :

गोभूहिरण्यवासंसि आचार्याय निवेदयेत् ।
तदर्थं ब्रह्मणे दद्यात्सदस्याय तदर्धकम् ॥
ऋत्विग्भ्यो दक्षिणां दद्यात्ततः शांतिर्भविष्यति ।
आयुरारोग्यमैश्वर्यं पुत्रपौत्रश्च विन्दति ॥

Colophon :

वायुसंहितायां काकप्रवेशशांतिः ॥

182

Sl. No. 10273 काकभूतिप्रवेशशांतिः (यामलोक्ता) Ms. No. P. 604/35b

Beginning :

अथातः संप्रवक्ष्यामि वायसागतशांतिकम् ।
मृत्योर्वक्त्रेण सञ्जातवायसा बहुरूपतः ॥
सितासितं च रक्तं च चित्रं चेति प्रकीर्तितम् ॥

End :

एवं यः कुरुते भक्त्या काकोत्पातार्थवर्जितः ।
धनधान्ययुतो राजा राज्यसौभाग्यसंयुतः ॥
पुत्रपौत्रैः परिवृतः सुखी भवति सर्वदा ॥

Colophon :

इति यामळोक्तकाकमूतिप्रवेशशांतिः समाप्ता ॥

183

Sl. No. 10274 काकमलोद्भवशांतिः (बोधायनीया) **Ms No. P. 4218/9**

Beginning

पूजाद्रव्याणि होमद्रव्याणि चादाय कर्ता बन्धुमित्रसह स्वस्तिसूक्तगीतवाद्यादिघोषैः अश्वत्थ-समीपं गत्वा अश्वत्थमूले वेदिकां कृत्वा मण्टपतोरणाद्यैः अलंकृत्य पत्नीसमेतः मङ्गलस्नानं कृत्वा ॥

End :

अनुप्रवचनं चैव पालाशो पूजहोमकौ ।
एवं विना कुते सर्वं उपवीतादि कारयेत् ॥
उपवीतवस्त्रमौञ्जि-अजिनानि च तत्तन्मन्त्रैश्च धारणं कृत्वा ग्रन्थान्तरेण विस्तारितम ॥

Colophon :

इति बोधायनोक्ताश्वत्थोपनयनाङ्गकाकमलोद्भवशान्तिः सम्पूर्णा ॥

184

Sl. No. 10275 काकमलोद्भवशान्तिः (शौनकीया) **Ms. No. P. 4247/1**

Beginning :

यजमानः प्राणायामपूर्वकं तिथ्यादि सङ्कीर्त्य × × त्यादिदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं + शौनकोक्तकाकमलोद्भवशान्तिकर्म करिष्यमाणः तदादौ विघ्नेश्वरपूजां कुर्यात् ॥

End ;

धेनुं पयस्विनीं दद्यादाचार्याय सदक्षिणाम् ।
दश दानानि निर्वर्त्य ब्राह्मणान् भोजयेत्ततः ॥

एवं कृते च विधिवच्छान्तिकर्मणि भक्तितः ।
काकविष्ठोद्भवं दोषं निवारयति तत्त्वतः ।।

Colophon :

इति शौनकोक्तकाकमलोद्भवशान्तिः समाप्ता ॥

185

Sl. No. 10281 काकथुर्मनदर्शनशान्तिः (गार्ग्यीया) Ms. No. P-1967/1

Beginning:

गार्ग्यः–

उत्पाता विविधा लोके दिवि भूमान्तरिक्षगाः ।
तेषां नामानि शान्तिं च सम्यग्वक्ष्ये पृथक् पृथक् ।

End :

ब्राह्मणान् भोजयेत्पश्चाच्छान्तिवाचनपूर्वकम् ।
एवं यः कुरुते शान्तिं सर्वदोषापनुत्तये ॥

Colophon:

× × गार्ग्योक्तकाकमैथुनशान्तिः समाप्ता ॥

186

Sl. No. 10282 काकमैथुनदर्शनशान्तिः (बोधायनीया) Ms. No. P. 3085/59

Beginning :

अथातः काकसङ्गमशान्तिं व्याख्यास्यामः– दृष्टपुरुषस्य महापातकनिवृत्त्यर्थं शान्तिं प्रकुर्वीत। शुचौ समौ देशे गोमयेन गोचर्ममात्रमुपलिप्य प्रस्थाष्टभिः कृष्णैर्वान्यैस्तदर्धैस्तण्डुलैर्माषैस्तदर्धं तिलैश्चारत्निमात्रं चतुरश्रमुपलिप्य ॥

End :

श्रोत्रियाय ब्राह्मणाय आज्यदानं कम्बलपा × × स्तम्भ × × न् दत्वा सर्वपापैः प्रमुच्यते इत्याह भगवान् बोधायनः ॥

Colophon

काकसङ्गमशान्तिः समाप्ता ॥

187

Sl. No. 10284 काकमैथुनदर्शनशान्तिः (शौनकीया) Ms. No. P. 4720/34

Beginning :

अथ काकमैथुनशांतिः—

उत्पाता विविधा लोके दिव्यभौमान्तरिक्षगाः ।
तेषां नामानि शान्ति च शौनकेन विनिर्मितम् ॥
दिवा वा यदि वा रात्री यः पश्येत्काकमैथुनम् ।
समरे मृत्युमाप्नोति अथवा स्थाननाशनम् ॥

End :

यथाविलानुसारोऽयं न्यूनाधिक्यं न कल्पयेत् ।
आचार्याय श्रोत्रियाय गां दद्याच्च कुटुम्बिने ॥
ब्राह्मणेभ्यो विशिष्टेभ्यो यथशक्त्या च दक्षिणां ।
ब्राह्मणान् भोजयेत्पश्चाच्छांतिकर्म समाहितः ।
एवं यः कुरुते सम्यग्दृष्टिदोषस्य शान्तये ॥

Colophon :

इति शौनकीये काकमैथुनशांतिः समाप्ता ॥

188

Sl. No. 10292 काकमैथुनदर्शनशांतिः Ms. No. P. 9167/40

(काकगृध्रनकुलमैथुनदर्शनशांतिः)

Beginning :

काकगृध्रमयूराणां नकुलानां च मैथुनम् ।
दृश्यते येन तस्येह मण्डले ह्यायुषः क्षयः ॥
ज्येष्ठपुत्रविनाशो वा भवेद्वा दारनाशनम् ।
पुर्वोक्तविधिना शांतिः कार्या च चतुरानन ॥

End :

सम्भोज्य द्वादशान् विप्रान् आदित्यादिनवग्रहान् ।
आचार्याय च दातव्यं गोदानं वस्त्रमेव च ॥
पुण्याहं वाचयेद्विप्रान् स्नापयेत् कुम्भचारिणाम् ।
उत्पातानि च यो दृष्ट्वा कारयेत्तस्य शांतये ॥

Colophon :

इति काकादिमैथुनदर्शनशांतिः ॥

189

Sl. No. 10299 काकस्पर्शनशांतिः Ms. No. 5587/68

(गार्ग्यीया – विहङ्गस्पर्शनशांतिः)

Beginning ;

अथ काकविहङ्गमादिशिरःस्पर्शनफलमुच्यते—

विष्ठा काकस्य शिरसो गत्वा व्याधिर्यस्तत्रनाशनम् ।
नराणां च नृपाणां च आयुः क्षीणं च दुर्गतिः ॥ (?)

End :

पावमानानुवाकेन तच्छंयोरनुदात्तकम ।
वासोहिरण्यगोदानं प्रयच्छेत् दक्षिणां ततः ॥
ब्राह्मणान् भोजयेत् पश्चात् कारयेत् स्वस्तिवाचनम् ॥

Colophon :

इति गर्ग्योक्तविहङ्गादिशिरःस्पर्शनशांतिविधिः समाप्ता ॥

190

Sl. No. 10300 काकस्पर्शनशांतिः Ms. No. P. 9428/31

Beginning :

वराह उवाच—

य × त स्पृशेत्काको यदा यस्य शिरस्स्थलम् ।
तेन शांतिः विधातव्या ध्रुवं मकरशान्तये ॥
निष्कमात्रसुवर्णेन तदर्धार्धेन वा पुनः ॥

End -

× × सदक्षिणां दत्वा ब्राह्मणान् भोजयेत्सुधीः ।
आचार्याय × × × × × × × ॥
एवं कृते तस्य शांतिः भवेदेवान्यथा न तु ।
लभते + + + + + मनोरथाः ॥

Colopoon .

इति वराहपुराणे काकस्पर्शशांतिः ॥

191

Sl. No. 10301 काकविष्ठाशान्तिः Ms. No. P. 60/55

Beginning :

काकविष्ठां प्रवक्ष्यामि स्पर्शने विष्ठसम्भवे।
शिरसि व्याधिमाप्नोति ललाटे धननाशनम् ॥
नेत्रद्वये बन्धुनाशः श्रोत्रयोः दीर्घरोगिता।
कण्ठे शत्रुमवाप्नोति कपोलें राजविग्रहम् ॥

End :

पृष्ठे मरणमाप्नोति ऊरुभ्यां स्त्रीविनाशनम्।
जानुभ्यां बन्धनप्राप्तिः पादयोर्मरणं ध्रुवम् ॥
मृत्युयोगे दग्धदिने घाते च विषनाडिषु।
चन्द्राष्टमे च जन्मर्क्षे अपमृत्युभयप्रदः ॥
तद्दोषपरिहाराय शांतिं कुर्यात्तु यत्नतः ॥

Coloohon :

– – –

192

Sl. No. 10302 काकविष्ठाशान्तिः (नारदोक्ता) Ms. No. P. 734/45

Beginning :

काकविष्ठां × × × × ललांटे × × नाशनम्।
नेत्रद्वये बन्धुनाशं श्रोत्रयोर्दीर्घरोगिता ॥
कण्ठे शत्रुमवाप्नोति क × × × × ×।
× × × × × × मे बन्धुविनाशनम् ॥

End :

एतैर्मन्त्रैः प्रोक्षणं वा सर्वदोषोपशान्तये।
गोदानं तिलदानं च ब्राह्मणा × × × ॥
× × × × × × × × संशयः ॥

Colophon :

इति नारदोक्ता काकविष्ठाशांतिस्समाप्ता ॥

193

Sl No 10304 काकविष्ठाशांतिः (शौनकीया) Ms. No. P. 3023/75

Beginning :

स्पर्शने काकविष्ठायाः प्रवक्ष्ये शान्तिकं फलम् ।
शिरसि व्याधिमाप्नोति ललाटे धननाशनम ॥

End :

गोदानं तिलदानं च पश्चात् ब्राह्मणभोजनम् ।
आयुरारोग्यमैश्वर्य लभते नात्र संशयः ॥

Colophon:

इति शौनकीये काकविष्ठाशान्तिः ॥

194

Sl. No. 10320 काकोत्पातशांतिः Ms. No. P. 10041/13

Beginning :

अथातः सम्प्रवक्ष्यामि काकोत्पातस्य लक्षणम् ।
वायसः कृष्णकण्ठश्च पुञ्जातिः प्रतिधीयते ॥
स्त्रीजातिः श्वेतकण्ठश्च सानुकारोपमुच्यते । (?)
नारी वा पुरुषाकारा यवगारप्रवेशनम् ।ः (?)
धनधान्यार्थसन्तानपशुपुत्रविनाशकृत ॥

End :

प्राची × तीचीशनाथास्सर्वदेवोत्तमोत्तमाः ॥
प्रभ अभयंकरंदानेन अभयं कुरु मे प्रभो ॥
नागपाशधरो नक्रः वायसः पाशमोचनः ।
तव मूर्तिप्रदानेन सर्वारिष्टं निवारय ॥

ब्राह्मणान् भोजयित्वाथ यथावित्तानुसारतः ।
काकोत्पातभयैर्मुक्तो जीवेद्वर्षशतं नरः ॥

Colopnon :

इति काकशांतिः ॥

195

Sl. No. 10321 काकश्येनाद्युपहतिशांतिः Ms. No. P. 9764/46

Beginning :

विष्णुधर्मोत्तरे–

क्रव्यादाः पक्षिणो यस्य मूर्ध्नियसन्ताडन्ति च ।
मस्तके त्वग्निदाहेऽपि मलप्रसवदूषिते ॥
शस्त्रछेदे दन्तखादे शुक्लछायादिदूषिते ।
विनापि पतनं सम्यक् केशानां शुद्धिरुच्यते ॥

End :

ब्राम्हणाय ततो दद्यात्कुम्भं वस्त्रं सदक्षिणम् ।
आज्यावलोकनं कुर्याद्दानानि च विशेषतः ॥
सर्वोपद्रवशांत्यर्थं धेनुं दद्यात्सदक्षिणाम् ।
ब्राह्मणान् भोजयेच्छ्रद्धात्तस्माद्दोषात्प्रमुच्यते ॥

Colophon :

इति काकश्येनाद्युपहतिशांतिः ॥

196

S. No. 10322 काकाहतिप्रवेशशांतिः Ms. No. P. 3804/19

Beginning:

अथातः संप्रवक्ष्यामि वायसाहतिशान्तिकम् ।
मृत्योर्वक्त्रात्तु संजाताः वायसा बहुरूपतः ॥
सितासिताश्च रक्ताश्च चित्राश्चेति प्रकीर्तिताः ॥

End :

एवं यः कुरुते भक्त्या काकोत्पातादिवर्जितः ।
धनधान्ययुतो राजा राज्यसौभाग्यसंयुतः ॥
पुत्रपौत्रैः परिवृतः सुखी भवति सर्वदा ॥

Colophon :

इति यामलोक्तकाकाहतिप्रवेशशांतिः ॥

197

Sl. No. 10325 काकाहतिप्रवेशशांतिः Ms. No. P. 9965/86

Beginning :

काकघातं प्रवक्ष्यामि स्पर्शने दुःखसम्भवः ।
शिरसि व्याधिमाप्नोति ललाटे धननाशनम् ॥
नेत्रद्वये बन्धुनाशः श्रोत्रयोः दीर्घरोगिता ।
कण्ठे शत्रुमवाप्नोति कपोले राजविग्रहम् ॥

End :

अभिषेकं ततः कुर्यात्त्राम्बमानीभिरेव च ।
अन्यैर्मन्त्रैः प्रोक्षणं च सर्वदोषोपशांतये ॥
गोदानं तिलदानं च ब्राह्मणान् भोजयेत्ततः ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥

Colophon :

इति नारदोक्तकाकघातशांतिः ॥

198

Sl. No. 10326 काकोलूककपोतशांतिः Ms No. P. 2579/35

Beginning :

काकोलूककपोतानां इत्थं शान्तिर्निरूपिता ।
वाराहप्रमुखैः पूर्वं सर्वं संक्षिप्य कथ्यते ॥
यमः कपोतरूपेण गृहं प्रविशते यदि ॥

End :

विप्रेभ्यो दक्षिणां दद्यात् घोषशांति च वाचयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् बन्धुभिस्सह भोजयेत् ॥
एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते ॥

Colohhon :

इति काकोलूककपोतशांति· ॥

199

Sl. No. 10329 कालचक्रदानविधिः Ms. No. P. 3804/79

Beginning :

अथ कालचक्रदानं मृत्युजयार्थम् –

चक्रं रौप्यमयं कृत्वा मुक्तारश्मिमयीकृतम् ।
कृत्वामुष्टिशरच्चन्द्ररश्मिमन्धन्दिनस्थितम् ॥
तमांस्यनेकरूपाणि गात्रेषु च समन्ततः ॥

End :

ततस्तु भोजयेद्भक्त्या विप्रान् द्वादशसंख्यया ।
स्वयमक्षारलवणं भुञ्जीत सकृदेव हि ॥
एवं कृते नरो नूनं चिरं जीवेन्न संशयः ॥

Colophon :

इति कालचक्रदानविधिः ॥

200

Sl. No. 10331 कालपुरुषदानविधिः Ms. No P. 9428/92

Beginning :

रचनाप्रकारः–

महाभयमहाव्याधिक्षोभसङ्कटमृत्युवा × मदुत्पातगृहसङ्क्रमानि निशि इन्द्रचाप-दिवानक्षत्रदर्शन-देवबिम्बादिचलन-वृक्षादिरुधिर × × × × कालेषु, देवालयादिपुण्यदेशेषु ॥

End :

कालपुरुषं पूर्वोक्त फलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । दशदान आचार्याय दद्यात् । तदा × गे कृष्णां गां ब्राह्मणाय दद्यात् । तन्मुखं नावलोकयेत् । यस्य स्मृत्येत्यादि ॥

Colophon:

इति कालपुरुषदानपद्धतिः ॥

201

Sl· No· 10332 कालपुरुषदानपद्धतिः (शैवपुराणांतर्गता) Ms·No. P· 9428/127

Beginning :

रचनाप्रकारः –

कृष्णाष्टमी-कृष्णचतुर्दशी-कृष्णचतुर्थी-संक्रांति-ग्रहण-जन्मनक्षत्रादिषु पुण्यकालेषु देवालयादि। पुण्यदेशेषु ॥

End :

सार्धशतद्वयदक्षिणां च तुभ्यमहं सम्प्रददे, शुनश्शेफकरणं तस्मै तत्सर्वं निवेदयेत् - प्रणिपत्य ब्राह्मणं विसर्जितं × × खं नावलोकयेत् यस्येत्यादि ।

Colophon :

इति शैवपुराणे ईश्वरप्रोक्ते कालपुरुषदानपद्धतिः ॥

202

Sl· No. 10333 कुजशांतिः Ms· No· P· 604/2

Beginning ;

अथातः सम्प्रवक्ष्यामि भौमदोषप्रशांतये ।
जलहीने धरापुत्रे देहः पिण्डो भवेत्तथा ॥
अंगरोगादिश्लेष्मं च युद्धादिभयमेव च ।
सर्वदा सर्वकार्येषु विघ्नं निष्फलमेव वा ॥

\+ + + + + + +

स्थानच्युतिर्विवादश्च कुर्यान्नृणां धरासुतः ।
तस्माच्छांतिं प्रकुर्वीत भौमवारे त्रिजन्मसु ॥

End:

एवं यः कुरुते भक्त्या सुखी भवति रक्षणात् ।
ऋणं न जायते तस्य धनं प्राप्नोति तत्र च ॥
× × × × × परां गतिम् ।
रुद्रप्रीतिकरं ह्येतत् शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति भविष्योत्तरे ईश्वरनारदसंवादे अङ्गारकशांतौ अनडुहकल्पः समाप्तः ॥

203

Sl. No. 10334 कुजशांतिः (यामलोक्ता–अंगारकशांतिः) **Ms. No. P.3023/155**

Beginning

अथातस्संप्रवक्ष्यामि भौमदोषोपशांतये ।
बलहीने धरापुत्रे देहपीडा भवेत्तदा ॥

End :

ऋणदारिद्र्यदुःखादिरोगदोषभयापहः ।
इह लोके सुखी भूत्वा पश्चाच्छिवपुरं व्रजेत् ॥

Colophon :

इति यामलोक्तकुजशांतिस्समाप्ता ॥

204

Sl. No. 10335 कुजशांतिः (अंगारकशांतिः) **Ms. No. P. 7935/6**

Beginning :

अथातस्सम्प्रवक्ष्यामि भौमदोषोपशांतिदम् ।
बलहीने धरापुत्रे देहपीडा भवेत्तथा ॥

End :

× × × गादिदुःखादिलोमदोषभयच्युतः ।
भौमलोके सुखी भूत्वा ह्यंते शिवपुरं व्रजेत् ॥

Colophon :

इति यामलोक्ताङ्गारकशांतिः ॥

205

Sl. No. 10336 कुजार्तवशान्तिः Ms. No P. 7935/47

Beginning:

कुजस्तु सप्तमस्थोऽपि कमलं हेमनिर्मितम् ।
कुजरूपं ततः कृत्वा निष्कमात्रसुवर्णतः ॥
स्थण्डिलोपरि संपूज्य तत्तद्वस्त्राक्षतादिभिः ।
अग्निर्मूर्धेति मन्त्रेण षोडशैरुपचारकैः ॥

End :

गृह्योक्तसमिधाज्येन होमं कृत्वा विधानतः ।
अभिषेकं ततः कुर्यात् प्रतिमादानमाचरेत् ॥
सर्वदोषहरं पुण्यं दम्पत्योस्सुखमाप्नुयात् ॥

Colopoon :

-- -- --

206

Sl. No. 10337 कुम्भाभिषेचनशांतिः Ms No. P. 3(23/131

(अलक्ष्मीहरशांति – यामलोक्ता)

Beginning :

× × × × अलक्ष्मीहरकुम्भाभिषेकं कमलासन ।
श्रीमतां च नृपाणां च बालानां राजयोषिताम् ॥
सुकुमारांगिनां चैव यूनां चैव विशेषतः ॥

End :

× × × × वस्त्र कण्ठसूत्र सकंचुकम् ।
गन्धपु × × दीनि दद्यात्संमृष्टभोजनम् ॥
पुत्रपौत्रधनैर्युक्तः भूतिमान् स्यान्न संशयः ॥

Colophon :

इति यामलोक्तालक्ष्मीहरकुम्भाभिषेकविधिः ॥

207

Sl. No. 10338 कुम्भाभिषेचनशांतिः Ms. No. P. 5587/56

(हेमाद्रीया– अलक्ष्मीहरशांतिः)

Beginning :

अथ अलक्ष्मीहरकुम्भाभिषेकविधिरुच्यते । कमलासनः –

श्रीमताञ्च नृपाणां च बालानां राजयोषिताम् ।
सुकुमाराङ्गनानां च यूथानां च विशेषतः ॥

End :

लक्ष्मीभूतिप्रदानेन भाम मे देहि सर्वदा ।
कटकं दक्षिणां दद्यादङ्गुलीयकमेव वा ॥
सुवासिन्यै ततो वस्त्रं दद्यात् समृष्टभोजनम् ।
पुत्रपौत्रः परिवृतो भूमिवंतो न संशयः(?) ॥

Colophon :

इति हेमाद्रौ शांतिप्रकरणे अलक्ष्मीहरकुम्भाभिषेकविधिः समाप्तः ॥

208

Sl. No. 10339 कुहूप्रथमार्तवशान्तिः (ब्रह्मसंहितांतर्गता) Ms. No. P. 5587/46

Beginning:

अथ कुहूवेषाप्रथम-ऋतुशांतिर्विधीयते –

रजस्वला भवेन्नारी प्रथमे कुहुरेव हि ।
तस्य शांतिविधानाच्च कुर्याद्यः पुत्रवाञ्छितः ॥

End :

कुर्याच्च शुभमाप्नोति न कुर्यादशुभं भवेत् ।
रजसा च स्वयं दृष्ट्वा लौकिकाचारमाचरेत् ॥
श्रुतिस्मृत्युक्तमार्गेण गर्भाधानं च कारयेत् ॥

Colophon :

इति हेमाद्रौ ब्रह्मसंहितायां शांतिप्रकरणे दुष्टतिथिवारनक्षत्रयोगकरणे प्रथमार्तवशांतिः समाप्ता ॥

209

Sl. No. 10340 कुहूशांतिः (शौनकीया) Ms No. P. 60/20

Beginning :

अथातः सम्प्रवक्ष्यामि कुहूशांतिमनुत्तमाम् ।
पर्वान्तेषु चतुर्नाड्यां विषनाडीषु संभवः ॥
तत्तारकासु जातानां मृत्युरेव न संशयः ।
यस्य जन्मर्क्षगश्चन्द्रो विषनाड्या कुहूर्व्रजेत् ॥

Edn :

पुण्याहं वाचयेत् पश्चात् ब्राह्मणांश्च विसर्जयेत् ।
ब्राह्मणान् भोजयित्वाथ स्वेष्टैश्च सह भोजनम् ॥
अनेन विधिना कुर्यात् कुहूशान्तिमनुत्तमाम् ।
सर्वदोषविनिर्मुक्तः शतायुष्यं स जीवति ॥

Colophon :

इति शौनकीये कुहूशान्तिः समाप्ता ॥

210

Sl .No. 10341 कुहूशान्तिः (वासिष्ठसंहितीया) Ms. No.P. 734/13

Beginning :

पर्वान्तेषु चतुर्नाड्यः विषनाडी च सम्भवेत् ।
सा कुहूरिति विख्याता नराणां मृत्युदायिनी ॥
- - - - - - - - - - - - - - - - - - ।
तस्माच्छान्ति प्रवक्ष्यामि स्नानदानजपादिभिः ॥

End :

येमे दोषाः प्रबाधन्ते देहस्थाः सततं नृणाम् ।
गृहीष्व प्रतिरूपं तु सह रोगैर्द्विजोत्तम ॥

आ × × दानमन्त्रः ॥

Colophon :

इति वसिष्ठसंहितायां कुहूशांतिस्समाप्ता ॥

211

Sl. No. 10342 कुहूशांतिः (मार्कण्डेयपुराणोक्ता) Mss. No. P. 920/8

Beginning :

कुहूशांतिं प्रवक्ष्यामि × × दोषापनुत्तये ।
यस्य जन्मर्क्षगश्चन्द्रः विषनाड्यां कुहूर्व्रजेत् ॥
अभिचारेण किं तस्य स्वयमेव मरिष्यतः ॥

End :

एवं यः कुरुते भक्त्या सर्वे दोषा क्षयं ययुः ।
आयुरारोग्यसंपन्नः जीवेद्वर्षशतं नरः ॥

Colophon:

इति मार्कण्डेयपुराणोक्तकुहूयोगशांतिः ॥

212

Sl. No. 10344 कुहूशान्तिः (ज्योतिःषार्णवोक्ता – शौनकीया) Ms. No. P. 1723/19

Beginning :

शौनकः–

अथातः संप्रवक्ष्यामि शौनकेन महात्मना ।
यस्य जन्मर्क्षगश्चंद्रः विषनाड्यां कुहूर्व्रजेत् ॥
अभिचारेण किं तस्य स्वयमेव भविष्यति ।
जन्मलग्ने च जन्मर्क्षे जन्मराशौ यदा भवेत् ॥

End :

अभिषेको द्विजानां तु वस्त्रगोभूहिरण्यकैः ।
ब्राह्मणान् भोजयेच्छक्त्या कुहूदोषप्रशांतये ॥
एवं कृत्वा विधानेन नापमृत्युर्भवेद्यदि ।
न तस्य जायते व्याधिः न पीडा व्रतशांतिभिः ॥

Colophon :

इति श्रीज्योतिषार्णवे शौनकीये कुहूशांतिः समाप्ता ॥

213

Sl. No. 10347 कुहूशांतिः (यामलोक्ता) Ms. No. P. 3023/106

Beginning :

× × × × क्ष्यामि कुहूशांतिमनुत्तमाम् ।
यस्य जन्मर्क्षगश्चंद्रः विषनाड्यां कुहू × × ॥
अभिचारेण किं तस्य स्वयमेव मरिष्यतः ॥

End :

× × × × त सह बन्धुभिः ।
एवं यः कुरुते शांतिं तस्य सर्वाघसंक्षयः ॥
भविता नात्र संदेहः जीवेच्च शरदां शतम् ।

Colophon :

इति विधे(?) यामले कुहूशांतिः ॥

214

Sl. No. 10350 कुहूशान्तिः (शौनकीया) Mf. No. P. 3804/27

Beginning :

अथातस्संप्रवक्ष्यामि शौनकेन महात्मना ।
यस्यजन्मर्क्षगश्चन्द्रः विषनाड्यां कुहूर्भवेत् ॥
अभिचारेण किं तस्य स्वयमेव मरिष्यति ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् कुहूदोषोपशांतये ।
एवं कृत्वा विधानेन नापमृत्युर्भविष्यति ॥
न तस्य जायते व्याधिः न पीडा व्रतशांतितः ॥

Colophon :

इति शौनकीये कुहूशांतिस्समाप्ता ॥

215

Sl. No. 10351 कुहूशांतिः (ज्योतिषार्णवीया) **Ms. No. P. 4335/22**

Beginning :

अथ कुहूशांतिविधिरुच्यते । शौनकः—
अथातः सम्प्रवक्ष्यामि शौनकेन महात्मना ।
यस्य जन्मर्क्षगे × × विषनाड्यां कुहूर्भवेत् ॥
अभिचारेण किं तस्य स्वयमेव मरिष्यतः ॥

End :

अभिषेकः द्विजानां तु वस्त्रगोभूहिरण्यकैः ।
ब्राह्मणान्भोजयेच्छक्त्या कुहूदोषप्रशान्तये ॥
एवं कृत्वा विधानेनापमृत्युर्भवेयदि ।
न तस्य जायते व्याधिः न पीडा व्रतशांतिभिः ॥

Colophon :

इति ज्योतिषार्णवे शौनकोक्तकुहूशान्तिविधिः ॥

216

Sl. No. 10358 कुहूशांतिः (वृद्धवसिष्ठीया) **Ms No P. 5293/50**

Beginning :

कुहूशान्ति प्रवक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।
तद्विधानं च तन्मूर्ति जनानां भवचारिणाम् ॥

जन्मर्क्षे धन्विनामर्क्षे नराणामभिषेकमे ।
कुहूदोषो यदि भवेत् षण्मासं तु स जीवति ॥

End :

एवं कृते शमयति सम्यद्दोषः कुहूद्भवः ।
दशदानानि दद्याच्च यथावित्तानुसारतः ॥
पङ्गून् दिवान्धकृपणान् तोषयेद्भुवि दानतः ।
धनारोग्यसुतैर्युक्तः शतवर्षाणि जीवति ॥

Colophon :

इति ब्रह्मर्षिवृद्धवसिष्ठप्रोक्ता कुहूशान्तिः समाप्ता ॥

217

Sl. No. 10360 कुहूशान्तिः (शांतिरत्नमालान्तर्गता) Mss No. P. 5313/2

Beginning :

ग्रंथान्तरे शांतिरत्नमालायां भृगुः-

कुहूशांतिविधिं वक्ष्ये सरहस्यं यथाक्रमम् ।
पर्वान्ते घटिकायुग्मं पूर्वं प्रतिपदो युगम् ॥
विषनाडी चतुष्कम्मे कुहूसंज्ञा भयावहा ॥

End :

आचार्यत्वं तु यः कुर्या द्वा साल्यार्थमेव वा ।
मुखावलोकनं वर्ज्यमन्यथा मृत्युमाप्नुयात् ॥

Colophon :

इति कुहूशांतिः समाप्ता ॥

218

Sl. No. 10372 कुहूशांतिः(वायवीयसंहितीया देवीयामलीया) Ms. No. P. 6390/2

Biginning :

अथातः सम्प्रवक्ष्यामि कुहूशांतिमनुत्तमाम् ।
यस्य जन्मर्क्षगश्चन्द्रो विषनाड्यां कुहूंव्रजेत् ॥

अभिचारेण किं तस्य × × × × ।
× × वाथ कर्मर्क्षे संघाते सामुदायिके ॥
आधाने च विनाशर्क्षे जन्मांशे लग्नगे × × ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् शतमर्धं तदर्धकम् ।
क्षमाप्याथाशिषो लब्ध्वा भुञ्जीत सह बन्धुभिः ॥
एवं करोति यः शान्तिं तस्य सर्वाघसंक्षयः ।
भविता नात्र सन्देहः जीवेच्च शरदां शतम् ॥

Colophon

इति देवीयामले कुहूशांतिः ॥

219

Sl. No. 10377 कुहूशान्तिः (मार्कण्डेयोक्ता) Ms. No. P.7684/5

Beginning:

कुहूशान्तिं प्रवक्ष्यामि सर्वदोषोपशान्तये ।
यस्य जन्मर्क्षगश्चन्द्रो विषनाड्यां कुहूः व्रजेत् ॥
अभिचारेण किं तस्य स्वयमेव मरिष्यति ।
जन्मर्क्षे जन्मराशौ च विप्राणां तु विशेषतः ॥

End :

गोदानं दक्षिणादानं भक्त्या दद्याद्विशेषतः ।
अन्येभ्यो दक्षिणां दत्वा ब्राह्मणान् भोजयेदथ ॥
इति यः कुरुते भक्त्या सर्वदोषा लयं ययुः (!) ।
आयुरारोग्यसंपन्नश्चिरजीवी भवेद्ध्रुवम् ॥

Colophon :

इति मार्कण्डेयोक्तकुहूशान्तिः समाप्ता ॥

220

Sl. No. 10383 कुहूशांतिः (वृद्धवासिष्ठीया) Ms. No. P. 5167/20

Beginning :

यस्य नक्षत्रगश्चन्द्रो विषनाड्यां कुहूर्व्रजेत् ।
अभिचारेण किं तस्य स्वयमेव मरिष्यति ।
जन्मर्क्षे चाथ नामर्क्षे नृपाणामभिषेकभे ।
कुहूदोषो यदि भवेत् षण्मासान्न स जीवति ॥

End :

दासीरश्वं च विप्रेभ्यः दद्यात्तद्दोषशांतये ।
ब्राम्हणान् भोजयेत्पश्चात् यथाविभवविस्तरम् ।
एवं कृते शमं यांति सम्यग्दोषाः कुहूद्भवाः ।
धनारोग्यसुखैश्वर्यैः शतवर्षाणि जीवति ॥

Colophon :

इति वृद्धवसिष्ठब्रह्मर्षिविरचितायां संहितायां कुहूशांतिः समाप्ता ॥

221

Sl. No. 10403 कुहूशांति (देवीयामले) Ms. No. B 622/12

Beginning :

अथातः सम्प्रवक्ष्यामि कुहूशांतिमनुत्तमम् ।
यस्य जन्मर्क्षगश्चन्द्रो विषनाड्यां कुहूर्व्रजेत ।
अभिचारेण किं तस्य स्वयमेव मरिष्यति ।
जन्मर्क्षे वाथ कर्मर्क्षे संघात्ये सामुदायिके ॥

End:

क्षमाप्य चाशिषो लब्ध्वा भुञ्जीत सह बन्धुभिः ।
एवं करोति यः शांतिं तस्य सर्वाघसंक्षयः ।
भविता नात्र सन्देहः जीवेच्च शरदां शतम् ॥

Colophon :

इति देवीयामळ कुहूशांतिः समाप्ता ॥

222

Sl No 10404 कूपशान्तिः (शौनकीया) Ms No. P. 5658/2

Beginning :

एवंगुणतिथौ अमा सह दशपूर्वेषां परेषां मद्वंशानां सर्वेषां पितॄणां शाश्वतविष्णुलोक-प्राप्त्यर्थं + + + + कूपशान्त्याख्यं कर्म आचरिष्यमाणः ।।

End :

एवं धना (!) शुद्धिना कार्यमात्मनो हितमिच्छताम् ।
एवं वाप्यश्च कूपाश्च सरितश्चान्त्यवे (!) तथा ।।
धनं धान्यं यशस्यं च शान्तिपुष्टिकरं तथा ।
आयुःपुत्रधनारोग्यं महापातकनाशनम् ।।
सर्वान् कामानवाप्नोति विष्णुलोकं स गच्छति ।।

Colophon :

इति शौनकीये कूपशांतिविधिः समाप्ता ।।

223

Sl. No. 10405 कूर्मशान्तिः Ms. No. P. 308566

Beginning:

देवालये जपस्थाने क्षेत्रे वाथ गृहेऽपि वा ।
कूर्मदर्शनमात्रेण सद्यो यमपुरं व्रजेत् ।।
दर्शनस्थानसीमायां कृत्वा षोडशभागतः ।
मध्ये चतुष्टयं दद्यात् मृत्युदं शीघ्रमेव च ।।

End :

पावक इति चतसृभिः पयस्मान्यस्मूर्जनमित्येकानुवाकं + नमकं चमकं पुरुषसूक्तं इन्द्रसूक्तं घृतसूक्तम् ।।

Colophon :

— — --

224

Sl No 10406 कूर्मशांतिः (वृद्धगार्ग्यीया) Ms. No. P 3085/69

Beginning :

देवालये × × स्थाने क्षेत्रे × न्ये × हेऽपि वा ।
कूर्मदर्शनमात्रेण सद्यो यमपुरं व्रजेत् ॥
दर्शनस्थानसीमायां कृत्वा षोडशभागतः ।
मध्ये चतुष्टयं दद्यात् मृत्युदं शीघ्रमेव च ॥

End :

उक्तद्रव्येण मन्त्रेण होमं कुर्यात् ततो दोषात्मुच्यते ॥

Colophon :

वृद्धगार्ग्येणोक्तकूर्मशान्तिः समाप्ता ॥

225

Sl·No·10407 कूष्माण्डदानम् Ms. No.P. 5788/4

Beginning :

चित्तमूविचमूमत्तमूषासनायासनावासनादन्वहम् ।
साधुताऽसाधुतासाधितासाधिताः किं तया चिन्तया चिन्तयामरिशवम् ॥

End :

प्रवाल्मुक्तासहितं तिलतैलेन सव्येन वेष्टितम् ।
सवस्त्रं च सताम्बूल देयं सन्ततिमिच्छता ॥

दानमन्त्रः—

कूष्माण्डं बहुबीजाढ्यं ब्रह्मविष्णुशिवार्पितम् ।
तस्मात्तस्य प्रदानेन अतः शांतिं प्रयच्छ मे ॥

Colophon:

— — — —

226

Sl. No. 10409 कृकलासशान्तिः Ms No. P. 3924/19

Beginning:

शिरोमध्ये च पार्श्व वा कृकलासो पतेद्भुवि ।
मासत्रयान्मृत्युदस्स्यात् ये नराश्शांतिवर्जिता: ॥ + + +
तत्र शान्त प्रवक्ष्यामि मंत्रौषधविधानतः ।
सशिखावपनं कृत्वा पुण्याहं वाचयेद्बुधः ॥

End :

दन्तछेदे काकहते कृकलासदिपातने ।
आशिषो वाचनं कृत्वा ब्राह्मणान् भोजयेच्छुचिः ॥

Colophon :

इति कृकलासशान्तिस्समाप्ता ॥

227

Sl. No. 10410 कृत्तिकानक्षत्रशांतिविधिः (गार्ग्यीया) Ms. No. P. 9254/87

Beginning :

– – –व्या धिनक्षत्रशांतिकृत्तिके ।
अग्निहोत्रमुपासीत गर्गः पृच्छति कौशिकम् ॥
बन्धनं रोदनं चैव व्याधिनाशप्रपीडने ।
कथं मोहो भवेत्तेषां साध्यासाध्यप्रपीडने ॥

कौशिकः–

आधाने जन्मनक्षत्रे नैधने प्रत्यरेऽपि च ॥

End :

पौष्णे फलानि जुहुयात्सर्वे द्रव्यं ददन्ति(?)च ।
समिदष्टोत्तरशतं होममिष्टे द्विजन्मनाम् ॥
अवश्यमेतत्कर्तव्यं सद्यो माननवात्परम् ॥

Colophon :

इति गार्ग्योक्तकृत्तिकानक्षत्रशान्तिविधिः ॥

228

Sl. No. 10411 कृत्तिकार्तवशांतिः (रुद्रयामलीया) Ms. No. C.223915

Beginning :

आर्तवे कृत्तिकायां तु रोगो वाऽपि दरिद्रता ।
बहुदुःखवती चैव नान्या वन्ध्येति वा यदि ॥
तस्य शांतिं प्रवक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥

End :

तस्मात्त्वन्मूर्तिदानेन मम स्तु सकलं फलम् ।
ततस्तु दक्षिणार्थं च रक्तधेनुं प्रदापयेत् ॥
इमां शांतिं प्रकुर्वीत दम्पत्योरभिवृद्धये ॥

Colophon :

इति रुद्रयामले कृत्तिकार्तवशान्तिः ॥

229

Sl. No. 10418 कृत्याशांतिः Ms No P. 3023/133

(अभिचारशान्ति – शौनकीया)

Beginning

अथातः संप्रवक्ष्यामि कृत्याशांतिमनुत्तमाम् ।
अभिचारप्रणाशार्थं शौनकोऽहं द्विजन्मनाम् ॥
कुर्यात्स्वजन्मनक्षत्रमासे मासे समाहितः ।

End :

नैनं कृत्या विहिंसति कृतानि चरितं परः ।
प्रत्यङ्गिरस्य कल्पेन सर्वस्तत्प्रतिबाधते ॥
प्रत्यङ्गिरस्सकृद्विद्वान् न मरिष्येत्कदाचन ॥

Colophon :

इति शौनकीयरकृत्याभिचारशान्तिः ॥

230

Sl. No. 10422 कृत्रिमशांतिः (शौनकीया) Ms. No. 8178/1

Beginning ;

कृत्यशान्ति द्विजातीनां अभिचारप्रणाश × × ॥
× × शनार्थं जपन् मासैः ऋषिसम्मितम् ॥
कुर्यात् स्वजन्मनक्षत्रे समे काले समाहितः ।
सुसंस्नातो नवं वस्त्रं आचार्यः समलङ्कृतः ॥

End :

या साङ्गिरसकृत्पातु स्तुतां नाभिशापेरपुनः ।
प्रतयङ्गिरसकल्पेन सद्यस्ता प्रतिबोध्यसे ॥
प्रत्यङ्गिरसविषा तु सान्निध्यान × × × ॥

Colophon :

इति शौनकीये कृत्रिमशान्तौ एकोनविंशतिखण्डः ।

231

Sl. No. 10427 कृष्णचतुर्दशीजननशांतिः (रुद्रयामलीया) Ms. No. P. 2579/3

Beginning :

कृष्णपक्षचतुर्दश्यां प्रसूतिश्चेत्फलं शृणु ।
चतुर्दश्यां तु षड्भागे प्रथमो यत्न दोषभाक् ॥
द्वितीये पितरं हन्ति तृतीये मातरं तथा ॥

End -

ऋत्विग्भ्यो दक्षिणां दद्यात् यथावित्तानुसारतः ।
ब्राह्मणान् भोजयेत्पश्चात् गृह्णीयादाशिषस्स्वयम् ॥
इत्थं शांतिं प्रकुर्वीता सर्वरक्षाकरीं शुभाम् ॥

Colophon :

इति रुद्रयामळे कृष्णचतुर्दशीजननशान्तिः ॥

232

Sl. No. 10429 कृष्णचतुर्दशीजननशांतिः (गार्ग्यीया) Ms. No. P. 3804/30

Beginning :

मन्दरस्थं सुखासीनं गर्गं मुनिवरं शुचिम ।
नमस्कृत्वा तु पप्रच्छ शौनको मुनिपुङ्गवः ॥
शान्तिकर्माणि सर्वाणि त्वत्तो जानाम्यहं पुरा ।
अधुना श्रोतुमिच्छामि कृष्णपक्षचतुर्दशीम् ॥

End :

तस्मादनेन विधिना वित्तशाठ्यविवर्जितः ।
एवं यः कुरुते शान्तिं सर्वपापैः प्रमुच्यते ॥
सर्वान् कामानवाप्नोति चिरञ्जीवी सुखी भवेत् ॥

Colophon :

इत्युत्तरगर्गोक्तकृष्णचतुर्दशीजननशान्तिः समाप्ता ॥

233

Sl. No. 10431 कृष्णचतुर्दशीजननशांतिः (वृद्धगार्ग्यीय Ms. No. P. 4863/126

Beginning :

अथ कृष्णचतुर्दश्यां जातानां शांतिरुच्यते –

चतुर्दशी चतुर्धा तु जिभाज्या फलमस्य च ।
धनस्य पितृमातृणां हानिं तत्र विनिर्दिशेत् ॥

End :

आचार्याय तु गां दद्यात् ऋत्विग्भ्यो दक्षिणां तथा ।
वस्त्रालंकारदानैश्च सम्पूज्य ब्राह्मणैरपि ॥
एवं दोषविनिर्मुक्तो कृत्वा शांतिं यथाविधि ॥

Colopoon .

इति वृद्धगार्ग्योक्तकृष्णचतुर्दशीजननशांतिः ॥

234

Sl No. 10447 कृष्णमृगदानपद्धतिः (ब्रह्माण्डान्तर्गता) Ms No. P. 9458/112

Beginning :

रचनाप्रकारः –

अयनादिषु संक्रान्तिग्रहणयुगादिजन्मनक्षत्रेषु देवालयादिपुण्यदेशेषु गोमयानुलेपित-रङ्गवल्यादिरचितभूभागोपरि + + ब्रह्माण्डपुराणोक्तप्रकारेण कृष्णमृगदानंकरिष्ये ॥

End :

कृष्णमृगं मम पूर्वोक्तफलकामः तुभ्यमहं सप्रददे न ममेति दद्यात् । भूमिसहितमिति यथाशक्ति भूदानं कुर्यात् ; इत्यर्थः । यस्य स्मृत्येत्यादि ॥

Colophon :

इति ब्रह्माण्डपुराणोक्तप्रकारेण कृष्णमृगदानपद्धतिः ॥

235

Sl No. 10449 कृष्णाजिनदानपद्धतिः Ms. No. P. 9428/114

Beginning :

रचनाप्रकारः पद्मपुराणे –

ग्रहणादिपुण्यकालेषु देवालयादिपुण्यदेशेषु द्वादशहस्तप्रमाणषोडशहस्तमाणमन्त प्राकारंकृत्वा + + पद्मपुराणोक्तप्रकारेण कृष्णाजिनदानं करिष्ये ॥

End :

चतुर्भिः ब्राह्मणैः पुण्याहं वाचयित्वा दक्षिणां दद्यात् । गोचर्मप्रमाणम्–

सप्तहस्तेन दण्डेन त्रिंशदण्डानिवर्तनम् ।

त्रिभाग × नां गोचर्ममानमाह प्रजापतिः ॥

Colophon :

इति कृष्णजिनदानपद्धति ।

236

Sl. No. 10450 केतुप्रीतिदानविधिः Ms. No P. 7970/183

Beginning :

अथातः संप्रवक्ष्यामि केतुप्रीतिकरं शुभम् ।
बलहीने यदा केतौ धान्य-दिक्षयमेव च ॥
कलिसङ्करदोषादिदानात दुःखप्रदो भवेत् ।
तत्तद्दोषोपशान्त्यर्थं सर्वविघ्नक्षयाय च ॥

End :

पीडां दहतु सर्वार्थसिद्धिं वा विजयं कुरु ।
सुवर्णं दक्षिणां दद्यात् यथावित्तानुसारतः ॥
ग्रहदोषविनिर्मुक्तः सर्वोत्पातविवर्जितः ।
सर्वकर्मफलोपेतः धनधान्यान्वितः सुखी ॥

Colophon :

इति केतुप्रीतिदानविधिः ॥

237

Sl. No. 10441 केतुप्रीतिदानविधिः (यामलोक्ता) Ms.No. P. 9254/63

Biginning :

अथ केतुप्रीतिदानविधिः–

अथातः सम्प्रवक्ष्यामि केतुप्रीतिकरं शुभम् ।
बलहीने यदा केतौ धान्यार्थक्षयमेव च ॥
कलिसङ्करदोषादिनानादुःखभयादयः ।
ततद्दोषोपशांत्यर्थं सर्वविघ्नक्षयाय च ॥

End :

पीडां दहतु सर्वार्थसिद्धिं वा विजयं कुरु ।
सुवर्णद्रविणं दद्याद्यथावित्तानुसारत: ॥
ग्रहदोषविनिर्मुक्त: सर्वोत्पातविवर्जित: ।
सर्वकर्मफलोपेतो धनधान्यान्वित: सुखी ॥

Colophon :

इति यामलोक्तकेतुप्रीतिदानविधि: ॥

238

Sl. No. 10454 केतुशान्ति: (बोधायनोक्ता) Ms. No. P. 604/7

Beginning :

अथात: संप्रवक्ष्यामि केतुशांतिमनुत्तमाम् ।
देवासुरमनुष्याणां शान्तिं: केतोरनुत्तमाम् ॥
केतुदोषे समुत्पन्ने नाशमायान्ति तत्क्षणम् ।
वैरिभिर्नियतो राजा केतुदोषाविनाशित: ॥

End :

यथाशक्ति सुप्रसन्नवल्मीकप्रतिमां कृत्वा ब्राह्मणाय दक्षिणासहितां दद्यात् । ततो ब्राह्मणान् भोजयेदित्याह भगवान् बोधायन: ॥

Colophon :

इति बोधायनोक्तकेतुशान्ति: समाप्ता ॥

239

Sl. No. 10455 केतुशांति: (यामलोक्ता) Ms. No. P. 2239/90

Beginning :

अथात: संप्रवक्ष्यामि केतुशांतिमनुत्तमाम् ।
केतु × × समु × × × यमायाति तत्क्षणात् ॥
× × सेननलक्काहिं केतुदोषाद्विशान्तिक: ॥

End :

सवस्त्रप्रतिमां दद्यात् आचार्याय च गां शुभाम् ।
× × भ्यो दक्षिणां दद्यात् यथावित्तानुसारतः ।।
एवं यः कुरुते सम्यक् सर्वदोषैर्विमुच्यते ।।

Colophon:

इति यामलोक्तकेतुशान्तिः ।।

240

Bl. No. 10462 केतुशांतिः (हेमाद्रीया) Ms. No. 5587/26

Seginn n :

अथातः संप्रवक्ष्यामि केतुशांतिमनुत्तमाम् ।
देवासुरमनुष्याणां पूजयेत्तु विशेषतः ।।
केतुदोषे समुत्पन्ने यः कुर्याच्छांतिमाचरेत् ।।

End :

एवं यः कुरुते सम्यक् सर्वदोषविवर्जितः ।
ब्राह्मणान् भोजयित्वा च विप्राशीर्वचनैरपि ।।
केतुदोषविनिर्मुक्तः सुखी भवति नान्यथा ।।

Colophon :

इति हैमाद्रौ दानकाण्डे पैतामहोक्तकेतुशांतिस्समाप्ता ।।

241

Sl. No. 10463 केतुशांतिः (सारावलीया) Ms. No. P. 5635/90

Beginning :

यदा जन्तोर्भवेत्पीडा दारुणा प्राणहारिणी ।।
तदा शांतिं प्रकुर्वीत केतोस्तु परितुष्टये ।।
पूर्ववत्कल्पिते देशे कृष्णगन्धोक्षिते शुभे ।।

End :

एतच्छांतिं प्रकुर्वीत सर्वारिष्टविनाशिनीम् ।
.... दान् ग्रहानेतान् समर्चयेत् ॥

Colophon:

इति सारावल्यां केतुशांतिः ॥

242

Sl. No. 10475 केशदहनशांतिः (शौनकीया) **Ms. No P. 2914/41**

Beginning :

ह्रीयते यस्य केशाक्तं हुतमुक्पशुमूषकैः ।
तस्याभिषेचनं × × र्थांच्छान्तिं कुर्याद्द्विजाततः ।ः
चतुर्दिक्षु ततः कुम्भान् स्थापयेत् स्थानमण्टपे ।
प्रकुर्याल्लौकिकं सर्वं त्रिभिस्सूक्तैश्च पूरयेत् ॥

End :

मुहूर्तं × वतानि नित्यं जन्मनक्षत्रदेवता ।
पदाङ्गदेवताश्चैव एतां ह्यर्हन्तु देवताः ॥
एतैर्मन्त्रैः प्रपूज्यैश्च सुमुहूर्तेऽम्बुविन्दुभिः ।
यः कुर्यादभिषेकं तु सोऽभीष्टफलम × ते ॥

Colophon :

इति शौनकीये केशदहनशान्तिः ॥

243

Sl No 10480 केशादिदहनशांतिः (वसिष्ठोक्ता) **Ms. No. P. 5930/21**

Beginning :

मस्तके चेन्द्रलुप्ते तु ब्रह्मस्थानादितः फलम् ।
मस्तके स्वग्निदाहेऽपि मलप्रस्रवदूषिते ॥
काकश्वामादिनिहते शुक्लविण्ठादिदूषिते ॥

End :

ब्राह्मणाय ततो दद्यात् कुम्भं वस्त्रं च दक्षिणाम् ।
ब्राह्मणान् भोजयेत्पश्चात् तस्माद्दोषात्प्रमुच्यते ॥

Colophon:

इति वासिष्ठप्रोक्तकेशादिदहनशांतिः ॥

244

Sl. No. 10491 **कोटिहोमपद्धतिः(ग्रहयज्ञसमुच्चयीया)** **Ms. No. P. 9254/220**

Beginning :

अथ कोटिहोमप्रयोगः–

कोटिहोमसमन्विते नवग्रहयज्ञेन यक्ष्य इति सङ्कल्प्य विशेषः । कृत्वाचार्यः ब्रह्म-ऋत्विक्पूजानन्तरं आचार्यं प्रणम्य प्रार्थयेदेतेन मन्त्रेण ।

त्वं नो गतः पिता माता त्वं बन्धुस्त्वं परायणः ।
त्वत्प्रसादेन विषये सर्वं स्यान्मे मनोगतम् ।

End :

यथार्थं नातिलोमेन ततः शान्त्युदकेन च ।
प्रोक्षयेत् ग्राममध्ये तु व्याधीनां च विशेषतः ॥
एवं कृते तु ग्रामस्य पुरस्य नगरस्य वा ।
राष्ट्रस्य च महाभाग राज्ञो जनपदस्य च ॥
सर्वबाधाप्रशमनं शांतिर्भवति सर्वदा ॥

Colophon :

इति योगीश्वरकृते ग्रहयज्ञसमुच्चये ।
महातिथ्यादिसापेक्षाकोटिहोमस्य पद्धतिः ॥

245

Sl. No. 10492 **कोपिशांतिः** **Mss No. P. 9764/35**

Beginning :

अथातो बोधायनकल्पविधिना कोपिशांतिं प्रागाद्यष्टस्थानेषु वक्ष्यते । अस्यानुष्टुप् छन्दः । अघोर ऋषिः । यमो देवता । मृत्युस्वरूपप्रतिमां सवस्त्रां अजवाहनसहितां मृत्यवे स्वाहेति पूजामन्त्रेण पूजां कृत्वा – ॥

End :

अष्टोत्तरशतहोम-नवग्रहहोमेन गोदानादिदशदानानि कुर्यात् । ब्राह्मणभोजनं च विधिना दक्षिणां दद्यात् । तद्दोषपरिहारो भविष्यति ॥

Colophon :

-- -- -- --

246

Sl. No. 10493 क्रूरग्रहजन्मनक्षत्रशान्तिविधिः Ms. No. P. 2581/15
(वसिष्ठोक्ता)

Beginning :

अथ वसिष्ठप्रोक्तक्रूरग्रहजन्मनक्षत्रशांतिविधिरुच्यते –

सर्वाधीश नमस्तुभ्यं नागानां भगणाधिप

गृहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये ॥

End :

× × × × मायुष्यं तुष्टिपुष्टिविवर्धनम् ।

धनधान्याभिवृद्धिं च पुत्रपौत्रविवर्धनम् ॥

शांतिसौमनसं दिव्यं देहि मे पाणिपल्लवे ॥

इति प्रार्थनम् ॥

Colophon :

-- -- -- --

247

Sl.No. 10494 क्रूरवारजन्मनक्षत्रशांतिः (यामलोक्ता) Ms. No. P. 4863/25

Beginning :

मन्दवारे यदा यस्य जन्मनक्षत्रसंभवे ।

कृशायुरर्थहानिश्च नानारोगसमुद्भवः ॥

End:

मृत्युरोगभयैर्मुक्तः सर्वदोषविवर्जितः ।

सर्वान्कामानवाप्नोति सुखी भवति नान्यथा ॥

Colophon :

इति यामळोक्तक्रूरवारजन्मनक्षत्रशांतिः ॥

248

Sl. No. 10495 क्रूरवारजन्मनक्षत्रशान्तिः (वसिष्ठोक्ता) **Ms. No. P. 4863/26**

Beginning :

अतः परं प्रवक्ष्यामि वशिष्ठोक्तविधानतः ।
भानुभौमादिवारेषु जन्मनक्षत्रसंभवे ॥
रोगपीडा महादुःख धनहानिश्च जायते ॥

End :

× × क्रूरग्रहयुक्ता दुष्टग्रहनिरीक्षणात् ।
जातदोषान्निहन्त्याशु दद्यादायुः श्रियं सुखम् ॥

Coloohon :

× × × वासिष्ठोक्त-क्रूरवारयुक्तजन्मनक्षत्रशांतिः समाप्ता ॥

249

Sl. No. 10497 क्रूरवारजन्मनक्षत्रशान्तिः(वृद्धवासिष्ठीया) **Ms. No. P. 9254/71**

Beginning :

अथ क्रूरवारजन्मनक्षत्रशांतिः –

अतः परं प्रवक्ष्यामि वसिष्ठोक्तविधानतः ।
भानुभौमार्किवारेषु जन्मनक्षत्रसम्भवे ॥
रोगपीडा महादुःखं धनहानिश्च जायते ।
दुःस्वप्नभय × × तन्नसर्वकण्टकसम्भवः ॥

End :

तत्तद्दोषा विनश्यंति सर्वारिष्टविवर्जितः ।
पुत्रपौत्रैः परिवृतः सर्वकामफलान्वितः ॥

दुर्लभोपग्रहैर्युक्तो दुष्टग्रहनिरीक्षणात ।
जातदोषं निहन्त्याशु दद्यादायुः श्रियं सुखम् ।

Colophon :

इति वृद्धवसिष्ठोक्तक्रूरवारयुक्तनक्षत्रशांतिः समाप्ता ॥

250

Sl. No. 10501 क्षयमासशांतिः Ms. No. P.8810

Beginning:

यदाकदाचिद्देवेशि क्षयमासो भवेद्यदि ।
कार्तिकादिषु मासेषु क्षयमासस्तु जायते ॥

तद्वष जायते देवि अधिमासद्वयं तथा ।
तदा भयं भवेल्लोके दुर्भिक्षमरणादिकम् ॥

End :

कालस्वरूपी स शिवः ग्रहैश्च सहितो रविः ।
क्षयमाससमुद्भूतं दोषशांतिं प्रयच्छति ॥

Colophon :

क्षयमासशांतिः सम्पूर्णा ॥

251

Sl. No. 10502 क्षीरकुम्भदानविधिः (सर्वज्वरहरः) Ms. No.P. 2584/17

Beginning :

अथ रचनाप्रकारः—

रिक्तव्यतिरिक्तदिने भानुभौमवारे ग्रामाद्बहिःप्रदेशे × × × पे विघ्नवर्जिते गृहस्य ईशानदिग्भागे गोमयानुलेपितं + + तदुपरि मृण्मयकुम्भं निधाय क्षीरेणापूर्य ॥

End :

अर्चितरजतविनिर्मितज्वरमूर्तिसमन्वितं गन्धपुष्पाद्यलङ्कृतं क्षीरकुम्भं मम पूर्वोक्तफलकाम-स्तुभ्यमहं सम्प्रददे न ममेति स्यात् + + + + + दद्यात् यस्येत्यादि ॥

Colophon :

– – – –

252

Sl.No. 10503 क्षीरवर्धनविधिः (शौनकोक्तः) Ms. No. P. 60/34

Beginning :

गृहस्य पूर्वदिग्भागे गोमयेनोपलिप्य द्वादशदलपद्मं विलिख्य तन्मध्ये सुवर्णं संस्थाप्य प्राग्दिशि रथं विलिख्य तद्रथे सूर्यं ध्यात्वा + + + + अर्चयेत् ॥

End :

ब्राह्मणेभ्यः फलसहितां शक्तितो दक्षिणां दद्यात् । क्षीरोदनेन ब्राह्मणान् तोषयित्वा तैः आशीर्वचनं गृहीत्वा मनसोऽभीष्टं भवतीति विज्ञायते ॥

Colophon :

इति श्रीशौनकोक्तक्षीरवर्धनविधिः समाप्ता ॥

253

Sl. No. 10504 श्वासहरदानविधिः (श्वासश्वासहरः) Ms. No. P. 8923/21

Beginning :

अथ प्रकारान्तरेण श्वासश्वासहरं वक्ष्यते । कर्मविपाकसङ्ग्रहे –

कुरुक्षेत्रादिदेशेषु कालेषु ग्रहणादिषु ।
महादानं गृही यत्नान्निषिद्धान्यथवा स्वयम् ॥

End :

हिरण्यदानादिमन्त्राः यथा नमकाश्च परिभाषायां निरूपिताः अत्राप्या × × गुरुलघुभावेन महिषीदानादीनि व्याख्यानानि योज्यानि ॥

Colophon :

इति प्रकारान्तरेण श्वासखासहरदानविधिः ॥

254

Sl. No. 10505 गजशांतिः (नारदसंहितान्तर्गता) Ms. No. P. 734/27

Beginning:

पाकलाप्यमुपासीनं पप्रच्छाङ्गो महायशाः ।
उपस × × × × × × × × ॥
× × × × गदैर्युक्तारिष्टैरपि विनाकृताः ॥

End :

प्राविशत्स्वनिरुद्धस्तु स्तम्भे तिष्ठ शर × × तम् ।
× × सारो गोबलवान् भूपो × × वहः × × ॥

Colophon :

इति नारदीयसंहितायां × × × × × × × × ॥

255

Sl. No. 10507 गजशांतिः (बोधायनीया) Ms. No. P. 2732/14a

Beginning :

अथातो ग्रहशांतिविधिं व्याख्यास्यामः–

शुक्लपक्षेऽष्टम्यामेकादश्यां चतुर्दश्यां श्रोणायां ब्राह्मणान् अन्नेन परिविष्य, पुण्याहं स्वस्ति ऋद्धिमिति वाचयित्वा पुरस्तात् तिलतण्डुलान् निरूप्य ॥

End :

प्रणीता जलेन गजं प्रोक्ष्य, आपो हि ष्ठा मयो भुवः, हिरण्यवर्णाः शुचयः सन्तु पावकाः, पावमानीभिः स्वस्थानं गजं × × हस्तिवदेव दीर्घायुः भवतीत्याह बोधायनः ।।

Colophon :

– – – –

256

Sl. No. 10509 **गजशान्तिः (शौनकीया)** **Ms. No. P. 4180/12**

Beginning:

नवम्यामाश्वयुज्यां च कार्तिमाघ्योरथापि वा ।
हस्तिनं राजिनं (?) कुर्यादाज्यभागसमाधये ।।

प्रागुदक्प्रवणे देशे विशालसुमनोहरः ।
पूर्वस्यामुत्तरस्यां वा नगरस्य वहिर्दिशैः (?) ।।

End :

हस्तिनं गोहिरण्यादीन् वस्त्राभरणभूषणैः ।
दद्याद्यश्च स्वयं तस्मै सम्यगाभरणानि च ।।

एवं नीराजनादाज्यात् सर्वान् कामानवाप्नुयात् ।
निरुजस्ते गजाः सर्वे भविष्यन्ति न संशयः ।।

Colophon :

इति शौनकीये गजशांतिः ।।

101

Sl. No. 10514 **गण्डदोषजननशांतिः** **Ms. No P. 1723/16**

Beginning :

अथ नक्षत्रगण्डान्तशांतिरत्राभिधीयते ।
अश्विनीमघमूलादौ त्रिपट्कनवनाडिकाः ।।

रेवतीसर्पसंक्रान मासाश्च ऋतुसायक्रान्तौः ।
अश्विनीमघमूलादौ नाडिकाद्वितयं तथा ॥

End :

आप्यायस्वेति मन्त्रेण पूजां कुर्यात् समाहितः ।
दद्याद्वै दक्षिणां दिष्टां गण्डदोषप्रशांतये ॥

शुक्लं वागीश्वरं चैव ताम्रपात्रसमन्वितः ।
गण्डदोषप्रशांत्यर्थं दद्याद्वेदविदे शुचिः ॥

Colophon :

इति गण्डान्तशांतिः समाप्ता ॥

25१

Sl. No. 10516 गण्डदोषजननशांतिः Ms No. P. 3128/21

(गडान्तशांतिः मानता संहितान्तर्गन्य)

Beginning :

गण्डान्तेष्वेवमेव स्याद्विशेषस्तत्र कथ्यते ।
गोमुखप्रसवं कुर्याद्विधिना च विशेषतः ॥

सप्तमे पञ्चमे शुद्धिः तस्यामेनं समाहितः ।
पूर्वाषाढे च पुष्ये च पितरं मातरं सुतम् ॥
मातुलं च तथा हन्यात्प्रथमादयंशकक्रमात् ॥

End :

त्रियम्बकेन मन्त्रेण हुत्वा चाष्टोत्तरं शतम् ।
होमशेषं समाप्याथ कुम्भप्रोक्षणमाचरेत् ॥

आज्यावेक्षणदानं च तिलदानं तथैव च ।
आचार्यपूजनं कुर्याद्गण्डान्तं दोषनाशनम् ॥

Colophon :

इति मानवीयसंहितायां गण्डान्तशांतिः ॥

259

Sl. No. 10517 गण्डदोषजननशांतिः (वृद्धगार्ग्यीया) Ms. No. P. 3804/52

Beginning

अभुक्तादिगण्डदोषशांतिविधिरुच्यते । वृद्धगार्ग्य उवाच –

अश्विनीमघमूलादि त्रिषट्कं च नरद्विका (?) ।
रेवतीसर्पसंक्रान्ते तमाश्चरतु सायकः (?) ॥

End:

अकांस्यपात्रशङ्खेन नवनीतेन पूरितम् ।
तस्मादस्य प्रदानेन चन्द्रः प्रीतिकरो मम ॥

इति दानमन्त्रः ॥

Colophon :

इति वृद्धगार्ग्योक्ता अभुक्तादिगण्डदोषशांतिः समाप्ता ।।

260

Sl. No. 10519 गण्डदोषजननशांतिः (ऋषिप्रोक्ता) Ms. No. P. 4992/7

Beginning :

अथातस्संप्रवक्ष्यामि लोकानां हितकाम्यया ।
सर्वपापहरं नृणां आयुरारोग्यदायकम् ।।
तिथिगण्डे जातशिशोः शांतिं वक्ष्यामि सादरम् ॥

End :

आयुरैश्वर्यसंपन्नः पुत्रपौत्रयुतः सुखी ।
सर्वदोषविनिर्मुक्तः सदा विजयवान् भवेत् ॥

Colophon :

इति ऋषिप्रोक्ता तिथिगण्डजननशांतिः ॥

261

Sl· No. 10520 गण्डदोपजननशांतिः (अगस्त्यसंहितीया) Ms· No· P· 9428/1

Beginning :

अथातः सम्प्रवक्ष्यामि चित्रपुष्योत्तराशुचा (?) ।
जन्मर्क्षे तु प्रसूते तु शांतिकर्म विधीयते ॥
चित्राद्यध × ×मध्ये पूर्वापाढर्क्षे ×××तृतीये ॥

End :

यजमानाभिपेकं च कुर्य × × × दार्चनम् ।
× × × रात्वाभिमन्त्रेण × × माननुवाकतः ।
देवशं स्विति मन्त्रेण अभिपेकं समाचरेत् ॥

Colophon:

इत्यगस्त्यसंहितायां चित्रपुष्योत्तरापूर्वापाढाप्रसूतिगण्डदोषशांतिकल्पः समाप्तः ॥

262

Sl· No· 10521 गर्भस्रावहरशांतिः Ms·No. P· 909/16

Beginning :

अथ गर्भस्रावहरयज्ञोपवीतदानम् । अथ निदानं वृद्धगौतम आह–

स्रवद्गर्ता भवेत्सा तु बालकं हन्ति या विषैः ।

वायुपुराणे-

यज्ञोपवीतं कुर्वीत कांचनं च स्वशक्तितः ।
अत्यन्तवर्णयुक्तं च राजतं चोत्तरीयकम् ॥

अत्यन्तवर्णयुक्तकांचनमित्यन्वयः । उत्कृष्टमित्यर्थः । तेन काञ्चनेन + + +कारये दित्यर्थः ॥

End :

अनुव्रज्या तथाचार्यं प्रणिपत्य क्षमापयेत् ।
गर्भस्रावकराद्दोषादेवं कृत्वा प्रमुच्यते ॥

अनुव्रज्य तथाचार्यं प्रणिपत्य क्षमापयेत् ।
गर्भस्रावकराद्दोषादेवं कृत्वा प्रमुच्यते ॥

अस्मिन् कर्मणि स्त्रिया अधिकारः ॥

Colophon :

-- -- -- --

263

Sl. No. 10522 गवादिगृहारोहणशांतिः (यामलीया) Ms. No. P. 604/32

Beginning :

अतः परं प्रवक्ष्यामि गृहशांतिमनुत्तमाम् ।
गावो वा वृषभा वापि महिषो वा तुरङ्गमः ॥

गृहमारोहणं चेत् स्यात गृहं ग्रामं च नाशयेत् ।
गृहादिपत्युर्मरणं सर्वनाशो भविष्यति ॥

आचार्याय ततो दद्यात् गोयुगं वस्त्रदक्षिणे
ऋत्विग्भ्यो दक्षिणां दद्यात् शक्त्या ब्राह्मणभोजनम् ॥

End :

गोगृहारोहणोद्भूतसर्वदोषाः शमं ययुः ।
भवेत् वर्णगतं चैव अपमृत्युविवर्जितः ॥

Colophon :

इति यामलोक्तगवादिगृहारोहणशांतिः समाप्ता ॥

264

Sl. No. 10525 गवादिगृहारोहणशांतिः Ms. No. P. 5587/64

(ज्योतिषार्णवान्तर्गता)

Beginning :

गवादिगृहारोहणशांतिविधिरुच्यते–

अथातः संप्रवक्ष्यामि गवादिगृहरोहणम् ।
गावो वापि महिष्यो वा श्वानो वापि तुरङ्गमः ।।

गृहमारोहणं चेत्स्यात् गृह ग्राम च नाशनम् ।।

End :

आचार्याय ततो दद्यात् गोयुग्मं वस्त्रदक्षिणाम् ।
ऋत्विग्भ्यो दक्षिणां दद्यात् शक्त्या ब्राह्मणभोजनम् ।।

गोगृहारोहणोद्भूत सर्वदोषा लयं ययुः ।।

Colophon

इति ज्योतिषार्णवे गवादिगृहारोहणशांतिविधिः समाप्ता ।।

265

Sl. No. 10530 गुडचीकल्पशान्तिः (शौनकीया) Ms. No. P. 4180/70

SlBeginning :

शौनकोऽहं प्रवक्ष्यामि गुडचीहोममुत्तमम् ।
रोगार्तवैश्च जनितः ज्वरशूलादिकान् बहून् ।।

जिह्वारोगं च नाभिश्च अन्तर्गतव्रणस्तथा ।
शिरोव्याधिमहाज्वालान् व्रणस्फोटं विषज्वरम् ।।

End:

हरिद्रोदकशोणं च रोगेण न च दृष्टिमान् ।
तज्योतिग्रहमी × × निवारितसमाचरेत् (?) ।।

मृत्युरोगार्तवं नृणां तत्क्षणादेव नश्यात ।
सर्वारिष्टविनिर्मुक्तः सुखीभव न संशयः ।।

Colophon :

इति शौनकीये गुडूचीकल्पशांतिः ।।

266

Sl. No. 10531 **गुडादिदानविधिः** **Ms. No. P. 5988/6**

Beginning :

गुडदानम्–

इत्रेष्टं सर्वरसानां च मनःप्रीतिकरं परम् ।
गुडं कल्याणकृद्यस्मादतः शांतिं प्रयच्छ मे ।।

रसानामगुडं श्रेष्ठं लवणं बलवर्धनम् ।
सर्वस्वादुकरं यस्मात अतः शांतिं प्रयच्छ मे ।।

End :

तैलमुष्टिकरं नित्यं आयुष्यं बुध्दिवर्धनम् ।
अमङ्गल्यहरं नित्यं अतः शांतिं प्रयच्छ मे ।।

अयःपिण्ड तवाधीन सर्वाण्यस्त्राणि यानि च ।
अयःपिण्ड नमस्तुभ्यं अतः शांतिं प्रयच्छ मे ।।

Colophon :

-- -- -- --

267

Sl. No. 10533 गुप्तदानविधिः (हेमाद्रीया) Ms. No. P. 7970/171

Beginning :

गुप्तदानं प्रवक्ष्यामि रहस्याघापनुत्तये ।
मनोरथावाप्तिकरं सर्वदेवप्रियं सदा ।।

सर्वरोगापहरणं आचार्याघनिवारणम् ।
अगम्यागमदोषाघमृत्युदुःस्वप्ननाशनम् ॥

End :

कार्तवीर्यं हनूमन्तं स्मरेद्दानं समाचरेत् ।
नष्टराष्ट्रं पुनः प्राप्तौ पुण्डरीकं प्रदापयेत् ॥

राज्यलाभो न सन्देहः भुवि कीर्तियुतो नरः ।
कूश्माण्डफलदानेन सर्वसिद्धिर्भवेद्ध्रुवम् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे गुप्तदानविधिः समाप्ता ॥

268

Sl. No. 10534 गुरुप्रीतिदानविधिः (यामलीया) Ms. No. P. 604/11

Beginning :

अथातः सम्प्रवक्ष्यामि गुरोः पीडाहरंसमम् ।
जीवरूपी सदा नृणां जीव इत्यभिधीयते ॥

बलहीने यदा जीवे जीवो निर्जीववन्नृणाम् ॥

End :

दक्षिणां च ततो दद्यात् शांतिसूक्तं जपेदथ ।
सर्वविघ्नविनिर्मुक्तः सर्वकामफलान्वितः ॥

इह लोके सुखी भूत्वा पश्चात् रुद्रपदं व्रजेत् ॥

Colophon :

इति यामलोक्तगुरुप्रीतिदानविधिः ॥

269

Sl. No. 10536 **गुरुशांतिः (यामलीया)** **Ms.No. P. 604/4**

Beginning :

अथातः सम्प्रवक्ष्यामि गुरुदोषापनुत्तये ।
प्राणिनां जीवरूपत्वात गुरुर्जीव इति स्मृतः ॥

बलहीनो यदा जीवः तस्माच्छांतिं समाचरेत् ।
जन्मस्थितो यदा जीवः देहपीडाभयं तथा ॥

End :

सुवर्णदक्षिणां दद्यात् यथाविचानुसारतः ।
ब्राह्मणान् भोजयेत् पश्चात् स्वयं भुञ्जीत वाग्यतः ॥

अनेन विधिना शांतिं नीरोगी सुखमाप्नुयात् ।
गुरुमुद्दिश्य यच्छांतिं कुर्यात् सर्वं प्रयत्नतः ॥

Colophon :

इति यामळोक्ता बृहस्पतिशांतिः समाप्ता ॥

270

Sl. No. 10541 गुरुशान्तिः Ms. No. P. 3023/192

Beginning :

कन्यायोद्वाहकाले तु शुद्धिर्यस्य न विद्यते ।
द्विजस्य चोपनयने गुरुं तत्रैव कारयेत् ॥

सुवर्णेन गुरुं कृत्वा पीतवस्त्रोपशोभितम् ॥

End:

लभते सकलान् कामान् सर्वानेव मनोगतान् ।
धनधान्यसमृद्धिश्च जायते × × × कुले ॥

Colophon :

इति विवाहोपनयनगुरुशांतिः ॥

271

Sl: No. 10549 गुरुशान्तिः (गुरुवारामावास्याशांति) Ms No. P. 7970/160

Beginning :

अमावास्यां गुरोर्वारे साक्षी देवो जनार्दनः ।
छायामश्वत्थवृक्षस्य प्राप्त गङ्गानदीजलम् ॥

अश्वत्थरूपो भगवान् उच्चार्मस्यानुजो विभुः ॥
क्रूरग्रहैः पीडितानां अमृतायै नमो नमः ॥

End :

तत्र छायोदकं स्नानं दुरितं मेऽपकर्षतु ।
जीवो बृहस्पतिस्सूरी आचार्यो गुरुराङ्गिराः ॥

वाचस्पतिर्देवमंत्री शुभं कुर्यात् सदा मम ।
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ॥

Colophon :

इति गुरुवारामावास्याशांतिः ॥

272

Sl. No. 10556 **गुर्वातिथ्यविधिः** **Ms. No. P. 3023/166**

Beginning :

चणकराश्युपरि वारुणं कलशं निधाय इमं मे वरुणेति षोडशोपचारैः पूजां कृत्वा × × तस्य पश्चिमदिग्भागे × × × × × × × × × × × × × × दलंकृत्वा ॥

End :

तद्दक्षिणा च तद्वस्त्र – – – – – ।
– – – द्वयं यस्मात् वासुदेवस्य वल्लभम् ॥
प्रदानादस्य मे विष्णुः अतः शांतिं प्रयच्छ मे ॥

Colophon :

– – – –

273

Sl. No. 10557 **गुल्मरोगहरशांतिः** **Ms. No. C.5951/7**

Beginning :

(गुल्मरोगहरविनायकदानविधिः)

ब्रह्मस्वस्यापहारेण गुल्मरोगी भवेन्नरः ।
वक्ष्ये तस्य प्रतीकारं दानहोम × × × × ॥
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥

End :

चतुर्णां ब्राह्मणानां च दद्याच्छक्त्या च दक्षिणाम् ।
एवंकृत्वा गणपतेः दानं विप्रः सुखी भवेत् ॥

Colophon

इति गुल्मरोगहरविनायकदानविधिः ॥

274

Sl·No·10558 गृध्रप्रवेशशान्तिः Ms· No P· 4992/27

Beginning :

अथातः संप्रवक्ष्यामि गृध्रशांतिं विधानतः ।
आरोहणं गृहे यस्य कपोतो वा प्रवेशयेत् ॥
गृध्रो वा यजमानस्य मृत्युदः शीघ्रमेव वा ॥

End :

तस्मादेवं प्रयत्नेन शांतिं कुर्याद्विधानतः ।
द्रव्यलोभे च वैश्यर्थं वित्तत्र्यानं (?) सम्यगाचरेत् ॥

Colophon:

— — —

275

Sl· No· 10559 गृध्रप्रवेशशांतिः Ms· No· P· 5293/53
(भविष्यत्पुराणांतर्गता)

Beginning :

श्रीमहादेव उवाच—

पिङ्गलीग्रप्रकाराश्च यमदूताः प्रकीर्तिताः ।
गहान्ते चोर्ध्वसंस्थाने तस्मिन् गेहे महाहवम् ॥

तस्मिन् गृहे व्याधिपीडाः दारिद्र्यं धननाशनम्।
तस्य शांतिं प्रवक्ष्यामि पितामह बिबोध मे ॥

End :

द्वादशाष्टौ च विप्रेभ्यः वस्त्रालङ्कारदक्षिणाः।
अनेन विधिना शान्तिं यस्तु कुर्याद्विचक्षणः॥

स च सर्वभयान्मुक्तः न व्याधिर्न दरिद्रता ॥
आयुरारोग्यसम्पन्नः स्वगृहे सुखमेधते ॥

Colophon:

इति हेमाद्रिखण्डे भविष्यत्पुराणे गृध्रशांतिः समाप्ता ॥

276

Sl. No. 10564 गृध्रोलूककपोतशांतिः (शौनकीया) Ms No. P.7970/98

Beginning ;

गृध्रो वाथ उलूको वा कपोतो वाथ वेशनम्।
आरोहे च गृहं यस्य गृध्रोलूकरवं यदि ॥

गृहेशमरणं विन्द्यात् अथवा व्याधिपीडनम्।
पतन्ति पक्षिणस्त्वेते एतैर्वाताथतस्ततः॥

End :

त्रियम्बकमृचेनैव तिलहोमं ततःपरम्।
दिक्पालांश्च ततो हुत्वा होमशेषं समापयेत्।

दश दानादिकं कृत्वा सर्वारिष्टविनाशनम्।
ब्राह्मणान् भोजयेत् पश्चात् अपमृत्युभयं कुतः॥

Colophon :

इति शौनकोक्तगृध्रोलूककपोतशांतिः समाप्ता ॥

277

Sl. No. 1056९ गृहदाहशांतिः (गृहक्षेमदिशांतिः) Ms. No. P. 909/7

Beginning :

अथामूलाग्रं चोक्तमार्गेण पूजाहोमौ च वक्ष्येते। तद्दिने चन्द्रानुकूलदिने वा विधिना वस्तुशांतिं कुर्वीत भक्तितः।

End :

ब्राह्मणान् भोजयेत्। दग्धदेशं ब्राह्मणाय दद्यात्। एवं कृते सति सर्वदोषा विनश्यंति ॥

Colophon :

इति शांतिविधिः ॥

278

Sl. No. 10570 गृहदाहशांतिः (शौनकीया) Ms No. P. 10041/21

Beginning :

शौनकोऽहं प्रवक्ष्यामि दग्धशांतिं यथागृहम्।
अकर्मयोगे तेनैव यदा पावकवर्जिते।

मनुष्या महिषी गाव अजाश्वपशुरर्पयेत् (?)।
बहुप्र.णिमनन्तेश्च (?) श्च गृहमाश्रित्य दह्यते ॥

End :

यदामृत्युभयं वासो वडवानलरुदयेत्।
तत्र पापविशुध्यर्थं अतरशशांतिं प्रयच्छ मे ॥

प्रतिरूपा × ×× × × × × भक्तितः।
गृहशुध्यर्थं दग्धशांतिश्च शौनकः ॥ (?)

Colophon :

इति शौनकीये गृहदग्धशांतिः ॥

279

Sl. No. 10572 गृहबलिविधिः Ms.No. C. 521/1

Biginning :

अथ गृहबलिदेवतानां कीर्तयिष्यामोऽत्र यत्र बसन्ति ते –

द्वारे पितामहं विद्यात् प्रकीले च उमापतिम् ।
आग्नेय्यां बलभद्रं च यमं विष्णुं च दक्षिणे ॥

नैऋत्यां स्कंदवरुणौ सोमं सूर्यं च पश्चिमे ।
वायव्यामश्विनौ वसवस्सोमो रुद्रोत्तरे दिशि ॥

End :

गोदोऽनपात्रं तत्र स्थित्वा तिथिग्रहणाय प्रक्षाल्य पादौ पाणी चाचम्य गृहं प्रविश्य पश्चाज्जो[illegible] । [illegible] पृथिवी, शिवमन्तरिक्षं, द्यौ[illegible] देव्यभयं नो अस्तु, शिवादिशः प्रदिश उद्दिशो न आपो विद्यु[illegible] [illegible]न्तु सर्वतः शांतिः शान्तिः शांतिः ॥

Colophon :

इति गृहबलिः ॥

280

Sl. No. 10574 गृहशांतिः Ms No. P. 3801/62

Beginning :

अथातः सम्प्रवक्ष्यामि गृहशांतिमनुत्तमम् ।
गावो वा वृषभो वाऽपि महिषो वा तुरङ्गमः ॥
गृह आरोहणं कुर्युः गृहं ग्रामश्च नश्यति ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् शक्त्या ब्राह्मणभोजनम् ।
गोगृहारोहणोद्भूतसर्वदोषलयैर्युतः ॥
जीवेद्वर्षशतं साग्रं अपमृत्युविवर्जितः ॥

Colophon :

इति यामलोक्तगवादिगृहारोहणशांतिः समाप्ता ॥

281

Sl. No. 10576 **गोचरबुधशांतिः** Ms. No. P. 5587/22

(यामलोक्ता बलहीने बुधे शांतिः)

Beginning :

गोचरबलहीनबुधशांतिविधिरुच्यते—

अथ शांतिं प्रवक्ष्यामि निशाकरसुतस्य च ।
दशमे जन्मषष्ठश्च सौम्ये दुःखप्रणाशनम् ॥

End :

ब्राह्मणान् भोजयेत् पश्चात् बन्धुभिः सह भोजयेत् ।
अनेन विधिना सम्यक्कुर्यात् भक्तिसमन्वितः ॥

तस्य दोषा विनश्यन्ति रोगापीडामयास्तथा ।
चिन्तितार्थं फलैर्युक्तं जीवेद्वर्षशतं नरः ॥

Colophon :

इति ज्योतिषार्णवे यामलोक्तगोचरबलहीनबुधशांतिः समाप्ता ॥

282

Sl. No. 10577 **गोचरशुक्रशांतिः** Ms. No. P. 5587/23

(ज्योतिषार्णवीया बलहीनशुक्रशान्तिः)

Beginning :

अथ गोचरबलहीनशुक्रशांतिविधिरुच्यते—

अथातः संप्रवक्ष्यामि शुक्रशांतिमनुत्तमाम् ।
स्वजन्मराशौ स्वस्थाने स्थानेषु भृगुनन्दनः ॥

End:

सर्वक्लेशविनिर्मुक्तः समस्तारिष्टवर्जितः ॥
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति ज्योतिषार्णवे शौनकोक्तगोचरबलहीनशुक्रशांतिः समाप्ता ॥

283

Sl. No. 10578 गोदानफलम् **Ms. No. P. 6528/2**

Beginning :

प्रथमं श्वेतवर्णादिगोदानफलमुत्तमम् ।

पादेन—

श्वेता सुखप्रदा प्रोक्ता चन्द्रलोकप्रदायिनी ।
कृष्णास्वर्गप्रदा प्रोक्ता गौरी स्यात् कुलवर्धिनी ॥

End :

रक्ता रूपप्रदा प्रोक्ता प्रीता दारिद्र्यनाशिनी ।
पुत्रप्रदा कृष्णसारा नीला धर्मविवर्धिनी ॥
कपिला सर्वपापघ्न सर्वदर्णा च मोक्षदा ॥

Colophon :

इति — — — — — — ॥

284

Sl. No. 10579 गोदानविधिः **Ms No. P. 2914/75**

Beginning

अथ गोदानप्रकारः—

स्वर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्यदोहां तमपृष्टां सुवस्त्रां धेनुमर्चयेत् ॥
गन्धपुष्पाक्षतैर्वस्त्रैः धूपदीपादिभिस्तथा ।

पूजाप्रकारः—

स्नाप्य प्रक्षाल्य पादाम्बु भक्त्या शिरसि धारयेत् ।
आच्छादनं गवे दद्यात् सम्यक्सिद्धं सुनिर्मलम् ॥

End :

गुणाग्रे (?) शांतिकं प्रोक्तं × × पर्जन्यार्थं तु वर्तते ।
पद्मास्ये रोगनाशार्थं जयार्थं चैव पद्मकेशव ॥

स्वास्ये पुष्पेदं प्रोक्तं × × × वर्धनम् ।
कुण्डानां च फलं ज्ञेयं स्थण्डिलं तप उच्यते (?) ॥

Colophon :

– – – –

285

Sl. No. 10583 गोपालमूर्तिदानविधिः Ms. No. P. 3972/2

Beginning :

अथ × × × × × दानम्–

अथ दानं प्रवक्ष्यामि पुत्रप्राप्तिकरं परम् ।
ब्राह्मणक्षत्रिया वैश्या शूद्रा ये वर्णसङ्कराः ॥

तेषां गृहस्थधर्माणां नो चेत् × × तति ।
आमुष्मिककरं नास्ति नैव विष्णुरूदं (?) तथा ॥
तस्मात सन्तानगोपालदानं भक्त्या समाचरेत् ॥

End :

गोपालमूर्तिदानस्य द्रव्याभावे दरिद्र × × ।
एकविंशतिमाहस्रसंख्यागोपालमन्त्रं जपेत् ॥

स्पृष्ट्वा तु गोघृतं जप्त्वा तद्घृतं प्राशयेत पतिः ।
पुत्रलाभो भवेत्सद्यः सत्यमेव न संशयः ॥

Colophon

इति गोपालमूर्तिदानविधिः ॥

286

Sl. No. 10585 — गोमुखजननशांतिः (ज्योतिषार्णवांतर्गता) — Ms. No. P. 604/59

Beginning :

प्रणिपत्य रविं वक्ष्ये प्रायश्चित्तमनुत्तमम् ।
सर्वारिष्टविनाशाय यदुक्तं ज्योतिषार्णवे ॥

आदित्य उवाच—

शृणु तत्वं ततो ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
बालानां मूलजातानां गण्डान्ते च विशेषतः ॥

End :

ब्राह्मणान् भोजयेत् पश्चात् गृह्णीयादाशिषः सदा ।
यथाशक्ति वसुं दद्यात् ब्राह्मणानां पिता तथा ॥

Colophon :

इतिज्योतिषार्णवे गोमुखजननशांतिविधिः समाप्तः ॥

287

Sl No 10588 — गोमुखजननशांतिः (शौनकीया प्रयोगात्मिका च) — Ms. No. P. 734/3

Beginning :

शौनकः-

प्रणिपत्या × × वक्ष्ये प्रायश्चित्तमनुत्तमम् ।
सर्वारिष्टविनाशाय यदुक्तं ज्योतिषार्णवे ॥

पित्ररिष्टे सुतारिष्टे मात्ररिष्टे तथैव च ।
प्रायश्चित्तं तदा कुर्यात् तस्य दोषस्य शांतये ॥

End :

आपोहिष्ठेति तिसृभिः अप्सु मे सोम इत्यथ ।
तद्विष्णोरिति मं × × × क्षीत्यां चेति सूक्तः ॥
समुद्रज्येष्ठ इत्याद्यैः तन्मन्त्रैरभिषेचयेत् ॥

Colophon :

इति शौनकीये गोमुखजननविधिः ॥

288

Sl. No. 10592 गोमुखजननशान्तिः Ms No. P. 2239/73

Beginning:

पितृजन्मर्क्षकर्मांशे जातस्तु पितृमातृहा ।
जन्मर्क्षजन्मलग्नांशे सद्यो जातो मृतिप्रदः ॥
तथा चाधाननक्षत्रे तथा वैनाशिसंज्ञके ॥

End :

भार्यापुत्रसमोपेतं यजमानं च मार्जयेत् ।
आज्यावेक्षणदानं च लोलायःपिण्डदानकम् ॥
दद्याच्च प्रतिमादानं ब्राह्मणान् भोजयेत्ततः ॥

Colophon :

इति वृद्धवासिष्ठप्रोक्तपितृजन्मर्क्षयोगगोमुखजननशांतिः ॥

289

Sl. No. 10593 गोमुखजननशांतिः (देवऊेका) Ms. No. P 2579/39

Beginning :

इत्युक्तो वेदशास्त्रार्थसार आगमचोदितः ।
मानवानां हितार्थाय वनतां सर्वकामिका ॥
गण्डान्तमेव दोषः स्यात् विशेषस्तत्र एव हि ॥

End :

अथवा येन तुष्टोऽथ वित्तन्तस्य प्रदापयेत् ।
तन्त्रोपकरणं मर्वं दैवज्ञाय निवेदयेत् ॥
ब्राह्मणान् भोजयेत्पश्चात् गृह्णीयादाशिषस्तत· ॥

Colophon :

इति देवलोक्तसर्वारिष्टप्रायश्चित्तगोमुखजननशांतिः ॥

290

Sl· No· 10606 गोमुखजननशांतिः (सर्वशाखासम्मता) Ms No P· 5635/53

Beginning :

अथांबिकासोदरमातुलाश्चमातामहा मातृसमानसूनुः ।
सूर्यादिखेटाः क्रमशः प्रदिष्टाः त्रिकोणगास्तेऽपि च तान्निहन्युः ॥

End :

तत्रोपकरणं सर्वं दैवज्ञाय निवेदयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् गृह्णीयादाशिषस्ततः ॥

Colophon:

इति मर्वशाखासम्मतगोमुख जननशांतिः समाप्ता ॥

291

Sl· No· 10613 गोमुखजननशांतिः (प्रयोगात्मिका) Ms· No· P.9254/189

Beginning:

एवंगुणेत्यादिशुभतिथौ मम कुमारस्य नक्षत्रगण्डदोषपरिहारार्थं + + सर्वारिष्टदोषपरिहारार्थं आयुरभिवृद्ध्यर्थं गोमुखप्रसूतिं करिष्ये । गोपूजा ॥

End :

इति सम्प्रार्थयेत् धेनुं तां नत्वादाय तत्पिता ।

क्षयंहस्तेनचे (?) पञ्चामृताभिषेक-आपोहिष्ठा त्रियम्बक-अक्षोभ्यं-देवस्य त्वा तच्छंयोः ॥

Colophon :

– – – –

292

Sl. No. 10621 मयूखगोसहस्रदानविधिः Ms. No. C-696/8A

Beginning :

अथातस्संप्रवक्ष्यामि महादानमनुत्तमम् ।
गोसहस्रप्रदानाख्यं सर्वपापहरं शुभम् ॥

पुण्यं तिथिमथासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतं त्रिरात्रं स्यादेकरात्रमथापि वा ॥

End :

मातामहानां तद्वच्च पुत्रपौत्रसमन्वितः ।
यावत्कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ॥

अश्वमेधशतं कुर्याच्छिवध्यानपरायणः ।
वैष्णवं यागमास्थाय ततो मुच्येत बन्धनात् ॥ इति॥

Colophon :

इति गोसहस्रदानविधिः ॥

293

Sl. No. 10622 गौळीपतनशांतिः (बोधायनीया) Ms. No. P. 3085/55

Beginning :

अथातो गौळीपतनशांतिं व्याख्यास्यामः—

अतः परं प्रवक्ष्यामि गौळ्या निपतने फलम् ।
शिरोमध्ये पतेद् गौळिः मातापित्रोर्गुरोर्मृतिः ॥

+ + + + + + + +

पुण्यनक्षत्रे पुण्यवारे शुभे मुहूर्ते शान्तिकर्म करिष्ये इति सङ्कल्पः ॥

End :

ततः पञ्चगव्यं प्राश्नीयात् । ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा सर्वपापैः प्रमुच्यते सर्वपापैः प्रमुच्यते— इत्याह भगवान् बोधायनः इति सङ्कल्पः ॥

Colophon :

-- -- -- --

294

Sl. No. 10524 गौळीपतनशांतिः (बार्हस्पत्यीया) **Ms. No. P. 6297/27**

Beginning :

× × × × × × मनुष्यैर्जीवितेच्छुभिः ।
पुरन्दर त्वया पृष्टः यत्तद्वक्ष्यामि साम्प्रतम् ॥
गौळीति भुवि विख्यातमण्डजं सत्यमस्ति वै ।
तत्स्वराच्छ्रूयते सर्वं देशकालविभागतः ।

End :

एवं शांतिर्मनुष्याणां तत्तद्दोषापनोदिनी ।
बहुना किमिहोक्तेन संग्रहं शृणु वृत्रहन् ॥
यद्भूसुराः सुसंतुष्टाः वदन्ति फलतीह तत् ॥

Colophon :

इति बार्हस्पत्ये गौळीपतनशांतिः समाप्ता ॥

295

Sl· No. 10627 ग्रहणकालप्रथमार्तवशांतिः (रुद्रयामलीया) Ms· No· P· 2579/27

Beginning :

दिवा वा यदि वा रात्रौ ग्रहणं सूर्यसोमयोः ।
व्याधिपीडाकरं स्त्रीणां प्रथमार्तवदर्शने ॥

इत्थं संजायते तस्या तस्या मृत्युर्न संशयः ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् गृण्हीयाद शिषस्ततः ।
एवं यः कुरुते शांतिं दम्पत्योरभिवृद्धये ॥

सर्वदोषविनिर्मुक्तः जीवेच्च शरदां शतम् ॥

Colophon:

इति रुद्रयामले ग्रहणकालार्तवशांतिः ॥

296

Sl· No·10632 ग्रहणकालप्रसूतिप्रथमार्तवशांतिः (शौनकीया) Ms· No· P· 604/73

Beginning :

परिवेषे दोषकाले जातलग्नादिसम्भवे ।
मन्दे लग्ने त्रिकोणरहिते सुरपूज्यो जयत्यपसारि ॥

तद्दोषपरिहारार्थं शांतिं कुर्याद्विशेषतः ।
ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यस्य जायते ॥

End:

अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः ।
कथितं भार्गवं सम्यक् शौनकाय महात्मने ॥

Colophon :

इति शौनकीये ग्रहणजातप्रथमार्तवशांतिः समाप्ता ॥

297

Sl. No. 10637 ग्रहणकालप्रसूतिप्रथमार्तवशांतिः Ms. No. P. 9764/8

Beginning :

ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्जायते नृणाम् ।
व्याधिपीडा तथा स्त्रीणां मध्ये च ऋतुदर्शने ॥

इदं तु जायते यस्य तस्य मृत्युर्न संशयः ।
× × × × दारिद्र्यं शोकश्च कलहो भवेत् ॥

End :

ब्राह्मणान् भोजयेत्पश्चात्प्रणिपत्य विसर्जयेत् ।
अनेन विधिना शांतिं सम्यक्कृत्वा समाहितः ॥

आयुरारोग्यवृद्धिश्च तुष्टिः पुष्टिः प्रवर्धनम् ।
सर्वशांतिकरं पुण्यं सौख्यं च समवाप्नुयात् ॥

Colophon :

इति ग्रहणे प्रसूतिरजोदर्शनशांतिः ॥

298

Sl. No. 10638 ग्रहणकालप्रसूतिशांतिः (शौनकीया) Ms. No. P.2239/67

Beginning ;

ग्रहणे सूर्यशशिनोः प्रसूतिः यदि जायते ।
तस्य ऋक्षपते रूपं सुवर्णेन प्रकल्पयेत् ॥

सूर्यस्य ग्रहणे सूर्यरूपं वित्तानुसारतः ॥

End :

सवस्त्रप्रतिमां दद्यात् आचार्याय सदक्षिणाम् ।
ऋत्विग्भ्यो दक्षिणां दद्यात् यथा.वित्तानुसारतः ॥
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यतः ॥

Colophon :

इति शौनकीये ग्रहणप्रसूतिशांतिः ॥

299

Sl. No. 10650 ग्रहणशांतिः (रुद्रयामलीया) Ms. No. 2239/92

Beginning :

यामले—

अथ शांति प्रवक्ष्यामि सोमसूर्यग्रहस्य च ।
फलमादौ प्रवक्ष्यामि धर्मशास्त्रोक्त × × × तः ॥
यस्य राशि × × स्थ × × × त् ग्रहणसंभवः ॥

End :

ततो नीराजनं पश्चात् राशिग्रहगमाचरेत् ।
इह लोके सुखीभूत्वा ग्रहदोषविवर्जितः ॥
मृत्युरोगभय × × न्मुक्तः जीवे × × रदां शतं ॥
सर्पाकृतिं हिरण्येन × × × ।
× × × गृहाण त्वं द्विजोत्तम ॥

Colophon:

इति रुद्रयामलोक्तोपरागशांतिः ॥

300

Sl. No. 10654 ग्रहणशांतिः (उत्पलपरिमलीया, मत्स्यान्तर्गता) Ms. No. P 3804/22

Beginning :

मत्स्यपुराणे–

यस्य त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ ।
तज्जातानां भवेत्पीडा ये नरा यांति वर्जिताः ॥

तस्य रोगभयं भवति ।

तस्माद्दानेन होमेन देवार्चनजपैस्तथा ॥

End :

न तस्य ग्रहपीडा स्यात् न च बन्धुधनक्षयः ।
परमां सिद्धिमाप्नोति पुनरावृत्तिवर्जिताम् ॥
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥

Colophon :

इत्युत्पलपरिमले ग्रहणशान्तिः ॥

301

Sl·No. 10657 ग्रहणशान्तिः (पितामहप्रोक्ता) Ms. No P. 5587/39

Beginning :

अथ ग्रहणशान्तिविधिरुच्यते–

चन्द्रादित्योपरागे च अभिषेको विधीयते ।
तदहं संप्रवक्ष्यामि द्रव्यं मन्त्रं विधानतः ॥

End :

सूर्यग्रहे तु गायत्र्या तिलमष्टोत्तरं हुनेत् ।
तदिन्द्राधिपदैवत्यं तिलान्नं × × × पकम् ॥

आचंन स्विष्टकृन्दुत्वा होमशेषं समापयेत् ।

Colophon

इति पैतामहोक्ता ग्रहणशान्तिः समाप्ता ॥

302

Sl. No. 10558 ग्रहणशांतिः (हेमाद्रीया) Ms. No. P. 5587/55

Beginning :

अथ राशिग्रहणशांतिविधिरुच्यते—

अथ शान्ति प्रवक्ष्यामि सोमसूर्यग्रहस्य वा ।
फलमादौ प्रवक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥

End :

यस्य स्मृत्येति समर्पणम् । सूर्यप्रतिमादानमन्त्रः ॥

रक्तवस्त्रयुगं यस्मात् आदित्यस्य च वल्लभम् ।
प्रदानात् तस्य मे सूर्यः सदा शांतिं प्रयच्छतु ॥

Colophon:

इति हेमाद्रौ शान्तिप्रकरणे राशिग्रहणशान्तिः समाप्ता ॥

303

Sl. No. 10667 ग्रहणशांतिश्लोकः Ms No P. 2579/42

Beginning :

यो सौ वज्रधरो देवः आदित्यानां प्रभुर्मतः ।
सहस्रनयनश्चन्द्रः ग्रहपीडां व्यपोहतु ॥

End :

त्रैलोक्ये यानि भूतानि सर्वरात्रिचराणि च ।
ब्रह्मविष्ण्वर्कयुक्तानि तानि पापानि हंतु मे ।।

सहस्रनयनः सूर्यः ग्रहपीडां व्यपोहतु ।। इत्यादि ।।

Colophon :

इति ग्रहणश्लोकाः समाप्ता ।

304

Sl. No. 10674 ग्रहणदुर्निमित्तशान्तिः (गर्गप्रोक्ता) Ms. No. P. 9764/51

Beginning :

गार्ग्यः—

ग्रहस्तम्बद्वारदामा कबाटे पतनं यदि ।
आस्पोटनं बास्य तेषां तदा ग्रहपतेर्वधः ।।

रथस्याङ्गं गृहीत्वा श्वा यदि वा मन्दिरं नयेत् ।।
तत्स्वामिनाशनं क्षिप्रं गवाङ्गछिद्रेण मृत्तिः ।।

End :

प्रतिमां वस्त्रसंयुक्तां दद्याद्दक्षिणया सह ।
तद्दोषशमनार्थाय दद्यात्सुसमाहितः ।।

ब्राह्मणान् भोजयेत्पश्चात् वित्तशाठ्यविवर्जितः ।
एवं यः कुरुते सम्यक्तर्शाद्ग्रहो विमुच्यते ।।

Colohhon :

इति ग्रहदुर्निमित्तशातिः ।।

305

Sl. No. 10675 **ग्रहप्रीतिदानविधिः** **Ms. No. P. 5635/95**

Beginning :

गोधूमास्तण्डुलाश्चैव तुवरी राजमाषकम् ।
चणकाः श्वेतनिष्पावाः तिला मुद्गाश्च माषकाः ॥

एतानि नव धान्यानि ग्रहप्रीतिकराणि वै ॥

End :

यस्मिन् महार्णवे पूर्वं विष्णोर्देहसमुद्भवाः ।
विष्णुप्रीतिकरा माषाः अतो मे घ्नंतु पातकम् ॥

Colophon :

— — — —

306

Sl. No 10676 **ग्रहप्रीतिदानविधिः (वासिष्ठप्रोक्तः)** **Ms. No. P. 7970/184**

Beginning :

कटकं कनकं धेनुं काश्मीरं रक्तचंदनम् ।
दैवताय ददेन्नित्यं (?) कर्मदोषाद्विमुच्यते ॥

चन्दनं चंद्रकांतं च कर्पूरं मौक्तिकं रसम् ।
कार्पासदानमात्रेण चन्द्रदोषो विमुञ्चति ॥

End :

कृष्णवर्णव्रीहियवान् कुलुत्थमथवा यदि ।
तीक्ष्णायःपिण्डदानेन राहुदोषः प्रनश्यति ॥
चित्रवस्त्रं चित्रधान्यं चित्रकम्बलमेव वा ।

310

Sl. No. 10681 ग्रहयोगशान्तिः (ब्रह्मयामळीया) Ms. No. P. 734/5

Beginning:

अथातस्सम्प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य × × जन्मनक्षत्रे राशौ लग्ने यथास्थिताः ॥

End:

इत्थं ग्रहाणां योगे तु यः कुर्याच्छान्तिमाप्नुयात् ।
तस्य सर्वे ग्रहास्सम्पदारोग्यविजयप्रदाः ॥

Colophon :

इति ब्रह्मयामळे ग्रहयोगशान्तिः ॥

311

Sl. No. 10683 ग्रहयोगशान्तिः (कात्यायनीया) Ms. No. P. 2239/80

Beginning :

अथ कात्यायनोक्तग्रहयोगशान्तिः —

मनुना याज्ञवल्क्येन × × × × × × तु ।
आदित्यादिग्रहादीनां × × क्रोऽतिचारगः ॥

यस्मिन् काले पर्वतिथौ प्रतिपद्यपरे दिने ॥

End :

भक्तिभावेन यः कुर्यात् सर्वदोषविवर्जितः ।
ग्रहयोगोत्थदोषैश्च त्यक्तः सर्वसुखान्वितः ॥

धनवान् पुत्रवांश्चैव नीरोगी जायते ध्रुवम् ॥

Colophon :

इति कात्यायनोक्तग्रहशान्तिः ॥

312

Sl. No. 10684 **ग्रहयोगशान्तिः । (हेमाद्रीया शौनकोक्ता)** **Ms. No. P. 2581/8**

Beginning :

शौनकोऽहं प्रवक्ष्यामि राजराष्ट्रहिताय च ।
शान्तिद्विग्रहयोगादेर्दर्शनं च विशेषतः ॥

भौमादिषु द्वियो (?) द्वौ च चत्वारोऽथ च पञ्च वा ।
यद्येकराशौ मिलितास्तदा अपि भयंकराः ॥

End:

अनेन विधिना कृत्वा अभिषेकं प्रयत्नतः ।
त्रैलोक्ये यानि भूतानि स्थावराणि पराणि च ॥

ब्रह्मविष्ण्वर्करुद्राश्च नाशयन्तु ग्रहापदान् ।
एभिर्मन्त्रैर्वेदमन्त्रैरभिषेकं द्विजोत्तमः ॥

Colophon :

इति हेमाद्रौ ग्रहशान्तिप्रकरणे ग्रहयोगशान्तिः समाप्ता ॥

313

Sl. No. 10637 **ग्रहयोगशांतिः (रुद्रयामलीया)** **Ms. No. P 3023/146**

Beginning :

अथातस्संप्रवक्ष्यामि ग्रहाणां कूटजं फलम् ।
एकराशौ ग्रहास्सर्वे कार्तवीर्यो हतः कृते ॥
त्रेतायां रामभद्रश्च राज्यभ्रष्टो वनं गतः ॥

End :

ब्राह्मणान् भोजयित्वा तु सघृतं पायसादिभिः ।
एवं यः कुरुते शान्तिं ग्रहदोषापनुत्तये ॥
आयुरारोग्यमैश्वर्यं धनधान्यमवाप्नुयात् ॥

Colophon :

इति रुद्रयामलोक्तसर्वग्रहयोगशान्तिः ॥

314

Sl. No. 10689 **ग्रहयोगशान्तिः** (ब्रह्मर्षिसंहितान्तर्गता) **Ms. No. P. 4863/32**

Beginning

अथातः संप्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य त्रिजन्मनक्षत्रे तौ लग्ने यदि संस्थिताः ।
एकराशौ ग्रहास्सर्वे तस्य मृत्युर्न संशयः ॥

End :

एवं यः कुरुते भक्त्या मर्त्यो दोषापनुत्तये ।
स दीर्घायुर्मह × र्यो लभते वाञ्छितं फलम् ॥

Colophon :

इति ब्रह्मर्षिसंहितायां ग्रहयोगशान्तिः ॥

315

Sl. No. 10692 **ग्रहयोगशांतिः** (नारदसंहितान्तर्गता) **Ms. No. P. 5635/94**

Beginning :

अतःपरं प्रवक्ष्यामि ग्रहयोगाख्यशान्तिकम् ।
अमावास्यादितिथिषु ग्रहयोगो भवेद्यदि ॥
एकर्क्षे भिन्नराशौ वा एकराशृक्षभेदके ॥

End :

आयुरारोग्यमैश्वर्यं जीवेद्वर्षशतं नरः ।
एतच्छान्तिं ˜कुर्वीत सर्वदोषापनुत्तये ॥

Colophon :

इति नारदीयसंहितायां ग्रहयोगशान्तिः ॥

316

Sl. No. 10696 ग्रहयोगशांतिः (ब्रह्मर्षिरचिता) Ms. No. P. 7401/119

Beginning :

× × × × × × × × ।
एकराशौ ग्रहास्सर्वे तस्य मृत्युर्न संशयः ॥
द्वित्रचतुर्ग्रहयोर्योगे कलहो नाशः जनक्षयं × ।
× × × × कुर्युर्भयं तस्य विनिर्दिशेत् ॥
एतेषां च त्रिजन्मानां शान्ति कुर्या × × दिषु ।
लक्षहोमैः कोटिहोमैः अयुतैर्होमसंज्ञया ॥

End :

एकादशेऽर्थलाभस्स्यात् द्वादशे व्याधिमाप्नुयात् ।
इष्टा ग्रहेण सङ्क्रान्ता तत्र शान्त्युदयः फलम् ॥

Colophon :

इति ब्रह्मर्षिरचितायां ग्रहयोगशान्तिः समाप्ता ॥

317

Sl. No. 10697 ग्रहयोगशान्तिः (याम्ळीया) Ms. No. P. 7401/121

Beginning:

रक्तगन्धार्चितं सूर्यं श्रीगन्धाभ्यर्चनं शशेः ।
देवदारुं तथाङ्गारं कुङ्कुमाभ्यर्चनं बुधः ॥ (?)

End :

एवं यः कुरुते भक्त्या ग्रहदोषं विवर्जयेत् ।
पूर्वोक्तदोषसङ्घैश्च विमुक्तः पुत्रवान् सुखी ॥

अ × × × × × × × × × ।
× × × × × × · × × × × येत् ॥

ब्राह्मणान् भोज × × × चानुसारतः ॥

Colophon :

इति यामळे ग्रहयोगविधानं समाप्तम् ॥

318

Sl.No. 10705 ग्रहयोगशान्तिः (ब्रह्मर्षिसंहितीया) Ms. No. P. 10070/53

Beginning :

अथातः सम्प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्यापि जन्मनक्षत्रे राशौ लग्ने यदि स्थिताः ॥

एकराशौ ग्रहास्सर्वे तस्य मृत्युर्न संशयः ।
द्वौ ग्रहौ कुरुतः क्षोभं त्रयो युक्ता जनक्षयः ॥

End :

एवं यः कुरुते मर्त्यः सर्वदोषा नुत्तये ।
स दीर्घायुर्महावीर्यो लभते वाञ्छितं फलम् ॥

Colophon :

इति ब्रह्मर्षिसंहितायां ग्रहयोगशान्तिविधिस्समाप्ता ॥

319

Sl. No. 10706 ग्रहशांतिविधिः Ms No P. 734/30

Beginning:

शौनकोऽहं प्रवक्ष्यामि ग्रहशान्ति विधानतः ।
यस्य राशि समासा × × × भवेद् ग्रहगसम्भवः ॥

गन्धमाल्यक्षतैर्भक्त्या आचार्यं पूजयेत्ततः ॥
धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकाम् ॥
सूक्ष्मवस्त्रं च हेमं च – – – – – – – – ॥

Colophon :

– – – –

320

Sl. No. 10710 ग्रहशान्तिविधिः (यामलोक्ता) **Ms. No. P. 2239/81**

Beginnnig:

अथातः संप्रवक्ष्यामि ग्रहयोगस्य शान्तिकम् ॥
अमावास्यादितिथिषु ग्रहयोगो भवेद्यदि ॥
एकर्क्षे भिन्नराशौ वा एकराश्यक्षभेदतः ॥

End :

एवं यः कुरुते भक्त्या ग्रहदोषविवर्जितः ।
पूर्वोक्तदोषसंघैश्च विमुक्तः पुत्रवान् सुखी ॥
आयुरारोग्यसंपन्नः जीवेद्वर्षशतं नरः ॥

Colophon :

इति यामलोक्तग्रहशान्तिविधिः ॥

321

Sl. No. 10718 ग्रहस्नानविधिः (पौराणिकग्रहाभिषेकमन्त्राणि) **Ms.No.P. 734/15**

Beginning :

ग्रहाणामादिरादित्यो लोकर × × कारकः ।
विषमस्थानसम्भूतपीडामत्र व्यपोहतु ।।

End :

सरितः सागराश्चैव तीर्थानि जलदा नदाः ॥
एतास्त्वामभिषिञ्चतु धर्मकामार्थसिध्दये ॥

Colophon :

इति पौराणमन्त्राणि ॥

322

Sl. No. 10721 ग्रहातिथ्यबलिः Ms.No.P.3374/10

Beginning :

अथातो ग्रहातिथ्यबलिकर्मो महारान् व्याख्यास्यामः- अश्रद्धधानमजपं त्यक्त × × मं × गलं ग्रहानानयंति । सुव्यक्तपुरुषम् यमसादन × × । तस्मान्मासि मासि ऋतौ ऋतौ सवत्सरे संवत्सरे × × × × एकाग्निविधानम् ॥

End :

तिसृभिः मार्जयित्वा प्रणीताभ्यो × × शों व्युन्नीय आचार्याय ब्रह्मणे ऋत्विक्षु दक्षिणां दत्वा अग्निं परिषिच्य उपस्थाप्य यस्य स्मृत्येति समर्पयेत् । शन्नो वातइति शान्तिं जपेत् ॥

Colophon

-- -- -- --

322

Sl.No. 10722 ग्रहातिथ्यबलिः(हेमाद्रीया) Ms No. P. 7970/169

Beginning :

अथातः संप्रवक्ष्यामि शृणु नारद यत्नतः ।
आदित्यभौममन्दानां राहुकेतोर्दिशांतरम् ॥

पापग्रहान्तरावेशात् सम्भूतं मृत्युनाशनम् ।
अष्टग्रहाणां वर्गस्य त्विन्द्रो × × × ॥
× × × × × × फलानि चालताम् ॥

End :

इमा आपः, शिवसङ्कल्पम्, पावमाना इत्यनुवाकानि अन्यैः पौराणिकैर्मन्त्रैः सुरास्त्वा भुवनस्य पितरं इन्द्र त्वा वृषभं वयम् । भूर्भुवस्सुवरोम् । अमृताभिषेकोऽस्तु ओं शांतिश्शांतिश्शांतिः । सर्वशांतिरस्तु ॥

Colophon :

इति हेमाद्रौ ग्रहातिथ्यविधिः समाप्तः ॥

324

Sl. No. 10724 ग्रहोत्पातशांतिः Ms. No. P. 7401/99

(ग्रहोत्पातद्विपाचतुष्पादुत्पन्न रिष्टहरशांतिः प्रयोगात्मिका)

Beginning :

अथ वै भवति श्राद्धमेवारभ्येति यज्ञो वा आपः यज्ञमेवारभ्येति + + शान्त्युदकं करोति । जन्मनक्षत्रे पुण्यनक्षत्रे विवाहचौलोपनयनसमावर्तनान्यद्भिः × × वादीनि मङ्गळकार्याणि ग्रहोपरागे ग्रहोत्पाते द्विपाचतुष्पात्सु विन्देताथ शांतिमारभेत ॥

End :

अ × × भिरित्येवमनुवाकं अग्निनः पातु, ऋध्यास्म, नवो नव इत्येतैस्त्रिभिरनुवाकैरु-त्तरैरु × × होमैश्च सुरभि × × × भिर्हिरण्यवर्णाभिः पावमानीभिः व्याहृतिभि × × × × ॥

Colophon :

— — — —

325

Sl. No 10726 ग्रामशांतिः (बोधायनीया) Ms. No. P.2117/1

Biginning :

अथातो ग्रामशान्ति × × × × × × हे व्याघ्रवृकसृगालरोदिते बहुब्राह्मणमरणे शूद्रान्त्यजातिमरणे ग्राममध्ये श्मशानभूते दस्युभिः पीडिते राज्ञान्तरबाधितशून्यहस्ते तु भिन्ने ×

× × × तेषामन्यतमं शांतिं कुर्यात् । शुभवारे शुभनक्षत्रे + + + + शुभलग्ने ग्राममध्ये षोडश + + + हस्तैर्वा चतुर्द्वारसहितां सतोरणां वितानं × × × × × हितां × × लां कृत्वा + + + हुतशेषं निदधाति ॥

End :

सर्वेभ्यो देवेभ्यो महाभिषेकनैवेद्यपूर्वं पूजां कृत्वा सहस्रब्राह्मणान् भोजयेत् । एवं कृते सर्वोत्पातशान्तिर्भविष्यतीति सर्वसंपद्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon :

इति बोधायनोक्तग्रामशांतिः ॥

326

Sl. No. 10728 ग्रामशांतिः (विष्णुरहस्यांतर्गता) Ms. No. P. 4984/60

Beginning :

विष्णुरहस्ये ग्रामशांतिविधिः—

अथ वक्ष्ये विशेषेण प्रोक्षणे विधिमुत्तमम् ।
प्रायश्चित्तेषु सर्वेषु प्रोक्षणादिषु सर्वशः ॥

ग्रामे वा नगरे वापि पत्तने वा तथैव च ।
ब्राह्मणानां बधे जाते राष्ट्रक्षोभेण वा ततः ॥
+ + + + + + + +
एवमादिषु सर्वेषु ग्रामशांतिं समाचरेत् ।
ग्रामशान्तिं पुरः कृत्वा पश्चात्कर्म समारभेत् ॥

End :

अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा ।
ब्राह्मणान् भोजयेत्पश्चात् सर्वदोषविनाशनम् ॥

इति सम्यक् समाख्यातो ग्रामशांतिविधिक्रमः ।
एवं विचार्य कर्तव्यं पाञ्चरात्रविशारदैः ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि विष्णुरहस्ये ग्रामशान्तिविधिर्नामाष्टमोऽध्यायः ॥

327

Sl. No. 10731 ग्रामशांतिः (बोधायनीया) Ms. No. P. 7970/58

Beginning :

अथातो ग्रामशांतिविधिं व्याख्यास्यामः—

अग्निदाहे व्याघ्रवृकसृगालादिपीडिते बहुब्राह्मणमरणे शूद्रान्त्यजातिमरणे ग्राममध्ये श्मशानभूते दस्युभिः पीडिते × × × × × × शांतिं कुर्यात् ॥

End :

सर्वेभ्यो देवेभ्यो महाभिषेकनैवेद्यपूर्वकं पूजां कृत्वा सहस्रं ब्राह्मणान् भोजयेत् । एवं कृते सर्वोत्पातशांतिः सिध्यति । × × इत्याह भगवान् बोधायनः ॥

Colophon:

इति बोधायनोक्ता ग्रामशान्तिः समाप्ता ॥

328

Sl. No. 10732 ग्रामशांतिः (बोधायनीया) Ms. No. P. 8532/25

Beginning :

अथ ग्रामशांतिविधिं व्याख्यास्यामोऽग्निदाहे व्याघ्रवृकसृगालप्रवेशे चोदिते च बहु-ब्राह्मणमरणे ग्राममध्ये श्मशानभूते + + + शान्तिं कुर्यात् ॥

End :

ऋत्विग्भ्यो दक्षिणां दत्वा समापयेत् । ममस्तोत्पातशान्तिर्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon :

इति ग्रामशांतिः ॥

329

Sl. No. 10733 ग्रामशान्तिः Ms. No. P. 8532/53

Beginning

अथातः सम्प्रवक्ष्यामि ग्रामशांतिं विधानतः ।
अग्निदाहे व्याघ्रवृकसृगालादिप्रवेशने ॥

श्मशाने ग्राममध्येऽपि दस्युभिः पीडते तथा ।
बहुप्रजाविनाशे च बहुब्राह्मणमारणे ॥

End :

एवं यः कुरुते राजा ग्रामशान्तिं विधानतः ।
शत्रवश्च पलायन्ते सोऽपि साम्राज्यमश्नुते ॥

Colophon :

इति ग्रामशांतिविधिः ॥

Extra Information :

अन्ते द्वादशादित्यानां एकादशरुद्राणां अष्टानां भैरवाणां च नामानि विद्यन्ते ॥

330

Sl. No. 10734 ग्रामशांतिः (ईशानसंहितीया) Ms. No.P. 9167/11

Beginning :

अतः परंप्रवक्ष्यामि ग्रामशान्तिमनुत्तमम् ।
ग्रामक्षेत्रगृहारामे ह्युत्पातानां समुद्भवे ।

श्रृगालरोदने चाग्निदाहे स्थूणावरोहेण ।
वल्मीकपुष्करोत्पन्ने बहुब्राह्मणमारणे ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् इतरेषां च शक्तितः ।
एवं कृते तु सर्वेषां समृद्धिः स्यान्नसंशयः ॥

सर्वेषां पायसं पक्त्वा (?) पायसं भोजयेत् द्विजान् ।
आशिषो वाचयित्वा तु पूजयेच्च शताधिकान् ॥

Colophon :

इति ईशानसंहितायां ग्रामशान्तिर्नाम पञ्चविंशाध्यायः ॥

331

Sl. No. 10738 ग्रामोत्पातशांतिः (बोधायनोक्ता) Ms. No. P. 2282/9

Beginning :

ग्रामोत्पातशान्ति व्याख्यास्यामः–

अग्निदहे घूकसृगालरोदने ग्रामस्थूणावरोहणे छिन्ने चण्डालादिप्रवेशे + ·|· ·|· ·|· शुभनक्षत्रे शुभलग्ने ग्रामोत्पातशांतिं करिष्ये इति सङ्कल्प्य ॥

End :

बलिद्रव्यं च भोज्यान्नैः अपूपव्यञ्जनान्वितैः ।
पायसान्नफलैश्चैव कूष्माण्डैः बिल्वसंयुतैः ।
सितासित × तश्वेतान्नैः इक्षुखण्डला × बहुफलान्वितैः (?) ।
दध्यक्षतसुसम्पूर्णैः बलिं कुर्यात् समाहितः ॥

Colophon :

इति बोधायनोक्तग्रामोत्पातशांतिः समाप्ता ॥

332

Sl No 10740 घूकप्रवेशशांतिः (ज्योतिषार्णवीया) Ms. No. P. 1723/24

Beginning :

मनुः–

हिमवत्युत्तरे पार्श्वे गन्धमादनपर्वते ।
सुखासीनं महादेवं ब्रह्मा पप्रच्छ विस्मितः ॥

गृहधर्मप्रवृत्तानां प्रजानां हितकारणम् ।
कलिघूंकस्वरूपेण गृहमारुह्यते यदि ॥

End:

देवस्य प्रतिमां दद्यादाचार्याय सदक्षिणाम् ।
पयस्विनीं च गां दद्यात् कलिक्लेशापनुत्तये ॥

समाराध्य विधानेन कुर्यादाज्यावलोकनम् ॥
अन्नदाने न विप्राणां सर्वदोः प्रशाम्यति ॥

Colophon :

इति श्रीज्योतिषार्णवे घूकप्रवेशशान्तिः समाप्ता ॥

333

Sl. No. 10743 **घूकप्रवेशशांतिः** **Ms. No. P. 8000/5**
(नारदपुराणीया)

Beginning :

सृगालघूकशशकपिङ्गलो व्यालसादयः (?) ।
प्रवेशयन्ति सततं गर्जयेन्मृत्युम.मुयात् ॥

षण्मासाभ्यन्तरेणैव यजमानो गृहं त्यजेत् ।
शांतिं कृत्वा विधानेन ब्राह्मणान् स्नापयेद्विजः ॥

End :

पयस्विनीं च गां दद्यात् कलिक्लेशापनुत्तये ।
× × विधानेन कुर्यादाज्यावलोकनम् ॥
एवं कृत्वा प्रयत्नेन कुर्यात् ब्राह्मणभोजनम् ।
अन्नदानेन विप्राणां सर्वदोषः प्रणश्यति ॥

Colophon :

इति नारदीयपुराणे घूकशांतिः ॥

334

Sl No 10744 घोषशांतिः Ms. No. B. 1257/3

Beginning :

मित्रोसि वरुणोसि । समहं विश्वैर्देवैः । क्षत्रस्य नाभिरसि । क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद मात्वा हिंसीत् । मा मा हिंसीत् ॥

End :

मीढुष्टम शिवतम – – – – विम्रदागहि । अर्हन् बिभर्षि – – – रुद्र
त्वदस्ति त्वमग्ने रुद्रो असुरो – – – – कृणुध्वम् । ओं शांतिश्शांतिश्शांतिः ॥

Colophon :

-- -- -- --

335

Sl. No. 10745 चतुर्थिप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 2239/2
पवमानस्सुवर्जनः । त्रियम्बकम् । महाशान्तिपञ्चशान्तिघोषशान्तयः इत्यादयः ॥

Colophon:

इति यामलोक्तशनिवाररजस्वलाशांतिः ॥

443

Sl. No. 11077 दुष्टवारप्रथमार्तवशांतिः Ms. No. P. 3804/42

Beginning :

दिवा वा यदि वा रात्रौ सूर्यवारे रजस्वला ।
महाव्याधियुता वाऽपि दु॰ [illegible] भरताऽपि वा ॥
तस्य शान्तिं प्रकुर्वीत तद्दोषशमनाय च ॥

End :

कुमराग्निश्शमीकाष्ठैः लाजैर्होमं समाचरेत्
अभिषेकं ततः कुर्यात् पूर्वोक्तविधिना तयोः ॥
सवस्त्रप्रतिमां दद्यात् आचार्याय सगां शुभाम् ॥

Colophon :

इतिदुष्टवारप्रथमार्तवशांतिः ॥

444

Sl. No. 11079 दुःस्वप्नशांतिः (स्वप्नोत्पातशांतिः) Ms. No. P 604/28

Beginning:

दिवा वा यदि वा रात्रौ दुःस्वप्नं यदि पश्यति ।
तत्क्षणादुत्थितो धीमान् पादप्रक्षाळनादिकम् ॥

दक्षिणाभिमुखो भूत्वा भस्म वामकरे न्यसेत् ।
भस्माख्यो यातु दुःस्वप्नं मुखाद्धासाद्विनर्जयेत् ॥

End :

भक्त्या तु दक्षिणां दद्यात् नमस्यन् इष्टदेवताम् ।
सर्वदुःस्वप्नजनितदोषो नश्यत्यसंशयः ॥

Colophon :

इति दुःस्वप्नशांतिः समाप्ता ।

445

Sl. No. 11082 दुःस्वप्नशांतिः स्वप्नोत्पातशांति. (शौनकीय) Ms No P. 4180/62

Beginning :

दन्तानां पतनं वापि केशानां पतनं तथा ।
दृश्यते यदि वा रात्रौ गतासु च महीतले ॥

ऊर्ध्वकेशं च तत्रैव न पश्येत्सर्वथा नरः ।
कृष्णतोयं च रक्तं वा पिबेच्छोक्ष्मशमुत्रान् ॥

End.

ब्राह्मणान् भोजयित्वा तु यथावित्तानुसारतः ।
सवस्त्रप्रतिमां गां च आचार्याय निवेदयेत् ॥

एवं यः कुरुते शांतिं स्वप्नोत्पातं विनश्यति ।
सर्वारिष्टविनिर्मुक्तः सुखी भवतु सर्वदा ॥

Colophon:

इति शौनकीये दुःस्वप्नदर्शनशांतिः ॥

446

Sl. No. 11085 दुस्वप्नशांतिः (ज्योतिषार्णवीया) Ms. No. P. 5313/48

Beginning :

अथ दुस्स्वप्नशांतिविधिरुच्यते—

दुस्स्वप्नदोषनाशाय शिसवक्कलयमन्त्रकैः ।
अष्टोत्तरसहस्रं च जप्त्वा नियमपूर्वकम् ॥
यमप्रतिमया सार्धं गां च दद्यात्पयस्विनीम् ॥

End :

रक्तचन्दनकाष्ठानि जुहुयाद्घृतपायसम् ।
गायत्र्या च सहस्रं च तेन शांन्तिर्भविष्यति ॥

Colophon :

इति ज्योतेषार्णवे दुस्स्वप्नशान्तिः समाप्ता ॥

447

Sl. No. 11086 दुस्वप्नशांतिः (वृद्धवसिष्ठोक्ता) Ms. No. P. 5587/52

Beginning :

अथ दुस्स्वप्नशांतिविधिरुच्यते--

दुःस्वप्नादिषु दुःख्यन्ते दुर्निमित्तातद्दानि च ।
आदित्यं वा सचन्द्रं च विगतद्युतिकं तथा ॥

End :

आरोहणं तथैतेषां मरणं शोकमाप्नुयात् ।
निर्वासयेत् तां नृपतिः स्वराष्ट्रात्
श्रियश्च मुच्येत ततो नरेन्द्रान् ।
किमुक्तकैः ब्राह्मणतर्पणैश्च
लोके ततः शान्तिमुपैति पापम् ॥

Colophon

इति वृद्धवसिष्ठप्रोक्तदुःस्वप्नशान्तिः समाप्ता ॥

448

Sl. No. 11101 दूर्वाक्षतहोमखण्डः (दूर्वासप्रोक्ता **Ms. No. P. 9764/33**

Beginning :

अथातो दूर्वाक्षतहोमविधिं व्याख्यास्यामः—

नानाऋषिप्रोक्तबोधाय तीयं दूर्वाक्षताज्यद्रव्येण यक्ष्य इति संकल्प्य , अनुष्टुप् छन्दः; अग्निर्देवता ; वामदेव ऋषिः ; सर्वप्रायश्चित्तं व्याहृतिमन्त्रेण स्वस्तिवाचनपूर्वकमग्निप्रतिष्ठानं कृत्वाज्यभागान्ते— ॥

End

त्रिदिनं पञ्चदिन वा पक्षं वा मासं वा द्विमासं वा त्रिमासं वा षण्मासं वत्सरं वा प्रतिदिनं वा नित्यहोमादिकर्त्तव्यमायुरारोग्यार्थं अपमृत्युनाशार्थं ग्रहपीडानाशार्थं नवग्रहहोमं रुद्राभिषेकं ब्राह्मणभोजनमिति ॥

Colophon :

दूर्वासप्रोक्तदूर्वाक्षतहोमखण्ड सम्पूर्णम् ॥

449

Sl. No. 11102 दूर्वायुतविधिः (आश्वलायनीया) Ms. No. P. 9965/96

Beginning :

अथातः सम्प्रवक्ष्यामि दूर्वायुतविधिं क्रमात् ।
सर्वपापक्षयकरं सर्वोपद्रवनाशनम् ॥

सर्वारिष्टविनाशं च क्षयापस्मारनाशनम् ।
ज्वरदाहादिशमनं सर्वव्याधिविनाशनम् ॥

End :

कम्बलं कृष्णवस्त्रं च सहिरण्यं प्रदापयेत् ।
एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते ।

इदं रहस्यं परमं पुण्यं च बलवर्धनम् ।
ऋणरोगादिनिर्मुक्तः परमं फलमश्नुते ॥

Colophon :

इति आश्वलायनोक्तदूर्वायुतविधिः ॥

450

Sl. No. 11103 दूर्वाहोमविधिः (शौनकीया) Ms. No. P. 3063/102

Beginning :

शौनकोऽहं प्रवक्ष्यामि अपमृत्युजयं तथा ।
आपूर्यमाणपक्षेषु कल्पेषु सुदिने तथा ॥
तिथ्यृक्षे × × × × –शुभवारे सुलग्नके ॥

End :

ऐश्वर्यं राजसन्मानम् पुत्रपौत्रप्रवर्धनम् ।
सर्वमृत्युमतिक्रम्य दीर्घमायुष्यमाप्नुयात् ॥

Colophon :

इति शौनकीये दूर्वाहोम समाप्तः ॥

451

Sl. No. 11105 दूर्वाहोमविधिः (हेमाद्रीये-शौनकप्रोक्ता) **Ms. No. P. 5587/17**

Beginning :

शौनकोऽहं प्रवक्ष्यामि अपमृत्युभयं तथा ।
अपूर्यमाणपक्षे तु कस्यासु सुदिने तथा ॥

प्रतिहिं शुद्धयोगे वा शुभवारे सुलग्नके ॥

End :

कृष्णधेनुमलङ्कारं ब्राह्मणाय निवेदयेत् ।
अपमृत्युमतिक्रम्य दीर्घमायुः समाप्नुयात् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शौनकोक्तदूर्वाहोमविधिः समाप्तः ॥

452

Sl. No. 11111 दृष्टिदोषशांतिः (शैवागमीया) **Ms No P. 3023/130**

Beginning :

दृग्दोषशांतिं वक्ष्यामि दृष्टिदोषहराय×× ।
×××××ने भोजनकाले च वस्त्रगन्धादिभूषणैः ॥

आस्थानमण्डपे वाऽपि विवाहे यदि संगरे ॥

End:

अचार्याय ततो दद्यात् दक्षिणाभरणादिकम् ।
एवम् यः कुरुते भक्त्या सर्वदाऽऽमयवर्जितः ॥

जीवेद्वर्षशतम् साग्रम् अपमृत्युविवर्जितः ॥

Colophon :

इति शैवागमप्रोक्तहृद्दोषशान्तिः ॥

453

Sl. No. 11120 देवताविकृतिशांतिः Ms. No.P. 4180/100

(देवतापतनभग्नस्वेदबिंद्वादिदर्शनशांतिः – नारदीया)

Beginning :

मूर्तीनां कम्पने तत्र चलने पतने तथा ।
वाग्भूते शङ्किते दष्टे हसिते रुदिते तथा ॥

तूष्णीभङ्ग दिपतने स्वेदबिन्द्वादिदर्शने ।
भ्रमिते रुदिते दाहेषकूपीटे (?) तथैव च ॥

End :

ब्राह्मणान् भोजयेत्पश्चाद्यथाविताऩुसारतः ।
सर्वारिष्टविनिर्मुक्तो ग्रामसीमसुखावहम् ॥

राज्ञः सर्वार्थसम्पत्ति सर्वशत्रुजयो भवेत् ।
देवस्य ×× फलप्राप्ति सर्वत्र सुखमश्नुते ॥

Colophon :

इति नारदप्रोक्तदेवतापतनभग्नस्वेदबिंद्वादिदर्शनशान्तिः ॥

454

Sl. No. 11122 देवालयकाकप्रवेशशान्ति Ms. No P. 3924 8

Beginning :

देवस्य तु समीपे तु यस्मिन् वृक्षपतेर्यदि :
श्वा भवेद्देवगर्भे तु काको वा समुपाविशेत् ।। ++
एतेषां दोषशांत्यर्थं तत्काले शन्तिमाचरेत् ।
आलयञ्चोपलिप्याथ सर्वत्र समतां व्रजेत् ।।

End:

. . .

षष्टिवर्षसहस्राणि विष्णुलोके महीयते ।।

इत्याह भगवान् बोधायनः ।।

Colophon:

– – – –

455

Sl. No. 11123 दोलान्दोलादिदण्डपतनशांतिः Ms No. P 4 80/98
(सनत्कुमारसंहितीया)

Beginning :

अथ दोलान्दोलादिदण्डपतनशान्तिः । सनत्कुमारः—

दोले वा यदि वान्दोले दण्डपातनभग्नके ।
मूषकैरलिदष्टैर्वा दीपाग्निः स्पृशते यदा ।।
तदग्रे कर्तृनाशः स्यान्मूले पुत्रविनाशनम् ।
तन्मध्यमध्ययोस्तस्य सर्वनाशो न संशयः ।।

End:

नमस्कारं ततः कृत्वा स्वयम् भुञ्जीत बन्धुभिः ।
पुनरान्दोलिकारूढो गृहम् गत्वा सुखोषतः ॥

एवम् यः कुरुते कर्म सर्वदोषापनुत्तये ।
धनधान्यसमायुक्तो जीवेच्च शरदः शतम् ॥

Colophon :

इति सनत्कुमारसंहितायां दोलान्दोलादिदण्डपतनशान्तिः ॥

456

Sl.No 11124 द्वादशाब्दातिक्रमशांतिः (स्कांदांतर्गता) **Ms. No. P. 4540/6**

Beginning :

युधिष्ठिरः—

भार्यामातृपितृभ्राताभगिनीपुत्रिकासुताः ।
स्वदेशे वान्यदेशे वा एकैकम् दृष्टा न च (?) ॥

द्वादशाब्दे तु हे ! कृष्ण ! किं कर्तव्यम् सदा जनैः ।
शृणु राजन् अहम् वक्ष्ये मुनिभिः कथितम् पुरा ॥

End :

अकृत्वा यदि सत्कर्म षण्मासान्मृत्युमाप्नुयात् ।
शान्ति कुर्युः जना ये च तेषां दोषो न विद्यते ॥

लोकान् पातुमिथं शान्तिः मुनिभिः लिपता कथं (?) ॥
एतच्च मुनिभिः पार्थ लोकानां हितकारणम् ॥

Colophon :

इति श्रीस्कान्दपुराणे द्वादशाब्दातिक्रमशान्तिः समाप्तः ॥

457

Sl. No. 11125 **द्वादशीयुतदुष्टनक्षत्रशांतिः** **Ms No. P. 9965/56**

Beginning :

अदितिः पुष्यमाश्लेषा चित्रा स्वाती द्विदेवता ।
अभिजिद्धे च पूषा च श्रवणः चाश्विनी यमौ ॥

द्वादशैतेषु ऋक्षेषु अशुभम् प्रथमार्तवे ।
आद्यादिपर्वऋक्षेषु मैत्रादौ तु चतुर्ष्वपि ॥

End :

काश्मीरवङ्गकालिङ्गसिन्धुसौराष्ट्रमागधान् ।
शाल्वबर्बरसंज्ञांश्च देशान् हित्वात्र कारयेत् ॥

याम्यस्वपूर्वासु विभर्तृका च
ज्येष्ठाग्निधिष्ण्या धनवर्जिता च ।
मघेशयोश्शोक समन्विता च
जानादिवौ वा हि रजोऽपि दृष्टम् ॥

Colophon :

इति द्वादशीयुतदुष्टनक्षत्रशान्तिः समाप्ता ।

458

Sl. No. 11126 **द्वादशीरजस्वलाशान्ति (रुद्रयामलीया)** **Ms. No. P. 2239/7**

Beginning :

द्वादश्यां यदि नारीणां प्रथमार्तवसंभवः ।
स्वकु × × × × यापि पतिं त्यक्त्वापकारिणी ।।

आषोडशदिनानन्त्ये कुर्याच्छान्तिं शुभे दिने ॥

दिवाकर महातेजाः × × × स्तिमिरापह ।
तव मूर्तिप्रदानेन सर्वारिष्ट हराशु मे ।।

एवं शान्ति प्रकुर्वीत पुत्रपौत्राभिवृद्धये ।।

Colophon :

इति रुद्रयामळे द्वादश्यार्तवशान्तिः ।।

459

Sl. No. 11137 द्वादशीहोमः (पुत्रकामेष्टिहोमः) Ms. No. P. 2282/10

Beginning :

ओम् ।। वसन्ते शुक्लपक्षे एकादश्यां उपोष्य द्वादश्यां प्रातः स्नात्वा नित्यकर्मादि निर्वर्त्य ब्राह्मणाननुज्ञाप्येत् । + + + + + यामलोक्तप्रकारेण पुत्रकामेष्टिरीत्या पुरुषसूक्त-विधानेन द्वादशीहोमं करिष्ये ; इति सङ्कल्पः ।।

End :

पूर्णे वत्सरे आचार्यं पूजयित्वा , दश प्रतिमादिकं आचार्याय दत्वा , सवत्सां गां दद्यात् । शतं ब्राह्मणान् भोजयेत् । सुपुत्रो जायते इत्याह यामलः ।।

Colophon :

इति पुत्रकामेष्टिहोमः सम्पूर्णः ।।

460

Sl. No 11138 द्विग्रहयोगशांतिः (शौनकोक्ता) Ms. No P. 2299/77

Beginning :

अथ द्विग्रहयोगशान्तिविधिरुच्यते । भगवान् शौनकः—

शौनकोऽहं प्रवक्ष्यामि राजराष्ट्रहिताय च ।
शान्तिं द्विग्रहयोगादिदानं चापि विशेषतः ।।

End :

एवं कृत्वा विधानेन अपमृत्युं × × दहति ।
न तस्य जायते व्याधिः न पीडां याति शान्तिभिः ।।
एवं कृत्वा विधानेन वेदोक्तायुर्भविष्यति ।।

Colophon :

इति शौनकीये द्विग्रहयोगशान्तिः ॥

461

S·l· No 11141 द्विग्रहयोगशांतिः (शौनकीय) Ms No P· 10041/60

Beginning:

शौनकोऽहं प्रवक्ष्यामि राजगणहिताय च ।
शान्ति द्विग्रहयोगादेः दानं चापि विशेषतः ॥
भौमादिषु त्रयो द्वौ वा चत्वरो वा च पञ्च वा ।
यद्येकाराशौ मिलितास्थता (?) भयभयंकराः ॥

End :

एवं कृत्वा विधानेन अपमृत्युर्विनश्यति ।
न तस्य जायते व्याधिः ××× याति शान्तिभिः ॥
एव कृत्वा विधानेन वेदोक्तार्थुभविष्यति ॥

Colophon :

इति शौनकीये द्विग्रहादियोगशान्तिः ॥

462

Sl· No· 11146 धनिष्ठापञ्चकशांतिः Ms· No P· 6707/2

Beginning :

अतः परं प्रवक्ष्यामि शान्ति लोकहिताय च
धनिष्ठापञ्चके मर्त्या म्रियन्ते यदि तत्कुलाः ॥
तद्बान्धवा वा तद्भार्या षण्मासान्मृत्युमाप्नुयुः ।

महतीमापदं चापि प्राप्नुयू रोगमद्भुतम् ॥
यदि शान्ति न कुर्वीरन्‌ ी ण्मासान्मृत्युमाप्नुयुः ॥

End :

बाला वृद्धाः स्त्रियः शूद्राः भृत्याः दास्यः तथाभयाः ।
धनिष्ठापञ्चके प्रेता तद्गृहेऽरिष्टदायकाः ॥
तस्मात्सर्वप्रयत्नेन शान्तिमेनां समाचरेत् ।
अन्यथा मृत्युमाप्नोति ब्रह्मापि सुरक्षितः ॥

Colophon :

इति धनिष्ठापञ्चकशान्तिः समाप्ता ॥

463

Sl.No 11150 धनिष्ठापञ्चकशांतिः (ज्योतिषार्णवीया) Ms No. P. 100411/

Beginning :

अथातः संप्रवक्ष्यमि धनिष्ठापञ्चकं विधिम् ।
सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ॥
कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मनः ।
× × × × × × × × वरुणप्रीतये नमः ॥

End:

स्वर्ण पात्रं करो यस्मादतः शान्तिं प्रयच्छ मे ।
गं भूदानं पञ्चैतानि कुर्याद्दोपशान्तये ॥

स्वर्णदानम् । आज्यावेक्षणम् ।

ब्राह्मणान् भोजयेत् पश्चात् सर्वदोषः विमुच्यति ॥

Colophon :

इति ज्योतिषार्णवे षण्मासादूर्ध्वं पञ्चकशान्तिः । इति पञ्चकशान्तिविधिः ॥

464

Sl. No 11151 धन्वन्तरिशांतिः Ms No. P. 291425

Beginning :

धन्वन्तरिमहाशान्तिं महाव्याधिसमुद्भवे ।
वक्ष्ये वागीशनामाहं सर्वशास्त्रानुसारतः ॥

नियमितौषधैः पथ्यैर्निवातशयनादिभिः ।
जपैर्दानै शान्तिहोमैर्देवतातर्पणैरपि ॥

End :

प्रवेशये ततो गेहमाचार्यं पूजयेदथ ।
ब्राह्मणान् भोजयित्वेवं ब्राह्मणान् भोजयेत्ततः (?) ॥

एवं कृत्वा विधानेन सर्वाघ्रयो विमुच्यते ।
सर्वदा सौख्यमाप्नोति दीर्घायुष्यं यशो बलम् ॥

Colophon :

इति धन्वन्तरिशान्तिः ॥

465

Sl. No. 1115 ध्वजपातशान्तिः Ms. No. P. 418079

Beginning :

अथातः संप्रवक्ष्यामि ध्वजादे पतनं क्रमात् ।
रथादिपातनं यस्तु स्तम्भमाद्याः प्रपातने (?) ॥

हर्म्यप्रपातनायाश्च (?) कलशप्रपतनं तथा ।

देवागारे तु पतने देवतानां प्रपातने ॥
सर्पाणां पतने यस्तु फल वक्ष्ये पृथक् पृथक् ॥

End:

कुम्भोपरि तमावाह्य पूजाहोमं च पूर्ववत्
तिलमिश्रंचरो (?) राज्य पालाश ामिधं क्रमात् ॥

विष्णवे चाज्यचरुभिस्तत्तन्मन्त्रेण होमयेत् (?)
प्रत्येकं पञ्चसाहस्र हुनोत्स्विष्टकृत (?) ततः ॥

Colophon :

– – – –

466

Sl. No. 11157 ध्वजपतनशांतिः Ms. No.P. 4180/102
(सर्वसारोध्दारसंहितान्तर्गता)

Beginning :
अथ ध्वजपतनशान्तिः—

एवं ध्वजादिपाते तु पूजाहोम तु पूर्ववत् ।
कुम्भाभिमन्त्रण कृत्वा दानं कृत्वा पृथक् पृथक् ॥

ध्वजादिदेवतामर्पं तस्मात् पूर्वोक्तहोमयेत् (?) ।
गोभूहिरण्यदानानि सर्वतन्त्रेष्वय क्रमात् ॥

End :

कुम्भस्थान् सलिलान् सर्वान् प्रोक्ष्येदद्भुतदर्शने ।
तत्क्षेपं तु ततः कर्ता प्रोक्ष्य दोषापनुत्तये ॥

ब्राह्मन् भोजयेत्पश्चाद्दिगीशाय बलिं हरेत् ।
तत्तद्दोपक्षयं श्री सत्यमेवद्धं न संशयः ॥

Colophon :

इते श्रीसर्वसारोद्धारसंहितायां ध्वजपतनादिशान्तिः समाप्ता ॥

467

Sl. No. 11158 नक्षत्रगण्डशान्तिः Ms. No. P. 604/84

(उत्तरगार्ग्योक्ता अभुक्त नक्षत्र जननशांतिः)

Beginning:

अश्विनीमघमूलादौ त्रिषट्कं नव नाडिकाः
रेवतीसर्पशक्रान्ते समाश्चरतु सप्तकाः ॥

अश्विनीमघमूलादो नाडिकाद्वितयं तथा ।
रेवतीसर्पशक्रान्ते नाडिकाद्वितयं तथा ॥

End :

मूले वा सर्पगण्डे वा कुर्यादेतानि यत्नतः ।
आयुर्वृद्धिकरार्थाय गण्डदोषप्रशान्तये ॥

Colophon :

इत्युत्तरगार्ग्योक्तनक्षत्रगण्डशान्तिः समाप्ता ॥

468

Sl. No. 11159 नक्षत्रगण्ड शांतिः (वृद्धगार्ग्येया) Ms No. P. 2239/523

Beginning :

अथ नक्षत्रगण्डान्तशान्तिविधिरुच्यते । वृद्धगार्ग्य उवाच—

ऽ× × × × षु मूलादौ त्रिषट्क नवनाडिकाः ।
रेवती सर्प शक्रान्ते भासान्तु ऋतुमायकाः ॥

अश्वीनीमखमूलादौ नाडिकाद्वितयं तथा ॥

End:

शुभमूर्ति शिवं शांतं ते ददमि द्विजोत्तम ॥

ईश्वरदानम्—

शुक्लं वागीश्वरं चैव कांस्यपात्रसमन्वितम् ।
गण्डदोषप्रशान्त्यर्थं दद्याद्वेदविदे शुचिः ॥

Colophon :

इति वृध्दगार्ग्योक्तनक्षत्रगण्डान्तशान्तिः ॥

469

Sl. No. 11160 नक्षत्रगण्डशान्तिः (सप्तर्षिप्रोक्ता) Ms. No. P. 2239/53

Beginning :

अथ ऋषिप्रोक्तनक्षत्रगण्डान्तशांतिः—

सुतिथौ शुभनक्षत्रे चन्द्रताराबलान्विते ।
गृहस्येशानदिग्भागे शुद्धदेशे सुसज्जिते ॥
गोमयालेपनं कुर्यात् रङ्गवल्यादिकं ततः ॥

End :

वारुणान् कलशान् दद्यात् ब्राह्मणान् भोजयेत्ततः ।
एवं चेत् कुरुते भक्त्या गण्डदोषः प्रशाम्यति ॥
आयुरारोग्यसंपन्नः जीवेद्वर्षशतं नरः ॥

Colophon :

इति सप्तर्षिप्रोक्तनक्षत्रगण्डान्तजननशांतिविधिः ॥

470

Sl No. 11163 नक्षत्रगण्डशांतिः (शौनकीया) Ms. No. P. 4180/29

Beginning :

अश्विनीमघमूलाद्यौ त्रिषर्क्षकनवनाडिकाः ।
रेवतीसर्पशक्रान्ते मासद्वयन्तु सायका ॥

अश्विनीघटिका मूलनाडिकाद्वितयं तथा ।
रेवतीसर्पशक्रान्ते नाडिका द्वितय तथा ॥

End :

शुक्रंवागीश्वरं चैव ताम्रपात्रे समाहितः ।
गण्डदोषप्रशान्त्यर्थं दद्याद्वेदविशारदः ॥

ब्राह्मणान् भोजयित्वा × शतेनाथ स्वशक्तितः ।
एवं यः कुरुते तत्र सर्वगण्डैः प्रमुच्यते ॥

Colophon:

इति शौनकीये नक्षत्रगण्डशांतिः ॥

471

Sl. No. 11175 नक्षत्रबलिविधिः Ms. No P 2579/64

Beginning :

नक्षत्रबलिरुच्यते—

वारचलया तु न स्वास्थ्यं यदि , ताराबलिर्भवेत् ।
तदहं संप्रवक्ष्यामि शृणु गर्ग त्यमादित ॥ १

कृत्तिकासु स्थिरो व्याधिः स्त्रिया वागुरुपोष्य (?) वा ॥

End:

अश्विन्या दशदिनानि । अश्वी देवता । श्रीरामाउड्डूकबलिः । भरण्यां न स्वास्थ्य भवति । प्रतेदिश नमत्स्य गांते । न हेत्रा त्रं यमदिशि निक्षिपेत् । यमो देवता । रोगाद्वि मुच्यते ॥

Colophon :

— — — — —

472

Sl. No. 11178 नक्षत्ररोगोत्पत्तिबलिविधिः Ms. No. P. 3804/59

(नक्षत्ररोगोत्पत्तिबलिविधिः – गार्ग्यी)

Beginning :

अश्विन्युद्भूतरोगस्तु नवरात्रेण शाम्यति ।
भिषक्स्थानेऽथपङ्क्तौ वा मुद्गान्नं तु बलिं ददेत् ॥
भरण्युद्भवरोगास्तु पञ्चरात्रेण शाम्यति ॥

End :

सर्वोपचारयुक्तं तु बलिं दद्यात्समाहितः ।
मार्जयेत्तु ततस्तेत विधिना बलिना पुनः ॥
पश्चादुक्तप्रदेशे तु बलिं दद्याद्विचक्षणः ॥

Colophon :

इति गार्ग्यप्रोक्तं नक्षत्ररोगोत्पत्तिबलिविधानं समाप्तम् ॥

473

Sl. No. 11081 नक्षत्रशांतिः (गार्ग्योक्ता) Ms. No. P. 604/27

Beginning :

नक्षत्रदेवताप्रीत्यै सुवर्णमयीं धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा आयुरारोग्यं भवति । इत्यश्विनीनक्षत्रशान्तिः ॥

End :

नक्षत्रदेवताप्रीत्यै हिरण्मयीं गां दक्षिणां दद्यात् । ब्राह्मणान् भोजयेत् । आशिषं वाचयित्वा आयुरारोग्यं भवति ॥

Colophon:

इति सप्तविंशतिनक्षत्रशान्तिः समाप्ता ॥

474

Sl. No. 11183 नक्षत्रशांतिः (नक्षत्रहोमविधिरूपः शौनकीयः) Ms. No P. 79 1/22

Beginning :

शौनकोऽहं प्रवक्ष्यामि नक्षत्रं होममुत्तमम् ।
आयुरारोग्यसिध्दयर्थं द्विजानां भावितात्मनम् ॥

अन्वाधानादिक कुर्यात् आज्यभागान्तसंयुतम् ।
अग्निः प्रजापतिः सोमो रुद्रादित्यबृहस्पतिः ॥

End :

मासेनवेत्यृचा वापि हुत्वाज्येन स्रुवेण च ।
स्विष्टकृदादि हुत्वा च होमशेषं समापयेत् ॥
दद्याद्धेनुं हिरण्यं च आचार्याय प्रयत्नतः ।
ब्राह्मणान् भोजयेत्पश्चात् सर्वकार्यसमृद्धये ॥

Colophon :

इति शौनकीये नक्षत्रहोमविधिः ॥

475

Sl. No. 11187 नक्षत्रशांतिः (नृसिंहभट्टीयविधानमालान्तर्गता) Ms. No. C. 4 9 /3

Beginning :

यस्मिन् ऋक्षे भवेत्पीडा तस्य ऋक्षस्य देवताम् ।
मूर्तिं स्वर्णमयीं कृत्वा पूजयेत् प्रयतश्शुचिः ॥
गोमयेनाशु संलिप्य मण्डलं शुभलक्षणम् ++ ।
कृत्वा तु स्थण्डिलं तत्र + + । + + +
ईशान्यदेशकोणे तु कलश स्थापयेत्सुधीः ।

देवता यस्य ऋक्षस्य मन्त्रा स्तल्लिङ्ग एव च ।
द्रव्यं च तस्य यद्युक्तं × × × ॥
+ + + + + + +
तत्सर्वं विदुपानीय होम तत्र प्रकल्पयेत् ।।

End :

रेवत्यामष्टरात्रं च मरणं वा प्रजायते ।
पूषा तु देवता तत्र पद्मवर्णोम्बुजासनः ॥

+ + + + + +
अखण्डितफलानि स्युः प्रधानं यज्ञशाखिनः ।
शतमष्टोत्तरं संख्या हवने परिकीर्तितः ॥

Colophon:

इति श्रीनृसिंहभट्टविरचितायां विधानमालायां नक्षत्रशान्तिविधानम् ॥

476

Sl. No. 11168 नक्षत्रहोमः (शौनकोक्त) Ms.No.P. 3023/123

Beginning :

नक्षत्रहोम × × × × अन्याधिरुच्यते तस्य तत्पूर्वोत्तरयोर्नक्षत्रयोर्होमः कर्तव्यः । नक्षत्रहोमस्य साधारणधर्मेण उच्यते ॥

End :

दूर्वाभिश्च यथा × × घृना××××××× प्रभृतिमेत्रम.त्मक.मेत्यादि सर्वेषां नक्षत्राणां तत्तन्मन्त्रैर्नामभिर्जुहुयात् ॥

Colophon :

इति शौनकोक्तनक्षत्रहोमविधिः ॥

477

Sl No. 11189 नक्षत्रहोमविधि (बोधायनीयनक्षत्रहोमप्रयोगः) Ms. No. P. 4863/48

Beginning :

बोधायनोक्तनक्षत्रहोमप्रयोगः—

होमं कुर्यात्तु पश्चात्तु आचार्यो ब्राह्मणैस्सह ।
प्रधृत्यावेज्यावसिक्ताः (?) त्रिराशिविवर्जिताः ॥

End :

समिदष्टोत्तरशतं हैममष्टौ द्विजन्मनाम् ।
अवश्यमेतत् कर्तव्यं सद्योजातनवात्परम् ।।

Colophon :

— — — — —

478

Sl. No. 11200 नरपतनशान्तिः Ms. No. P. 5930/61
(ब्रह्मपुराणोक्ता ज्योतिषार्णवीया)

Beginning :

ज्योतिषार्णवे जैमिनिः—

प्रमत्तोवाऽप्रमत्तो वा निद्रयाऽऽलस्यतोऽपि वा ।
स्वपदापदेन (?) संयुक्तो वा दुर्बलादिप्रपातनः ॥

End :

विप्रान् सन्तोषयेत्पश्चात् घृतपायसभोजनैः ।
अकस्मात्पतने दोषः अरिष्ट याति तच्छमम् ॥

Colophon :

इति ब्रह्मपुराणोक्तनरपतनशान्तिः ॥

479

Sl. No. 11201 नरपतनशांतिः(निद्रावशान्नरपतनशांतिविधिः) Ms. No. P. 912 /
(ब्रह्माण्डपुराणोक्ताज्योतिषार्णवीय)।

Beginning :

अथ निद्रावशान्नरपतनशान्तिः । ज्योतिषार्णवे जैमिनिः—

प्रमत्तो वाऽप्रमत्तो वा निद्रयालस्यतोपि वा ।
खपसकेन (?) संयुक्तो ....दुर्लभादिप्रपातनः ।।

तैलाद्यशीतदेहो वा अद्भुनालङ्कृतोऽपि वा ।
एतेषां प्राणिनां मध्ये वैषम्याद्वा प्रपातनः ।।

End:

ऋत्विग्भ्यो दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ।
विप्रान् सन्तोषयेत्पश्चात् घृतपायसतेमनात् ।।

अकस्मात्पतने दोषः अरिष्टं याति तत्समम् ।।

Colophon:

इति ब्रह्माण्डपुराणोक्तनरपतनशान्तिः समाप्ता ।।

480

Sl. No. 11205 नरसिंहप्रतिमादानविधिः (याम्लोक्ता) Ms. No. P. 3804/41

Beginning :

अतः परं प्रवक्ष्यामि दानमाहात्म्यमुत्तमम् ।
महाभयकरं नित्यं ग्रहदोषनिवारणम् ।।

दुःस्वप्नदुर्निमित्ताद्यैः संभूतोपद्रवच्युतिम् ।
नारसिंहमिति ख्यातं महाभयनिवारणम् ।।

End:

ततो ब्राह्मणमभ्यर्च्य वस्त्रैराभरणैरपि ।
उदङ्मुखाय विप्राय दद्यात्तां च सदक्षिणाम् ॥

प्रह्लादप्रतिमां तस्मै आचार्याय समां शुभाम् ।
समस्तभयसंत्यक्तं सर्वमङ्गलसंयुतम् ॥

Colophon:

इति यामलोक्तनरसिंहप्रतिमादानविधिः ॥

४४१

Sl. No. 11207 नवग्रहचक्रकल्पः (मार्कण्डेयीयः) **Ms. No. P. 5951/10**

Beginning :

वसिष्ठ उवाच—

शृणु राम प्रवक्ष्यामि इक्ष्वाकुकुलनन्दन ।
मार्कण्डेयप्रसादेन तस्य चक्रं विनिर्मितम् ॥
\+ \+ \+ × \+
नवग्रहप्रसादेन सर्वत्र विजयी भवेत् ॥

End :

. . . .

गन्धपुष्पादिधूपं च दीपं ताम्बूलमेव च ।
प्रदक्षिणनमस्कारम गुरूणां पूजनं भवेत् ॥

इति तत्कथितं किञ्चित् किं भूयः श्रोतुमिच्छसि ।

Colophon :

इति श्रीहरगौरीसंवादे मार्कण्डेयविरचिते रामस्य वसिष्ठोपदेशे नवग्रहचक्रकल्प सम्पूर्णः ॥

482

Sl. No 11209 नवग्रहजपविधिः Ms No. P. 7758/7

Beginning :

अथजपविधिः । ಸೂರ್ಯನಿಗೆ —

उ××× मि : मन्त्रस्य कण्वपुत्रप्रकण्वऋषिः गायत्री छन्दः । सूर्यो देवता ।

+ + + + ध्यानम्—

पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरङ्गवाहनः ।
दिवाकरो लोकगुरुः किरीटी
मैत्रीप्रसादं विदधातु देवः ॥

मनसोद्दिष्टजपं उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यं इति जपम् ॥

End :

मृत्युबाधाप्रशमनं दुस्वप्नभय ×××× ।
× × × × नित्यं महामृत्युनाशनम् ॥

यावच्छक्यं सदा कुर्यात् गृहाण ×××× ।
××××× यीन् सर्वोपद्रवनाशनम् ॥

न तस्यमृत्युबाधा स्यात् न च ब्रूयाच्छुभं क××× ।

Colophon :

— — — —

483

Sl. No. 11210 नवग्रहद्रव्यदानविधिः Ms No. P. 9254/43

Beginning :

नवग्रहदानम्—

गोधूमाः सर्वजन्तूनां बलपुष्टिविवर्धनाः ।
सुरव्याश्च हव्यकव्येषु अतः शान्तिं प्रयच्छ मे ॥

रक्तवस्त्रयुगं यस्मादादित्यस्य च वल्लभम् ।
प्रदानात्तस्य मे सूर्यः सदा शान्तिं प्रयच्छतु ॥

End :

शीतवातोष्णसन्त्राणं लज्जाया लक्षणं परम् ।
देहालङ्करणं वस्त्रं अतश्शान्ति प्रयच्छ मे ॥

स्वर्णं पवित्रममलं स्वर्णं पापप्रणाशनम् ।
स्वर्णं हि शङ्करं यस्मादतः शान्ति प्रयच्छ मे ॥

अस्मैब्राह्मणायेत्यादि ॥

Colophon :

— — — —

484

S l. No 11211 नवग्रहध्यानविधिः Ms. No. P. 3023/171

(नवग्रहातिथ्यविधिः रुद्रयामलिया)

Beginning:

× × × × × × × कृपया रक्ष मां सदा ॥

सूर्याय नमः, विष्टरं समर्पयामि + +

त्रलोक्यदीपकं देवं त्रिगुणं तु त्रयीमयम् ॥

End :

इति मन्त्रं समुच्चार्य दद्याद्दक्षिणया सह ।
पुरुषाहारमन्नं वा फलं वा प्रतिमां तथा ॥

पूर्वोक्तमानं धान्यं वा ग्रहदोषो विमुच्यते ॥

Colophon:

इति रुद्रयामले नवग्रहध्यानदानविधिः ॥

485

Sl. No. 11212 नवग्रहप्रतिमादानम् Ms No P. 7401/133

Beginning :

पद्मासनं × पद्मकरं × द्विभुज च किरीटिनम् ।
तव मूर्तिप्रदानेन सूर्यप्रीतिश्च मे सदा ॥ १ ॥

श्वेताम्बरधरं सोमं चतुरश्रं महाबलम् ।
तव मूर्तिप्रदानेन योगदोषापनुत्तये ॥ २ ॥

End :

चणकोपरिनिक्षिप्तोऽसि सदानेन मे द्विजः (?) ।
पीडां दहतु सर्वार्थं सिध्दिं यच्छतु मे सदा ॥३॥

Colophon :

– – – – – –

486

Sl. No. 11213 नवग्रहप्रतिमादानम् (शौनकीयम्) Ms. No. P. 8178/43

Beginning :

अत्रोक्तप्रतिमादानमुच्यते । भगवान् शौनकः—

भूषितं भास्कराणां च तत्तद्द्रव्यसमन्वितम् ।
प्रह्वार्थ(र्ध)वस्त्रप्रतिमां कुम्भं × मन्त्र × पयेत् ॥

× × × × अतः शान्तिं प्रयच्छ मे ॥ १ ॥

End :

नानारूपधरो देवः श×णां च भये × × ।
तव मूर्तिप्रदानेन सन्तु सर्वाऽभयास्तु मे ॥

Colophon :

इति शौनकीये नवग्रहप्रतिमःदानानि ॥

487

Sl·No· 11214 | नवग्रहप्रीतिदानविधिः (वसिष्ठोक्ता) | Ms. No· P· 60+,16

Beginning :

कण्टक कनक धेनु काश्मीरं रक्तचन्दनम् ।
दैवज्ञाय ददन्नित्यमर्कदोषो विमुच्यति ॥
चन्द्रकान्त च कर्पूरं मौक्तिकं श्वेतचन्दनम् ।
कार्पासदानमात्रेण चन्द्रदोषो विमुच्यति ।

End :

तत्तद्ग्रहोक्तमध्येषु एकैक वा प्रदापयेत् ।
एकैकं स्याद्ग्रहस्यादि × × × × × × ॥
विमते स ते सर्वेषां महाफलमवाप्नुयात् ॥

Colophon :

इति वसिष्ठोक्तनवग्रहप्रीतिदानविधिः ॥

488

S. No. 11215 नवग्रहप्रीतिदानविधि (यामलोक्त) Ms. No. P. 604/17

Beginning :

धेनुदानं च सर्वेषां वित्तवानपि कारयेत् ।
रोगादिभयदुःखादिसर्वहानिर्भवेदपि ।

किं कुर्वन्ति तदाकाले ग्रहदोपहराय च ।
ग्रहप्रीत्यन्नदानं वा फलदानमथापि वा ॥

End :

अन्नदानं प्रदास्यामि ग्रहाणां च पृथक् पृथक् ।
× × × × × × ब्राह्मणानां ईषितः ॥

ग्रहदोपयुनानां च × × गाहारमात्रतः ।
यवगोधूममिश्र न्नदानेन रविदोषनु ॥कृ

Colophon :

इति यामलोक्तनवग्रहप्रीतिदानविधिः ॥

489

S. No. 11216 नवग्रहप्रीतिदानविधि Ms. No. P. 1967/2

Beginning :

धेनुभानं च सर्वेषां वित्तवानपि कारयेत् ।
एक × × ग्रहस्यापि × × × णश्रयेत् ॥

दरिद्राणामनाथानां × × × ह्युपप्लवे ।
रोगादिभवदुःखाद्यैः सर्वहानिर्भवेद्यदि ॥

End :

पीडां दहतु सर्वार्थसिद्धि वा विजयं कुरु ।
सुवर्णं दक्षिणां दद्याद्यथावित्तानुसारतः ॥

ग्रहदोषविनिर्मुक्तः सर्वोत्पातविवर्जितः
सर्वकामफलोपेतः धनधान्यान्वितः सुखी ॥

Colophon :

इति हेमाद्रौ ××× डेकाण शान्तिप्रकारेण ग्रहाणां प्रीतिधान्यदानानि समाप्त. ॥

490

Sl. No. 11220 नवग्रहप्रीतिदानविधिः (मानवीया) Ms. No. P. 5930/60

Beginning:

अथ पुराणोक्तनवग्रहप्रीतिदानानि –

धेनुं यानं च वित्तं वा ×× कारयेत् ।
एकैकस्य ग्रहस्यापि द्वादशब्रह्मभोजनम् ॥

End:

केतुग्रहकृता पीडा नाशमायात्यसंशयम् ।
गृहदानं नरः कुर्यात् पुराणोक्तविधानतः ॥

Colophon :

इति मानवीयोक्तानवग्रहप्रीत्यन्नदानविधिः ।

491

Sl. No. 11228 नवग्रहप्रीत्यभयदानविधिः (अतिमानवीया) Ms. No. P. 4863/20

Beginning :

अन्नदानं प्रवक्ष्यामि ग्रहाणां च पृथक् ।
शक्तानामप्यशक्तानां ब्राह्मणानां च योषिताम् ॥
ग्रहदोषयुतानां च पुरुषाहारमात्रत. ॥

End:

पञ्चवर्णान्नदानेन तक्रपक्वान्नकैरपि ।
केतुग्रहकृता पीडा नाशमायात्यसंशयः ॥

ग्रहदानं नृपः कुर्यात् पुराणोक्तविधानतः ॥

Colophon:

इत्यतिमानवीयोक्तनवग्रहप्रीत्यभयदानविधिः ॥

492

Sl. No. 11229 नवग्रहप्रीत्यन्नदानविधिः Ms. No. P. 10070/41

Beginning :

अथ पुराणोक्तनवग्रहप्रीतिदानानि—

धेनुदानं च सर्वेषां वित्तवानपि कारयेत् ।
एकैकस्य ग्रहस्यापि द्वादशब्रह्मभोजनम् ॥

दरिद्राणमनाथानां वसिष्ठ दोषाद्युपप्लवे ।
रोगातिभयदुःखाद्यैः सर्वहानिर्भवेद्यदा ॥

End :

सक्षीरलवणान्नेन राहुदोषः प्रशाम्यति ।
पञ्चवर्णान्नदानेन तक्रपक्वान्नकैरपि ॥

केतुग्रहकृता पीडा नाशमायात्यसंशयः ।
ग्रहदानं नृपः कुर्यात्पुराणोक्तविधानतः ॥

Colophon :

इति मानवीयोक्तनवग्रहप्रीत्यन्नदानविधिः ॥

493

Sl. No. 11230 नवग्रहफलदानविधिः Ms. No. P. 79804/185

Beginning :

अथ पुराणोक्तनवग्रहफलदानविधिः—

धेनुदानं च सर्वेषां वित्तवानपि कारयेत् ।
एकैकस्य ग्रहस्यापि द्वादशब्राह्मणा× ×पेत् ॥

दरिद्राणामनाथानां महादोषाद्युपप्लवे ।।

End :

द्राक्षादिफलदानेन शुक्रदोषा लयं ययुः ।
बदरीफलदानेन शनिदोषा लयं ययुः (!) ॥

दाडिमाख्यफलेनैव राहुदोषा लयं ययुः ।
कपित्थफलदानेन केतुदोषा लयं ययुः (!)॥

Colophon :

इति पुराणोक्तनवग्रहफलदानविधिः ॥

494

Sl No 11231 नवग्रहमूर्तिदानविधिः (मन्त्राः) Ms. No. P. 5587/68

Beginning :

अथ सूर्यमूर्तिदानमन्त्रः—

पद्मासनः पद्माकरो द्विबाहुः
पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी
श्रेयांसि मह्यं विदधातु देवः ॥

End :

धूम्रो द्विबाहुर्वरदो गदाभृत्
गृध्रासनस्थो विकृताननक्षः ।
किरीटकेयूरविभूषणाङ्गः
सदास्तु मे केतुगणः प्रशान्तः ॥

Colophon :

इति नवग्रहमूर्तिदानमन्त्राः समाप्ताः ॥

495

Sl. No. 11233 नवग्रहयोगशान्तिः (ब्रह्मर्षिप्रोक्ता) **Ms. No. P. 3023/150**

Beginning :

अथातस्संप्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य त्रिजन्मनक्षत्रे राशौ लग्ने × × × × ॥
× × × ग्रहास्सर्वे तस्य मृत्युर्न संशयः ॥

End :

नवमस्थे धर्महानिः दशमे कार्यनाशनम् ।
एकादशेऽर्थलाभः स्यात् द्वादशे व्याधिमाप्नुयात् ॥
× × × ग्रहेण संक्रान्तौ तत्र राश्युदय फलम् ॥

Colophon :

इति ब्रह्म-ऋषिविरचितग्रहयोगशान्तिः ॥

496

Sl. No. 1234 नवग्रहयोगशान्तिः **Ms. No. P. 3023/152**

Beginning

अतः परं प्रवक्ष्यामि ग्रहयोगादिशान्तिकम् ।
अमावास्यादितिथिषु ग्रह × × भवेद्यदि ॥
एकर्क्षे भिन्नराशौ वा एकराश्यर्क्षके तथा ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् धेनुं शङ्खादयोरपि(?) ।
तदभावे यथाशक्ति हिरण्यमपि दापयेत् ॥

Colophon :

इति यामलोक्तग्रहयोगशांतिविधानं समाप्तम् ।.

497

Sl. No. 11235 नवग्रहगतफलादिदानम् Ms No. P. 3023/151

Beginning :

नीलं रत्नं च वैडूर्यं माणिक्यं पुष्परागकम् ।
पञ्चरत्नमिति ख्यातं प्राहुर्वेदविदो × ॥

जटामांसीहरिद्रे द्वे मुराशैलेयचन्दनम् ॥

End :

कपित्थं बृहस्पतये , द्राक्षाफलं शुक्राय , जम्बूदुम्बरं शनैश्चराय , दाडिमं राहवे , केतोः पनसमित्युपहारं दद्यात् ॥

Colophon :

इति ग्रहयोगशान्तिः (?) समाप्ता ॥

498

Sl No. 11237 नवग्रहशांतिकल्पः (शौनकीयः) Ms. No. P. 734/17

Beginning :

ताम्रं रत्नं सुवर्णं च धान्यं वस्त्रं च रौप्यकम् ।
अयःपिण्डं तिलांश्चापि दद्यादर्कादि (?) यत्नतः ॥

दानमन्त्राः—

पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी
मयि प्रसादं विदधातु देवः ॥

End :

ग्रहाधीनं जगत्सर्वं मन्त्राधीनं तु दैवतम् ।
सर्वेषां विनिर्मुक्तो ब्रह्मलोके महीयते ॥

Colophon:

इति शौनकीये ग्रहयोगशान्त्यां नवग्रहप्रतिमादानम् ॥

499

Sl. No. 11241 नवग्रहशान्तिकल्पः (ब्रह्मयामलीयः) **Ms.No.P. 3924/4**

Beginning :

अथातस्सम्प्रवक्ष्यामि यदुक्तं ब्रह्मयामळे ।
सप्ताङ्गराज्यराष्ट्राणां वृध्यर्थं ग्रहशान्तिकम् ॥

ग्रहपीडा भवेत्तस्य उक्तकाले महीभृताम् ।
ग्रहप्रवेशे प्रारम्भे यज्ञप्रारम्भके तथा ॥

End :

ऐरावतकुलोद्भूत कणद्घण्टासमन्वित ।
××न्द्रप्रीतिकरो नित्यं अतश्शान्तिं प्रयच्छ मे ॥

गजदानमन्त्रः ॥

Colophon :

नवग्रहपूजाविधिः समाप्तः ॥

500

Sl. No. 11242 **नवग्रहशांतिकल्पः** Ms. No. P. 3924/6

Beginning :

अथातस्सम्प्रवक्ष्यामि सूर्यदोषापनुत्तये ।
बलहीने तथा सूर्ये दुष्टग्रहसमागमे ॥ + + +

तत्तद्दोषक्षयार्थाय शान्तिं कुर्यात्प्रयत्नतः ॥

End:

तत्तन्मूर्तिश्च जानीयात् होमयन् अर्चन् ग्रहान् बुधः ।
अज्ञात्वेतान् पुमान् कृत्वा तत्फलं नैव विन्दति ॥

एवं दैवोपघातानां शान्तिर्भवति वारणम् ॥

Colophon:

इति सूर्यादिनवग्रहशान्तिस्समाप्ता ॥

501

Sl. No. 11247 **नवग्रहशांतिस्तोत्रम्** Ms. No P. 3023/34

Beginning :

गजवक्त्रः शूर्पकर्णः त्रिणेत्रोऽङ्कुश पाशभृत् ।
लम्बोदरो वक्रतुण्डः वरदः स्य × × रीमशः ॥१॥

सहस्रकिरणः सूर्यः हर्ता यो भुवनापदाम् ।
सकलद्वे (?) पदीपस्थः वरदः स्याद्दिवाकरः ॥ २ ॥

End :

शक्रो गुर्वरुणिर्वायुः यमो वैश्रवणस्तथा ।
निरृतिश्च तथेशानः दिक्पालाः पान्तु ते सदा ॥५॥

Colophon :

— — — — —

502

Sl. No. 11248 नवग्रहशांत्याभिषेकविधिः Ms. No. P. 4180/44

Beginning :

आदौ रविस्नानम्–

मञ्जिष्ठमायमातङ्गं कुङ्कुमं रक्तचन्दनम् ।
पूर्णकुम्भं रवेर्दाने सूर्यस्नानं विधीयते ॥

इति आदित्यस्नानम् ॥ १ ॥

उशीरं च शिरीषं च कुङ्कुमं रक्तचन्दनम् ।
शङ्खन्यस्तमिदं स्नानं चन्द्रपीडाविनाशनम् ॥

End :

स्वर्णरौप्यलोहयो (?) च सीसकं च यथाक्रमम् ।
ग्रहरूपं प्रकुर्वन्ति पूजास्नानं समाचरन् ॥

ग्रहस्नानमिदं पुण्यं ग्रहपीडाविनाशनम् ।
आदित्यादिग्रहाः सर्वे सदा सुसुफलप्रदाः ॥

Colophon :

इति विष्णुधर्मोत्तरे आदित्यादिग्रहस्नानविधिः ॥

503

Sl. No. 11252 नवग्रहशान्तिहोमः Ms. No. P. 6009/2

(नवग्रहाराधनपौराणिकहोममन्त्राः)

Beginning :

ಹೋಮವಂ ತ್ರ ಸೂರ್ಯಗೆ

यमासनः पद्माकरो द्विबाहुः
पद्माद्युतिः ससतुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी
मैत्रीप्रसादं विदधातु देवः ॥ १ ॥

End :

ಕೇತುವಿಗೆ—

धूम्रो द्विबाहुः वरदो गदाभृत्
गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषणाङ्गः
सदास्तु मे केतुगणप्रशान्तः ॥ ९ ॥

Colophon :

— — — —

504

Sl. No. 11254 नवग्रहहोमः (होममन्त्राः) **Ms. No. P. 9689/5**

Beginning:

आसत्येन ; अग्नि दूतं , न द्रुद्रायेत्यर्कसमिधः दित्याय ; आप्यायस्त्वा ; अप्सु मे सोमोऽब्रवीत् ; गौरी मिमायेति पालशं सोमाय ॥

End:

आयं गौः पृश्निरक्रमीदशन मातरं पुनः , पितरं च प्रयन्त्सुवः , स्वाहा । राहुग्रहाधिदेवतायै अङ्गारकाय इदं न मम । यत्ते देवी निर्ऋतिराबध + + + राहुग्रहप्रत्यधिदेवतायै यमाय इदं न मम ॥

Colophon :

— — — — —

505

Sl. No. 11259 नवग्रहतिथ्यबलिकर्मविधिः **Ms. No. P. 3023/149**

Beginning :

अयातो ग्रहातिथ्यबलिकर्मोपहारान् व्याख्यास्यामः—

श्रद्धादानमशुचिमजीर्नं व्यक्तं हि मङ्गलम् ।
ग्रहानयं विनु(?)व्यक्त पुरुषं यमसाधनम् ।

End:

बलिं चैवोपचारं च गन्धमाल्यं तथैव च ।
यथाक्रमेणोपहरेत् सर्वेषामनुपूर्वतः ।।

Colophon :

– – – –

506

Sl. No. 11260 नवदुर्गाप्रतिमादानविधिः (यामलोक्त) Ms. No.P. 7970/147

Beginning :

अथातः संप्रवक्ष्यामि दुर्गादानमनुत्तमम् ।
श्रीकरं च महावश्यं तथैव च भयापहम् ॥

जनवश्यं चोरनाशं सर्वदुर्गमवर्जितम् ।
शत्रुसेनावरं हन्ति स्वसेनाबलवर्धनम् ॥

End :

एतेषां दक्षिणादानं कुर्यात् विचानुसारतः ।
क्षीरोदार्णवसंभूते निशानाथसहोदरि ॥

कृपया त्राहि मां देव देहि सर्वार्थसम्पदम् +++ ।
जनमध्ये तु विख्यातः श्रीमान् धीमान् जनेश्वरः ॥

Colophon :

इति यामलोक्तनवदुर्गाप्रतिमादानविधिः ॥

507

Sl.No. 11262 नवधान्यदानविधिः Ms.No. P. 9928/20

Beginning :

गोधूमाः सर्वजन्तूनां बलपुष्टिविवर्धनाः ।
मुख्याश्च हव्यकव्येषु प्रीती भवतु भास्करः ॥ १ ॥
तण्डु × × × सर्वजन्तूनां व्रणरोगनिवारणम् ॥

End:

कुलित्थाः सर्वपापघ्नाः अतः शान्ति प्रयच्छ मे ॥ ९ ॥

वस्त्रयज्ञोपवीतादिहेतुः कार्पास उच्यते ।
सर्वारिष्टहरो यस्मात् अतः शान्ति प्रयच्छ मे ॥

Colophon :

– – – –

508

1S. No. 11263 नवमीप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 2239/5

Beginning :

दम्पत्योर्मरणे वाऽपि स्त्रीणां च विधवा× ×।
शुक्ले वा कृष्णपक्षे वा नवाम्यां प्रथमार्तवे ॥

सम्यक् शान्ति प्रकुर्वीत वित्तशाठ्यं न कारयेत् ॥

End :

तवमूर्तिप्रदानेन ममोत्थाह× ×तु मे ।
अनेनैव तु मन्त्रेण दानं दद्याच्च गादि(?)दत् ॥

इमां शान्ति प्रकुर्वीत मृत्युगण्डः प्रशाम्यति ॥

Colophon :

इति रुद्रयामळे नवम्यार्तवशान्तिः ॥

509

Sl. No. 11275 नवागारशांतिः Ms No. P. 3128/31.

(वास्तुशांतिः शौनकीया)

Beginning :

अथातः सम्प्रवक्ष्यामि नवागारप्रवेशनम् ।
सर्वसौख्यप्रदं नृणां आयुरारोग्यवर्धनम् ॥

ग्रहप्रवेशकाले तु शान्ति कुर्याद्विचक्षणः ।
दारुपाषाणवल्मीकवृक्षगुल्मलतादयः ॥

भूम्यास्तु खनने दोषः क्रिमिकीटादिका तथा ॥

End :

दशदानानि कुर्वीत ब्राह्मणान् भोजयेत्ततः ।
साशिषः प्रतिगृह्णीयात्स्वयं भुञ्जीत बन्धुभिः ॥

एवं कृते महाराज सर्वशान्तिर्भविष्यति ।
पुत्रपौत्रैः परिवृतो सुखेन परिमोदते ॥

Colophon :

इति श्रीशौनकोक्तनवागारप्रवेशविधि समाप्तः ॥

510

Sl. No. 11276 नवागारशांतिः (रौरवागमोक्तावास्तुशांतिः) Ms. No. P. 5313/52

Beginning :

अथ नवागारवास्तुशांतिविधिरुच्यते—

अथातः सम्प्रवक्ष्यामि वास्त्वर्चनविधिं [क्रमात्] ॥
यस्मिन् कृते सर्वसौख्यम् सर्वदा भवति गोपतेः ॥

यद्ग्रहाधिपतेश्चैव उत्तरोत्तरवृद्धिदम् ॥

End:

इत्याद्यष्टदिक्षु बलिं दद्यात् । ततो यजमानः आचार्येण सह पादौ प्रक्षाल्य राक्षोघ्नं जपेत् ।

आचार्याय ततो दद्यात्सवस्त्रप्रतिमां च गाम् ।
दिक्पालप्रतिमां दद्याद्‌द्विजेभ्यः काञ्चनैः सह ॥
विभवे दशदानं च कुर्यादाज्यावलोकनम् ॥
+ + + + + +

स्नातः स्रग्वी विमलवसनो मङ्गलैर्वेदघोषैः
अन्यैर्यात्राकथितशकुनैः × × × पुत्रान्वितः सन् ।
....
हर्म्यं प्रासादमुक्तं सकलशुभयुतं तोरणाढ्यं विशेत्सहः ।

Colophon :

इति रौरवागमोक्तनवागारवास्तुपूजाहोमबलिविधिः समाप्तः ॥

511

Sl. No. 11277 नवागारशांतिः (वास्तुपूजा-शैवागमोक्ता) Ms. No. P. 5930/1

Beginning:

अथातः सम्प्रवक्ष्यामि वास्त्वर्चनविधि [क्रमम्][1] ॥
यस्मिन् कृते सर्वसौख्यं सदा भवति गोष्पदेः (?) ।
यद्गृहाधिपतेश्चैव उत्तरोत्तरवृद्धिदम् ॥

End :

कृत्वा विप्रान् सजलकलशान् अग्रतो वामतो वा ।
स्नातस्स्रग्वी विमलवसनो मङ्गलैर्वेदघोषैः ॥
यस्तैर्यातः कथितशकुनैर्दारपुत्रान्वितः श्री-
स्याद्धर्म्ये पुरुषप्रकुरुः स्विमत्तोरणाढ्ये विशेषः ॥

Colophon:

इति शैवागवे वास्तुपूजाबलिधिः सामप्तः ॥

Extra information :

१. धिगुरो- इति ताळप्रतिपाठः ।

512

Sl. No. 11279 नागप्रतिमादानपद्धतिः Ms. No P. 9428/87

Beginning :

रचनाप्रकार:–

रोगकाले स्वगेहेषु शुद्धदेशे गोमयानुलेपिते रङ्गवल्यादिरचितं भूभागोपरि संस्थितं × × × कपरिमाणं तिलराशिं कृत्वा तदुपरि कृष्णकम्बलं प्रसार्य , तदुपरि कांस्यपात्रं निक्षिप्य , तदुपरि रक्तवस्त्रं प्रसार्य , × × × नागप्रतिकृतिप्रतिमादानं करिष्ये ॥

End :

गन्धपुष्पाद्यलङ्कृतां नागप्रतिमां मम पूर्वोक्तफलकामःतुभ्यं महं सम्प्रददे नमनेति दद्यात् । तन्मु×+×× वलोकयेत् । एव गुणेत्यादि ॥

Colophon:

इति नागप्रतिमादानपद्धतिः ॥

513

Sl. No. 11280 नागप्रतिष्ठाप्रकरणम् Ms. No. B. 117/2

Beginning :

पूर्वदियसे कलशस्थापनविधानम् । पुण्याहं नान्दी । आचार्यादिऋत्विग्वरणम् । कलशः ९ । वस्त्र ९ । नागप्रतिमाः ९ । एतत्पूजासामग्री ॥

End :

दशमी पूर्णमासी च तिथयश्चोत्तमोत्तमाः ।

Colophon :

– – – –

514

Sl.No. 1120 3 नागप्रतिष्ठाविधिः (शौनकोक्ता) Ms. No. P. 2972/4

Beginning :

नागप्रतिष्ठां वक्ष्यामि उदगयने बुधतिथौ ।
तथा संस्थापं कुर्यात् अहरेवासुलम्निके (?)॥

जलाधिवासनं कर्ता कुर्यात् पूर्वदिने निशि ।
दन्तानां धावनं कर्ता तैलस्नानं समाचरेत् ॥

End :

ब्राह्मणान् भोजयित्वा च भुञ्जीयात् बन्धुभिस्सह ।
अनेन विधिना यस्तु करोति स्थापनं यदि ।
नगेन्द्रस्य प्रसादेन सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति शौनकोक्तनागप्रतिष्ठाविधिः समाप्तः ॥

515

Sl. No. 11284 नागप्रतिष्ठाविधिः (बोधायनीया) Ms. No. P. 2972/5

Beginning :

अथतो नागप्रतिष्ठाविधिं व्याख्यास्यामः— सर्वं विष्णुप्रतिष्ठावत् । नमो अस्तु सर्पेभ्यः इति तिसृभिः, इदं सर्पेभ्य इति द्वाभ्याम्, सर्पेभ्यः स्वाहा इति त्रिभिश्चाज्याहुतीर्हुत्वा ॥

End :

सहस्रफणामण्डलमण्डिताय नमः, इति शिरः पुनर्हुत्वा शेषाय नमः, इति सर्वाङ्गम् । अन्यत् समानम् । सन्तिष्ठते नागप्रतिष्ठेति बोधायनः ॥

Colophon :

– – – – – –

516

Sl. No. 11285 नागप्रतिष्ठाविधिः (कपिञ्जलसंहितीया) Ms No. P.3242/3

Beginning :

अथ नागप्रतिष्ठां व्याख्यास्यामः—

पूर्वेद्युः पुरुषसूक्तेन जलाधिवासं कृत्वा श्वोभूते पुण्याहं वाचयित्वा अनन्तरं तैलाभ्यञ्जनं कृत्वा पुरुषसूक्तेन पञ्चगव्येन पञ्चामृतैः स्नापयित्वा ॥

End :

ऋत्विग्भ्यो वस्त्रप्रतिमां दक्षिणां दानं कृत्वा आचार्याय गां दद्यात् । पञ्चरत्नयुते गर्ते नागं संस्थाप्य हविर्निवेदयेत् । ब्राह्मणान् भोजयेत् ॥

Colophon :

इति कपिञ्जलसंहितोक्त-नागप्रतिष्ठाविधिः ॥

517

Sl. No 11287 नागप्रतिष्ठाप्रकरणम् (बोधायनीयम्) Ms. No. P. 3804/76

Beginning :

अथातो नागानां प्रतिष्ठाकल्पविधिं व्याख्यास्यामः - उदगायने व्याम्रहर्नि(?) उग्राय स्वाहा । भीमाय स्वाहा । ध्रुवाय स्वाहा । दंष्ताय स्वाहा । शास्त्रायस्वाहा । अभि-युनाय स्वाहा ।

End

कुम्भं हरिण्यं वासो दक्षिणान्ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीत । शान्तिर्भवति सुशान्तिर्भवतीत्याह भगवान् बोधायनः ॥

Colophon :

— — — —

518

Sl. No. 11313 नागप्रतिष्ठाविधिः (ब्रह्माण्डपुराणोक्ता) Ms. No. C. 2641/2

Beginning :

नारद उवाच—

लोकनाथ चतुर्वक्त्र सर्वधर्मविशारद ।
अनपत्यनृणां लोके प्रजासिद्धिः कथं भवेत् ॥

ब्रह्मा उवाच—

शृणु नारद वक्ष्यामि यत्पृष्टोऽहमिह त्वया ।
पार्वत्यै कथितं तद्धि शङ्करेण हितैषिणा ॥

+ + + + + + + + +

प्रतिष्ठां नागराजस्य पूर्वोक्त ×यथाविधि ॥

End:

सूत उवाच—

एतद्धि कथितं विप्राः नारदाय महर्षये ।
ब्रह्मणा कथितं पूर्वं नागराजस्य ×××:॥

ये शृण्वतीह सततं ये पठन्ति च मानवाः ।
सर्वे पापविनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे नागप्रतिष्ठाविधिकथनं नाम पञ्चसप्तत्यधिकद्विशत-तमोऽध्यायः ।

519

Sl. No. 11315 नालवेष्टनशांतिः (शौनकीया) Ms. No. P. 909/3

Beginning :

शौनकोऽहं प्रवक्ष्यामि लोकानां हितकाम्यया ।
नालवेष्टशिशुं जातं यस्य भार्या प्रसूयते ॥

तस्य मज्जायते पीडा पुत्रिका पुत्र एव च ।
मापितृधनादीनां सर्वनाशकरो भवेत् ॥

End :

सम्यक् शान्ति तथा कुर्यात् वित्तशाठ्यविवर्जितः।
सर्वदोषविनिर्मुक्तः पुत्रपौत्रसमन्वितः ॥

दम्पत्योः सुखमाप्नोति वेदोक्तायुश्च विन्दति ॥

Colophon :

इतिं शौनकीये नालवेष्टनशान्तिः समाप्ता ॥

520

Sl·No· 11319 **नालवेष्टनशांतिः (गार्ग्यीया)** **Ms. No· P· 5293/52**

Beginning :

अथ चाष्टकजन्मस्थाः .... केचिद्विशेषाः कथ्यन्ते ।
शिशोर्जन्मफलञ्चैव सर्वशास्त्रविनिर्णयः ॥

पितुर्मातुश्च सोदर्याः धनं निधनमेव च ।
लक्षणानि च सर्वाणि कथयिष्यामि पूर्वतः ॥

End:

तिलदानमयःपिण्डं कार्पासं कम्बलं ततः ।
गोदानञ्च ततो दद्यात् दशदानं विशेषतः ॥

तद्दोषशमनार्थाय कुर्याद्ब्राह्मणभोजनम् ।

तस्यायुर्विजयो लक्ष्मीः कीर्तिवृद्धिश्च जायते ॥

Colophon :

इति गार्ग्योक्तनालवेष्टनशान्तिः समाप्ता ॥

521

Sl. No. 11327 निंद्यतिथ्यर्क्षवारार्तवशांतिः Ms No. P. 2579/29

(रुद्रयामलीया– ऋतुजामित्रादिशान्त्यन्तर्गता)

Beginning :

निन्द्यर्क्षतिथिवारेषु यदि पुष्पं प्रदृश्यते ।
ततः शान्तिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः ॥

प्रत्येकं शतमष्टैश्च गायत्र्या जुहुयात्ततः ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् कृत्वा ब्राह्मणभोजनम् ।
एवं यः कुरुते शान्तिं सर्वदोषहरं शुभम् ॥

दम्पत्योः (?) सुखमाप्नोति पुत्रपौत्राभिवृद्धिदम् ॥

Colophon :

इति रुद्रयामले ऋतुजामित्रादिशान्तिः सम्पूर्णा ।

522

Sl. No. 11328 निमित्तदोषशांतिः Ms. No. P 9428/29

Beginning:

श्रीरग्निर्बन्धुनाशश्च वित्तहानिर्महद्यशः ।
बन्धुलोभः पुत्रहानिः भूचिन्ता मह×दा × × ॥
पूर्वादीनि फलान्येता × × × लुप्ते च मस्तके ॥

End :

आशिषो वचनं कृत्वा ब्राह्मणान् भोजयेत् सुधीः ।
लोभतः कुड्यगे×श्च × ×श्चागते न्य×येन्ययः ॥
दक्षिणं स्फुरणं लाभं वामस्फुरणमन्यथा ॥

Colophon :

इति निमित्तदोषशांतिः ॥

523

Sl. No. 11329 निषसादकल्पम्ः (ऋग्विधानान्तर्गतम्) Ms. No.P. 8178/33

Beginning :

अथ ऋग्विधाननिषसादकल्पम् ॥

निषसाद धृत इति जपे होम × × × धिदः ।
कृष्णपुरा अमर × ज्ञाता × × × नृपः ॥

प्रभावो कथेन्द्राणि(?) ब्रूहि मे × × वान्नरः (?) ॥

End.

सर्वालङ्कारसौभाग्य आयुरारोग्यधर्मवित् ॥
सोमसूर्यप्रभातेजाः श्रियं पुत्र पशु धनम् ॥

वेदशास्त्रप्रभास्तत्र सप्त होमः जपः स्त्रियम् (?) ॥

Colophon :

इति ऋग्विधाने निषसादकल्पः समाप्तः ॥

524

Sl No. 11330 पक्षिपतनशांतिः Ms.No. P. 4180/35

Beginning :

गृहे निशा वा प्रविशन्ति काकोगृध्रे कपोतश्च गृहे शरीरे ।
तस्य मृत्युः शोकपुत्रोपहानिः स्वयं च नाशो महदु खकारणम् (?) ॥

कुक्कुटोलूखला चैव मा×रं प्रविशन्ति वै ।
महारोगकरो देहो पशुपुत्रान्महद्भयम् ॥

End :

समुद्रज्येष्ठा इति पावमानी स्वस्त्ययनीः त्रायन्तामिह देवाः इत्यमूषु तत्त्वायामि अभिषेकं समाप्य वस्त्रमाचार्याय निवेद्य वस्त्रकुम्भमाचार्याय निवेद्य ब्राह्मणान् भोजयित्वा सर्वशांतिर्भवति ॥

Colophon :

इति पक्षिपतनशांतिः ।

525

Sl. No. 11331 पक्षिपतनशांतिः (ब्रह्मसंहितान्तर्गता) Ms. No. P. 5313/37

Beginning :

अथ पक्षिपतनशांतिविधिरुच्यते—

आयुःक्षयकरान् घोरानुत्पातान् कमलासन ।
[1]पक्षिणां पतने चैव पक्षाणां च तथा भवेत् ॥

येषां काये प्रपतति तेषामायुःक्षयो भवेत् ।
अङ्गप्रत्यङ्गपतनान्महाव्याधिं विनिर्दिशेत् ॥

End :

रुक्मकुण्डलवस्त्राणि गां दद्याच्च पयस्विनीम् ।
ब्राह्मणान् भोजयेत्पश्चान्महाशान्त्यै दशारवान् ॥

पुण्याहं वाचयेत्पश्चात्सर्वशान्तिर्भविष्यति ॥

Colopuon :

इति ब्रह्मसंहितायां पक्षिपतनशान्तिः समाप्ता ॥

Extra information :

१) 'क्षी' इति तालपाठः ।

526

Sl. No. 11332 पक्षिपतनशांतिः (वायुपुराणीया) Ms. No. P. 5635/38

Beginning :

आयुःक्षयकरान् घोरान् उत्पातान् कमलासन ।
पक्षिपातप्रवेशेऽपि नराणामायुषः क्षय ॥
तेषाञ्चवै कशान्तिं च वक्ष्यामि चतुरानन ॥

End :

ब्राह्मणान् भोजयेत्तत्र महाशान्ति दशापरान् ।
पुण्याहं वाचयेत्पश्चात् तस्य शान्तिर्भविष्यति ॥

Colophon :

इति वायव्यपुराणोक्तादिक्षितनशांतिः ॥

527

Sl. No. 11335 पञ्चनवग्रहयोगशांतिः Ms.No.P. 604/26

Beginning :

अथातः सम्प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य त्रिजन्मनक्षत्रे राशौ लग्ने यदि स्थिताः ॥

एकराशौ ग्रहास्सर्वे तस्य मृत्युर्न संशयः ।
द्वौ ग्रहौ कुरुतः क्षोमं त्रयो युक्तजनक्षयः ॥

End:

श्रोत्राय स्वाहा श्रुत्यै स्वाहा ॥

ततश्चंद्रमसे स्वाहा प्रतीदृश्यायै । स्वाहा
अहोरात्रेभ्य स्वाहाः अर्धमासेभ्यः स्वाहा ।

स्विष्टकृत्प्रभृत्यावरदानान्तं कृत्वा पञ्चपल्लवोदकेन अभिषेकं कुर्यात् ॥

Colophon:

– – – –

528

Sl. No. 11336 पञ्चग्रहयोगशांतिः (वसिष्ठप्रोक्ता) Ms. No. P. 734/18

Beginning :

उत्पातलक्षण वक्ष्ये वसिष्ठेन महात्मना ।
द्वादशे जन्मराशौ वा अष्टमे वा विशेषतः ॥

पञ्चग्रहाणां संयोगे × × गारीन्वर्धयेत्सदा ।
तस्मात्सर्वप्रयत्नेन शान्तिकर्म समाचरेः ॥

End .

भोजनं बन्धुभिस्सार्धं सर्वदो× ×पनुत्तये ।
राष्ट्रस्य यजमानस्य फलमेवं न संशयः ॥

Colophon :

इति श्रीवसिष्ठप्रोक्ते पञ्चग्रहयोगशान्तिः समाप्ता ॥

529

Sl. No. 11337 पञ्चग्रहयोशांतिः (ब्रह्मर्षिविरचिता) Ms. No. P. 3924/2

Beginning:

अथाऽस्सम्प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
त्रिजन्मनक्षत्रे राशौ लग्ने यथास्थितः ॥ ÷ ÷ +

तद्दोषशमनार्थाय शान्तिकुर्याद्विचक्षणः ।
लक्षहोमैः कोटिहोमै अयुतैर्नियुतैरपि ॥

End :

एकादशेऽर्थलाभं स्यात् द्वादशे व्याधिमाप्नुयात् ।
शुभाशुभग्रहाणाञ्च योगे साम्यफलं स्मृतम् ॥

Colophon:

इति ब्रह्मर्षिविरचितायां पञ्चग्रहादियोगशान्तिस्समाप्ता ॥

530

Sl. No 11338 पञ्चग्रहयोगशांतिः (रुद्रयामळीया) Ms No. P. 3924/3

Beginning :

अत. परं प्रवक्ष्यामि ग्रहयोगादिशान्तिकम ।
अमावास्यादितिथिषु ग्रहयोगो भवेद्यदि ॥

End: ।

आयुरारोग्यसम्पन्नः जीवेद्वर्षशतं नरः ।
इह लोके सुखी भूत्वा जीवेद्व × × × × ॥

Colophon :

इति रुद्रयामळोक्तपञ्चग्रहादियोगविधिः समाप्तः ॥

531

Sl. No. 11339 | पञ्चग्रहयोगशांतिः भविष्योत्तरापुरणीया | Ms. No. P. 4180/19

Beginning :

अतः परं प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्या त्रिजन्मनक्षत्रे राशौ लग्ने यदि स्थिते ॥
एकराशौ ग्रहाः सर्वे तस्य मृत्युर्न संशयः ।
द्वित्रिश्चतुर्ग्रहायोगे च प्राणनाशो न संशयः ॥

End :

अभिषेकप्लुतं त्यक्तमन्यवस्त्रधरे सति ।
आचार्याय च गां दद्याद्ब्राह्मणान् भोजयेच्छतम् ॥
एवं यः कुरुते शान्ति तस्य दोषापनुत्तये ।
दीर्घमायुर्धनं वीर्यं पुत्रवर्धनदं सुखी ॥

Colophon:

इति भविष्योत्तरपुराणे पञ्चग्रहयोगशान्तिः समाप्ता ॥

532

Sl. No. 11341 पञ्चग्रहयोगशांतिः (ज्यौतिषार्णवीया) Ms. No. P. 5587/48

Beginning :

अथ पंचग्रहयोगशांतिविधिरुच्यते—

अथातः संप्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य त्रिजन्मनक्षत्रे राशौ लग्ने यदि स्थिते ॥

End :

दीर्घमायुर्बलं वीर्यं लभते नात्र संशयः ।
इह भुक्त्वा भुवि फलान् सर्वान् कामान् यथेप्सितान् ।
न तस्य दुरितं किंचित् ग्रहपीडां व्यपोहति ॥

Colophon:

इति ज्योतिषार्णवे पैतामहोक्तपंचग्रहयोगशान्तिः समाप्ता ॥

533

Sl No. 11348 पञ्चग्रहयोगशांतिः Ms. No. P. 10041/61
(ब्रह्मसंहितांतर्गता)

Beginning :

अतः परं प्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य जन्मनि नक्षत्रे राशौ लग्ने यदि स्थिताः ॥
एकराशौ ग्रहाः सर्वे तस्य मृत्युर्न संशयः ।
द्वित्रिचतुर्ग्रहयोगे कलहं नाशयेद्द्विजः (?) ॥

End:

दीयन्ते द्विजवर्याणां सूर्यादीनां यथाक्रमम् ।
एवं यः कुरुते मर्त्यस्तद्दोषोपशान्तये ॥

दीर्घमायुर्बलं वीर्यं लभते नात्र संशयः ।
इह भुक्त्वा तु विपुलान् सर्वान् कामान् यथेप्सितान्
न तस्य दुरितं किंचित् ग्रहपीडा व्यपोहतु (?) ॥

Colophon :

इति ब्रह्मसंहितायां ग्रहयोगशान्तिर्नाम नवमोऽध्यायः ॥

534

Sl. No. 11350 पञ्चमारिष्टशांतिः (शौनकीया विधिप्रयोगात्मका) Ms. No. P. 60/4

Beginning :

अथ पञ्चमारिष्टशान्तिविधिरुच्यते—

जातस्य पञ्चमे लग्ने सूर्यादिग्रहसंस्थिताः ।
पित्रादीनामरिष्टन्तु कुर्वन्ति च यथाक्रमम् ॥

End :

ऋत्विग्भ्यो हि यथाशक्त्या दक्षिणाभिश्च तोषयेत् ।
ब्राह्मणान् भोजयेत् पश्चात् स्वयं भुञ्जीत बन्धुभिः ॥

एव शान्ति प्रकुर्याच्चेत्तस्य दोषो विनश्यति ।
इत्येवं मनुना प्रोक्तं ग्रहशांतिविधिक्रमात् ॥

Colophon :

इति शौनकीये पञ्चमारिष्टशांतिः ॥

535

Sl No 11351 पञ्चमारिष्टशांतिः (याज्ञवल्क्यो ।) Ms. No. P. 604/60

Beginning :

याज्ञवल्क्यः—

गृहा नरनरेन्द्राणां उत्छ्रायाः पतनानि च ।
तथा च सर्ववर्णानां ग्रहेभ्य· पतनयोच्छ्र्यौ ॥
तस्मात् सर्वप्रयत्नेन शांतिकर्म समाचरेत् ॥

End:

चित्रवस्त्रेण सवेष्ट्य वारुणं कुम्भमेव च ।
पूर्वोक्तविधिना कृत्वा विप्राय ।वेनिवेदयेत् ॥

Colophon :

इति याज्ञवल्क्योक्ता पञ्चमारिष्टशांतिः समाप्ता ।।

536

Sl. No. 11353 पञ्चमारिष्टशांतिः (मानवीया) Ms. No. P. 734/11

Beginning :

जातस्य पञ्चमे लग्ने सूर्यादिग्रहसंस्थितौ ।
पित्रादीनामरिष्टं तु कुर्वन्ति च यथाक्रमम् ।।

\+ + + + + + +

तद्दोषपरिहारार्थं शांतिं वक्ष्याम्यशेषतः ॥

End:

सर्वारिष्टविनाशश्च वेदोक्तायुर्भविष्यति ।
इत्येवं मनुना प्रोक्तो ग्रहशांतिविधिः क्रमात् ॥

Colophon :

इति मानवीये पञ्चमारिष्टशांतिः ॥

537

Sl. No. 11357 पञ्चमारिष्टशांतिः (वृद्धवासिष्ठीया) Ms. No. P. 2239/72

Beginning :

अथातः संप्रवक्ष्यामि पञ्चमारिष्टशांतिकम् ।
निर्णयो गण्डदोषाणां वृध्दवासिष्ठ उच्यते ॥

पञ्चमस्थो यदा भानुः पितरं हन्ति निश्चितम् ॥

End :

भोजयेत् ब्राह्मणान वर्णान् भक्ष्यपायससर्पिभिः ।
तेभ्योपि दक्षिणां दद्यात् यथाविचानुसारतः ॥

एवं कृत्वा विधानेन स जीवेच्छरदां शतम् ॥

Colophon:

इति वृद्धवासिष्ठप्रोक्ते पञ्चमारिष्टशांतिः ॥

538

Sl. No. 11358 पञ्चमारिष्टशांतिः (यामलोक्ता) Ms. No. P. 2579/38

Beginning :

गृहादीनां नरेंद्राणां उच्छ्रायपतनाय च ।
यथा च सर्ववर्णानां ग्रहेभ्यः पतनोच्छ्रयौ ॥

तस्मात्सर्वप्रयत्नेन शांतिकर्म समाचरेत् ॥

End :

केतोररिष्टे संप्राप्ते शालिभिः पूरितं घटम् ।
चित्रवस्त्रेण संवेष्ट्य वारुणं कुम्भमेव च ।।
पूर्वोक्तविधिना कृत्वा विप्राय विनिवेदयेत् ।।

Colophon :

इति यामलोक्तपञ्चमारिष्टजननशांतिः ।।

539

Sl. No. 11362 पञ्चमारिष्टशांतिः Ms. No P. 4335/23

(हेमाद्रीया– याज्ञवल्क्योक्ता)

Beginning :

याज्ञवल्क्यः—

ग्रहादिभ्यो नरेन्द्राणां उच्छ्रयः पतनानि च ।
तथापि सर्ववर्णानां ग्रहेभ्यः पतनोच्छ्रयौ ।।
तस्मात्सर्वप्रयत्नेन शांतिकर्म समाचरेत् ।
अनेन पञ्चमस्थाने सूर्यस्या (?) च यदि स्थिते ।।

End :

केत्वष्टे तु सम्प्राप्ते शालिभिः पूरितं घटम् ।
चित्रवस्त्रेण संवेष्ट्य वारुणं कुम्भमेव च ।।
पूर्वोक्तविधिना कृत्वा विप्राय विनिवेदयेत् ।।

Colophon :

इति हेमाद्रौ दानकाण्डे शां॰ प्रकरणे याज्ञवल्क्योक्तपञ्चमारिष्टशांतिः समाप्ता ।।

540

Sl. No 11363 पञ्चमारिष्टशांतिः (गोमुखजननपूर्विका) Ms. No. P. 472048/

Beginning :

अथातः सम्प्रवक्ष्यामि पञ्चमारिष्टशांतिकम् ।
यस्मिन् कृते तु तत्कर्म ह्यायुर्वृद्धिर्भवेच्छुभम् ॥

जन्मलग्ने शिशोः खेटाः पञ्चमस्थानगा यदि ।
सूर्यादीनां तथा सम्यक् पृथक् फलमुदाहृतम् ॥

End :

दधिमध्वाज्यसंयुक्तं हुनेच्छास्त्रोक्तवर्त्मना ।
आदित्यादिग्रहाणां च होमं कुर्यात्समन्त्रकैः ॥

मूलग्रन्थोक्तमार्गेण पूजाहोमं विशिष्यते ॥

Colophon :

इति सगोमुखजननपूर्वकपञ्चमारिष्टशांतिः समाप्ता ॥

541

Sl. No. 11375 पञ्चमारिष्टशांतिः (पितामहप्रोक्ता) Ms. No. P. 8000/17

Beginning :

अथातः सम्प्रवक्ष्यामि पञ्चमारिष्टशांतिकम् ।
अस्मिन् कुले पुराप्रोक्तास्तेषां दोषप्रशान्तये ॥

सूतकान्ते शुभदिने कुर्याच्छान्तिं स्वशक्तितः ।
पुण्याहं वाचयित्वाऽथ आचार्यान् वरयेत्ततः ॥

End :

ब्राह्मणानतिथीन् बन्धून् भोजयेच्च सदक्षिणम् ।
एवं यः कुरुते भक्त्या पञ्चमारिष्टशांतिकम् ॥

तद्दोषः तत्क्षणादेव नाशमायात्यशेषतः ।
ग्रहाश्च तस्य तुष्टाः स्युः दद्युश्चायुर्धनानि च ॥

Colophon:

इति पितामहप्रोक्ते पञ्चमारिष्टशांतिः समाप्ता ॥

542

Sl. No. 11378 पञ्चमारिष्टशांतिः (अत्रिसंहितांतर्गता) **Ms. No. P. 9764/36**

Beginning:

अत्रिरुवाच—

अर्को वा भूमिजो वापि सौरिर्वा चन्द्र एव वा ।
जन्मनो यस्य काले च पञ्चमस्थो भवेद्यदि ॥
स शिशुर्हन्ति पितरं भ्रातरं च स्वमातरम् ।
तद्दोषस्य निवृत्यर्थं शान्तिकर्म समारभेत् ॥

End:

दिनान्धकृपणेभ्योपि भूरिदानं च कारयेत् ।
आज्यावेक्षणदानादि दशदानानि कारयेत् ॥
एवं करोति यो मर्त्यः शान्तिकर्म समाहितः ।
तद्ग्रहदोषनिर्मुक्तो दीर्घमायुश्च विन्दति ॥

Colophon:

इत्यत्रिसंहितायां पञ्चमारिष्टशांतिः ॥

543

Sl. No. 11387 पद्मदानविधिः (गर्गमलोक्ता रोगापहारिणी) **Ms. No. P. 4180/52**

Beginning:

पद्मासनं प्रवक्ष्यामि सर्वरोगनिवर्हणम् ,
सूर्याङ्गारकराहूणां दुस्स्थानसिद्धितपापहम् (?) ॥

दिव्यन्तरिक्षभूमोत्थग्रहोत्पातादिदोषहा ।
क्षेमारोग्यादिफलदं यशःश्रीसौख्यदायकम् ॥

End :

भूदानं (?) दशदानानि विभवे गां प्रदापयेत् ।
ब्राह्मणान् भोजयेत् तत्र यथा द्वादशसंख्यया ॥

पूर्वोक्तदोषकालाद्यैर्निर्मुक्तो नात्र संशयः ।
इह लोके सुखी भूत्वा यसायुज्यमाप्नुयुः ॥

Colophon :

इति यामिले पद्मदानविधिः ॥

544

Sl. No. 11388 पद्मदानविधिः (हेमाद्रीया रोगापहारिणी) Ms. No. P. 5587/59

Beginning :

अथ रोगहरपद्मदानविधिरुच्यते—

अथ दानं प्रवक्ष्यामि सर्वरोगनिबर्हणम् ।
सूर्यांगारार्कराहूणां दुःस्थानस्थितपापहम् ॥
+ + + + + + ।
पाहि दुर्ग्रहदोषाच्च पद्मदानेन शङ्कर ।

End:

सुवर्णदक्षिणां दद्यात भूदानं विभवे सति ।
पूर्वोक्तदोषैस्सकलैः निर्मुक्तो भाग्यवान् सुखी ॥

इह लोके भुवि ख्यातः सूर्यसामीप्यतां ययुः ॥

Colophon :

इति हेमाद्रौ दानकाण्डे रोगहरपद्मदानविधिः समाप्तः ॥

545

Sl. No. 11389 परशुदानपद्धतिः Ms. No. P. 9428/90

Beginning :

रचनाप्रकारः—

अरिभयकालग्रहासन्तापसम्भवग्रहयोगकाल × × × × सङ्कटकालेषु, अष्टमीचतुर्दशीषु पर्वसंक्रमजन्यनक्षत्र × × × × श्रीपरमेश्वरप्रीतिं कामयमानः यामलोक्तप्रकारेण समस्तभयहरपरशुदानं करिष्ये ॥

End :

गन्धपुष्पाद्यलङ्कृतं ईश्वरदेवताकं परशुं पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे ; न ममेति दद्यात् । स्वर्णद्वयं दक्षिणां दद्यात् । यस्य स्मृत्येत्यादि ॥

Colophon :

इति शत्रुहरपरशुदानपद्धतिः ॥

546

Sl. No. 11390 परिवेषकालजननरजस्वलशान्तिः (गार्ग्योक्ता) Ms.No.P. 3804/50

Beginning

अथ परिवेषकालजननरजस्वलाशान्तिविधिरुच्यते । वृद्धगार्ग्यः—

परिवेषे भानुविध्वोः जातो वा रजस्वलापि वा ।
पितृमात्रोः भर्तृहानिः पशुनाशो धनक्षयः ॥
तद्दोषपरिहारार्थं शांतिं कुर्यात् × × × ॥

End :

तद्दोषपरिहारार्थं तथैव शांतिं कुर्यादिमे ।

सुवर्णप्रतिमां कुर्यात् नक्षत्रेशानिदेवताम् ।
अष्टौ द.क्येन मन्त्रेण जपं होमं च कारयेत् ॥

Colophon :

इति गार्ग्यप्रोक्तसूर्यचन्द्रग्रहविषकालजननरजस्वलाशांतिः समाप्ता ॥

547

Sl. No. 11391 पर्जन्यजपशांतिः Ms. No. P. 251/24

Beginning :

अथातः पर्जन्यविधिं व्याख्यास्यामः—

यस्मिन् देशे मिथुनवृश्चिकयोर्मध्ये यद्यवर्षेत् तत्तद्राष्ट्राधिपः पर्जन्यशान्त्यादिकं कारयेत् ।

तथा तत्प्रकारमाह—

नृपनक्षत्रे ग्रामनक्षत्रे वा शुभग्रहानुकूलदिवसे पूर्वाह्ने + + शान्तिंकुर्यात् ॥

End :

ಶ್ರೀವತ್ಸಗೋತ್ರಂ ಕಂದರ್ಪ ಭಟ್ಟ ಟುಲ —२५ ॥
ಕಾಶ್ಯಪಗೋತ್ರಂ ಶೇಷಾನ್ನ ಭಟ್ಟ ಟುಲು —२६ ॥

इति वीराणांनित्याभ्यङ्गस्नानवस्त्रगन्धपुष्पधूपदीपादिषड्सोपेतभोजनादिताम्बूलदक्षिणादीनि दद्यात् सुवृष्टिः सद्यो भवति ॥

Colophon :

— — — — — —

548

Sl. No. 11395 पर्जन्यजपशांतिः (याजुषः) Ms. No. P.2732/1

Beginning :

" पुनः संकल्प्य, एवंगुणविशेषणेत्यादि । अस्मिन् राष्ट्रे महाराजेन तत्तदधिकारेषु नियुक्तैराधिकारिभिः परिपाल्यमानपल्लीपट्टणग्रामादिषु + + इन्द्रावरुणपर्जन्यदेवताप्रीत्यर्थं + + जपान् करिष्ये ॥

End:

श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः ।
मकरस्थः पाशपाणिः वरुणो मे प्रसीदतु ॥ + +

अतुल्यबलवानत्र सर्वसस्याभिवृद्धये ।

घुवासु त्वा सुक्षितिषु क्षियन्तो व्या × × × ॥
यूयं पात स्वस्तिभिः सदा नः ; इति जपेत् ॥

Colophon :

– – – – –

549

Sl. No. 11398 पर्जन्यजपशांतिः Ms. No. P. 3023/184

Beginning :

अथातः पर्जन्यकल्पविधिं व्याख्यास्यामः—

यस्मिन् देशे मिथुनवृश्चिकयोः मध्ये यद्यवर्षे तत्तद्राष्ट्राधिपः तदा पर्जन्यशान्तिं कारयित्वा ॥

End:

भास्करेभ्यो पञ्चोऽनवानं-(?) वेतसपुष्टिनानाविधपुष्पैः गन्धाक्षतैः सह महार्घ्यं दद्यात् ; इत्याह भगवान् बोधायनः ॥

Colophon :

इति पर्जन्यशान्तिः समाप्ता ॥

550

Sl. No. 11404 पर्जन्यजपशांतिः (शौनकीया) Ms. No. P. 4540/8

Beginning :

अनुवृष्टि < पेण सस्यादिशोषणे सति आर्द्रादिमहानक्षत्रेषु यदा अवग्रहो भवति तदा कुर्या. । तत्काले सस्याभिवृद्ध्यर्थं पर्जन्यजपं कुर्यात् । तत्पर्जन्यप्रक्रममाह

End :

एतानि सूक्तानि प्रत्यृचं पच्छोर्ध(?)र्चशः तर्पणं कुर्यात् । एवं सप्ताहं द्वादशाहं पञ्चदशाहं एकविंशतिदिनं वा शक्त्यापेक्षया च कुर्युः । आचार्याय दक्षिणां दद्यात् । एवं कृते सम्यक् वृष्टिः भवति ॥

Colophon :

इति शौनकीये पर्जन्यविधिः समाप्तः ॥

551

Sl. No. 11405 पर्जन्यजपशांतिः (बोधायनीया) **Ms. No. P. 4540/9**

Beginning :

अथ पर्जन्यविधिं व्याख्यास्यामः—

पुण्ये नक्षत्रे ग्रामणीः यजमानस्य वलान्विते तटाकमध्ये मण्टपं कृत्वा तन्मध्ये गोमयेन गोचर्ममात्रमुपलिप्य; – ॥

End :

प्रथमशान्तिं महाशान्तिं च जपित्वा, ब्राह्मणसहस्रान् भोजयित्वा, यथाशक्ति दक्षिण दत्वा तत्प्रतिमामाचार्याय वस्त्राभरणेन च दत्वा महावृष्टिः भवति ; इत्याह भगवान् बोधायनः ॥

Colophon :

– – – –

552

Sl. No. 11417 पर्जन्यजपशांतिः(आश्वलायनीयः) **Ms. No. P. 7561/12**

Beginning:

अथ आश्वलायनोक्तपर्जन्यशांतिः—

अथातः सम्प्रवक्ष्यामि पर्जन्यां शांतिमुत्तमाम् ।
वृष्ट्यभावे यदानर्घे मासे वापि ऋतौ तथा ॥
यत्र यत्र विना सस्यं तत्र तत्र तु कारयेत् ॥

End :

धान्यस्येपरि तं कुम्भ वस्त्रेणावेष्ट्य तन्वसित (?) ।
गङ्गोदकेन सम्पूर्णं पञ्चरत्नसमन्वितम् ।।
कूर्चेन तु समायुक्त पञ्चपल्लवसंयुनम् ।।
× × × × न × × × × ।
× × × × × × × × तम् ।।

Colophon :

– – – – –

553

Sl. No. 11425 पर्जन्यजपशांतिः Ms. No P. 9727/1

Beginning :

× × × ×एवंगुणविशेषणविशिष्टायां शुभतिथौ पर्जन्यदेवता उद्दिश्य पर्जन्यदेवता-प्रीत्यर्थं वरुणदेवताउद्दिश्य वरुण× × र्थंइन्द्रावरुणदेवता उद्दिश्य ×× र्थं इन्द्रदेवताउद्दिश्य× × थ + + + + वरुणप्रार्थनं कुर्यात् ।।

End :

अश्वावतीर्गोमतीर्न उषासः ।
वीरवतीस्सदामिच्छन्तु भद्राः (?) ।
अमृतं दुहाना विश्वतः प्रपीनाः ।
यूयं पात स्वस्तिभिः सदा नः ।। ७९ ।। + +
प्राणमन्नं तौ सूर्याचन्द्रमसा नव सप्रतिः ।(?)

Colophon :

– – – –

554

Sl. No. 11428 पल्लीपतनशांतिः Ms. No. P. 734/40

Beginning :

शिरोमध्ये पतेद्गौली मातापित्रोगुरोर्मृतिः ।
पार्श्वे दक्षिणतो ज्येष्ठभ्रातुर्वामे कनिष्ठहा ।।

End :

पूर्वान्प्रदक्षिणीकृत्य नमस्कृत्य विसर्जयेत् ।
एवंकृत्वा तेन शांतिदोषश्चानुविनश्यति ।।

Colophon:

इति गौलीपतनशांतिस्समाप्ता ।।

555

Sl. No. 11430 पल्लीपतनशांतिः Ms. No. P. 4992/31

eginning :

अथातस्संप्रवक्ष्यामि शृणु शौनकसत्तम ।
पल्याः प्रपातनफलं सरटस्य प्ररोहणे ।।
शीर्षे राज्यं स्त्रियावाप्तिः पार्श्वे त्वैश्वर्यवर्धनम् ।।

End :

तद्दोषशमनायैव कुर्याद्ब्राह्मणभोजनम् ।
एवं सम्यग्विधानेन शान्तिकर्म करोति यः ।।
तस्यायुष्यं बलं लक्ष्मीः कीर्तिः पुष्टिश्च जायते ।।

Colophon :

इति शौनकीये बल्लीसरटशान्तिकल्पः संपूर्णः ।।

556

Sl. No. 11436 पल्लीपतनशांतिः Ms. No. C. 769

(गार्ग्य- वराह- माण्डव्य- नारदाद्यनुमता- भृगुप्रोक्ता)

Beginning :

अथ पल्लीशुभाशुभविचारो लिख्यते—

अथातः सम्प्रवक्ष्यामि फलं पल्याः प्रपातने ।
यद्यदङ्गे मनुष्याणां दृष्ट्वा तत्तद्विशेषतः ॥

गार्ग्यवाराहमाण्डव्यनारदाद्यैर्यथोदितम् ।
तत्तत्कालविशेषेण ज्ञातव्यं सुविचक्षणैः ॥

End:

ब्राह्मणान् भोजयेच्छक्त्या ततोऽरिष्टं प्रशाम्यति ।
पल्लीसरटयोः शान्तिः कथिता भृगुणा यथा ॥

शौनकाय मुनीन्द्राय लोकानुग्रहकारिणे ॥

Colophon:

इति भृगुणोक्तं पल्लीपतनफलं शान्तिपूर्वकं समाप्तम् ॥

557

Sl. No. 11437 पल्लीविण्मूत्रपतनशांतिः (ज्योतिषार्णवीया) Ms. No P. 4180/140

Beginning:

अथ पल्लीविण्मूत्रपतनशान्तिः—

विण्मूत्रपतने पल्याः सर्वाङ्गेषु शिरोरुहे ।
स्त्रियो वा पुरुषस्यापि शान्तिं वक्ष्यामि यत्नतः ॥

तत्क्षणे क्षीरमिश्रं तु सचेलं स्नानमाचरेत् ।
देवागारे गृहे वापि सद्यः शान्तिं समाचरेत् ॥

End :

कलशस्थोदके स्नात्वा पौरुषेण च सूक्तनः ।
मक्षीभ्यामिति सूक्तेन समृद्धज्येष्ठ इत्यथ ॥
तद्दोषशमनं क्षिप्रं दीर्घायुर्भवति ध्रुवम् ।
ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदथ ॥

Colophon:

इति ज्योतिपार्णवे पल्लीविण्मूत्रपतनशांतिः ॥

558

Sl. No 11438 पल्लीसरटशांतिः (वृद्धगार्ग्योक्ता) **Ms. No. P. 604/29**

Beginning :

अथातः संप्रवक्ष्यामि शृणु शौनकसत्तम ।
पल्याः प्ररोहणं चैव सरटस्य प्ररोहणम् ॥
शीर्षे राज्यश्रियावाप्तिः ललाटे भूतिवर्धनम् ।
कर्णयोर्भूषणावाप्तिः नेत्रयोर्बन्धुदर्शनम् ॥

End :

अकृत्वा शांतिकम् कर्म लोभेन द्रव्यसञ्चयम् ।
दौर्भाग्यं जायते तस्य दौर्मनस्यं च जायते ॥
तस्मात् सर्वप्रयत्नेन तयोः शांतिं समाचरेत् ॥

Colophon:

इति वृद्धगार्ग्योक्तपल्लीसरटशांतिः समाप्ता ॥

559

Sl. No. 11441 पल्लीसरटपतनशांतिः (शौनकीया) Ms.No.P 2914/16

Beginning :

शौनकः-

पल्याः प्रपातस्य फलं सरटयाश्च तथैव च ।
तयोः स्पर्शनमात्रेण सचेलं स्नानमाचरेत् ॥

शुभस्थानेऽशुभस्थाने शांतिं कुर्याद्यथाविधि ।
पुण्याहं वाचयेत्पश्चात् कलशस्थापनादिकम् ॥

End:

सवस्त्रां प्रतिमां गां च आचार्याय निवेदयेत् ।
आज्यावलोकनं पश्चादयःपिण्डादि दापयेत् ॥

दशदानानि कुर्वीत ब्राह्मणान् भोजयेदथ ।
इत्थं शांतिं प्रकुर्याच्चेज्जीवेद्वर्षशतं नरः ॥

Colophon :

इति शौनकीये पल्लीसरटपतनशांतिः ॥

– – – –

560

Sl. No. 11457 पापपुरुषदानपद्धतिः (यामलोक्ता) Ms. No. P. 9428/106

Beginning :

रचनाप्रकारः—

ग्रहणादिपुण्यकालेषु संक्रान्ति अयनजन्मानुजन्मदिवसे नवमी-चतुर्दशी-षष्ठी-अष्टमीदिवसेषु देवालयादिपुण्यदेशेषु गोमयानुलेपितरङ्गवल्यादिरचितभूभागोपरि तिलान्निक्षिप्य ॥

End:

एवंविधां रचितां पापपुरुषप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे ; न मम ; इति दद्यात् । त × × × स्वानवलोकयेत् । यम्येत्यादि ॥

Colophon :

इति यामलोक्तप्रकारेण पापपुरुषदानपद्धतिः ॥

561

Sl. No. 11458 पारावतशांतिः Ms. No. P. 3924/13

Beginning :

गृहे पारावतप्रवेशे मासपर्यन्तं तत् गृहं त्यजेत् । अनन्तरं शांतिः- सुवर्णेन कपोतरूप मृत्युप्रतिमां कृत्वा तां पूजयेत् ॥

End :

भूर्स्वाहेत्यन्तेन त्र्यम्बकमन्त्रेण पलाश-पवमाना - आर्द्रकैः प्रत्येकमष्टोत्तरसहस्रमष्टोत्तर शत वा जुहुयात् । ग्रहयज्ञस्त्वैच्छिकः । दशदानं ब्राह्मणभोजनं च कुर्यात् ॥

Colophon :

– – – –

562

Sl. No. 11459 पिङ्गलशांतिः Ms. No. P. 3924/11

Beginning :

गृहोपरि पिङ्गलप्रवेशने एकसंवत्सरं गृहं वर्जयेत् । उपरि शरभाषेण (?) गृहपतेर्मरणं सूचयति । तस्य शांतिं सुवर्णेन तदर्धेन वा पिङ्गलीरूपं मृत्युं कृत्वा ॥

End :

पालाशसमिद्भिः सहस्रहोमं दूर्वाहोमश्चापमृत्युमन्त्रैस्त्रिभाक्षतमन्त्रहोमग्रहयक्षं सर्वत्र समिदा अचरुमिर्होमः । तत्सर्वं पूर्ववत् ॥

Colophon :

– – – –

563

Sl. No. 11460 पितृपु–कृष्णासजननशांतिः (पाराशरसंहितीया) Ms. No. P. 9428/30

Beginning :

अतःपरं प्रवक्ष्यामि शांतिकर्मविधिं श्रुणु ।
यस्मिन् मासे पितुर्जन्म तन्मासेऽपि च तत्तिथौ ।
तद्राशौ चैव तद्धक्षायां × × ये जायते शुभः ।।

End :

गोभूहिरण्यवासांसि ब्राह्मणेभ्यः प्रदापयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् सर्वारिष्टानि × त्तयेत् ॥
एवं कृते तु तत्पातं तत्क्षणान्ते विनश्यति ।
× × × पूर्णकामश्च सर्गः प्राप्नोति सम्पदः ॥

Colophon :

इति पाराशरसंहितायां पितापुत्रैकमामादिजननशांतिः ॥

564

Sl. No 11461 पितृनक्षत्रजननशांतिः (बोधायनीया) Ms. No. P. 3085, 5

Beginning :

अथातः पितृनक्षत्रजननशांतीं व्याख्यास्यामः—

पितृगण्डदोषनिवृत्यर्थं शांतिं प्रकुर्वीत । शुचौ समे देशे गोमयेन गोचर्ममात्रं तुरश्रमुपलिप्य प्रस्थषड्भिर्धान्यैस्तदर्धतण्डुलैः ॥

End :

आचार्याय वस्त्रप्रतिमां दत्वा ऋत्विग्भ्यो दक्षिणां ददाति । ततो दोषात् प्रमुच्यते । ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा अक्षय्यफलमाप्नोतीत्याह भगवान् बोधयनः ।

Colophon :

पितृनक्षत्रजननशांतिस्समाप्तः ॥

565

Sl. No. 11462 पितृनक्षत्रजननशांतिः (शातातपीया) **Ms. No. P. 7993/2**

Beginning :

अथ पितापुत्रैकजननशांतिविधिरुच्यते –

एकस्मिन् एकनक्षत्रे भ्रातुर्वा पितृपुत्रयोः ।
प्रसूतिश्चेत्तयोर्मृत्युः भवेदेकस्य निश्चयः ॥

End :

तद्दोषपरिहाराय आशिष प्रतिगृह्य च ॥
एवं यः कुरुते सद्यः सर्वाभीष्टं च विन्दति ॥
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥

Colophon :

इति शातातपोक्तपितापुत्रैकजननशांतिविधिः ॥

566

Sl. No. 11463 पीनरोगनिवारणशांतिः **Ms. No. P. 2077/2a**
(गरुडनासिकादानविधिः)

Beginning :

वक्ष्येऽहं पीनरोगस्य जपहोमादिकं तथा ।
स्वर्णे नध्दं वाऽथ रौप्ये कुर्यात् गरुडनासवत् ॥

तन्मध्ये विलिखेन्मन्त्रं गार्गधैकाक्षरं (?) शुभम् ।
वाय्वग्न्यमृतसंयुक्तं विलिखेदग्निमण्डले ॥

End :

लक्षमेकं यथायुक्त्या ब्रुद्ये भानुवासरे ।
दानं दद्याद्यथाशक्ति दक्षिणालङ्कृतादिभिः ॥

पश्चात्तदौषधं दद्यात् सर्वं पीनसशान्तये ॥

Colophon :

इति पीनससंहारगरुडनासिकादानविधिः ॥

567

Sl. No. 11464 पुत्रकामेष्टिविधिः Ms. No. P. 1908/6

Beginning :

अथ प्रसङ्गात् पुत्रकामेष्टिविधिरुच्यते –

ऋगमस्मि × न् सन्नयति अमृतत्वं न गच्छ ति।
पितापुत्रस्य जातस्य पश्यतो जीवतोर्मुखम् ॥

End :

पालाशदलसाहस्रं महानद्यां सावित्रीमन्तरेण दलं प्रतिस्नापयेत् । सुपवित्रेण एकादश्यां प्रजार्थिनमिति ॥

Colopuon :

इति ऋषिशृङ्गविरचिते पुत्रप्राप्तिकरं पुत्रकामेष्टिप्रकरणं सम्पूर्णम् ॥

Extra information

अंकोलमूल + + + + पुत्रिणी सा भविष्यति ॥

इति ग्रन्थान्ते दृश्यते ॥

568

Sl. No. 11469 पुत्रकामेष्टिविधिः होमप्रकरणम् शौनकीयम् Ms No. P. 4180/40

Beginning :

आदिजाता प्रयेमग्न् पुत्रा नव भवन्ति वै ।
ऋतुकाले भत्रे षष्ठे दम्पती समलङ्कृतौ ॥

कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकम् ।
पूर्णपात्राणि दानांतमुपलेपादि पूर्ववत् ॥

End :

अनर्चनं तु होतारं अनुघृत्योमिति ब्रुवन् ।
उपगम्य ततः पत्नी व्यया यच्च यथाविधिः (?)॥

एवमुक्तादि तत्पुत्रः लुप्यते न कदाचन (?)।
ब्राह्मणान् भोजयित्वेषां स्वयं भुञ्जीत बन्धुभिः ॥

Colophon :

इति × × × नकीये पुत्रकामेष्टिहोमः ॥

569

Sl. No. 11473 पुनर्वसुजननशान्तिः Ms.No.P. 4863/52

Beginning:

पुनर्वसुः × × × × × × वा पीडा भवति । अथ होमे नक्षत्रदेवताध्यान पूर्व-
वत् । तत्र विशेषः–

End :

पलाशपत्रोदकेन चाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् ।
ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ।

Colophon :

इति पुनर्वसूनक्षत्रशान्तिः ॥

570

Sl. No. 11475 पुनर्वसूजननशांतिविधिः (गार्ग्यीया) Ms. No. P. 9254/92-

Beginning :

अथपुनर्वसुनक्षत्रशांतिः —

पुनर्वसोः सप्तदिनादि विंशतिदिनानि वा पीडा भवति । अथ होमनक्षत्रदेव ताराधनं पूर्ववत् । तत्र विशेषः अग्न्यनुमत्योर्मध्ये अदितिः पुनर्वसुनक्षत्रदेवतेति भेदः । अदितिदेवतास्वरूपम् ।।

End :

नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ।।

Colophon :

इति पुनर्वसुनक्षत्रशांतिविधिः ।।

571

Sl.No. 11478 पुनर्वसुप्रथमार्तवशांतिः (रुद्रयामलीया) Ms.No. P. 2239/17

Beginning :

परपूर्वरताकन्या पुष्पवत्यां पुनर्वसौ ।
महारोगयुता वाऽपि दुःखदारिद्रसंयुता ॥

तस्य शांतिं प्रकुर्वीत तदुक्तं रुद्रयामले ॥

End :

अनेनैव तु मन्त्रेण दद्याच्च प्रतिमात्रयम् ।
गोहिरण्यतिलान् दत्वा चतुर्ब्राह्मणभोजनम् ॥

एवं यः कुरुते शान्तिं दम्पत्योः सुखमाप्नुयात् ॥

Colophon :

इति रुद्रयामले पुनर्वस्वार्तवशान्तिः ॥

572

Sl. No. 11485 पुष्करयोगशांतिः (रोमशप्रोक्ता) Ms. No.P. 10070/77

Beginning :

....संज्ञितम् ।
त्रिगुणपालदोर्वृद्धौ नष्टे हते च मृतेऽथ यो वा ।
त्रिपुष्करेण वाध्यं तस्माच्छान्तिः भूयादितीरिता ।।

End:

यथा तमो नास्त्यस्यति भानुदर्शने (?)
यथा शांतिविधानमिच्छतः ...... ।
त्रिपुष्करोत्थं भयमाशु नश्यति
ग्रहोत्थदोषोऽपि च नश्यति ध्रुवम् ।।

Colophon :

इति रोमशप्रोक्तपुष्करयोगशांतिः ।।

573

Sl. No. 11486 पुष्य(तिष्य)नक्षत्रजननशांतिः Ms. No. P. 2239/32

Beginning :

अथ पुष्यादिनक्षत्रजननशांतिः ।।

शृणु शौनक यत्नेन गण्डदोषविनिर्णयम् ।
शांति × × × × × × × म्यप× × यः ।।
पुष्ये च तिष्ये च यथा च तोये कन्याकुलीरोदयचापलग्ने
शुभग्रहे पश्यति चेन्निहन्यात् पितंश्च मातृंश्च निहन्ति मातुलम् ।।

End :

त्रिर्व्रीहिहोमं च कुर्यात् । विशाखाधिदेवता इन्द्राग्नी ×××× गजारूढ×× ×× चतुर्भुजः । वज्राङ्कुशचापबाण× इन्द्रं माता युवतिरिति ॥

Colophon:

— — — — —

574

Sl. No. 11487 पुष्य(ति॰)यनक्षत्रजननशांतिः **Ms. No. P.2239/34**

(वृद्धगार्ग्यीया रुद्रयाभलान्तर्गता)

Beginning :

अथ यामलोक्त पुण्यनक्षत्रजननशांतिः- वृद्धगार्ग्य उवाच—

श्रृणु शौनक यत्नेन गण्डदोषविनिर्णयम् ।
शान्तिकर्मविधानं च यथावत् कथयाम्यहम् ॥

द्विमासे चोत्तरे दोषं पुष्ये चव त्रिमासतः ।
पूर्वाषाढाष्टमासश्च चित्राषाण्मासिकं तथा ॥

End :

आशीविषधरः क्रूरः कुण्डली कभ्यपञ्जनः ।
तन्मूर्तिदानतो भक्त्या मम सन्तु मनोरथाः ॥

इति दत्वा दक्षिणार्थं कपिलां गां प्रदापयेत् ॥

दानमन्त्रः ॥

ब्राह्मणान् भोजयेत्पश्चात् गृहीयादाशिषः स्वयम् ।
एव यः कुरुते शान्ति पौत्रपौत्रादि×××× ॥

Colophon :

इति रुद्रयामले पुष्यनक्षत्रजननशांतिः ॥

575

Sl. No. 11491 पुष्य(तिष्य)नक्षत्रजननशांतिः Ms. No. P. 3804/45

(ज्योतिषार्णवीया)

Beginning :

पुष्ये च कर्किलग्ने च पूर्वाषाढे च कार्मुके ।
तस्मिन् जाते कुमारे तु पितॄन् हन्ति न संशयः ॥
उत्तरा प्रथमे पादे पुष्ये चैव तु मध्यमे ॥

End :

उपहोमे इमे हुत्वा तिलव्रीहींस्ततो हुनेन् (?) ॥
व्याहृतीर्विहितास्सम्यक् गण्डदोषप्रणुत्तये ॥

Colophon :

इति ज्योतिषार्णवे तिष्यनक्षत्रजननशान्तिः समाप्ता ॥

576

Sl. No. 11500 पुष्यनक्षत्रजननशांतिः Ms. No.P. 9254 93

Beginnin

अथपुष्यनक्षत्रशांतिः—

पुष्ये सप्तदिनानि द्वन्द्वरात्रिर्वा पीडा भवति । अथ होमनक्षत्रदेवनाराधनं पूर्ववत् । तत्र विशेषः— अग्न्यनुमत्योर्मध्ये बृहस्पतिः तिष्यनक्षत्रदेवतेति भेदः । बृहस्पतिदेवतास्वरूपम् ॥

End :

ततः स्विष्टकृत्प्रभृत्यावरदानान्तं कृत्वा जीवपल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आयुरारोग्यं भवति ॥

Colophon:

इति पुष्यनक्षत्रशांतिः ॥

577

Sl. No. 11506 पुष्यपूर्वाषाढजननशांतिः Ms. No. P. 60/3

(स्मृतिसंग्रहान्तर्गता)

Beginning :

पूर्वाषाढे च पुष्ये च शांतिः जातस्य कथ्यते ।
तयोः पादक्रमेणैव पितृमातृसुतास्तथा ॥

पुत्रस्य मातुलं चैव घ्नन्ति शान्ति विवर्जयेत् ।
गोमुखाज्जनयेत्पूर्वं शिशुं जातं तदृक्षयोः ॥

End:

भूहिरण्यतिलाज्यानि वासो धान्यगुडानि च ।
रौप्यं लवणमित्याहुः दश दानाः प्रकीर्तिताः ॥

एतानि च यथाशक्ति दत्वाज्यावेक्षणं ततः ।
ब्राह्मणेभ्यः प्रदानव्य वित्तशाठ्य न कारयेत् ॥

Colophon :

इति स्मृतिसंग्रहे पूर्वाषाढाशान्तिः ॥

578

Sl. No. 11509 पुयपूर्वाषाढजननशांतिः (शौनकीया) Ms. No. P. 5635/57

Beginning :

पुष्यर्क्षे वा जलक्ष वा जाते च ग्रहपञ्चके ।
पितृमातृसुतान् हन्ति मातुलं च पदक्रमात् ॥

पितरं मातरं चैव ज्येष्ठपुत्रं तथैव च ॥

End:

तस्य दोषस्य नाशाय शांतिकर्म समाचरेत् ।
एवं यः कुरुते शांतिं तस्य दोषो विनश्यति ॥

Colophon :

इति शौनकीये पुष्यपूर्वाषाढाशांतिः ॥

579

Sl·No 11510 पुष्यपूर्वाषाढाजननशांतिः Ms. No. P. 5635/58
(वृद्धगार्ग्योक्ता)

Beginning :

सुखासीनं मुनिश्रेष्ठं गर्गं मुनिगणान्वितम् ।
कृतांजलिपुटो भूत्वा परिपप्रच्छ शौनकः ॥
पुष्यतोयर्क्षसम्भूतौ गण्डदोषो विनिश्चितः ॥

End :

अज्ञानात् ज्ञानतो वाऽपि वैकल्याच्छन्दसात्मनः ।
तन्न्यूनमधिकं चैव तत्सर्वं क्षन्तुमर्हसि ॥

Colophon :

इति वृध्दगार्ग्योक्तपुष्यपूर्वाषाढशांतिः समाप्ता ॥

580

Sl No 1151 पूगसीमन्तविधिः (बोधायनीया) Ms No. P. 5635/3

Beginning :

अथातः पूगवृक्षाणां गर्भितोन्नयनं भवेत् ।
हेमन्तादौ शिशिरयोगपूर्यमाणपक्षे प्रथमे गर्भे पूर्वाह्णे समारभेत ॥

End :

ओषधयस्संवदन्त इयुपस्थाय होमं पूजां च समाप्य शांतिं जपित्वा दक्षिणां दत्वा आशीर्वचनं गृहीत्वा पूगवृक्षफलं भवतीत्याह भगवा न्बोधायनः ॥

Colophon :

इति पूगसीमन्तविधिः ॥

581

Sl. No. 11521 पूर्वफल्गुनीप्रथमार्तवशांतिः Ms. No. P. 2239/20
(पुब्बानक्षत्रार्तवशांतिः रुद्रयामलीया)

Beginning :

बन्ध्या त्वति (?) च शोका वा रोगदारिद्र्यदा भवेत् ।
पापाचारी महाक्रोधा पूर्वफल्गुन्यार्तवे ध्रुवम् ॥
पुण्याहवाचनादीनि सर्वं कुर्याद्यथाविधि ॥

End :

उरसा कुङ्कुमा×× नः भृगो विश्वप्रकाशकः ।
तसस्त्वन्मूर्तिदानेन ममाभीष्टफलप्रदा ॥
इति दत्त्वा दक्षिणार्थं कृष्णधेनुं प्रदापयेत् ॥

Colophon :

इति रुद्रयामलोक्तपूर्वफल्गुनीऋतुशांतिः ॥

582

Sl. No. 11533 पूर्वाभाद्राप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 2239/22

Beginning :

धनभर्तृक्षेत्रहानिः पूर्वाभाद्रपदे ऋतौ ।
तद्दोषशमनार्थाय शांतिकर्म समाचरेत् ॥
गृहस्योत्तरभागे तु गोमयालेपनादिकम् ॥

End:

इति दत्त्वा दक्षिणार्थं श्वेतगोदानमाचरेत् ।
एवं यः कुरुते शांतिं सद्यो दोषापनुत्तये ॥

आयुरारोग्यमैश्वर्यं पुत्रपौत्रप्रवर्धनम् ॥

Colophon:

इति रुद्रयामले पूर्वाभाद्रार्तवशांतिः ॥

583

Sl. No. 11538 पूर्वाभाद्राप्रथमार्तवशांतिः **Ms. No. P. 5930/107**

Beginning:

पूर्वाभाद्रायां मृत्युसन्देहे वा पञ्चरात्रं वा पीडा भवति । अथ होतुदेवता राधन पूर्व-वत् । तत्र विशेषः ॥

End:

दूर्वापल्लवोदकेनाभिषेकं कुर्यात् नक्षत्रदेवताप्रीत्यै कृष्णधेनुं तिलकम्बलहिरण्यदक्षिणां दद्यात् । ब्राह्मणान् भोज××यित्वाऽऽयुरारोग्यं भवति ॥

Colophon:

इति पूर्वाभाद्राशांतिः ॥

584

Sl. No. 11540 पूर्वाभाद्राप्रथमार्तवशांति: **Ms. No. P. 9254/111**

Beginning:

अथपूर्वाभाद्रानक्षत्रशांतिः—

पूर्वाभाद्रायां मृत्युसन्देहे वा पञ्चरात्रं वा सप्तरात्रं वा विंशतिरात्रं वा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः अग्न्यनुमत्योर्मध्ये अज-एकपात्प्रोष्ठपदानक्षत्रदेवतेति भेदः ॥

End :

नक्षत्रदेवताप्रीत्यै कृष्णधेनुं तिलकम्बलहिरण्यदक्षिणां दद्यात् ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्य भवति ॥

Colophon :

इति पूर्वाभाद्रानक्षत्रशांतिः ॥

585

Sl. No. 11549 **पूर्वाषाढाजननशांतिः** **Ms. No. P. 6298/6**

(सर्वस्मृतिसंग्रहान्तर्गता)

Beginning :

पूर्वाषाढे च पुष्ये च शांतिर्जातस्य कथ्यते ।
तयोः पादक्रमेणैव पितृमातृसुतांस्तथा ॥

पुत्रस्य मातुलं चैव पङ्क्तिशांतिविवर्जिने ।
गोमुखाज्जनयेदर्घ्यं शिशु जातं नदक्षयोः ॥

End :

ब्राह्मणान् भोजयेच्चापि दक्षिणाभिश्च तोषयेत् ।
अथोपकरणं सर्वं देवज्ञाय निवेदयेत ॥

अनेन शांतिहोमेन दीर्घायुष्यो भवेच्छिशुः ।
सर्वारिष्टमतिक्रम्य भव भवति शोभनम् ॥

Colophon :

सर्वस्मृतिसंग्रहे पूर्वाषाढाजननशांतिः समाप्ता ॥

586

Sl. No. 11553 पू षाढानक्षत्रजननशांतिः Ms. No. P. 9254/105

Beginning:

अथ पूर्वाषाढानक्षत्रशांतिविधिः—

पूर्वाषाढायां दिने विंशतिदिवसं मृत्युः । सन्देहे वा पीडा भवति । अथ होम नक्षत्रदेवताराधनं ्वैवत् । तत्र विशेषः- अग्न्यनुमत्योर्मध्ये पूर्वाषाढानक्षत्रदेवतेति भेदः ॥

End :

नीलवासांसि हिरण्यरत्नानि दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाच यित्वा आयुरारोग्यं भवति ॥

Colophon :

इति पूर्वाषाढानक्षत्रशांतिः ॥

587

Sl. No. 11560 पूर्वाषाढा पुष्यजननशांतिः Ms. No. P. 3128/15
(ज्योतिषार्णवीया)

Beginning :

पूर्वाषाढे च पुष्ये च शान्त्यृक्षे तस्य कथ्यते ।
तयोः पादक्रमेणैव पितृमातृसुतस्य च ॥

पुत्रस्य मातुलश्चव घ्नन्ति शांतिविवर्जने ।
गोमुखं जनयेत्पूर्वं शिशुं जातं .... ॥

तस्य शांतिं प्रवक्ष्यामि ज्योतिषार्णवचोदितम् ॥

End :

ब्राह्मणान् भोजयेत्पश्चा × × दपुरस्सरः ।
एनां यः कुरुते शांतिं ऋक्षदोषो विनश्यति ॥

मातापित्रोः शिशोश्चैव आयुर्वर्धनसौख्यदम् ।
अपमृत्युविनाशाय सद्य एव न संशयः ॥

Colophon :

इति पुष्यपूर्वाषाढयोः शांतिः समाप्ता ॥

588

Sl. No 11561 पूर्वाषाढाप्रथमार्तवशांतिः (रुद्रयामळीया) Ms. No. P. 2579/21

Beginning :

पूर्वाषाढे च वैधव्यं कन्याया धत्तिकाशुचि (?) ।
तद्दोषपरिहारार्थं शांतिं कुर्याद्यथाविधि ।
भरण्युक्तविधानेन शांति-सर्वां समाचरेत् ॥

End :

श्वेतवर्णचतुर्हस्त विश्वेदेव दयानिधे ।
तव मूर्तिप्रदानेन अतशांतिं प्रयच्छ मे

इति दत्वा,

दक्षिणार्थं श्वेतगां च [आचार्याय] प्रदापयेत् ॥

Colopuon :

इति रुद्रयामले पूर्वाषाढाऋतुशांतिः ॥

589

Sl. No. 11568 पौर्णमीप्रथमार्तवशांतिः (रुद्रयामळीया) Ms. No. P. 2239/9

Beginning :

पौर्णमास्यां यदि भवेत् नारीणां प्रथमार्तवम् ।
रोगपीडा × × × × कुलहानिर्भवेत्तथा ॥
विचशाठ्यं न कुर्वीत भक्त्या शांतिं समाचरेत् ॥

Enn:

औषधीश महातेजः द्विजराज क्षपाकर ।
तव मूर्तिप्रदानेन मम सन्तु मनोरथाः ।।

इति शांतिं प्रकुर्वीत गण्डदोषः शाम्यति ॥

Colophon :

इति रुद्रयामले पौर्णम्यार्तवशांतिः ॥

1590

Sl. No. 11573 पौर्णमीप्रथमार्तवशांतिः Ms. No. P. 9254/175

Beginning :

पौणमास्यां यदि भवेन्नारीणां प्रथमार्तवम् ।
रोगापीड. महान् दुःखं कुलहानिस्तदा भवेत् ।।

वित्तशाठ्यं न कुर्वीत भक्त्या शांतिं प्रकल्पयेत् ।
गन्धपुष्पाक्षतैर्वस्त्रैः पूर्ववत्सर्वमाचरेत् ॥

End :

नवो नवेति मन्त्रेण त्रियम्बकमृचेन च ।
होमं पूजां जपं चैव दानान्ते होममन्त्रतः ॥

पालाशैः पायसैराज्यैः होममन्त्रद्वयेन च ।
अभिषेकादिसकलं प्रतिपदयुक्तमाचरेत् ॥

Colophon :

इति पोर्णमासीप्रथमार्तवशान्तिः ॥

591

Sl. No 11576 पौर्णमासीशांतिः म् Ms. No. P. 5930/1113

(पौर्णमास्यमावस्याशांतिः)

Beginning :

पौर्णमास्यां— तदानीमेव पौर्णमास्यां कर्म करिष्ये ;- इति यथायोगं संकल्प्य निर्वाप प्रोक्षणे च तदर्थेचरौ पूर्णापश्चादिति ।

End :

वरदानान्तं कृत्वा धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वाऽशिषो वाच-यित्वाऽयुरारोग्यं भवति ॥

Colophon :

इति पौर्णमावास्याशांनिः ॥

592

Sl. No. 11473 पौर्णमासीशान्तिः Ms. No .P 9254/116

Beginning.

पौर्णमास्यां तदानीमेव पौर्णमास्याख्यं कर्म करिष्ये; इति यथायोग्यं संकल्प्य नि-र्वापप्रोक्षणे च तदर्थेचरौ पौर्णःपश्चादितिं पुरोनुवाक्यमनूद्य पृथ्वीसुवर्चा इति याज्यया जुहोति ; पौर्णमास्यै स्वाहा । कामाय स्वाहा । गायत्र्यै स्वाहा ॥

End:

मन्त्राधिदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाच-यित्वा आयुरारोग्यं भवति ॥

Colophon :

इति पौर्णमी ॥

593

Sl. No. 11579 प्रतिपत्प्रथमार्तवशांतिः Ms. No. P. 2239/1

Beginning :

प्रतिपद्यदि नारीणं आर्तवे दोषदा भवे. ।
मनस्ताप × × × × × × ॥
× × तिथ्यां विचारेषु अभ्यङ्गस्नानपूर्वकम् ॥

End :

अन्येभ्यः कलशान् दद्यात् ब्राह्मणान् भोजयेत्ततः ।
अनेन विधिना सम्यक् दम्पत्योरभिवृद्धये ॥
सर्वदोषविनिर्मुक्तः बहुसन्तानवान् सुखी ॥

Colophon :

इति श्रीं × × × × × × शांतिः ॥

594

Sl. No 11580 प्रतिपत्प्रथमार्तवशांतिः Ms. No. P. 3023/3
)रुद्रयामलांतर्गता)

Beginning :

प्रतिपद्यनस्त्या वा नारीणां प्रतमार्तवे ।
तस्य :दोषक्षयार्थाय शांन्ति कुर्याद्यथाविधि ॥
वह्निमूर्तिं ब्रह्ममूर्तं सुवर्णेनैव कारयेत् ॥

End :

ऋत्विग्भ्यः दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ।
अनेन विधिना सम्यक् दम्पत्योरभिवृद्धये ॥
सर्वदोषविनिर्मुक्तः बहुसन्तानवान् सुखी ॥

Colophon :

इति रुद्रयामले प्रतिपदि प्रथमार्तवशांतिः ॥

595

Sl. No 11587 प्रतिपदाद्यार्तवशांतिः (रुद्रयामलीया) **Ms. No. P. 5672/3**

Beginning :

प्रतिपद्यनपत्या वा नारीणां प्रथमार्तवे ।
तस्य दोषक्षयार्थाय शांतिं कुर्याद्यथाविधि ॥

वह्निमूर्तिंब्रह्ममूर्ति सुवर्णेनैव कारयेत् ॥

End:

अनेन विधिना सम्यक् दम्पत्योरभिवृद्धये ।
सर्वदोषविर्मुक्तः बहुसन्तानवान् भवेत् ॥

Colophon :

इति रुद्रयामले प्रतिपदि प्रथमार्तवशांतिः ॥

596

Sl. No. 11592 प्रतिशुक्रशांतिः (पिप्पलोक्ता) **Ms. No. P. 3804/97**

Beginning:

अथतच्छृणु भूपाल प्रतिशुक्रव्रतान्तरम् ।
यात्रारम्भावसाने च यथा शुक्रोदये त्विह ॥

राजते वाऽथ सौवर्णे कांस्यपात्रे अथवा पुनः ।

End:

वन्दे सर्वार्थसिध्यर्थे गृहाणार्घ्यं नमोस्तु ते ॥

अर्घ्यमन्त्र.—

एवमस्योदये कुर्वन् यात्रादिषु च भारत ।
सर्वान् कापानवाप्नोति सर्वशत्रुजयो भवेत् ॥

Colophon :

इति पिप्पलोक्तप्रतिशुक्रव्रतं समाप्तम् ।।

597

Sl. No. 11593 प्रथमफलदर्शनशांतिः (बोधायनीया) Ms. No. P. 5587/70

Beginning :

अथ कदली क्रमुक-नारिकेलादिप्रथमफलदर्शनशान्तिविधिरुच्यते -

इन्द्राग्नियमभागेषु निर्ऋतेर्वरुणस्य च ।
वायुसोमबुधेशाने तत्र स्थाने शुभाशुभम् ।।

End :

आचार्याय च गां दद्यात् ××× दानमाचरेत् ।
ब्राह्मणानां शतैः भुक्तौ कृतकृत्यो भवेदिति ।।

सर्वानिष्टविनाशाय सर्वसम्पत्समृध्दये ।।

इत्याह भगवान् बोधायनः ।।

Colophon :

इति बोधायनोक्त-कदली-क्रमुक-नारिकेल-प्रथमफलदर्शनशान्तिविधिः समाप्तः ।।

598

Sl. No 11594 प्रथमार्तवव्यतीपातवैधृतिशांतिः (गौतमोक्ता) Ms. No. P. 9254/165

Beginning :

व्यतीपातवैधृतिप्रथमार्तवशांतिः-

अतःपरं प्रवक्ष्यामि शृणु गौतमसत्तम ।
वैधृतौ तु व्यतीपाते यावन्नारी रजस्वला ।।

शोकदुःखभयावाप्तिर्निर्धनत्वं च भोगता ।
पतिहीनाथ वन्ध्या वा मृतपुत्रत्वमेव वा ॥

End :

चतुर्दिक्षु बलिं दद्यात् चतुर्वर्णान्नकैरपि ।
आज्यावलोकनं पश्चान्नववस्त्रादिधारणम् ॥

आचार्याय ततो दद्यात्सवस्त्रप्रतिमां च गाम् ।
ऋत्विग्भो दक्षिणां दद्यात् ब्राह्मणांश्चापि भोजयेत् ॥

सर्वदोषविनिर्मुक्तः पुत्रपौत्रधनान्वितः ॥

Colophon :

इति गौतमोक्तव्यतीपातवैधृतौ प्रथमार्तवशांतिविधिः समाप्ता ॥

599

Sl. No. 11595 प्रथमार्तवशांतिः (बृहस्पतिप्रोक्ता) Ms. No. P. 604/85
(भुवनेश्वरीशांति)

Beginning :

प्रथमार्तवतिथिफलम्—

प्रतिपद्यां स्वयंपाकी द्वितीये चाल्पभोगिनी ।
तृतीये चेद्धनवती चतुर्थ्यां वृषली भवेत् ॥

पञ्चम्यां शुभगात्रा च षष्ठ्यां विकृतचारिणी ॥

End :

एवं यः कुरुते शान्तिं बार्हस्पत्यप्रकारतः ।
अरिष्टदोषं सकलं सद्य एव विनश्यति ॥

प्रतिमाप्रमाणलक्षणं दानानि च चतुर्दश । जन्मशान्त्यादिः उक्त ॥

Colophon :

इति बर्हिस्पत्योक्तप्रथमार्तवभुवनेश्वरीशान्तिः समाप्ता ॥

600

Sl. No. 11596 प्रथमार्तवशांतिः (बोधायनीया) Ms. No. P. 734/16

Beginning :

अथातः प्रथमार्तवशान्तिकल्पं व्याख्यास्यामः. स्नानात्पूर्वरात्रावुत्तरपूर्वे देशेऽगारस्य गोमयेन गोचर्ममात्रचतुरस्रमुपलिप्यस्थण्डिलमुल्लपयित्वा ॥

End :

इतीमं कुम्भमुद्धास्य शान्तिसूक्तेनाभिषिच्य पुण्याहं वाचयित्वा, ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

Colophon:

– – – – –

601

Sl. No. 11598 प्रथमार्तवशांतिः Ms. No. P. 1723/30

(ईश्वरसंहितांतर्गता– गर्गवसिष्ठप्रोक्ता)

Beginning:

अथातः प्रथमार्तवशान्ति व्याख्यास्यामः—

नारीणां प्रथमरजोदर्शनकाले तिथि-वार-नक्षत्र-योग-करण-लग्नादिभिः सूचितसकलदोषशान्त्यर्थं सर्वारिष्टशान्त्यर्थं सत्पुत्रसन्तानार्थं च चतुर्थे पञ्चमेऽहनि वा कुर्यात् ॥

End :

गर्भं धेहीति पत्नीं प्राशयेत् । क्षीरसंयुक्तमान्नं कांस्यपात्रे निधाय घृतसूक्तेन पत्नीं प्राशयेत् । आचार्याय धे॒ दद्यात् । अनन्तरं नवग्रहयज्ञं कुर्यात् ॥

Colophon :

इति ईश्वरसंहितायां गार्ग्यवसिष्ठप्रोक्तप्रथमार्तवशान्तिः समाप्ता ॥

602

Sl. No. 11600 प्रथमार्तवशांतिः (ज्योतिषार्णवान्तर्गता) Ms. No. P. 2581/22

Beginning :

अथ रजस्वलाकालनिरीक्षणफलं उच्यते । स्वायम्भुवमनुरुवाच—

अथातः सम्प्रवक्ष्यामि पुष्पवत्याः शुभाशुभम् ।
प्रातःकाले शुभं ब्रूयात्सङ्गवे शुभसंकुलम् ।।

मध्याह्ने निर्धनी भोगी सुतहीनाऽपराह्णके ।
सायाह्ने सर्वसन्तुष्टा सन्ध्ययोर्विधवा भवेत् ॥

End :

अलंकृत्य यथान्योऽन्यं आचार्याय निवेदयेत् ।
आचार्याय च गां दद्यात्सवत्सां च पयस्वीनीम् ।।

ब्राह्मणान् भोजयेत्पश्चाद्यथावित्तानुसारतः ।
एवं यः कुरुते शांतिं तद्दोषो नानुलीप्यते ॥

Colophon :

इति ज्योतिषार्णवे प्रथमरजस्वलाशांतिः ॥

603

Sl. No. 11601 प्रथमार्तवशांतिः (संहितासारीया) Ms No P. 2581/23

Beginning :

मनुः संहितासारे–

पुष्पं दृष्ट्वा निन्दिते मे यदि स्या- ।
च्छान्तिं कुर्यादङ्गनानां च नूनम् ॥

तत्संयोगे वल्लभो वर्जनीयात् ।
यावद्भूयः शरव्यभे (?) यान्ति दृष्टम् ॥

दूर्वातिलाज्यैर्जुहुयात्सहस्रम्।

End :

स्वर्णयुक्तं कांस्यपात्र गोघृतेन प्रपूजयेत् ।
तत्रावलोकनं कृत्वा ब्राह्मणाय निवेदयेत् ॥
आचार्याय च गां दद्यात्सवत्सां च पयस्विनीम् ॥

Colophon :

इति संहितासारे प्रथमार्तवशान्तिः समाप्तः ॥

604

Sl. No 11603 प्रथमार्तवशांतिः Ms. No. P. 3804/38

Beginning :

आर्तवानां च नारीणां शांतिं वक्ष्याम्यतःपरम् ।
चतुर्थेदिवसे प्राप्ते स्नात्वा तामभिषेचयेत् ॥
ऋक्षाधीशं सुपर्णेन्द्रं धर्मशास्त्रोक्तमार्गतः ॥

End :

आज्यावलोकनं कुर्यात् आचार्यमभिपूजयेत् ॥
सवस्त्रप्रतिमां धेनुं आचार्याय प्रदापयेत् ॥
ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ॥

Colophon :

इति ब्रह्मयामलोक्तप्रथमार्तवशान्तिः ॥

605

Sl. No. 11604 प्रथमार्तवशांतिः Ms. No. P. 4396/52

(कात्यायनकल्पसूत्रान्तर्गता)

Beginnin

ततः परं प्रवक्ष्यामि शांतिं पूर्वोक्तमार्गतः ।
दुष्टर्क्षेषु च नारीणां प्रथमार्तवदर्शने ॥
प्रत्येकं च फलं तेषां नक्षत्राणां विशेषतः ॥

End:

गन्धपुष्पादिकं सर्वं देवताभ्यो निवेदयेत् ।
स्वसमिद्भिः स्वमन्त्रैश्च जपहोमादिकं तथा ।
गोदानाप्रतिमदानं वस्त्रदानं च पूर्ववत् ॥

Colophon:

इति कात्यायनकल्पसूत्रोक्तप्रथमरजस्वलाशांतिः समाप्ता ॥

606

Sl. No. 11615 प्रथमार्तवशांतिः (ज्योतिषार्णवान्तर्गता) Ms. No. P.9965/57

Beginning :

स्थूलं स्थूलतरं नित्यं अणुं चाणुतरं शुभम् ।
पद्मासनं नमस्कृत्य प्राञ्जलिर्नारदोऽब्रवीत् ॥
तिथिवारनक्षत्रयोगेषु सञ्जातं च रजस्त्रियः ।
दृश्यते यदि तत्त्वेन शांतिं ब्रूहि पितामह ॥

End :

सर्वालंकारसंयुक्तामाचार्याय सदक्षिणाम् ।
आदित्यादिग्रहादींश्च ऋत्विग्भ्यश्च प्रदापयेत् ॥

दशदानानि कृत्वाथ कुर्याद्ब्राह्मणभोजनम् ।
एवं यः कुरुते शांतिं सर्वदोषात्प्रमुच्यते ॥

Colophon :

इति पिप्पलसंहितायां प्रथमार्तवऋतुशान्तिः ।

607

Sl. No. 11618 प्रसववैकृतिशांतिः Ms No. P. 60/14

Beginning :

अथ प्रसववैकृतिशान्तिविधिरुच्यते—

अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
विकृतिः प्रसवाश्चैव धूमप्रसवनास्तथा ॥

End :

निर्वासयेतां नृपतिश्च राष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
चिकित्सनैर्ब्राह्मणतर्पणश्च
ततोस्य शांतिः समुपैति पापे ॥

Colophon :

इति प्रसववैकृतिशांतिः ॥

608

Sl. No. 11619 प्रसववैकृतिशांतिः (हेमाद्रीया) Ms No. P. 604/77

Beginning :

हीनाङ्गा अधिके काले प्रसवे सतियोषिनाम् ।
असंख्याजनने युग्मे प्रसवे वा विशाखिनः ॥

अमानुषाणि चाण्डानि जायन्तेऽन्याण्डजानि च ।
हीनाङ्गश्चाधिकाङ्गश्च अनङ्गाः संभवन्ति वा ॥

End :

पूर्ववत् कारयेत् सर्वं जपहोमार्चनादिकम् ।
अभिषेकं च तत्सर्वं शान्तिं कुर्याद्यथाविधि ॥

Colophon :

इति हेमाद्रौ प्रसववैकृतिशान्तिः समाप्ता ॥

609

Sl. No. 11620 प्रसववैकृतिशांतिः Ms. No. P. 4180/15
(शौनकीया अकालप्रसवशांतिः)

Beginning :

अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
विकृतिप्रसवा नार्यः सा वधूः प्रसव एव च ॥
अमातुला च बाला च असातव्यजनी(?) तथा ।
हीनाङ्गा चाधिकाङ्गा वा जायन्ते यदि वा स्त्रियः ॥

End:

ब्राह्मणान् भोजयित्वा तु यथाशक्त्या च दक्षिणम्
तदाग्निदग्धं विदुषे प्रदद्याद्ब्राह्मणाय च ॥
पाणिदग्धेषु सर्वेषु हिरण्यं दक्षिणं ददेत् (?) ।
एवं यः कुरुते भक्त्या सर्वदोषैः प्रमुच्यते ॥

Colophon :

इति शौनकीये अकालप्रसवगृहादिदग्धशांतिः समाप्ता ॥

610

Sl. No. 11621 प्रसवविकृतिशांतिः (वासिष्ठसंहितीया) Ms. No. P. 4863/120

Beginning

हीनकालेऽधिके काले प्रसवे सति योषिताम् ।
असंख्याजनने युग्मे प्रसवे वारिशाखिनः ॥

अमानुषाणि चाण्डानि जायन्ते चाण्डजानि वा ॥

End:

हुत्वा च तर्पयेद्विद्वान् बहुवर्णैः सुभोजनैः ।
एवं यः कुरुते शान्तिं तस्मात्पापात्प्रमुच्यते ॥

अकृत्वा नास्तिको लोभात् अशुभो सर्वसंकटान् ॥

Colophon :

इति वसिष्ठसंहितायां यमळजननादिप्रभवविकृतिशांतिः समाप्ता ॥

611

Sl. No. 11625 प्रसवविकृतिशांतिः (वराहव्याख्यानसंहितीया) Ms. No. P. 9254/198

Beginning :

अथ प्रसविकारे स्त्रीणां द्वित्रिचतुःपञ्चसंप्रसूते वा ।
हीनातिरिक्तबालैः स्वदेशे कुलसंक्षयो भवति ॥

परस्परं प्रसूतानां अन्यः पशुप्रसवं विनाशयेत ॥

End :

प्रजापत्येन मन्त्रेण यज × × × दक्षिणाम् ।

विना दानं देशान्तरप्रापणम् । यागः स्वम्वत्वनिवृत्तिः परस्वपादनम् । तथा योगं शीघ्र कृतं तस्य चतुष्पदस्वामिनो नगरयूथादेः शुभं स्यात् ।

Colophon :

इतिवराहव्याख्यानसंहितायां यमलजननादिप्रसवविकृतिशान्तिः समाप्ता ॥

612

Sl. No. 11629 प्रसूतिशांतिविधिः Ms. No. P. 7899/1

Beginning :

अथातः प्रसूतिशान्तिकल्पविधिं व्याख्यास्यामो पुंग्योहिदं (?) पत्ये चन्द्रताराबलान्विते पूर्वाह्णे दम्पती मङ्गळस्नातौ भूत्वा पुण्याहं वाचयित्वा, ॥

End :

वासुदेवो जगन्नाथः ततः सर्पणाद्यः ।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥

आखण्डलोग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षः कुबेरकः ॥

एतास्त्वामभिषिञ्चन्तु दुरितक्षयकारकाः ॥

Colophon:

– – – – –

613

Sl. No. 11630 प्रसूतिरजोदर्शनशांतिः (वृद्धगार्ग्यीया) Ms. No. P. 9428/44

Beginning:

अथ शान्त प्रवक्ष्यामि ब्रह्मणो वचनं यथा ।
द्विजान् एकादशप्रोक्तान् वेदवेदाङ्गपारगान् ॥
पूर्वोगुरेव भुक्त्य × × वि ांसश्च पुरोहितः ॥

End :

अनेन विधिना शान्ति कृत्वा ××× हितः ।
आयुरारोग्यवृद्धिन्तु पुत्रपौत्र × वर्धनम् ॥
सर्वशांतिकरं पुण्यं सौख्यं च समवाप्नुयात् ॥

Colophon :

इति ग्रहणे प्रसूतिरजोदर्शनशांतिः ॥

614

Sl. No. 11631 . प्रस्रवद्योनिशोणितहरशांतिः Ms. No. P.909/17

Beginning:

अथ प्रस्रवद्योनिशोणितहरम् । तत्रकर्मविपाकसंग्रहे—

मासोपवासिनी नारी रेतः प्रस्रवयेद्यदि ।
यदि सम्पर्कदोषो वा जायते चान्यजन्मनि ॥

End :

स्रवद्रक्ता सदा योनौ तन्निष्कृतिः इहोच्यते ।
मासोपवासं कुर्वीत तथा मासं पयोव्रतम् ॥

Colophon :

— – – – – ––

615

Sl. No. 11632 बलहीन [illegible] शांतिः (गुरुप्रोक्ता) Ms. No. P. 604/23

Beginning :

वागीश सुरवृन्देश ग्रहाणां मध्यमे स्थिता
मम लोकहितार्थाय गुरुशान्तिफलं वद ॥

बृहस्पतिरुवाच—

देव देव महाकाल मद्भक्त्या मानुषाः सुराः ।
श्रध्दाभक्तियुताश्चैव मम शांतिं प्रचक्ष्मु ॥

End :

बृहस्पतिः सदोपेतः सर्वसम्पत्समृध्दिदः ।
एतच्छान्ति हरेर्नित्यं श्रध्दाभक्तिसमन्वितः ।
स नरः सुखामाप्नोति सर्वदोपविवर्जितः ॥
परमैश्वर्यमतुलं प्राक्×दिं बा ततो जयम् ॥

Colophon :

इति बृहस्पतिशान्तिः समाप्ता ॥

616

Sl. No. 11633 बलहीनबृहस्पतिशांतिः (ज्योतिषार्णवीया) Ms. No. P. 2581/19

Beginning :

अथ बलहीनबृहस्पतिशान्तिविधिरुच्यते—

वागीश सुरवृन्देश ग्रहाणां मध्यमे स्थिते ।
मम लोकहितार्थाय गुरुशान्तिफलं वद ॥

बृहस्पतिः गुरवः च—

देव देव यथा कालं मद्भक्त्या मानुषा सुराः ।
श्रध्दाभक्तियुताश्चैव मम शान्ति प्रचक्षते ॥

End:

बृहस्पतेः सदा प्रीतिः सर्वसम्पत्समृध्दिमान् ।
एतच्छान्ति पठेन्नित्यं श्रध्दाभक्तिसमन्वितः ॥

स नरः सुखमाप्नोति सर्वारिष्टविवर्जितः ।
परमैश्वर्यमतुलं वाक्सिध्दिं च ततो जयम् ॥

Colophon :

इति ज्योतिषार्णवे बलहीनबृहस्पतिशान्तिः समाप्तः ॥

617

Sl. No. 11636 बलहीनबृहस्पतिशान्तिः Ms. No .P. 5587/19
(शौनकीया)

Beginning:

गोचारबलहीतगुरुशांतिविधिरुच्यते—

अथातः संप्रवक्ष्यामि गुरुदोषापनुत्तये ।
प्राणिनां जीवरूपत्वात् गुरुर्जीव इति स्मृतः ॥

End:

गुरुमुद्दिश्य यच्छन्ति कुर्याद्वित्तानुसारतः ।
गुरुणा ज्ञात सर्वाप्यु (?) नाशयामि शुभप्रदः ॥

एवं यः कुरुते भक्त्या शांतिहोमं समाचरेत् ॥

Colophon :

इति शौनकीये गोचारबलहीनबृहस्पतिशान्तिः समाप्ता ॥

618

Sl. No. 11638 बलहीनशनिशांतिः (हेमाद्रीया) Ms. No. P. 7970/173

Beginning :

अथ बलहीनशनैश्चरशांतिविधिरुच्यते । शौनक उवाच—

नवग्रहाणां भूतानां पापानां शान्तिभूमिजौ ।
राहुः केतुश्च सर्वत्र सर्वोपद्रवकारकाः ॥
राशौ वर्षद्वयेऽर्कश्च मासार्धं मासमेव च ॥

End :

आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ।
ब्राह्मणान् भोजयेत् पश्चात् तेभ्यो दद्याच्च दक्षिणाम् ॥

बन्धुभिः सह भुञ्जीत कुर्याच्च ब्राह्मणाशिषः ।
शनिदोषं विनिर्जित्य सर्वान् कामानवाप्नयात् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शनिश तिः ॥

619

Sl. No. 11642 — बलहीनशनिशांतिः (शौनकीया) — Ms. No. P. 4180/22

Beginning :

शौनकः—

नानाग्रहाणां मध्ये तु शनिर्भौमान्महद्भयम् ।
राहुःकेतुश्च सर्वत्र सर्वोपद्रवकारकौ ॥

द्वौ शौ(?)वर्षद्वयार्धं च मासार्धं मासमेव च ।
शनिभौमौ राहुकेतौ चक्रे कग्रहकारकौ ॥ (?)

End :

ब्राह्मणान् भोजयित्वा तु विविधंर्भक्ष्यभोज्यकः ।
बन्धुभिः सह भुञ्जीत गृहीत्वा ब्राह्मणाशिषः ॥

सर्व × × × षविनिर्मुक्तः सर्वैश्वर्ययुतं गृही ॥

Colophon :

इति शौनकीये बलहीनशनैश्चरशान्तिः ॥

620

Sl. No. 11643 बलहीनशनिशांतिः Ms. No. P. 5587/9

Beginning :

बलहीनशनैश्चरशांतिविधिरुच्यते । शौनक उवाच—

नवग्रहाणां भूतानां पापानां शनिभूमिजौ ।
राहुः केतुश्च सर्वत्र सर्वोपद्रवकारकाः ।।

End :

ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
बन्धुभिः सह भुञ्जीत कुर्याद् ब्राह्मणाशिषस्तथा ।।

हानिदोषं विनिर्जित्य सर्वान् कामानवाप्नुयात् ।।

इति हेमाद्रौ दानकाण्डे शांतिप्रकरणे शनिशान्तिः समाप्ता ।।

Colophon :

621

Sl No. 11644 बलहीनशनिशांतिः Ms No. P. 5587/1

Beginning :

अथातः संप्रवक्ष्यामि शांतिकर्म सुतस्य च ।
यस्य नाशं समुत्पस्य द्वादशाराम न्मसु ।।
संस्थितो यत्र राशिस्थः स्थाननाशं धनक्षयम् ।।

End :

यस्मात्त्वं पृथिवी सर्वधेनोर्वै कृष्णसन्निभाम् ।
मृत्युरूपभया यस्मात् ततः शांतिं प्रयच्छ मे ।।

Colophon :

इति श्रीज्योतिषार्णवे शतसाहस्रिकायां संहितायां शान्तिपर्वणि गोचारवहीनशनैश्चर शांतिः पञ्चत्रिंशोध्यायः ।

622

Sl. No. 11645 बालग्रहशांतिः Ms. No. P. 3023/79

(बालरक्षाविधिः. भागवतान्तर्गता)

Beginning :

कपिलसंहितायां—

....शिशुसुरक्षणार्थाय भूतग्रहनिवारणीं ।
रक्षां सन्ध्यासु कुर्वीत निंवसर्षपगुग्गुलैः ॥
फलीकरणसम्मिश्रैः कुरंजैरनले क्षिपेत् ॥

End :

स्वप्नदुष्टा महोत्पाता वृद्धबालग्रहाश्च ये ।
सर्वे नश्यन्ति ते विष्णोः नामश्रवण एव च ॥

Colophon :

इति भागवते बालरक्षविधिः ॥

623

Sl. No. 11647 नवग्रहशांतिः (कर्मविपाकसंग्रहान्तर्गता) Ms. No. P. 9764/60

Beginning :

बालग्रहं प्रवक्ष्यामि महसाद्रावणोदितम् ।
पूजाद्रव्यं वलिद्रव्यं बलदिग्भागमेव च ॥
प्रथमे दिवसे मासे वर्षे तृष्णानिबालकम् ।
राक्षसीनन्दना नाम सर्वसत्वजयावहा ॥

End :

क्रमेण जुहुयाच्छान्दोनियमयाजुषम् ।

प्रार्थनमन्त्रः–

तेन माहेश्वरस्तुष्टस्त्वचोव्यात्ससततं शिशुम् ।
त्वमद्यतो स्कन्दबलिभिस्तूपकर्तृक ।

माहेश्वरस्तुष्टस्त्वचोव्यात्ससततं शिशुम् ॥

Colophon :

इति कर्मविपाकसंग्रहोक्तबलाग्रहहरविधिः ॥

624

Sl. No. 11649 बालाशुभनिवारणविधिः (हरिवंशांतर्गता) Ms. No. P. 2914/12

Beginning :

अथ यदि प्रमादाद्बालकस्य भुवि पतनादिनादिभिरुपरुजो जायन्ते तदा पार्थिव-राजः परिगृह्य शिशोः शिरः त्रिः प्रदक्षिणमावृत्य विष्णोस्तत्पूर्वतः सात्वेत्यादिभिर्मन्त्रैः रक्षां कुर्यात् । एष रक्षाविधिः शकटभञ्जनेन नन्दगोपेन भित्तोय(?) शिशुरिति बुध्या यदुनन्दनस्य श्रीकृष्णस्य कृत इति हरिवंशे ॥

End :

स्वस्ति करोतु भगवान् पिनाकवृषवाहनः ।
गावो रक्षन्तु सर्वत्र भूमिः पातु सदा शिशुम् ॥

एवमुच्चार्य नन्दस्तु कृष्णं पस्पर्श सर्वतः ।
एष मन्त्रो हि बालानां रक्षायै परिकीर्तितः ॥

Colophon :

इति हरिवंशे बालाशुभनिवारणविधिः ॥

625

Sl. No. 11652 बुधदर्शनशांतिः Ms. No.P 7935/8

(सौम्यदर्शनशांतिः रुद्रयामळीया)

Beginning :

दिवा वा यदि वा रात्रौ प्रमादाद्वुधदर्शनम्।
देशक्षोभो नृपक्षोभो जनक्षोभो भवेत्तथा ॥ + ।।

तस्य शांतिं प्रवक्ष्यामि तद्दोषोपशान्तये ॥

End :

ग्रामात् गृहाच्च पूर्वादिष्वष्टदिक्षु बलिं क्षिपेत्।
सर्वदोषोपशान्तिश्च सर्वसम्पद्भवेन्नृणाम् ।

Colophon :

इति रुद्रयामळे बुधदर्शनशांतिः ॥

626

Sl. No 11656 बुधप्रीतिदानविधिः (हेमाद्रीया) Ms No. P. 7970/178

Beginning :

अथातः संप्रवक्ष्यामि बुधप्रीतिकरं शुभम् ।
बलहीने यदा सौम्ये वातश्लेष्मादिरोगतः ।:

वाक्स्तम्भः दैन्यवृद्धिश्च महारोगः भयावहः ।
समस्तरोगनाशाय मुद्गदानं समाचरेत् ॥

End :

मुद्गबीजोपरिगतं पात्रस्थं चन्द्रपुत्रकम् ।
ददाम्यायुष्यवृद्ध्यर्थं दोषापहरणाय च ॥

ततो वित्तानुसारेण दक्षिणादानमाचरेत् ।
समस्तदोषनिर्मुक्तः धनवान् पुत्रवान् सुखी ॥

Colophon :

इति हेमाद्रौ बुधप्रीतिदानविधिः ॥

627

Sl. No. 11661 बुधशांतिः (यामिळोक्ता) Ms No. P. 604/3

Beginning :

बुधशान्तिमाह –

अथ शान्ति प्रवक्ष्यामि निशाकरसुतस्य च ।
दशाष्टजन्मषष्ठश्च शोकदुःखप्रदः सदा ॥
यदि पापसमायोगः सदा निष्फलदो बुधः ॥
ह्वाहु × × × × × × × × ज्वरादिकम् ॥

End :

ब्राह्मणान् भोजयेद्भक्त्या बन्धुभिस्सह भोजनम् ।
तस्य दोषाः विनश्यन्ति रोगपीडाभयं तथा ॥
चिन्तितार्थफलैर्युक्त जीवेद्वर्षशतं नरः ॥

Colophon :

इति यामळोक्त-बुधशांतिः समाप्ता ॥

628

Sl. No. 11662 बुधशांतिः (यामलान्तर्गता) Ms No. P. 2239/85

Beginning :

अथ शांति प्रवक्ष्यामि निशाकरसुतस्य च ।
दशाष्टजन्मषष्ठस्थः सौम्यो दुःखप्रदस्सदा ॥
यदि पापसमायोगः सदा निष्फलितो बुधः ॥

End :

अनेन विधिना कुर्यात् सम्यक् भक्त्या च तत्परः ;
तस्य दोषा विनश्यन्ति रोगपीडादयस्तथा ॥
सूचितार्थफलैर्युक्तः जीवेद्वर्षशतं नरः ॥

Colophon :

इति यामलोक्तबुधशांतिः ।

629

Sl. No. 11667 **बुधशांतिः** (सारवलीया) **Ms. No. P. 5635/85**

Beginning:

यदा बुधो भवेत् क्रूरः नृणां भवति दुःखदः ।
विज्ञानं कलुषं तेषां जाड्यमेव प्रयच्छति ॥
तदा नरस्तरुप्य (?) इव क्रमबुद्धिस्तु जायते ॥

End:

जाड्यं हरति तस्याशु मेधां यच्छति शाश्वतीम् ।
ब्राह्मणात् भोजयेत्पश्चात् यथा वित्तानुसारतः ॥

Colophon :

इति तारावल्यां बुधशान्ति ॥

630

Sl. No. 11679 **बृहस्पतिप्रीतिंदानविधिः** (हेमाद्रीया) **Ms. No. P. 7970/179**

Beginning :

अथातः संप्रवक्ष्यामि गुरोः पीडाहरक्षमम् !
जीवरूपी सदा नृणां जीव इत्याभिधीयते ॥

बलहीने यदा जीवे देशो निर्जीवनं नृणाम् ।
जीवग्रहप्रसादेन सर्वे जीवन्ति जन्तवः ॥

End :

शालितण्डुलोपरिगतं स्वर्णपात्रार्चितं गुरुम् ।
ददामि सर्वकाम्यार्थं सिद्धिं मे सर्वदा कुरु ॥

सर्वविघ्नविनिर्मुक्तः सर्वकामफलान्वितः ।
इह लोके सुखी भूत्वा पश्चादिन्द्र पदं व्रजेत् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे बृहस्पतिप्रीतिदानविधिः ॥

631

Sl. No. 11680 बृहस्पतिप्रीतिदानविधिः Ms. No. P. 9254/59

(यामलोक्ता)

Beginning :

अथ बृहस्पतिप्रीतिदानम्---

अथातः सम्प्रवक्ष्यामि गुरोः पीडाहरक्षमम् ।
जीवरूपी सदा नृणां जीव इत्यभिधीयते ॥

बलहीने यदा जीवे जीवो निर्जीवता नृणाम् ।
जीवग्रहप्रसादेन सर्वे जीवन्ति जन्तवः ॥

End :

ददामि सर्वकार्यार्थं शुद्धि मे सर्वदा कुरु ॥
दक्षिणां च ततो दद्याच्छान्तिसूक्तं जपेदथ ॥

सर्वविघ्नविनिर्मुक्तः सर्वकामफलान्वितः ।
इह लोके सुखी भूत्वा पश्चादिन्द्रपदं व्रजेत् ॥

Colophon :

इति यामलोक्तबृहस्पतिप्रीतिदानविधिः ॥

632

1. No 11685 बृहस्पतिशांतिः (सारावलीया) Ms. No. P. 5635/86

Beginning :

यदा देवगुरोः पीडा नृणां भवति दारुणा ।
तदा शांतिः प्रकर्तव्या गुरुपीडापनुत्तये ॥
पूर्ववत्कल्पितं देशं प्रोक्षयेत्तिलचन्दनै ॥

End:

एवं कृते न संदेहः गुरुपीडा निवर्तते ।
कार्यं प्रवर्तते सम्यक् सिद्धिं विन्दति सर्वतः ॥

Colophon :

इति सारावल्यां गुरुशांतिः ॥

633

Sl. No. 11686 बृहस्पतेशान्तिः (बृहस्पतिप्रोक्ता) Ms. No. P. 5930/69

Beginning:

वागीश सुरबृन्देश ग्रहाणां मध्य ×××× ।
मम लोकहितार्थाय गुरुशातिफलं वद ॥

बृहस्पतिरुवाच–

देवदेवयथाकालं–

End :

स नरः सुखमाप्नोति सर्वारिष्टविवर्जितः
परमैश्वर्यमतुलं वा सिद्धिं वादतो जयम् ॥

Colophon :

इति बृहस्पतिप्रोक्तबृहस्पतिशांतिः ॥

634

Sl. No. 11695 भरण्यार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 2239/14

Beginning

अथातस्संप्रवक्ष्यामि भरण्यां च समागते ।
प्रथमार्तवसंप्राप्तौ नारीणां शांतिरुच्यते ॥

भरण्यां भर्तृशोकश्च वन्ध्या स्याद्वा मृतप्रजाः ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् गृह्णीयादाशिषः स्वयम् ।
इमां शांतिं प्रकुर्वीत दम्पत्योः सुखसिद्धये ॥

आयुरारोग्यमैश्वर्यं लभेते पुत्रसम्पदम् ॥

Colophon:

इति रुद्रयामले भरण्यार्तवशांतिः ॥

635

Sl. No. 11698 भरणीनक्षत्रप्रथमार्तवशांतिः Ms No. P. 5313/55

Beginning :

भरणीनक्षत्रप्रथमार्तवशांतिविधिरुच्यते –

अथ शांतिं प्रवक्ष्यामि शौनकोक्तविधानतः ।
या नारी रजसाक्रान्ता भरण्यां भर्तृदोषकृत् ॥

याम्यर्क्षे प्रथमे पादे वैधव्य च विनिर्दिशेत् ।
द्वितीये पुत्रनाशः स्यात्तृतीये तु दरिद्रता ॥

End:

आयुर्विद्यां यशः पुत्रं धनं धान्यं लभेन्नरः ।
तस्माच्छान्ति प्रकुर्वीत यशस्कामी नरोत्तमः ।।

लोभाद्वा यदि वा मोहाच्छांतिर्नक्रीयते यदि ।
मद्यो मरणमाप्नोति नोचेन्मासत्रयावधि ।

Colophon :

इति शौनकोक्तयाम्यनक्षत्रे रजस्वलाशांतिः समाप्ता ।।

636

Sl. No. 11704 मल्लीसरटशांतिः (शौनकोक्त पल्लीसरटशांतिः) Ms. No. P. 9764/39

Beginning :

कं नासाहनुकुक्षिहस्तनखग्रीवोष्ठपार्श्वांसके
द्वे गुह्येरुगु(?) भलिकाप्रपतनं चारोहणं सारटम् ।।

दक्षाङ्गेषु शुभं त्विदं च सुमनःस्पुंसां विलोमक्रमात्
स्त्रीणां तद्विपरीतसर्वमुदितव्यत्यसत्या नरत्ययः ।।

End :

ब्राह्मणान् भोजयेत्पश्चाद्द्याच्छक्त्या च दक्षिणा ।
मल्लीसरटयोरेवं शांति कुर्याद्यथाविधि ।।

एवं यः कुरुते सम्यक् श्रद्धाभक्तिसमन्वितः ।
स पुमानचिरेणैव तस्माद्दोषात्प्रमुच्यते ।।

Colophon :

इति शौनकोक्तमल्लीसरटशांतिः ।।

637

Sl. No. 11705 मल्लीसरटशांतिः (वृद्धगार्ग्यीया) Ms. No. P. 9764/40

Beginning :

गार्ग्यः—

मल्ल्याः प्रपातस्य फलं सरटस्य प्ररोहणे ।
शीर्षे राज्यश्रियावाप्तिः फले चैश्वर्यवर्धनम् ॥

कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम् ।
नासिकायां तु सौभाग्यं वक्त्रे त्विष्टान्नभोजनम् ॥

End :

इत्थं सम्यग्विधानेन शांतिकर्म करोति यः ।
तस्यायुर्विजयो लक्ष्मीः कीर्तिर्वृद्धिश्च जायते ॥

मल्लीसरटयोः शांति विधानं शौनकाय च ।
कीर्तिदं च फलोऽपि तं वृद्धगार्ग्येण धीमता (!)॥

Colophon :

इति वृद्धगार्ग्योक्तमल्लीसरटशांतिः ॥

638

Sl No. 11706 भानुवारजन्मनक्षत्रयोगशांतिः Ms. No. P. 604/20

Beginning :

अतःपरं प्रवक्ष्यामि ग्रहशांतिमनुत्तमम् ।
भानुवारे तु जन्मर्क्षयोगे रोगादिसंभवः ॥

महद्व्यानमपि वा राजभीतिमथापि वा ।
तत्कालबलहीनेऽपि वेधगो गोरमार्गतः ॥

End :

ब्राह्मणान् भोजयेद्भक्त्या बन्धुभिः सह भोजयेत् ।
ग्रहदोषविनिर्मुक्तः सर्वकण्टकवर्जितः ।

इह लोके सुखी भूत्वा पश्चाद्विष्णुपदं व्रजेत् ॥

Colophon :

इति भानुवारसंयोगजन्मनक्षत्रशांतिः ॥

639

Sl. No. 11707 भानुवारजन्मनक्षत्रयोगशांतिः Ms. No. P. 2581/16

Beginning:

अथातः संप्रवक्ष्यामि × × × धानतः ।
भानुभौमार्कवारेषु जन्मनक्षत्रसङ्गमे ॥

रोगपीडामनोदुःखं धनहानिश्च जायते ।
दुःस्वप्नभयवद्धङ्गं सर्वकण्टकसम्भवम् ॥

End:

अक्षीभ्यामिति सूक्तेन येन देवादयः क्रमात् ।
शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥

आचार्याय ततो दद्यात्स××× मां च गाम् ।
यथावित्तानुसारेण ब्राह्मणान् भोजयेदथ ॥

Colophon :

इति यामलोक्तभानुवारजन्मनक्षत्रशांतिः ॥

640

Sl. No. 11721 भानुवारप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 2239/12

Beginning :

दिवा वा यदि वा रात्रौ भानुवारे रजस्वला ।
महाव्याधियुता चापि दुर्भागा ता भवेत् ॥
तस्य शांतिं प्रकुर्वीत तद्दो × × × × ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् × × × × ।
य एवं कुरुते शांतिं रजोदोषनिवृत्तये ॥
सर्वदोषविनिर्मुक्तः पुत्रायुर्धनवान् भवेत् ॥

Colophon :

इति रुद्रयामले भानुवाररजोदर्शनशांतिः ॥

641

Sl. No. 11729 भीमरथशांतिः (वृद्धशौनकीया) Ms. No. P. 3804/92

Beginning :

अथ भीमरथीशांति भगवान् शौनकोऽब्रवीत् ।
जननात् सप्ततेर्वर्षे मृत्युर्भीमरथिर्भवेत् ॥
षण्मासान्मृत्युमाप्नोति धनहानिं तथैव च ॥

End :

वैमृत्यु निवृत्तिः स्यात् सर्वथासुखमश्नुते ।
शत्रवोऽपि विनश्यन्ति पुत्रपौत्रप्रवर्धनम् ॥
हरिमेव स्मरेन्नित्यं कर्मपूर्वे परेषु च ॥

Colophon:

इति श्रीवृद्धशौनकीये भीमरथशांतिः समाप्ता ।

642

Sl. No. 11732 भीमरथशांतिः (मार्कण्डेयकल्पोक्ता) Ms. No. C. 540/1

Beginning :

अथातः संप्रवक्ष्यामि शांतिं भीमरथाभिधाम् ।
सप्तत्यां जायते मृत्युः नृणां भीमरथाभिधः ॥

दारनाशः पुत्रनाशः धननाशो रुजस्तथा ॥

End :

सर्वरोगविनिर्मुक्तः सर्वपीडाविवर्जितः ।
शतवत्सरपर्यन्तं भुक्त्वा भोगान्यनेकशः ।

अन्ते विष्णुपदं प्राप्य तत्रैव परिमोदते ॥

Colophon :

इति मार्कण्डेयकल्पोक्तभीमरथशान्तिः समाप्ता ॥

643

Sl. No. 11734 भीमरथशांतिः (शैवागमोक्ता) Ms. No. C3419

Beginning:

अथातस्सम्प्रवक्ष्यामिशान्तिं भीमरथाभिधाम् ।
सप्तत्यां जायते मृत्युः नृणां भीमरथाभिधः ॥

End :

एवं यः कुरुते शान्तिं विधिवच्छ्रद्धयान्वितः ।
स सर्वरोगान्निर्मुक्तः सर्वपापविवर्जितः ॥ + +

अन्ते विष्णुपदं प्राप्य तत्रैव परिमोदते ॥

Colophon :

इति शैवागमोक्तभीमरथशान्तिस्समाप्ता ॥

644

Sl. No 11735 भुवनेश्वरीदानपद्धतिः Ms No P 9428/117

Beginning :

रचनाप्रकार:—

अष्टमी-नवमी-चतुर्दशी-द्वादशी-ग्रहणादि-पुण्यकाले तु भृगुभौमभानुवारेषु देवालयादिपुण्य-देशेषु गोमयानुलेपित + + ·· + + ·· वशीकरणभुवनेश्वरीदानं करिष्ये ॥

End:

गन्धपुष्पाद्यर्चितां भुवनेश्वरीप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे ; न मम इति दद्यात् ॥

Colophon :

इति समस्तवशीकरणभुवनेश्वरीपद्धतिः ॥

645

Sl. No. 11736 भुवनेश्वरीशांतिः Ms. No. P. 3804/4

प्रथमार्तवशांतिः (शौनकीया)

Beginning :

आर्तवानां तु नारीणां शान्तिं वक्ष्यामि शौनक !
तिथिवारर्क्षयोगेभ्यः क्रमाष्टग्रहसप्तमात् ॥
ग्रहेभ्यो दुस्थितेभ्यश्च तेषां दोषक्षयाय च ॥

End :

ब्राह्मणान् भोजयेद्भक्त्या भुञ्जीतेष्टजनैस्सह ।
एवं यः कुरुते शान्तिं शौनकोक्तप्रकारतः ॥
तदनिष्टं तु सकलं सद्य एव विनश्यति ॥

Colophon:

इति शौनकीये प्रथमरजोदर्शनशान्तिः समाप्ता ॥

646

Sl No 11738 भुवनेश्वरीशांतिः Ms. No. P 797049

बृहस्पत्युक्ता प्रथमा विशांतिः

Beginning :

बृहस्पतिरुवाच—

आर्तवानां तु नारीणां शान्ति वक्ष्यामि शौनक ।
तिथिवारर्क्षयोगेभ्यः लग्नाच्चगृहसप्तमात् ॥

ग्रहेभ्यो दुस्थितेभ्यश्च एतद्दोषक्षयाय च । + +
तस्मिन्नहनिम कुर्वीत ऋतुदोषविधानतः ॥

End:

एवं यः कुरुते शान्ति बार्हस्पत्यप्रकारतः ।
अनिष्टदोषं सकलं सर्वमेव विनश्यति ॥.

इति पतिरनागतआगतानानेनतु × िाः उक्ते प्रथमार्तवनारीणां सर्वदोषर-णार्थं समस्ताभ्युदयार्थं च ॥

Colophon :

भुवनेश्वरीशान्तिकर्मः सम्पूर्णः इति बृहस्पत्युक्तभुवनेश्वरीशान्तिविधिः समाप्तः ॥

647

Sl No. 11745 भूकम्पशांति Ms. No. P. 3924/15

Beginning :

भूकम्पोदये पञ्चाशत्कोटिविस्तीर्णभूकम्पे सर्वराजस्थानहानिर्भवति । तत्तद्राष्ट्राधिपैः शान्तिः कार्या संवत्सरपर्यन्तं रुद्राभिषेकञ्च ॥

End :

पादभूकम्पे द्विलक्षहोमः, मासद्वयपर्यन्तं रुद्राभिषेकः चतुर्विंशतिलक्षाश्वत्थप्रदक्षिणानि कर्तव्यानि ॥

Colophon :

— — — —

648

Sl. No. 11746 भौमवारयुक्तजन्मक्षत्रयोगशांतिः Ms. No. P. 604/21

Beginning

भौमवारे यदा यस्य जन्मनक्षत्रसंयुते ।
ज्वराग्निभयरोगादि कलहं सङ्करोऽपि वा ॥

तस्मात् शान्तिं प्रकुर्वीत शुद्धदेशोत्तरे दिशि ।
गोमयालेपनं कुर्यात् तत्र पुण्याहवाचनम् ॥

End :

सवस्त्रप्रतिमां दद्यात् आचार्याय सदक्षिणाम् ।
विभवे धेनुदानं च रक्ताक्षतमथापि वा ॥

एवं यः कुरुते भक्त्या दोषजातविवर्जितः ।
धनधान्ययुतो मर्त्यः सर्वसम्पत्समृद्धिमान् ॥

Colophon :

इति भौमवारयुक्तजन्मनक्षत्रशान्तिः समाप्ता ॥

649

Sl. No. 11747 भौमवारजन्मनक्षत्रयोगशांतिः (वसिष्ठोक्ता) Ms. No. P.2581/17

Beginning :

अथ भौ × × × न्मनक्षत्रशान्तिविधिरुच्यते । मनुः—

जन्मर्क्षे वा त्रिजन्मर्क्षे भौमवारेण संयुते ।
पूर्वोक्तेन विधानेन कृत्वा पुण्याहवाचनम् ॥

वेदाग × × × कुशलं धर्मशास्त्रार्थकोविदम् ।
आचार्यं पूजयेद्भक्त्या पूजाहोमार्थमादरात् ।।

End:

सवस्त्रमितिमां नद्याताचार्याय च गां शुभाम् ।
संपत्नो यजमानश्च मनड्वादानमाचरेत् ।।

तुवराभारसंयुक्तं सामगानं विशेषतः ।
एकविंशति × × कान् ब्राह्मणान् भोजयेत्सुधीः ।

Colophon :

इति वसिष्ठप्रोक्तभौमशावारजन्मनक्षत्रन्तिः समाप्ता ।।

650

Sl. No. 411758 भौमवारजन्मनक्षत्रयोगशांतिः (यामलोक्ता) Ms. No. P 94762

Beginning :

भौमवारे यदा यस्य जन्मनक्षत्रसंभवे ।
ज्वराग्निभयमीतादिव्रणदोषोद्भवादयः ।।

शान्तिं तस्य प्रवक्ष्यामि शुद्धदेशे समस्थले ।
गोमयालेपनं कुर्यादत्र पुण्याहवाचनम् ।।

End :

गमोगदाभ्यत्(!) धराघ्नुतः शक्तिधरश्च शूली
सदा मम स्याद्वरदः प्रशान्तः ।
धेनु पयस्विनीं दद्याद्रक्तोक्षमथवा यदि ।
सर्वैश्वर्यसमायुक्तो जीवेद्वर्षशतं नरः ।।

Colophon:

इति यामलोक्तभौमवारजन्मनक्षत्रयोगशान्तिः ।।

651

Sl No 11762 भौमवारप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 1723/23

Beginning :

दिवा वा यदि वा रात्रौ भौमवारे रजस्वला।
वन्ध्या ना बहुदुःखी बा पुंश्चली वा भवेध्द्रुवम् ॥

शान्ति कुर्यात प्रयत्नेन धनवान् निर्धनोऽपि वा ।
तुवरीराशिं विन्यस्य शुद्धदेशे समस्थले ॥

End :

ददामि भौमदोपाध्दि पीडां दहतु मे सदा ।
इति दत्त्वक्षं दक्षिणार्थं रक्ताक्षं च प्रदापयेत् ॥

एवं यः कुरुते शान्ति सर्वदोषविवर्जितः ॥
सर्वमम्पत्समायुक्तः सुखी भवति नान्यथा ॥

Colophon :

इति रुद्रयामलेनोक्तौ भौमवारार्तवशांतिः समाप्ता ॥

652

Sl. No. 11766 भौमवारप्रथमार्तवशांतिः (शौनकीया) Ms. No. P. 5313/46

Beginning :

अथ भौमवारप्रथमार्तवशांतिविधिरुच्यते—

दिवा वा यदि बा रात्रौ भौमवारे रजस्वला ।
वन्ध्या हि बहुदुःखा च पुंश्चली बा भवेध्द्रुवम् ॥

शांतिं कुर्यात्प्रयत्नेन दरिद्रो धनवानपि ।
रक्तधान्यं क्षिपेद्भूमौ शुध्नदेशे समस्थले ॥

End :

अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् ।
सवस्त्रप्रतिमां कुम्भमाचार्याय निवेदयेत् ॥
दक्षिणां जापकादिभ्यः प्रदद्यात्सुसमाहितः ।
ब्राह्मणान् भोजयेत्पश्चाद्यथावित्तानुसारतः ॥
एवं यः कुरुते भक्त्या तस्य दोषो विनश्यति ॥

Colophon :

इति शौनकीये भौमवाररजस्वलाशान्तिः समाप्ता ॥

653

Sl. No 11774 भौमशांतिः Ms. No. P. 5635/84

(कुजशांतिः वा मङ्गलकशांतिः - सारावलीया)

Beginning :

यदा भौमकृता पीडा दारुणा च रुजा नृणाम् ।
तदा भौमस्य तुष्ट्यर्थं शांतिं कुर्वीत यत्नतः ॥
कर्ता तु प्रातरुत्थाय कारयेद्दन्तधावनम् ॥

End :

क्लेशास्तस्य न जायन्ते येनेयं विधिना कृता ।
मङ्गलं मङ्गलो दद्यात् एवं शांतिं प्रकुर्वतः ॥
एवं यः कुरुते शांतिं सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति सारावल्यां भौमशान्तिः ॥

654

Sl. No. 11775 भौमशांतिः (यामलोक्ता) Ms. No. P. 7401/124

Beginning :

अथातःसंप्रवक्ष्यामि भौमदोषोपशांतये ।
बलहांने तदा पुत्रदेहपीडा भवेत्तदा ॥

तस्माच्छांतिं प्रकुर्वीत भौमवारे त्रिजन्मसु ॥

End :

ऋणदारिद्र्यदुःखादिरोगदोषभयापहः ।
इह लोके सुखीभूत्वा पश्चाच्छिवपुरं व्रजेत् ॥

Colophon :

इति यामळोक्तकुजशान्तिस्समाप्ता ॥

655

Sl. No 11777 मण्डूकशांतिविधिः (शौनकीया) Ms. No. P. 4720/41

Beginning :

अथमण्डूकशान्तिः —

शौनकोऽहं प्रवक्ष्यामि शांतिं मण्डूकसंज्ञिकाम् ।
जलाग्निपतने पादघाते मार्जालिदूषिते ।
अज्ञानाज्ज्ञानतो वापि बारुणे वा गृहाङ्गणम् ।
त्यक्त्वा गृहं त्रिमासेषु त्रिपक्षे वा ततः परम् ॥

End :

तत्तन्मन्त्रेण लिङ्गोक्तैर्मन्त्रैरन्यैः शुभप्रदैः ।
ऋत्विग्भ्यो दक्षिणां दद्यादमिपेकमतःपरम् ।
एतच्छांतिं न कुरुते षण्मासान्मृत्युमाप्नुयात् ।

Colophon :

इति शौनकीये मण्डूकशान्तिः समाप्ता ॥

656

Sl·No 11778 मघानक्षत्रजननशांतिः Ms. No· P· 3085/4

Beginning :

अथातो मघानक्षत्रशांतिं व्याख्यास्यामः—

पित्रोर्गण्डदोषनिवृत्यर्थं शांतिं प्रकुर्वीत । शुचौ समे देशे गोमयेन गोचर्ममात्र-मनुरश्रमुपलिप्य प्रस्थाष्टभिर्धान्यैस्तदर्धम् ॥

End:

शिशोर्मुखमीक्षते । आचार्याय वस्त्रं प्रतिमां दत्वा ऋत्विग्भ्यो दक्षिणां ददाति अक्षयं फलमाप्नोति ; पित्रोर्गण्डदोषः प्रमुच्यते— इत्याह भगवान् बोधायनः ॥

Colophon :

— — — — —

657

Sl. No· 11781 मखानक्षत्रजननशांतिः (वृद्धगार्गीया) Ms· No· P·4992/1

Beginning:

सुखासीनं मुनिश्रेष्ठं गर्गं मुनिगणान्वितम् ।
कृताञ्जलिः समासाद्य परिपप्रच्छ शौनकः ॥

मखानक्षत्रसंभूतगण्डदोषविनिर्णयम् ।
तस्य शान्तिविधानं च वद मे मुनिसत्तम ॥

End :

ततो नीराजनं कुर्यात् अलक्ष्मीनाशहेतवे ।
मृत्युरोगभयान्मुक्तः जीवेच्च शारदां शतम् ॥
पुत्रपौत्रैः परिवृतः सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति वृध्दगार्ग्योक्तमखानक्षत्रजननशान्तिः ॥

658

Sl-No 11781 मघानक्षत्रजननशांतिः (पैतामहीया) **Ms. No. P. 7970/15[8]**

Beginning :

मन्दरस्थं सुखासीनं देवदेवं जगद्गुरुम् ।
प्रणम्य शिरसा भक्त्या नारदं परिपृच्छति ॥

मघानक्षत्रजातस्य गण्डदोषः शिशोर्यदा ।
अन्येषामपि ऋक्षाणां गण्डं तच्छान्तिकर्म च ।[1]

End :

ब्राह्मणान् भोजयेत् पश्चात् यथावित्तानुसारतः ।
इत्युक्तं ब्रह्मणा सम्यक् नारदाय महात्मने ॥

एवं यः कुरुते शांतिं पूर्वोक्तेनैव मार्गतः ॥
अरिष्टदोषं सकलं सद्य एव विनश्यति ॥

Colophon :

इति पैतामहोक्तमघाजननशान्तिः ॥

\- - - - -

659

Sl. No. 11791 मघार्तवशांतिः (रुद्रयामलीया) **Ms. No. P.2239/19**

Beginning:

दम्पत्योर्मरणं ज्ञेय मखायामार्तवं यदि ।
पुण्याहवाचनादीनि सर्वं पूर्ववदाचरेत् ॥

ध्यानं-

पितरं कृष्णवर्ण च चतुर्भुज समन्वितम् ॥

End :

अनेनैव तु मन्त्रेण प्रदद्यात् प्रतिमात्रयम् ।
दक्षिणार्थं च गां दद्यात् तदभावे हिरण्यकम् ॥

एवं यः कुरुते शांतिं ऋतुदोषः प्रशाम्यति ॥

Colophon :

इति रुद्रयामले मखानक्षत्रार्तवशांतिः ॥

660

Sl. No. 11797 मधुच्छत्रपिपीलिकाशांतिः Ms. No. P. 60/32

(वसिष्ठोक्ता)

Beginning :

वसिष्ठ उवाच—

हस्ताकारे तथा छत्रं लाङ्गुले वर्तुलाकृतिः ।
पूर्वदिग्जनितो गेहे स्थाननाशे धनक्षयम् ॥

अनले जायते तद्वत् पश्चमे वाथ वामरे ।
सुखं भवति तत्रैव अत ऊर्ध्वं विनश्यति ॥

End :

शिथिलीफलवत्सर्वं ज्ञात्वा तत्र शुभाशुभम् ।
देशक्षोभं नृपक्षोभं मानभङ्गमवाप्नुयात् ।
विधिरत्नगर्भमधुवल्मीका
म्भोरुहसमुद्भवश्च पिनाशस्य ।
ग्रीष्मे शक्षरादिप्रावृषि
भूतलेनैव दोषास्युः ॥

Colophon :

इति मधुछत्रपिपीलिकाशान्तिः ॥

661

Sl. No. 11805 मधुछत्रपिपीलिकाशांतिः Ms. No. P. 9965/113

(मनुप्रोक्ता)

Beginning :

मनुरुवाच—

मध्याच्छुभो यशो मृत्युः जयः कीर्तिः शुभावहम् ।
ऐश्वर्यं धनहानिश्च मधुछत्रपिपीलिकाः ॥
ब्रह्मेन्द्रराक्षस-जलाधिप दिष्यसील्यं ।
हुताशछत्रं मवायुधि (?) च वष्ट(?)दोषाः ।

वल्मीकमंकुरमधुत्रितयं प्रकुर्या-
दुत्पादितं× ×शान्तिकरं विधाय ॥

End:

शिथिलीफल तत्सर्वं ज्ञात्वा तत्र शुभाशुभम् ।
देशक्षोभं नृपक्षोभं नानाभयमवाप्नुयात् ॥

विधिरत्ने गार्ग्यः-

मधुवल्मीकाम्भोरुहस्य समुद्भवश्चापि नाशीयात् ।
ग्रीष्मे शरदि प्रावृषि भूतले नैव दोषाः स्युः ॥

Colophon :

इति श्रीमनुप्रोक्त-मधुछत्रपिपीलिकाशांतिः ॥

662

Sl. No. 11806 मधुमक्षिकाशान्तिः (बोधायनीया) Ms. No. P. 60/61

Beginning:

अथातो मधुमक्षिकाकल्पविधिं व्याख्यास्यामः–

गृहस्येन्द्रदिग्भागे मधुमक्षिका भवेत् । अर्धमासार्थलाभो भवति । अथ ऊर्ध्वं सर्वादर्थनाशः स्यात्। तद्दोषशमनार्थाय इदं वो विश्वतस्परीति संस्कृताज्येन चानया तिलहोमं च कारयेत् ॥

End :

उक्तादन्यत् । यत्रकुत्रचित्स्थाने येन येन होमोऽभिहितः तत्र तत्र द्विगुणिनामेव जुहुयात् । गतेषूक्तेषु × × × षु होमेष्वाचार्याय च गां दद्यादिति ।

Colophon :

इति बोधायनोक्तमधुमक्षिकाशांतिः समाप्ता ॥

663

Sl. No. 11816 मधुशांतिः (नारदीया) Ms. No. P. 4180/24

Beginning :

मधुशांतिं प्रवक्ष्यामि शुभाशुभफलानि च ।
पिङ्गलस्य स्वरोप्येव मधुवल्मीकयोरपि ।

सम्पूर्यमन्दिरे तानि शून्यं तत्सद्ममण्डलम् ।
गोपुरे च पुरद्वारे प्राकारे द्वौषु (!) वीथिषु ॥

End:

अन्येभ्यो दक्षिणां दद्याद्यथा वि×नुसारतः ।
ब्राह्मणान् भोजयित्वा तु सर्वदोषैः प्रमुच्यते ॥

एवं यः कुरुते शांतिं सर्वारिष्टं विनश्य× ॥
स्वगृहे धनधान्यादीन् पशुपुत्रादिसम्पदः ॥

Colophon:

इति नारदप्रोक्त मधुशांतिः ॥

664

Sl. No. 11817 मधुशांतिः (शौनकीया) Ms. No. P. 4720/37

Beginning :

अथ मधुशांतिः—

अथातः सम्प्रवक्ष्यामि मधुशांतिमनुत्तमाम् ।
सर्वेषां च नृपाणां च दोष उत्पद्यते सदा ॥

मधूत्पादशांत्यर्थमुच्यते फलनिर्णयः ।
गृहमध्ये तु जातेषु अशुभं नाशमाप्नुयात् ॥

End :

ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत वा भवेत् ।
एवमुक्तप्रकारेण शांतिं यः कुरुते नरः ।

तस्योत्पातफलं नास्ति जीवेच शरदां शतम् ।
एवं कृत्वा विधानेन सर्वदोषोपशान्तये ॥

Colophon :

इति शौनकीये मधुशांतिः समाप्ता ॥

665

Sl. No. 11819 मधुशांतिः (मानवीया) Ms. No. P. 5635/6

Beginning :

अथातः सम्प्रवक्ष्यामि मधुशान्तिविधिं क्रमात् ।
अगारे वास्तु तन्मध्ये सर्वदिक्षु द्रुमागतम् ॥
स्वक्षेत्रे स्वगृहे चैव कदाचिन्मधुदर्शने ॥

End :

ऐश्वर्यं कीर्तिमाप्नोति सर्वारिष्टविनाशनम् ।
एवं शांतिं प्रकुर्वीत जीवेच्च शरदां शतम् ॥

Colophon :

इति मानवीये मधुशान्तिः

666

Sl. No. 11825 मन्दवारजन्मनक्षत्रयोगशांतिः **Ms. No P. 604/22**
यामलोक्त–शनिवारशांतिः

Beginning

मन्दवारे यदा यस्य जन्मनक्षत्रसम्भवे ।
क्लेशायुरर्थहानिः (?) स्यात् नानारोगसमुद्भवः ॥

दुस्स्थानस्थस्तदाकाले गोचरे वाष्टवर्गतः ।
शांतिं कुर्यात् प्रयत्नेन वित्तशाठ्यं न कारयेत् ॥

End :

मृत्युरोगभयान्मुक्तः सर्वदोषविवर्जितः ।
सर्वान् कामानवाप्नोति सुखी भवति नान्यथा ॥

Colophon:

इति यामळोक्तमन्द(क्रूर)वारजन्मनक्षत्रशान्तिः समाप्ता ॥

667

Sl. No. 11826 मन्दवारजन्मनक्षत्रयोगशांतिः **Ms. No. P 2581/18**
(ज्योतिषार्णवीया वृद्धवसिष्ठोक्ता- शनिवारशांतिः)

Beginning :

अथ मन्दवारजन्मनक्षत्रशान्ति ×××ते । शौनकः-

मन्दवारेण संयुक्तो जन्मर्क्षेऽप्येवमाचरेत् ।
आचार्यं वरयेत्तत्र कुलीनं च कुटुम्बिनम् ॥

तेनैव कारयेध्द्दोमं पूजां चैव यथाक्रमम् ।
द्वादशारं लिखेत्पद्मं वृत्तं कृष्णतिलैरपि ॥

End:

तत्तदोषा विनश्यन्ति सर्वारिष्टविवर्जिताः ।
पुत्रपौत्रैः परिवृताः सर्वकामफलान्विताः ॥

दुर्लभोपग्रहैर्युक्ताः दुष्टग्रहनिरीक्षणात् ।
जातदोषां निहन्त्याशु दद्यादायुःश्रियं सुखम् ॥

Colophon :

इति ज्योतिषार्णवे वृध्दवसिष्ठप्रोक्ता मन्दवारजन्मनक्षत्रशान्तिः समाप्ता ॥

668

Sl No 11836 मन्दवारप्रथमार्तवशांतिः (रुद्रयामलीया) Ms No. P. 1723/21

Beginning :

मन्दवारे यदि भवेत् नारीणां प्रथमार्तवः ।
सर्वनाशो भवेत् सद्यः दारिद्र्यं भवति ध्रुवम् ॥

जातिसङ्करदुष्टा च दुष्टजातानुगामिनी ।
× × × × कुर्वीत शुभनक्षत्रवासरे ॥

End :

तस्मात्तन्मूर्तिदानेन ऋतुदोषा प्रशाम्यति
इति दत्वा दक्षिणार्थं कृष्णधेनुं च दापयेत् ॥

ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ।
एवं यः कुरुते भक्त्या दम्पत्योरभिवर्धयेत् ॥

Colophon :

इति रुद्रयामले मन्दवारप्रथमार्तवशान्तिः ॥

669

Sl. No. 11848 महाबलिशांतिः Ms. No. P. 7401/94

(महाशांतिः वा सर्वरोगहरशांतिः)

Beginning :

महाबलिविधिं वक्ष्ये सर्वरोगहरक्रमम् ।
अयुरारोग्यफलदं सर्वशत्रुनिवारणम् ॥

End :

अपमृत्युभयान्मुक्तः जीवेद्वर्षशतं नरः ।
एवं त × × कुर्वीन महामृत्युविवर्जितः ॥

× × × × × × × × ×
× × × × × × × × × ।

× × × × × × × × ×
× × × × × × × × × ॥

Colophon :

— — — —

670

Sl. No. 11849 महायक्षबलिशांतिः (मृत्युञ्जयोक्ता) Ms. No. P. 3023/127

Beginning :

महाबलिविधिं वक्ष्ये सर्वरोगहरक्षमम् ।
× × × × × ॥
× ×पां च विशेषतः ।
रात्रौ स्मशानगमनात् × × × ॥
भोजने पङ्क्तिभेदादौ देवद्विज × × ॥

...

End :

एवं यः कुरुते सम्यक् नीरोगो नात्र संशयः ।
अपमृत्युभयान्मुक्तः जिवेद्वर्षशतं × × ॥

असाध्याख्यमहारोगात् विमुक्तस्सर्वदा सुखी ॥

Colophon:

इति मृत्युञ्जयोक्तमहायक्षबलिः ॥

671

Sl. No. 11850 महायज्ञनक्षत्रशांतिः (शौनकीया) Ms. No. P. 7970/104

Beginning :

ओं नमो भगवते महायज्ञ महायज्ञ उग्रतेजोमय घोररूप महाकाय महादंष्ट्रा कराल वदन असमानपराक्रम कुर्येदं वलिंथ गृहाण मच्छरीरस्थरोगजालं दह दह ओं रु व !

End :

एवं यः कुरुते सम्यक् न रोगी नात्र संशयः ।
अपमृत्युभयान्मुक्तः जीवेद्वर्षशतं नरः ॥
एवं त्रिरात्रं कुर्वीत महामृत्युविवर्जितः ।
असाध्यैश्च महारोगैः विमुक्तः सर्वदा सुखी ॥

Colophon :

इति शौनकोक्त-महायज्ञनक्षत्रशान्तिविधिः ।'

672

Sl. No. 11851 महावातरोगहरशांतिः (महावातप्रतीकारशांतिः) Ms. No. P. 3804/71

Beginning :

महावातप्रतीकारं प्रवक्ष्याम्यनुपूर्वशः ।
आ × × × × वक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥
वातरोगो रोगराजः सर्वनाडीसमन्वितः ॥

End:

तं विप्रमासां न दर्शयेत् ॥

बहुधा वातरोगादिसर्वरोगविवर्जितः ।
कान्तिमान् सुकुमाराङ्गः सुखी भवति सर्वदा ॥

Colophon:

इति महावातप्रतीकारमृगदानविधिः ॥

673

Sl. No. 11853 वातरोगहरशांतिः **Ms. No. P 5587/58**

(हेमाद्रीया– मृगदानविधिः)

Beginning:

अथ वातरोगमृगदानविधिरुच्यते –

महावातप्रतीकारं प्रवक्ष्याम्यनुपूर्वतः ।
आदौ निदानं वक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥

End:

आयुरारोऽग्यसिद्धिकामोऽहं तुभ्यमहमित्यादि× × × × ।

बहुधा वातरोगादि सर्वदोषविवर्जितः ।
कान्तिमान् सुकुमाराङ्गः सुखी भवति सर्वदा ॥

Colophon:

इति हेमाद्रौ दानकाण्डे वातरोगहरमृगदानविधिः समाप्तः ॥

674

Sl. No. 11857 महाशांतिः Ms No. P. 8364/3

Beginning :

ओं भूमिमुद्दसंस्पृशेद्गन इला नम इला नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो ममो × × ×अस्तु देवेभ्यः शिवा नः सन्तमा भव समृद्धीका सरस्वती । माते व्योमसन्दशी । भद्रं-कर्णेभिः + + + शांतिः ॥

End :

एकाहचो वै बाहयदो एवाङ्यो वै बाही द्राम् । एवाह्ये वै वाहिष्णा । एवाहये वै वाहि पूषन् ॥ एवाहिये वै वाहि देवाः । एवाहि शक्रो वशां भत् । अथो मन्यां यमन्यव उपेहि मन्यवे उपेहे विश्वधा । विशमयवन्विदोम् । धिदामयवन्ने का अन्यस्मिन् देशे ॥

Colophon:

– – – –

675

Sl. No. 11858 महाशांति :(भविष्योत्तरपुराणीया) Ms. No. P. 8532/28

Beginning :

महाशांतिं प्रवक्ष्यामि महादेवेन भाषितम् ।
पार्थिवानां हितार्थाय महादुष्तरकारिणाम् ॥

End :

आर्थः समर्थयति वर्धयते तु धर्मं
कालं प्रसाधयति तस्य विनिनष्टपापम् ।
यः कीर्तयेत्सकलदोषहरोमहार्थं
शांतिं प्रशांतहृदयः पुरुषः स देवः ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे महाशांतिर्नाम अष्टचत्वारिंशोऽध्यायः ॥

676

Sl. No. 11861 महिषीदानविधिः Ms. No. P 5930/18

(नारदीयः मृत्युमहिषी दानप्रकारः)

Beginning:

नारदीये—

मम वर्तमानस्थलशरीरादिविरोधेन शरीरे वर्तमानरोगनिदानभूतपापनिवृत्तिद्वारा अपमृत्यु-परिहारार्थम् ॥

End :

तुभ्यमहं संप्रददे न मम यथाशक्ति दक्षिणां दद्यात् यस्य...त्येत्यादि + + + इत्यादि समर्पणम् ॥

Colophon :

इति नारदीये मृत्युर्महिषीदानप्रकारः ॥

677

Sl. No 11865 महिषीदानविधिः Ms No P 9178/61

(यामलोक्तः ब्रह्माण्डपुराणीयः मृत्युमहिषीदानविधिः)

Beginning :

ब्रह्मपुराणोक्तमहिषीदानम्—

आपन्नमृत्य ना देया महिषी चापि दक्षिणा ।
तरुणी रूपसम्पन्ना सुशीला च पयस्विनी ॥

End:

भवत्यन्याहतं श्रेयो महाराजः सुधार्मिकः ।
तेजस्वी च यशस्वी च ××× जायते ॥
यद्यदिष्टतमं तस्य सर्वान्प्राप्नोत्यसंशयः ॥

Colophon

इति यामलोक्ते महिषीदानविधिः ॥

678

Sl. No. 11868 महिषोत्सर्गविधिः (बोधायनोक्ता) Ms. No. P. 4180/76

Beginning

अथातो महिषोत्सर्गविधिं वक्ष्यामि साम्प्रतम् ।
चैत्रे कृष्णचतुर्दश्यां कार्तिक्यां वा विशेषतः ॥

माघ्यां वा शततारायां च वैशाख्यामश्विनीयुते ।
भरण्यां वा मघायां वा रोगमृत्युभयेषु वा ॥

End :

पुत्रपौत्रैः परिवृतः भुक्त्वा भोगान्यथेप्सितान् ।
ततः स्वकुलजैः सार्धं गाणापत्यमवाप्नुयात् ॥

ब्राह्मणान् भोजयेत्पश्चादन्नापूपादिपायसैः ।
दक्षिणाभिस्तोषयित्वा प्रणिपत्य विसर्जयेत् ॥

Colophon :

इति बोधायनप्रोक्तं महिषोत्सर्गविधिः ॥

679

Sl. No. 11870 महिषोत्सर्गविधिः (शौनकीया) Ms. No P. 6821/1

Beginning :

महिषोत्सर्गः—

शौनकोऽहं प्रवक्ष्यामि महिषोत्सर्ग उच्यते ।
यमप्रीतिकरं धर्मं व्रतानामुत्तमं व्रतम् ॥

पितृणामपि सर्वेषां नरकोत्तारणे × × × × ।
× × ×ताः सर्वे बध्यन्ते यमकिङ्करैः ॥

End :

ततो दानानि कुर्वीत आचार्याय स ःत्सगाम् ।
पञ्चद्रोणमितो मापः तिलद्रोणत्रयं तथा ॥
उदकं काञ्चनं वस्त्र विप्रेभ्योदानमुत्तमम् ।
चित्रान्नभक्ष्यभोज्यैश्च आशिषो वाचनं ततः ॥

Colophon :

इति शौनकीये महिषोत्सर्गविधिः ॥

680

Sl. No. 11871 महिष्यादिगृहारोहणशांतिः (यामलोक्ता) Ms. No. P. 5313/51

Beginning:

अथ गृहारोहणमहिष्यादिशांतिविधिरुच्यते –

अतःपरं प्रवक्ष्यामि गृहशांतिमनुत्तमाम् ।
गावो वा वृषभो वापि महिषो वा तुरङ्गमाः ॥
गृहमारोहणं चेत्स्यात् गृहग्रामस्य नाशनम् ॥

End :

गां गृहारोहणात् भूतसर्वदोषा लयं ययुः ।
जीवेद्वर्षशतं साग्रमपमृत्युर्विवर्जितः ॥

Colophon :

इति यामलोक्तगवादिगृहारोहणशांतिः समाप्ता ॥

681

Sl No 11872 मार्जनविधिः Ms. No. P. 8000/20

Beginning :

सुरास्त्वामभिषिञ्चन्तु ब्रह्माविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथः तथासङ्कर्षणो विभुः ।।

प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो नैऋतिस्तथा ॥

End:

ओषधीनि च रत्नानि कालस्यावयवाश्च ये ।
विघ्नेशः क्षेत्रपालश्च लोकपालनवग्रहाः ।।

सरितः सागराः सर्वाः तीर्थानि जलदा नदाः ।
एतास्त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥

Colophon :

इति मार्जनविधिः ।।

682

Sl. No. 11873 मूत्रकृच्छ्रशांतिः Ms. No. P. 373/5

Beginning :

अथ मूत्रकृच्छहराणि शातातपप्रोक्ते---

गुरुजायाभिगमनात् मूत्रकृच्छ्रं प्रजायते ।
तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन कर्मणा ॥

इत्यनेना द्विधा निष्कृतिरुच्यते ॥

End :

ताम्रपात्रे तिलां × × कृत्वा फलषोडशबलि × × × स हि रा × × श × वादिप्रति-पाददोषतः ॥ त्रिविधं पापं वाङ्मनःकायसम्भवम् । इति प्रकाशा(ग)मरणमूत्रकृच्छहरम् (?)

Colophon:

— — — — —

683

Sl. No. 11875 मूलानक्षत्रजननशांतिः (बोधायनीया) **Ms. No. P. 734/7**

Beginning :

अथातो मूलशांतिं व्याख्यास्यामः—

द्वादशेऽनि मूलानक्षत्रे वा पुण्याहं स्वस्ति समृद्धिमिति वाचयित्वा शुचौ देशे ॥

End :

आचार्य कुण्डलाङ्गुलीयकवस्त्रैस्सम्पूज्य हिरण्यं दद्यात् । गोभूतिलहिरण्यादि यजमानो दारपुत्रा अभ्यायुषो भवन्तीत्याह भगवान् बोधायनः ॥

Colophon :

इति मूलानक्षत्रशांतिः ॥

684

Sl. No. 11876 मूलानक्षत्रजननशांतिः (मनुप्रोक्ता) **Ms. No. P. 1723/1[2]**

Beginning :

अथ मूलानक्षत्रशातिविधिरभिधीयते-

अथातः सम्प्रवक्ष्यामि मूलाजातहिताय च ।
मानापित्रोर्धनस्यापि कुलज्ञातिहिताय च ॥

त्यागो वा मूलजातस्य स्यादब्दादष्टदर्शनम् ॥

मनुरुवाच–

End:

गण्डान्तेपि च कर्तव्यं पुष्याद्ये तद्वदेव तु ।
मासाष्टके द्वादशाहे कुर्याद्वा शान्तिमादरात् ॥

इत्युक्तं मनुना सम्यक् मूलजातहिताय च ।
मातापित्रोर्धनस्यापि बन्धुशोकोपशांतये ॥

Colophon:

इति मनुप्रोक्ता मूलानक्षत्रशांतिः ॥

685

Sl. No. 11877 मूलानक्षत्रजननशांतिः Ms. No. P 2239/39

(ज्योतिषपितामहासंहितांतर्गता– कल्पात्मिका)

Beginning:

मन्दराद्रौ सुखासीनां देवदेवं जगद्गुरुम् ।
प्रणम्य शिरसा भक्त्या नारदः पर्यपृच्छत् ॥

मूलानक्षत्रजातानां शांतिकर्म विधानतः ॥

End:

अनेन विधिना शांतिं कुर्यात् सम्यग्विधानतः ।
आयुरारोग्यवृद्धिश्च तुष्टिपुष्टिविवर्धनम् ॥

सर्वशांतिकरं पुण्यं सर्वसौख्यं प्रजायते ॥

Colophon:

इति पितामहाख्ये ज्योतिश्शास्त्रे दशसहस्रसंहितायां मूलानक्षत्रशांतिकर्मणि तृतीयो-
ध्यायः ॥

686

Sl No. 11879 मूलनक्षत्रजननशांतिः Ms No. P. 2581/१८

(पौराणिकी विधिः)

Beginning :

अथ मूलानक्षत्रजननशांतिविधिरुच्यते ।

अथातः सम्प्रवक्ष्यामि मूलाजातहिताय च ।
मातापित्रोर्धनस्यापि कुल ××ति हितावहम् ॥

त्यागो वा मूलजातस्य वदनं नावलोकयेत् ।
शान्तिर्वा पुष्कलस्याच्च तर्हि दोषो न कश्चन ॥

End :

तस्मिन् शतौषधीर्मध्ये हेममूल निधापयेत् ।
कुम्भस्येशानदिग्भागे होमस्थानं प्रकल्पयेत् ॥

उपलेपादिकं कृत्वा प्रतिष्ठाप्य हविर्भुजः ।+ + +

स्वायम्भुवमनुरुवाच –

सप्त ते अग्ने समिधः सप्तजिह्वा सप्तऋषयः । सप्तधामप्रियाणि । सप्तहोत्रः सप्तधात्वा यजन्ति । सप्तयोनीरापृणीष्वा घृतेन स्वाहा । अग्निरद्भिः प्रजापतये शतक्रतवे अग्नये इन्द्रं न ममेति पूर्णाहुतिं हुत्वा होमशेषं समापयेत् ॥

Colophon :

– – – –

Extra information-

ग्रन्थेस्मिन् अन्वाधानविधिः भ्रमेरेकविधिश्च नक्षत्रान् उक्त पौराणिकेयं शांतिः ॥

687

Sl. No. 11886 मूलनक्षत्रजननशांतिः (शौनकीय) Ms. No. P. 5313/18

Beginning :

शौनक उवाच—

अथ शांतिं प्रवक्ष्यामि मूलजातहिताय च ।
पितृ मातृर्धनस्यापि कुलज्ञातिहितावहम् ॥

ध्यांगो वा मूलजातस्तु दशाब्दान् वाप्यदर्शयेत् ।
शांतिर्वा पुष्कला कार्या न हि दोषः न कदाचन ॥

End :

स, वितरं, दुर्गां, त्रियम्बकं, विश्वेदेवान्, अग्निं, क्षेत्रपतिं, रुद्रं, श्रियं + व्याहृतिभिरन्येनाग्निं वायुं सूर्यं च तिलव्रीहिभिः शेषेण स्विष्टकृतम् । इत्यन्वाधानम् ॥

Colophon :

इति शौनकोक्तमूलजननशांतिः समाप्ता ॥

688

Sl No. 11895 मूलनक्षत्रजननशांतिः (हेमाद्रीया मनुप्रोक्ता) Ms.No. P. 7970/57

Beginning :

मूलानक्षत्रजननशांतिविधिरुच्यते

स्वायंभुवमनुरुवाच—

अथातः सम्प्रवक्ष्यामि मूलजातहिताय च ।
मातापित्रोः धनस्यापि कुलज्ञाति हिताय च ॥

End :

मासाष्टके द्वादशाहे कुर्याद्वा शांतिमादरात् ।
इत्युक्ता मुनिना सम्यक् मूलजातहिताय च ॥

मातापित्रोर्धनस्यापि बन्धुशोकोपशांतये ।
एवं यः कुरुते शांति सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति हेमाद्रौ दानकाण्डे मनुप्रोक्तशांतिकर्मणि मूलानक्षत्रजननशांतिः समाप्ता ॥

689

Sl. No. 11903 मूलानक्षत्रजननशांतिः Ms. No. P. 9951/54

Beginning :

मूले शीघ्रं मृत्युः सन्देहो वाचकविंशतिदिनानि (?) पक्षत्रयेषु वा पञ्चदशदिनेति मास द्वय वा सर्वथा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत ॥

End:

स्विष्टकृत्प्रभृत्या वरदानानं कृत्वा शतावरीबिल्वपत्रोदकेनाभिषेकं कुर्यात् । × × ×. मूलावस्त्राभरणानि ब्राह्मणेभ्यो दद्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान्भोजयित्वा आशिषो वाचयित्वायुरारोग्यं भवति ॥

Colophon :

इते मूलानक्षत्रशांतिः ॥

690

Sl. No. 11910 मूलनक्षत्र जननशांतिः (गार्ग्यीया) Ms. No. P. 3128/22

Beginning :

मूलनक्षत्रजनने शांति वक्ष्यामि गार्ग्यकः
जातस्य द्वादशाहे वा नक्षत्रे वा शुभे दिने ॥

तत्र शांति प्रकुर्वीत कर्थ तत्र प्रचक्ष्महे ·
सुशुभे पुण्यदेशे तु मण्टपं कारयेत् बुधः ॥

End:

गृहस्थो वाचद्विपेप्रान् निरुक्तिः प्रीयतामिति ।
विधानं चरते यस्तु ततः शांतिर्भवेत् द्रुतम् ॥

×××यन्तेप्येव कर्तव्यं पुण्य ××× ।
××द्वादशाहे कुर्याद्वा शांतमादरात् ॥

इत्युक्तं गार्ग्यवचनान्मूलाद्यानां हिताय च ।
मातापित्रोर्हितस्यापि बन्धूनां कोपशांतये ॥

Colophon :

इति गार्ग्यप्रोक्त- मूलनक्षत्रजननशांतिः ॥

691

Sl. No. 1912 **मूलश्लेषाजननशांतिः** **Ms. No. P 4360/9**

Beginning :

××× विधिं व्याख्यास्यामः— पुण्याहे दम्पत्योश्चन्द्रताराबलान्विते पूर्वाह्णे दम्पती मङ्गलस्नानं कृत्वा ब्राह्मणानाहू× × × त्रे चरणे + + + इति सङ्कल्प्य,– ॥

End :

आज्यावेक्षणं करिष्य इति सङ्कल्प्य , रूपं रूपानि...... मृत्युस्वरूपञ्च। ...गमभ्यर्च्य ब्राह्मणाय दद्यात् पूर्ववदुपविश्य दशदानानि दद्यात् । अनन्तरं ब्राह्मणान् भोजयेत् ।

Colophon :

मूलाश्लेषादिसर्वशान्तिः समाप्ता ॥

692

Sl. No. 11914 **मूलश्लेषाजननशांतिः** **Ms. No. P-5587/30**
(हेमाद्रौ पितामहप्रोक्ता)

Beginning:

अथ मूलश्लेषानक्षत्रजननशान्तिविधिरुच्यते—

मन्दरस्थं सुखासीन देवदेवं महेश्वरम् ।
प्रणम्य शिरसा भक्त्या नारदः परिपृच्छति ॥

End :

तेभ्योऽपि दक्षिणां दद्यात् प्रणिपत्य समन्वितः ।
अनेन विधिना शान्ति कुर्यात् धीमान् विधानतः ॥

आयुरारोग्यवृद्धिं च तुष्टिपुष्टिफलप्रदम् ।
सर्वशान्तिकरं पुण्यं सौख्यं चैव प्रजायते ॥

Colophon:

इति हेमाद्रौ दनगाण्डे शान्तिप्रकरणे पैतामहोक्तमूलाश्लेषाशान्तिः समाप्ता ॥

693

Sl. No. 11917 **मूलश्लेषाजननशांतिः** **Ms. No. P. 8532/5**
(पितामहसंहितीया)

Beginning :

सहस्रकलशैदिव्यैः पु × × × × × × ।
× × × × × × विप्र चिरं जीवति यो नरः ।।

प्रदक्षिणं तु यः कुर्यादश्वत्थे विष्णुरूपिणम् ।।

End :

अनेन विधिना शान्ति कुर्यात्सम्यग्विधानतः ।
आयुरारोग्यवृध्दिश्च तुष्टिपुष्टिविवर्धनम् ॥

सर्वशान्तिकरं पुण्यं सौख्यं चैव प्रजायते ।

Colophon :

इति पितामहज्योतिःशास्त्रे दशमहर्षिकायां संहितायां मूलश्लेषागण्डजनन शान्तिर्नाम-
तृतीयोऽध्यायः ॥

694

Sl No 11921 मूलाश्लेषाजननक्षत्रशांतिः Ms. No. P. 9965/76
(कात्यायनीया)

Beginning :

अश्लेषाऋक्षजातानां शांतिं वक्ष्यामि शौनकः)
जातस्य द्वादशाहेतु शान्तिकर्म समाचरेत् ॥
यथाशक्ति द्वादशाहे जन्मनक्षत्रके तथा ।
स्नात्वाभ्यगादिभिस्तास्मिम् गृहाकंकारपूर्वकम् ॥

End:

कार्पासानां ततो दद्यात्फलानामेकविंशतिः ।
तस्माद्स्य प्रदानेन अतः शांतिं प्रयच्छ मे ॥

इति कार्पासदानम् + + + यथाशक्ति ब्राह्मणभोजनानन्तरं ब्राह्मणाशीर्वादः ॥

Colophon :

इतिश्री कात्यायनोक्तमूलाश्लेषानक्षत्रजननशान्तिः ॥

695

Sl No. 11923 मृगशीर्षानक्षत्रजननशांतिः Ms No. P. 4863/50

Beginning :

मृगशिरसि दिवसे पञ्चदश ××त्रं पञ्चरात्रं वा त्रिंशद्दिनानि वा पीडा भवति । अथ होननक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । अग्नेनमर्त्यो(?) मध्ये मृगशीर्षे देवतेति भेदः ॥

End :

ततः ×× कृत्स्नमृत्यावरदानान्कृत्वा नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति मृगशिरोनक्षत्रशांतिः ॥

696

Sl. No. 11927 मृगोत्पातादिशांतिः (गार्ग्यसंहितीया) Ms. No. P. 4180/17

Beginning :

उत्पातशांतिं वक्ष्यामि सर्वचारमतेन तु ।
प्रवदन्ति पदे ग्राममरण्यमृगपक्षिणौ ॥

अरण्या यान्ति तत्ग्रामशतं यांति जलोद्भवः ।
स्थलजीवजलं यान्ति जलजीवस्थलेऽपि वा ॥

End :

सवस्त्रप्रतिमां गां च आचार्याय सदक्षिणाम् ।
ब्राह्मणान् भोजयित्वा तु सर्वदोषैः प्रमुच्यते ॥

उत्पातदोषसंजातः तत्क्षणादेव नश्यति ।
धान्यवान् कृतकृत्यश्च सुखी भव न संशयः ॥

Colophon :

इति सर्वशास्त्रोक्तगार्ग्यसंहितायां मृगोत्पातादिशांतिः समाप्ता ॥

697

Sl. No. 11932 मृत्युञ्जयकल्पः Ms. No. P. 2370/78

Beginning :

अस्य श्रीत्र्यम्बकमन्त्रस्य मैत्रावरुणीपुत्रा वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, मृत्युञ्जय त्र्यम्बकरुद्रो देवता, दे देव्यौ प्रणवौ बीजशक्तिः, ओं बीजम् ह्रीं शक्तिः ॥

End :

त्रियम्बक महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥

त्वावतस्त्वद्गतः प्राणः त्वच्चित्तोऽहं सदा मृड ॥

इति विज्ञाप्य देवेशं जपेन्मत्रं त्रयम्बकम् ।
............हुनेन्मन्त्रं त्रियम्बकम् ॥

Colophon :

— — — —

698

Sl. No. 11933 मृत्युञ्जयकल्पः Ms. No. P. 2527/1

Beginning :

अस्य श्री मृत्युञ्जय त्रियम्बकमहामन्त्रस्य मन्त्रावरुणयुनो वसिष्ठ ऋषिः । अनुष्टुप् छन्दः; तियम्बकरुद्रो देवता; देवदेव्यौ प्रणवौ बीजशक्तिः । अत्र मूलमन्त्रेण कर-शुद्धिं कुर्या ॥

End:

त्वा × × त्वद्गतप्राणः त्वच्चितोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियम्बकम् ॥

मृत्युर्नश्यतु आयुर्वर्धताम् । श्री × × जामहे × × × नेन्मन्त्रं त्रियम्बक-मिति वक्तव्यम् ॥

Colophon :

— — — —

699

Sl. No. 11934 मृत्युञ्जयकल्पः Ms No. P. 2914/44

Beginning:

अथमृत्युंजयकल्पविधिंव्याख्यास्यामः—

जन्मनक्षत्रे पुष्यनक्षत्रे त्रिजन्मसु ब्राह्मणानन्नेन परितोष्य, पुण्याहं वाचयित्वा, देव-यजनोल्लेखनप्रभृत्यग्निमुखं कृत्वा, चरून् श्रपयित्वा ओंभूर्भुवस्सुवरोंमिति पुरोनुवाक्यामनूच्य

End :

तच्छंयोरावृणीमहेति बलिं ददाति । धेनुं वृषभमनड्वाहं हिरण्यं कांस्यं वासो वा पुनर्मृत्युञ्जयतीत्याह भगवान् बोधायनः ॥

Colophon :

इति मृत्युंजयहोमः ॥

700

Sl. No. 11935 मृत्युञ्जयकल्पहोमविधिः Ms. No. P. 2914/50
(शौनकीया)

Beginning :

होमकुण्डं विधानं तु वक्ष्येऽहं शौनकोविधिम् ॥

मुनिः—

होमतन्त्रानुसारेण शालालक्षणमेव च ।
अङ्गुल्यस्त्रिविधा प्रोक्ताः वनमालशरीरकाः ॥

शालाप्रासादगेहादौ मानाङ्गुलिरुदाहृता ।
यज्ञोपकरणे कुण्डे मात्राङ्गुलिरुदीरिता ॥

End :

ब्रह्माणं पूजयेद्देवं दक्षिणाभिश्च ऋत्विजः ।
अनड्वाहश्च प्रदातव्यो मृत्युञ्जयप्रसादकः ॥

ब्राह्मणान् भोजयेत्पश्चात् यथावित्तानुसारतः ।
एवं कृते महाहोमे सर्वापद्भ्यो विमुच्यते ॥

Colophon :

इति शौनकीये मृत्युञ्जयहोमविधिः ॥

701

Sl. No. 11944 मृत्युञ्जयकल्पः Ms. No. P. 8429/3
(जपविधिः—वेदोक्ता)

Beginning:

अस्य श्रीमृत्युञ्जयत्रियम्बकमहामन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठ ऋषिः, मृत्युञ्जय-त्रियम्बकरुद्रो देवता; देवदेव्यौ × मो बीजशक्तिः; मूलमन्त्रेण करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य + + + + अंगन्यासमारभेत् ॥

End :

त्रियम्बकमहादेव त्राहि मां शरणागतम् ।
करुणाकर × × × × × × × × ॥

जन्ममृत्युजरारोगैः पीडितैः कर्मबन्धनैः ।
यावन्तस्त्वद्गतप्राणाः त्वच्चित्तोऽहं सदाशिवं ॥

इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियम्बकम ॥

Colophon :

इति वेदोक्तमृत्युञ्जयजपविधानं सम्पूर्णम ॥

702

Sl. No. 11948 मृत्युशांतिः Ms. No. P. 6824/2

Beginning :

ओं ॥ मृत्युशान्तिः ओं नमः चिरञ्जीविनो अश्वत्थाम्नस्वाहा । ओं नमः चिरं-जीविने बलये स्वाहा । नमश्चिरंजीविने व्यासाय स्वाहा । नमश्चिरंजीविने विभीषणाय स्वाहा ॥

End:

एतेषां पूर्वदिग्भागे मृत्युञ्जय उदीरीतः ।
आग्नेयादिषु कोणेषु चत्वारो वारुणा बहिः ॥

इन्द्रादिकाष्टदिक्पालान् तत्तद्दिक्षु निवेशयेत् ।
सर्वेषां पूर्वभागे स्यात् आकाशकल × × × ॥

Colophon

– – – –

703

Sl. No. 11949 मृत्युहरच्छागदानविधिः (यामलोक्ता) Ms. No. P. 7970/127

Beginning

आदित्यादिषु वारेषु सहिरण्यः सहैव तु ।
यः प्रयच्छति धर्मार्ति तस्य पुष्यन्ति वै ग्रहाः ॥

अथ दानं प्रवक्ष्यामि महामृत्युहरं क्षरम् ।
महाभयहरं नित्यं दुष्टग्रहभयापहम् ॥

End :

विप्रं चिरंजीवेत् पश्चात् मानानं नावलोकयेत् ॥
यः कुर्यात् भक्तिभावेन वित्तशाठ्यविवर्जितः ॥

तस्य मृत्युभयं नास्ति सत्यमेव न संशयः ।
नीरोगी दृढकायश्च चिरञ्जीवी सुखी भवेत् ॥

Colophon :

इति यामलोक्तमृत्युच्छागदानविधिः ॥

704

Sl. No. 11951 मृत्युहरमहिषीदानविधिः Ms No. P. 2282/12

Beginning :

अथ मृत्युहरमहिषीदानविधिः । औषधादिभिरनिवारणरोगे मृत्युमहिषीदानविधिः—

शन्यङ्गारकवारे च भरण्यां जन्मभे तथा ।
पर्वद्वये च संक्रान्तौ महिषीदानमुत्तमम् ॥

End :

दशदानानि कुर्वीत फलताम्बूलमेव च ।
प्रतिमां वस्त्रसंयुक्तां पूजोपकरणान्विताम् ॥

दक्षिणाश्च × × आचार्ये दत्वा रोगात् विमुच्यते
ब्राह्मणान् भोजयेत्पश्चात् सद्यो रोगाद्विमुच्यते ॥

Colophon :

इति मृत्युमहिषीदानपद्धतिः

705

Sl. No. 11953 मृत्युहरमहिषीदानविधि (नारदीयांतर्गता) Ms. No P.9254/14

Beginning

अथ मृत्युमहिषीदानम्—

मम वर्तमानस्थूलशरीराविरोधेन शरीरे वर्तमानरोगनिदानभूतपापनिवृत्तिद्वारा अप-मृत्युपरिहारार्थं आयुर्वृद्धिं च कामयमानः नारदोक्तप्रकारेण मृत्युमहिषीदानं करिष्ये

End

वस्त्रद्वयच्छन्नां रक्तमालालंकारसर्चिता यमदेवताका महिषीं मम पूर्वोक्तफलावाप्ति कामय मानः तुभ्यमहं सम्प्रददे न मम। यथाशक्ति दक्षिणां दद्यात्। यम स्मृत्वेत्यादि ॥

Colophon:

इतिनारदीयमृत्युमहिषीदानप्रकारः समाप्तः ॥

706

Sl. No. 11958 मेहरोगशांतिः (सूर्यमूर्तिदानविधिः) Ms. No. P. 601/3

Beginning:

अथ दान प्रवक्ष्यामि महारोगहर क्षमम्।
पञ्चधा मेहरोगस्तु विधानं क्रमशः शृणु ॥
शुक्लरक्ताश्च पाषाणमधुमेहेति पञ्चधा।
लक्षणं सम्प्रवक्ष्यामि तेषां चैव पृथक् पृथक् ॥

End:

सुवर्णं दक्षिणां दद्यात् रक्तधेनुमथापि वा ॥
भक्त्या भावेन तत्कुर्यात् मेहरोगपरिच्युतिम् ॥
सुसन्ततिसमायुक्तः जीवेद्वर्षशतं नरः ॥

Colophon:

इति मेहरोगशांतिर्सूर्यमूर्तिदानविधिः ॥

707

Sl. No. 11960 मेहरोगहरमहाशांतिः Ms No. P. 4180/63

(मेहहरसूर्यमूर्तिदानविधिः- यमिलोक्तः)

Beginning:

अथ दानं प्रवक्ष्यामि मेहरोगनिवारणम्।
पञ्चधा मेहरोगस्तु निधानं क्रमशः शृणु ॥

शुक्लरक्ताथ पाषाणः मधुदाहेति पञ्चधा ।
लक्षणं संप्रदक्ष्यामि तेषां चैव पृथक् पृथक् ॥

End :

सुवर्णदक्षिणां दद्याद्रक्तधेनुसमन्विताम् ।
भक्तिभावेन यः कुर्यान्मेहरोगपरिच्यतिः ॥

सुसन्ततिसमायुक्तो मेहरोगनिवारणम् ।
सर्वारिष्टविनिर्मुक्तः जीवेद्वर्षशतं बुधः ॥

Colophon :

इति यामिले मेहहरसूर्यमूर्तिदानविधिः ॥

703

Sl. No. 11965 यक्षशांतिः (शौनकीया) Ms. No. P. 2239/101

Beginning:

शौनकोऽहं प्रवक्ष्यामि शान्ति यक्षप्रणाशनम्।

प्रयुंजन्ति प्रशान्त्यर्थं यत्नेन ऋषयः पुरा ॥
विप्र × × × चेमां शान्तये स्वस्ति जन्मसु ॥

End :

× × × × ×वाऽथ अष्टविंशतिमेव वा ।
अष्टात्रयं वा संमा××यथा× × × × × ॥

××××× शक्ति दत्त्वाऽथ स्वस्ति वाचयेत् ॥

Colophon :

इति शौनकीये यक्षशान्तिः ॥

709

Sl. No. 11970 यज्ञोपवीतदानविधिः Ms. No. C. 3463/2

(गर्भस्रावहरा वृद्धगार्ग्यीया)

Beginning :

अथ गर्भस्रावहरयज्ञोपवीतदानम् ।

वृद्धगौतमः-

स्रवद्गर्भा भवेत्या तु बालकं हन्ति याविषैः ।

वायुपुराणे—

यज्ञोपवीतं कुर्वीत कांचनं तु स्वशक्तितः ।

शात्यन्तवर्णयुक्तेन राजतं चोत्तरीयकम् ॥

End:

धनान्यपि ब्राह्मणेभ्यस्तस्मिन् काले प्रदापयेत् ।

विलोक्याज्यं प्राप्य चार्थं प्रणिपत्य क्षमापयेत् ॥

गर्भस्रावकराद्दोषादेवं कृत्वा विमुच्यते ॥

अस्मिन् कर्मणि स्त्रियां अधिकारः ।

Colophon

इति गर्भस्रवहरयज्ञोपवीतदानम् ॥

710

Sl. No 11971 यमप्रतिमादानविधिः Ms. No P. 7970/11 7c

Beginning :

अतःपरं प्रवक्ष्यामि यमदानमनुत्तमम् ।

महामृत्युहरं सद्यो महादोषनिवर्हणम ॥

कालमृत्युं जयेच्छापि किं. पुनस्तूपमृत्युनः ।

अष्टम्यां च चतुर्दश्यां ××× पातवैधृतौ ॥

End :

तव मूर्तिप्रदानेन प्रयच्छ मम वांछितम् ।
दक्षिणाशतनिष्कं वा तदर्धं पादमेव च ॥

विप्रं विसर्जयेत् पश्चात् मासान् नावलोकयेत् ।
मृत्युरोगभयैर्मुक्तः जीवेच्च शरदां शतम् ॥

Colophon :

इति यामलोक्तयमप्रतिमादानविधिः ॥

711

Sl. No 11972 यमप्रतिमादानविधिः Ms. No. P. 8829

(तिलपिष्टयमप्रतिमादानविधिः-ब्रह्मयामलीया)

Beginning :

सर्वरोग-सर्वपापहरशनैश्चरप्रीत्यर्थतिलपिष्टयमप्रतिमादानविधिरुच्यते । रचनाप्रकारः–

ग्रहण-अयन-विषु संक्रान्-व्यतीपातवैधृति-वैशाखि-कार्तिकी-माघाख्य-पौर्णमी- महोदयश्च अर्धोदय-मन्दवासर-भरणी-आश्लेषा-कृत्तिकासु–+ + + +

एवंगुणविशिष्टायां शुभतिथौ + + +सर्वारिष्टनिवारणसिद्ध्यर्थं + + +वृद्ध्यर्थं च यमप्रति-मादानमहं करिष्ये ॥

End:

दत्वा वस्त्राभरणादिकं सम्पूज्य, ब्राह्मणान् भोजयित्वा, आशीर्वचनं गृह्णीयात् । एवंकृते सर्वरोगविनिर्मुक्तः सर्वसम्पत्समन्वितः दीर्घायुररोगदृढगात्रवांश्च भवति ॥

Colophon :

इति ब्रह्मयामळे सर्वरोगहर-सर्वपापहरशनैश्चर-प्रीत्यर्थ-तिलपिष्ट-यमप्रतिमादानविधिः ॥

712

Sl No. 11974 यमळजननशांतिः Ms. No P. 604/76

(कात्यायनोक्ता)

Beginning :

अथातो यमळजननशांतिविधिं व्यख्यास्यामः –

यस्य भार्या गौर्वडवा दासी वा यमळं × × याता तदा षण्मासाभ्यन्तरे यजमानस्य मरणं अनर्थपरम्परा च भवेत् । पूर्णिमादशाहे वृक्षाणां कषायार्थं त्वचो हरेत् ॥

End :

त्वया जगत् सृष्टिमिहेति तत्वं
त्वमेव सर्वस्य पितामहोसि ।
त्वमेवकर्ता जगतां विकर्ता
त्वमेव धाता जगतां विधाता ॥

Colophon :

इति कात्यायनोक्त-यमळजननशांतिविधिः समाप्तः ॥

713

Sl. No. 11978 यमळजननशांतिः Ms. No. P. 3123/19

(सर्वोत्पातशांतिः – बोधायनीया)

Beginning:

अथातः संप्रवक्ष्यामि यमलं जननं भवेत् ।
भार्या दासी च धेनुश्च शांतिं कुर्वन्तु ते शुभम् ॥

प्रायश्चित्तो भवेत्पूर्णे दशाहे द्वादशेऽपि वा ।
चतुर्णां क्षीरवृक्षाणां कषायमुपसंहरेत् ॥

End :

ध्वजवितानेष्वन्येषु एतदेव प्रायश्चित्तं ग्रहणशक्तिप्रयुक्तेन विधिना हुत्वाचार्याय वरं दत्त्वा स्वस्ति वाचयित्वाशिषः परिगृह्य शांतिर्भवति शांतिर्भतीत्याह भगवान् बोधायनः ॥

Colophon :

इति यमलजननादिसर्वोत्पातशांतिः ॥

714

Sl. No. 11981 **मूलाश्लेषाजननशांतिः** **Ms. No. P. 4863/126**

(यमलजननादिप्रसवविकृतिशांतिः वराहव्याख्यानसंहितांतर्गता)

Beginning

प्रसवविकारे स्त्रीणां द्वित्रिः चतुःप्रभृति प्रसूतेर्वा हीनातिरिक्तकाले स्वदेहक्षयः कुलक्षयो वा भवति। पर ×× पशूनां अन्यपशुप्रसवं विनाशयेत् ॥

End :

त्यागः स्वत्वनिवृत्तिः परस्वत्वाय दानम् च । तद्यथा योगं शीघ्रं कृतं तस्य चतुष्पादादिः स्वामिनो नगरयूथादेः शुभं स्यात् ॥

Colophon :

इति वाराहे व्याख्यानसंहितायां यमळजनननादिप्रसवविकृतिशांतिः समाप्ता ॥

715

Sl. No. 11984 **यमलजननशांतिः** **Ms. No. P. 5587/56**

(जोतिषार्णवीया)

Beginning :

अथ यमलजननशांतिविधिरुच्यते । गार्ग्यः—

यामलो यदि जायेत गवि पत्न्यामथापि वा ।
भवन्तु गृहिणां विन्द्यात् शांतिर ×× वक्ष्यते ॥

End :

त्रयोदश जपान् हुत्वा मित्रं देवि समर्पयेत् ।
चतुर्गृहीतं जुहुयात् बाधका वास्तु चात्र नु ॥
स्वाहान्तमुखभागान्ते कथिता इति निश्चय: ॥

Colophon :

इति ज्योतिषार्णवे यामलजननशांतिः समाप्ता ॥

716

Sl. No. 11989 यमलजननशांतिः Ms. No. P. 9254/197

(वसिष्ठसंहितीया– प्रसवविकृतिशांतिः)

Beginning :

अथ वसिष्ठसंहितायां यमलजननादिप्रसवविकृतिशांतिः —

हीनकालेऽधिके काले प्रसवे सति योषिताम् ।
असंख्याजनने युग्मे प्रसवे वापि शाखिनः ॥
अमानुषाणि चण्डाला जायन्तेऽन्यां द्विजानि वा(?)।

End :

प्राजापत्येन मन्त्रेण समिदाज्यचरून् क्रमात् ।
हुत्वा च तर्पयेद्विद्वान् बहुवर्णैः सुशोभनैः ॥
एवं यः कुरुते सम्यक् तस्मात्पापाद्वि मुच्यते ।
अकृत्वा नास्तिको लोभा × × अशुभं सर्वसङ्कटात् ॥

Colophon :

इति वसिष्ठसंहितायां यमलजननादिप्रसवविकृतिशांतिः समाप्ता ॥

717

Sl. No. 11996 रक्तस्त्रीजननाद्भुतशांतिः(अद्भुतशांतिः) Ms. No. P. 3374/43

Beginning :

रक्तस्त्रीजनने गृहं नवधा भागं कृत्वा मध्यभागे रक्तस्त्रीजनने_ अग्निभयं भवति । सप्ताहाद्-र्वं-प्रजानां व्याधिः । यत इन्द्र भयामह इति द्वाभ्यां पालाशसमिद्भिः अष्टोत्तरशतं जुहुयात् ॥

End:

बिल्वसमिद्भिः अष्टोत्तरशतं तथान्नाज्याहुतीर्जुहोति । सप्तम्यां ग्रामनन्दने सकुटुम्बस्य व्याधिः । आत्वा हारुपमिति बिल्व × मिद्भिः अष्टोत्तरशतं तथान्नाज्याहुतीर्जुहुयात् ॥

पक्षान्तरात् + + । + + शतं पृथक् ॥

Colophon :

इति रक्तस्त्रीजननाद्भुतशांतिः समाप्ता ॥

718

Sl. No. 11997 रक्तार्बुदशांतिः Ms. No. P. 909/19

Beginning :

उमामहेश्वरसंवादे–

विधवा गमनेनापि नित्यं नारद वै यतिः ।
रक्तार्बुदो भवेद्यस्तु प्रायश्चित्तं प्रशांतये ॥

End:

प्राजापत्यानि चत्वारि सप्त धान्यानि चोत्सृजेत् ।

ब्राह्मणेभ्य इति शेषः । व्रीहियवादीनि यथालाभोपपन्नानि ॥

Colophon :

– – – –

719

Sl. No. 11998 रजतरथदानपद्धतिः Ms. No. P. 9428/12
(यामलोक्ता)

Beginning :

रचनाप्रकारः—

फाल्गुने पौर्णमास्यां देवालयादिपुण्यदेशेषु गोमयानुलेपितकुङ्कुमादिविरचितभूभागोपरि वस्त्रं प्रसार्य, + + + + रजतरथदानं करिष्ये ॥

End :

मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् । शतनिष्कं पञ्चशतनिष्कं पञ्चविंशतिनिष्कं दक्षिणां दद्यात् । तन्मुखानवलोकयेत् । यस्य स्मृत्येत्यादि ॥

Colophon :

इति यामलोक्तप्रकारेण रजतरथदानपद्धतिः ॥

720

Sl. No. 11999 रजस्वलाशांतिकल्पः (पितामहसंहितीया)) Ms. No. P. 734/38

Beginning :

विनायकश्च कर्तव्यो गजवक्त्रश्चतुर्भुजः ।
कमलं चाक्षमालां च दन्तस्य दक्षिणहस्तयोः (?) ॥

End

रजा ××× दृष्टो लौकिकाचारमाचरेत् ।
श्रुतिस्मृत्युक्तमार्गेण गर्भादानं च कारयेत् ॥

Colophon :

इति पितामहसंहितायां रजस्वलाशान्तिकल्पस्समाप्तः ॥

Extra information:

अस्मिन् ग्रन्थे रजस्वलाशांत्याङ्गत्वेन विनायकादिनानदेवतानां प्रतिमास्वरूपविवरणं तद्दानं तदङ्गभूतवस्तुविवरणं इत्येते अंशाः उल्लिखिता वर्तन्ते ॥

721

Sl. No. 12001 रजस्वलाशांतिकल्पः (रुद्रयामलीया) Ms. No. P. 4335/19

Beginning :

दिवा वा यदि वा रात्रौ भौमवारे रजस्वला ।
वन्ध्या वा बहुदुःखी वा पुंश्चली वा भवेत् ध्रुवम् ॥

शांतिं कुर्यात्प्रयत्नेन धनी वाप्यधनोऽपि वा ।
तुवरीराशिमध्ये तु शुद्धदेशे समास्थिते ॥

End :

महासेन महासत्व तारकासुरमर्दन ।
तव मूर्तिप्रदानेन गण्डान् दहतु मे गुह ॥

इत्थं शांतिं प्रकुर्वीत सर्वसौभाग्यसम्पदः ।
आयुरारोग्यमैश्वर्यं जीवेच्च शरदां शतम् ॥

Colophon :

इति षष्ठीरजस्वलाशांतिः ॥

Extra information.

रुद्रयामलोक्ता ।

अत्र भौमवार-कृत्तिकानक्षत्र-प्रतिपत्-चतुर्थी षष्ठी.दिन-रजस्वलाशांतिविषयाःअपि अंतर्भाविताः ॥

722

Sl. No. 12002 रजस्वलाशांतिकल्पः (नारदीया) Ms. No P. 4396/34

Beginning :

निन्द्यर्क्षतिथिवारेषु यदि पुष्पं प्रजायते ।
आचार्यं वरयेत्कर्ता चतुरो ब्राह्मणानपि ॥

गोमयेन समालिप्य चतुर्हस्तं प्रमाणतः ।
तत्र कोणेषु कलशान् चतु प्रस्थप्रमाणकान् ॥

End :

प्रतिमां वस्त्रयुग्म च आचार्याय निवेदयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् सर्वदोषापनुत्तये ॥
भर्ता तत्रापि गमनं सर्वदोषविवर्जितः ॥

Colophon:

इति नारदीये रजस्वलाशांतिः ॥

733

Sl. No. 12004 — रजस्वलाशांतिकल्पः (भरद्वाजीयः) — Ms. No. P 5672/1

Beginning

यस्मिन् दुष्टनक्षत्रे रजो दृश्यते, तन्नक्षत्राधिदेवताप्रतिमां द्वादशस्वर्णाधिककनकेन निष्क मात्रेण वा कृत्वा नक्षत्रशांत्युक्तप्रकारेण वस्त्रगन्धपुष्पधूपदीपनैवेद्यादिकं + + + कृत्वा ॥

End :

येन केन प्रकारेण दुर्नक्षत्रशांतिं कुर्यात् अतिक्रान्ते अरिष्टं भवतीत्याह भगवान् भारद्वाजः ॥

Colophon:

इति रजस्वलाशांतिः ॥

724

Sl·No 12012 रजस्वलाशांतिकल्पः Ms. No. B 117/5

(रजस्वलादोषशांतिः यामलोक्ता)

Beginning :

व्यतीपातवैधृतेरजस्वलशांतिः कथ्यते–

अतः परं प्रवक्ष्यामि शृणु शौनक यत्नतः ।

व्यतीपातो वैधृतिश्च रजंदोषाय कल्पते ॥

End:

फल्गुनीनामधाशक्येन हविः पूर्वोक्तविधानात् योषित् (!) ।

सवस्त्रप्रतिमां दद्यात् आचार्याय सगां शुभाम् ॥

एवं कृत्वा विशेषेण सर्वदोषात् प्रमुच्यते ॥

Colophon :

इति यामलोक्तदुष्टतिथिशांतिः ॥

625

Sl. No. 12013 रज्जुकूटपद्धतिः Ms. No. P. 9428/130

Beginning:

रचना प्रकार:–

अष्टमीनवमी चतुर्दशीषु भानुभौमभृगुवासरेषु त्रिपुष्कर त्रिपक्षवरित्य ×× चन्द्रताराबलोपेते तस्मिन् दिने कुर्वीत ।

End :

गुणैकवर्णा द्विगुणं च ××श्च

ताराश्रिगुण्यम् चतुरस्तु योनिः ।

गुणैःषोडशभिः नि ×××× शयिनिन्दितो भवेत् ।

पञ्चविंशगुणाः श्रेष्ठः अतऊर्ध्वं विशेषतः ॥

Colophon :

— — — —

626

Sl. No. 12014 रथदानपद्धतिः (यामलोक्ता) Ms. No. P. 9428/118

Beginning :

अयनरक्षणसंक्रान्तिव्यतीपातत्रिजन्म-अष्टमी-नवमीद्वादशीपौर्णमीअमायां भानुवारे भौमवासरेषु ××× यामलोक्तप्रकारेण समस्तभयहररथदानं करिष्ये ।।

End:

वस्त्रवेष्टितं गन्धपुष्पाद्यलंकृतं मृत्युञ्जयदेवताकं रथं मम पूर्वोक्तफलकामः तुभ्यमहं सकरं ददे न ममेति दद्यात् ×× न्मुखं नावलोकयेत् । यस्य स्मृत्येत्यादि ॥

Coolphon :

इति यामलोक्तप्रकारेण रथदानपद्धतिः ।।

727

Sl. No. 12015 रम्भाविवाहविधिः Ms. No P. 3242/28

(कदलीविवाहविधि:)

Beginning :

अथ रम्भाविवाहस्य विधिं वक्ष्ये यथाविधि ।
ज्येष्ठे च रोगिणि भ्रष्टे कुब्जेन्धे बधिरे जने ॥

कनीयान् कन्यकार्थी स्यात् कदलीं नववाससा ।।
आच्छाद्य तूष्णीं वेदिं च निधायाकुम्पूर्वकम् ।।

End:

मुख्य चतुर्थविवाहकाले एतादृगदोषो नास्ति । तत्र वचनस्य दुष्टत्वात् । अतः कदलीविवाहानन्तरं ज्योतेष्यमुख्यविवाहकरणं अशक्तमिति प्रतिभाति ।यथायोग्यं विचार्य कर्तव्यम् ॥

Colophon:

इति कदली(रम्भा) विवाहेविधिः ॥

728

Sl No 12016 रम्भाविवाहविधिः (शौनकीया) Ms. No. P. 5293/61

Beginning :

रम्भाविवाहं वक्ष्यामि भगवान् शौनको मुनिः
अर्कोद्वाहं विना नित्यं तृतीयां नोद्वहेत् द्विजः ॥

ज्येष्ठे तु कुष्ठरोगी स्यात् विकलाङ्गे क्षयादीना ।
स्तब्धश्चक्ष कुब्ज उन्मत्तः अन्धो मूको भवेद्यदि ॥

End:

प्रसवे तु त्रिरात्रं स्यात् मृतके तु त्रिरात्रकम्।
तस्मात् सर्वप्रयत्नेन रंभाच्छेदं न कारयेत् ॥

ज्येष्ठे स्वानूढे स्वनुजो न कन्या
परिग्रहं नेति नचैवनेमम् ।
कन्यासु चान्धं बधिरात्रिनूकः(?)
पङ्गुश्च पण्डश्च न दोष भाग्भवेत् ॥

Colophon :

इति शौनकोक्तः कदलीविवाहः समाप्तः ॥

729

Sl. No. 12018 रविवारप्रथमार्तवशांतिः Ms. No. P. 4396/49

Beginning :

दिवा वा यदि वा रात्रौ सूर्यवारे रजस्वला ।
महाव्याधियुता वाऽपि दुर्मार्गाऽभिरताऽपि वा ॥

तस्मच्छान्तिं प्रवक्ष्यामि तद्दोष शमनाय च ॥

End :

रक्तवस्त्रं प्रसार्याथ तदा मत्येन पूजयेत् ।
तिलाक्षताज्याक्तहोमं ततो दानं समाचरेत् ॥
सर्वदोषविनिर्मुक्तः पुत्रवान् धनवान् सुखी ॥

Colophon :

इति रविवारप्रथमार्तवशांतिः ॥

730

Sl. No. 12021 रामर्मूतिदानपद्धतिः Ms. No. P. 9428/10

Beginning:

रचनाप्रकारः—

ग्रहणादिपुण्य× सेपु गोमयानुलेपितगृहब्रयादिरचितभूभागोपरि दर्भानास्तीर्य× × ××
यामलोक्तप्रकारेण राममूर्तिदानं करिष्ये ॥

End :

श्रीरामचन्द्रप्रीतिं कामयमानः तुभ्यमहं सम्प्रददे न मम । दक्षिणां गोद्वयं भूमिं स्वर्ण निर्मितं दद्यात् ॥

Colophon:

इति राममूर्तिदानपद्धतिः ॥

731

Sl. No. 12022 रावणहस्तशांतिः (शौनकोक्ता) Ms. No. P. 5293/65

Beginning :

शौनकोऽहं प्रवक्ष्यामि रावणस्य कराकृतिः ।
यस्य गेहे तु जायेत तद्गेहस्य विनाशनम् ॥

अथवा पशुनाशं च गृहस्थस्यैव बाधकम् ।
तस्मात्तद्दोषनाशाय शांतिकर्म समाचरेत् ॥

End :

कलशोदकेन संस्नाप्य तद्वस्त्रं तु परित्यजेत् ।
निरीक्षणाच्च दानं च फलदानं ततः परम् ॥

नीराजनं ततः कृत्वा ब्राह्मणान् भोजयेत्ततः ॥
एवं यः कुरुते मर्त्यः जीवेद्वर्षशतं ध्रुवम् ।

Colophon :

इति शौनकीये रावणहस्तोत्पत्तिशांतिः समाप्ता ॥

732

Sl. No. 12023 राशिग्रहणशांतिः Ms. No. P. 5313/10

(हेमाद्रीया-जन्मनक्षत्रराशिग्रहोपशांतिः)

Beginning :

अथ राशिग्रहशांतिरुच्यते –

अथ शांतिं प्रवक्ष्यामि ग्रहणे चन्द्रसूर्ययोः ।
जन्मर्क्षे जन्मराशौ वा ग्रहणं यस्य वा भवेत् ॥

मासातिमासषाण्मासान् मृत्युरेव न संशयः ।
पुत्रबन्धुकलत्रादिपीडनं नात्र संशयः ॥

End :

धौतवस्त्राणि सङ्गृह्य दशदानानि कारयेत् ।
जपकर्तॄन् होमकर्तॄन् संपूज्यविधिपूर्वकम् ॥

ब्राह्मणान् भोजयेद्भक्त्या यथाविभवानुसारतः ॥

एवं कृते तु विधिवच्छांतिकर्मणि मानवैः ।
सर्वारिष्टविनाशः स्यात् ग्रहदोषो न विद्यते ॥

Colophon :

इति हेमाद्रौ राशिग्रहणशांतिः समाप्ता ॥

733

Sl. No. 12024 राशिचक्रदानपद्धतिः **Ms. No. P.9428/98**
(यामलोक्ता)

Beginning

कर्ता प्राङ्मुखस्सन् दानमङ्कल्पं कुर्यात् - एवं गुणेत्यादि: मम मगत्तगापक्षयद्वारा जन्म नक्षत्र जन्मराश्यपेक्षया नामनक्षत्रनामराश्यपेक्षया + + + यामलोक्तप्रकारेण राशिचक्रदानं करिष्ये ॥

End:

गन्धपुष्पाद्यलंकृतं राशिचक्रं मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति दद्यात् . द्वादशनिष्कं दक्षिणां दद्यात् गोदानं कुर्यात् ' तदभावे वस्त्र××नि दद्यात् । शांतिसूक्तं जपेत् । यस्य स्मृत्येत्यादि ॥

Colophon:

– – – –

734

Sl. No. 12025 राहुप्रीतिदानविधिः **Ms. No. P. 604/14**
(यामळोक्ता)

Beginning :

अथातः सम्प्रवक्ष्यामि राहुशांतिमनुत्तमाम् ।
नवग्रहाणां मध्येतिक्रूरात् क्रूरतरोरगः ।।

चन्द्रो नष्टो रविर्नष्टो राहुग्रहणमात्रतः ।
त्रि॰॰यान्वितान्येषु(?) स्थितेष्वपि फणीश्वरे ॥

End:

यथाशक्त्यनुसारेण दक्षिणादानमाचरेत् ।
एवं यः कुरुते भक्त्या दोषसङ्घाविवर्जितः ॥
एतद्दानप्रभावेन धनवान् सौख्यवान् भवेत् ॥

Colophon :

इति यामळोक्त-राहुप्रीतिदानविधिः ॥

735

I. No. 12023 राहुप्रीतिदानविधिः Ms. No. P. 7970/182

(हेमाद्रीया)

Beginning :

अथातः संप्रवक्ष्यामि राहुप्रीतिकरं शुभम् ।
नवग्रहाणां मध्येऽपि क्रूरान् क्रूरतरोरगः ॥
चन्द्रो नष्टो रविर्नष्टः राहुग्रहणमात्रतः ।
त्रिषडायान्वितान्येषु स्थितेष्वपि फणीश्वरे ॥

End:

ददामि दोषनाशाय सर्वकाम्यार्थसिद्धये ।
यथाशक्त्यनुसारेण दक्षिणादानमाचरेत् ॥
एवं यः कुरुते भक्त्या दोषसंघविवर्जितः ।
एतद्दानप्रभावेन धनवान स सुखी भवेत् ॥

Colophon

इति हेमाद्रौ राहुप्रीतिदानविधिः ॥

736

Sl. No. 12041 राहुशांतिः (सारावलीया) Ms. No. P. 56839

Beginning :

यदा पीडा भवेद्राहोः नृणां त्रासविधायिनी ।
तदा शांतिः प्रकर्तव्या राहुपीडापनुत्तये ॥

पूर्ववत्कल्पिते देशे रक्तगन्धोदकोक्षिते ॥

End :

एवं यः कुरुतेशांति विधिदृष्टेन कर्मणा ।
राहुर्भवति सुप्रीतः तस्मै यच्छति वै सुखम् ॥

Colophon :

इति सारावल्यां राहुशांतिःसमाप्ता ॥

737

Sl. No. 12053 रुद्रकलशमार्जनविधिः Ms No. P. 5672/88

(सर्वरोगहररुद्रकलशोदकमार्जनविधिः)

Beginning :

नानारोगहतानां च दुस्स्वप्नभयकिंगनाम् ।
बाल्यौवनवृद्धादिग्रहरोगहरं शुभम् ॥

विषकृत्रिमसम्भूत रोगिणां कृत्यरोगिणाम् ॥

End :

चिकित्सासाध्यरोगाणां नाशयित्वा सुखी भवेत् ।
अकालमृत्युं निर्जित्य जीवेद्वर्षशतं नरः ॥

Colophon :

इति सर्वरोगहररुद्रकलशोदकमार्जनविधिः ॥

738

Sl. No. 12054 रुद्रबलिः (तापज्वरहरा) Ms. No. P. 604/54

Beginning :

अस्य रुद्रबलिः–

अङ्गदाहे ज्वरी तत्र नमकं चमकं जपेत् ।
हरेर्नाम सहस्रं वा शुद्धैः त्रिमधुराप्लुतैः ॥

End :

मन्त्रेणानेन शुद्धात्मा रुद्राय बलिमाहरेत् ।
द्वादशाहं दशाहं वा सप्तरात्रमथापि वा ॥

उत्तमे मध्यमे नीचे बलिरक्षा विधीयते ॥

Colophon :

इति तापज्वररुद्रबलिः ॥

739

Sl. No. 12056 रुद्रबलिः Ms. No. P. 2581/4

Beginning :

अथ रुद्रबलिविधिरुच्यते ।

अङ्गदाहे ज्वरी तत्र नमकं चमकं जपेत् ।
हरेर्नामसहस्रं वा शुध्देस्त्रिमधुनाप्लुतैः ॥

आम्रसत्.... पर्णैर्जुहुयाज्जातवेदसम् ।
उष्णज्वरेऽम्बुशीतैश्च चन्दनोत्सेधगन्धिभिः ॥

End :

प्रगृहाण बलिं चेमं ज्वरितस्य ज्वरापहम् ।
मन्त्रेणानेन शुध्दात्मा रुद्राय बलिमाहरेत् ॥

द्वादशाहं दशाहं वा शतरात्रिमथापि वा ।
उत्तमे मध्यमे वा स्यात् बलिरक्षा विधीयते ॥

Colophon :

इति रुद्रबलिविधिः ॥

-- 740

Sl. No. 12058 रुद्राभिषेकविधिः Ms. No. C. 5169/5

Beginning :

अथातो महाभिषेकविधिं व्याख्यास्यामः–

पञ्चामृतं गृहीत्वा देवालयं प्रविश्य देवस्य पुरस्तात् सङ्कल्प्य पुण्याहं वाचयित्वा आत्मनश्च देवस्यचाङ्गन्यासं कृत्वा ॥

End :

एकदशवारं अभिषिच्य पूर्वमन्त्रैः गन्धादिभिः अलंकृत्य अत्रभूतनामद्वयेन वामदेव्यं गायेत् दाचार्याय दक्षिणां दत्वा यथाशक्ति ब्राह्मणभोजनं कुर्यात् ॥

Colophon :

-- -- - --

741

Sl No. 12059 रुद्रयन्त्रलक्षणम् Ms. No. P. 8808/5

Beginning

त्रिपञ्चशूलं चतुरस्रकं तथा
मध्यं च साद्यं परितश्च शङ्करम् ।
बहिश्च तारं हुड्मुक्तसमन्वितं
श्रीरुद्रयन्त्रं मुनयो वदन्ति ॥

End :

वासुदेवार्चनसंहितायां गायत्रीप्रसिद्धा । भूबीजानि ॐ वं रं यं जन् दिव्याख्यबीजानि ॐ यं क्षां वं यं सं हं इत्येवम् । रुद्रयन्त्रं विलिखेत् ॥

Colophon :

इति रुद्रयन्त्रक्रमः ॥

742

Sl. No. 12060 रुद्रविधानम् Ms. No. P. 496/7

(शांतिकमलान्तरीयम् हेमाद्रीयम्)

Beginning

अथ शांतिकमलाकरे रुद्रातिरुद्रमहारुद्रशतरुद्रविधानं तत्तल्लक्षणं च। तत्र पुरश्चरणप्रकारः हेमाद्रौ–

कृच्छ्रमादौ स्वय कृत्वा पराकं च तथा पुनः ।
स्नात्वा रुद्रं समभ्यर्च्य उषित्वा सर्पशर्वरीः ॥

End :

रुद्रे मण्टपपरिमाणमाह परशुराम·–

मण्टपोष्ट गुणाः कुण्डात्
कुण्डं होमानुसारतः ॥

Colophon :

इति शांतिकमलाकरे रुद्रविधानं सम्पूर्णम् ॥

743

Sl. No. 12061 रुद्रशांतिः Ms. No. P. 55/2

(मृत्युञ्जयोक्ता यमलजननशांतिः)

मृत्युंजय उवाच–

Beginning :

रुद्रशांतिविधिं वक्ष्ये जपहोमर्चनाः क्रमात् ।
नानारोगहतानां च दुःस्वप्नभयशङ्किनाम् ॥
बाल्यौवनवृध्दादिग्रहदोषवतां नृणाम् ॥

End :

पुत्रपौत्रैः परिवृतः पुष्टिमान् बलवीर्यवान् ।
सर्वैश्वर्यसमायुक्तः जीवेद्वर्षशतं नरः ॥

Colophon :

इति श्रीमृत्युञ्जयोक्तरुद्रशान्तिः समाप्ता ॥

744

Sl No. 12070 रुद्रशांतिः **Ms. No. P. 9428/44a**

Beginning

वृध्दगार्ग्यः—

उपवासे गवां रक्षे(?) शांतिं रोगादिसम्भवे ।
भूरिशोकादिफलमरणेतॄणां × × × पणे ॥
रौद्रशांतिं प्रकुर्वीत गवां दोषापनुत्तये ॥

End:

रुद्रो गवामधिपतिः तत्कोपाज्जायते न × ।
उपसर्गश्च म × × णां शैवोप्यन्योपि जायते ॥
तद्दोषशान्तये कुर्यात् रौद्रशांतिं विधानतः ॥

Colophon:

— — — —

745

Sl. No. 12074 रुद्रशांतिः (रुद्रयामलीया-रुद्राभिषेकविधिः) **Ms No. C. 3578**

Beginning :

अथ कुम्भाभिषेकस्य विधिं वक्ष्यामि सुव्रत ।
पञ्चविंशतिमारभ्य सहस्राविधि तद्भवेत् ॥

नानारोगहरं चैव दुःस्वप्नभयनाशनम् ।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ॥

End :

स्वशक्त्या दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ।
पुत्रपौत्रैः परिवृतो जीवेद्वर्षशतं नरः ॥

Colophon :

इति श्रीरुद्रयामलोक्तरुद्रशान्तिविधिः ॥

746

Sl. No. 12076 रुद्रस्नानविधिः Ms. No. P. 6298/12

Beginning :

अथातो रुद्रस्नानविधिं व्याख्यास्यामः—आदित एव तीर्थे स्नात्वाऽहतं वासः परिधाय शुचिः ब्रह्मचारी शुक्लवासाः प्रतिकृतिं कृत्वा तस्य दक्षिणप्रत्यक्-देशे तन्मुखः स्थित्वा

End :

सर्वमवाप्नोति पायसादिमहाहविर्निवेदयेत्; आचार्याय दक्षिणां ददाति ; दशगावः सौवर्णविभूषिताः तदभाव एकां गां दक्षिणां दद्यात्; इत्याह भगवान् बोधायनः ॥

Colophon :

इति रुद्रस्नानविधिः ॥

747

Sl. No. 12077 रुद्रस्नापनविधिः (भविष्योत्तरपुराणान्तर्गता) Ms. No. C. 3014/1

Beginning :

भविष्यपुराणे, युधिष्ठिर उवाच—

रुद्रस्नानं विधानेन कथयस्व जनार्दन ।
सर्वदुःखप्रशमनं सर्वशान्तिप्रदं नृणाम् ॥

श्रीकृष्ण उवाच—

देव सेनापति स्कन्दं रुद्रपुत्रं षडाननम् ॥

End :

यत्स्नानमविचरति रुद्र इति प्रसिध्दं
श्रध्दान्वितःद्विजवरानुमते नताङ्गी ।
दोषान्निहत्य सकलान् स्वशरीरभाजे
भर्तुः प्रिया मति भारत जीववत्सा ॥

Colophon:

इति भविष्योत्तरोक्तं रुद्रस्नानम् ॥

748

Sl. No. 12078 रुद्रस्वाहाकारविभागः Ms. No. C. 496/12

Beginning :

नमस्ते रुद्र मन्यव उनो त इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते, नमः ॥ स्वाहा ।

नमस्कारप्रशान्तमन्यवे प्रार्थनाप्रसन्नधनुर्बाणालङ्कृत बाहुद्वयशालिने रुद्रायेदं न मम ॥

End :

तेनो मृडयं तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा । सर्व विषशत्रुनाशकेभ्यः अस्मत्सुखकरेभ्यः पूर्वोक्तेभ्यः सर्वेभ्यो रुद्रेभ्यः इदं न मम ॥

Colophon :

— — — —

749

Sl. No. 12080 **रुद्रहोमविधिः** Ms. No. P. 8808,1

Beginning :

यजमानस्य नक्षत्रे राशौ जातस्य नामधेयस्य गोचरमार्गे जन्मराश्यपेक्षया ये ये ग्रहाः ·+ + ·+ श्रीरुद्रमुद्दिश्य व्रीहितिलसर्पिर्मिश्रिततिलहोमं करिष्ये ॥ अथ रुद्रहोम-प्रयोगः ॥

End :

शतरुद्रीयहोमेन प्राप्नोति सुमहत्फलम् ।
मुनिभिः कथितं दिव्यं प्रायश्चित्तमिदं महत् ॥

साधको भवति श्रीमान् अपमृत्युविवर्जितः ।
इह लोके सुखी भूत्वा मृतो मोक्षमवाप्नुयात् ॥

Colophon :

इति रुद्रहोमविधिस्समाप्तः ॥

750

Sl. No. 12081 **रुद्रहोमविधिः** (बोधायनोक्तः) Ms. No. B. 321/1

Beginning :

अथातो रुद्रहोमविधिं व्याख्यास्यामः—

महोत्पाते अनावृष्ट्यां महारोगे ग्रहदीपिकायां व्रणरोगपीडायां वा, मासि मासि जन्मनक्षत्रे जन्मदिवसे संवत्सरे सर्वसंक्रमादिषु वा रुद्रहोमः कर्तव्यः ॥

End :

यस्य स्मृत्येत्यादि । श्रीपरमेश्वरः प्रीयतां इत्युक्त्वा + अनन्तरं कलशोत्तरपूजां कृत्वा, आज्यावेक्षण-गोदान-फलदानानि कृत्वा, ऋत्विग्भ्यो दक्षिणां दत्वा, गुरुपूजां कुर्यात् । एवं कृते दीर्घायुष्मान् भवतीत्याह ; भगवान् बोधायन ॥

Colophon :

इति बोधायनोक्तरुद्रहोमविधिः सम्पूर्णः ॥

751

Sl. No. 12082 रुद्रहोमविधिः Ms. No. B. 321/2

(आश्वलायनीयः रुद्रहोमान्वाधानसङ्कल्पः)

Beginning :

स्विष्टकृदादिप्रायश्चित्तमन्त्राः आश्वलायनगृह्योक्तरीत्या लिखिताः ।

अथ रुद्रहोमान्वाधानसङ्कल्पः—

अत्र देवतापरिग्रहार्थं, आज्येन आदित्यादिनवग्रहप्रधानदेवताः यथासम्भवसंख्यया तत्तत्समिच्चर्वाज्यद्रव्यैः पूजनीयः ॥

End :

दुर्गा-गणपति-क्षेत्रपाल-वास्तुपुरुषा भयङ्करमृत्युञ्जयदेवताः यथासम्भवसंख्यया तत्तन्मन्त्र तिलचर्वाज्यद्रव्यैश्च पीठावरणदेवताः तत्तन्नाममन्त्रैः एकैकसंख्यापूर्वोक्तद्रव्यैश्च शेषेण स्विष्टकृतमित्यादि ॥

Colophon :

समाप्तम् ॥

752

Sl. No. 12083 रुद्रहोमविधिः (बोधायनीया) Ms. No. C. 496/11

Beginning :

अथ बोधायनोक्तरुद्रहोमविधिः—

श्रीरुद्राय नमः । अथातो रुद्रहोमविधिं व्याख्यास्यामः—महोत्पाते अनावृष्टौ महारोगे ग्रहादिपीडायां ज्वरगरोगपीडायां वा ॥

End :

वृद्धिश्च मे, सत्यं च मे, श्रद्धा च मे, जगच्च मे, धनं च मे, वशश्च मे, त्विषिश्च मे क्रीडा च मे मोदाश्च मे, जातं च मे, जनिष्यमाणं च मे ॥

Colophon :

Extra information:

Folio 4B is blank. On folio 11, the Camaca ends in
जनिष्यमाणं च मे ।
Th first five folios are in kannada script while the rest are in DN Script.

753

Sl. No. 12084 रुद्रहोमविधिः Ms. No. C. 496/16
(रुद्राहुतिसंख्या)

Beginning:

अथ रुद्राहुतिसंख्या—

तत्र चतुर्दशसहस्राणि षट्शतानि एकचत्वारिंशच्च रूपका भवन्ति । अत्र शताङ्के एकशतम् षट्चत्वारिंशच्च रूपका भवन्ति ॥

End :

याते अग्न इत्यतिशक्वरीरिति । शिष्टा ऋचोऽनुष्टुभः । या ते रुद्र अघोरेभ्य इति स्वराडनुष्टुप् । शिष्टानि यजूंषि । इति छन्दः ।

Colophon:

इति नमकाङ्गन्यासमन्त्राणां ऋषिदेवताछन्दांसि ॥

754

Sl. No. 12085 रेवतीनक्षत्रजननशांतिः Ms. No. P. 4863/70

Beginning :

रेवत्यां दिवसे पञ्चाष्टादशद्वादशपञ्चदशदिनानि वा पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । आन्यनुमत्योर्मध्ये पूषा देवतेति भेदः ॥

End :

पञ्चपल्लवोदकेनाभिषेकं कुर्यात् । रौप्यकनकालङ्काराकृत्यां धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

-- -- -- --

755

Sl. No. 12087 रेवतीनक्षत्रजननशांतिः Ms. No. P. 9254/113

Beginning :

अथ रेवतीनक्षत्रशान्तिः-

रेवत्यां दिवसे पञ्चाष्टद्वादशदिनानि पीडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये पूषा नक्षत्रदेवतेति भेदः । पूषा देवता । स्वरूपम् ॥

End :

पञ्चपल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै रौप्यक कनकालङ्कृतधेनुं दक्षिण दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon:

इति रेवतीनक्षत्रशान्ति ॥

756

Sl. No. 12089 रेवत्यश्विनीनक्षत्रजननशांतिः Ms. No. P. 3085/51

(बोधायनीया)

Beginning :

अथातो रेवत्यश्विनीशांतिं व्याख्यास्याम:—
मध्यमपादे पुत्रजनने पित्रोर्गण्डदोष-निवृत्यर्थं शांतिं प्रकुर्वीत । शुचौ समौ देशे गोमयेन गोचर्ममात्रं चतुरश्रं स्थण्डिलमुपलिप्य चतुर्दिशशवान् दर्भानास्तीर्य ॥

End :

आचार्यादिभ्यो दक्षिणां दत्वा दोषात्प्रमुच्यते । अतः पुण्याहं वाचयित्वा अक्षय फलमाप्नोति;- इत्याह भगवान् बोधायनः ॥

Colophon :

-- -- - --

757

Sl. No. 12090 रोगग्रहविषार्तिशांतिः Ms. No P. 7499/12

(कर्मविपाकीया)

Beginning :

श्रीदाल्भ्यः—

भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपतापैश्च सर्वकालमुपद्रुताः ॥

आभिचारिककृत्याभिश्चार्शरोगाश्च दारुणाः ।
सदा सम्पद्यमानास्तु तिष्ठन्ति मुनिसत्तम ॥

End:

अङ्गुलीषु श्रीधरं च पद्माक्षं सर्वसन्धिषु ।
नखेषु माधवं चैव न्यसेत्पादजलेऽच्युतम् ॥

रोमकूपे गुडाकेशं कृष्णं रक्तास्थिमज्जसु ।
मनोबुध्योरहङ्कारे चित्ते न्यस्य जनार्दनम् ॥

अच्युतामन्दगोविन्दान्वातपित्थककफेषु च ।
एवं न्यासविधिं कृत्वा यत्कार्यं शृणु तद्द्विज ॥

पादम् × × × × × × × ×।
× × × × × × × × × × ॥

Colophon :

-- -- -- --

758

Sl. No: 12093 रोगनक्षत्रशांतिः Ms. No. P. 2914/32

(गार्ग्यमतानुसारिणी).

Beginning:

स्वात्याश्लेषारौद्रपूर्वासु शक्रे
रोगोत्पत्तिर्जायते यस्य पुंसः ।
तद्द्वेषज्यं व्याधितो निष्प्रयत्नः
तद्बुद्ध्वा व्येर्लब्धजन्मापिवेद्यैः ॥

व्याध्युती×र्यस्य पौष्णे
समन्त्रे प्राणत्राणं जायते यस्य ।
कृता वै सौम्ये रोगमुक्तस्तु मासात्
विंशत्य स्याद्वासराणां मघासु ॥

End:

अपमृत्युविनाशाय कुर्याद्रुद्राभिषेचनम् ।
अन्यानि चैव दानानि गोभूमादि स्वशक्तितः ॥

ब्राह्मणान् भोजयेत्पश्चात् प्रणिपत्य क्षमापयेत् ।
एवं कृते रोगशान्तिः भवत्येव न संशयः ॥

Colophon :

इति गार्ग्यमते रोगनक्षत्रशांतिः ॥

759

Sl No 12094 रोगनक्षत्रशांतिः **Ms. No. P. 2214/33**

(शौनकीया)

Beginning :

शौनकोऽहं प्रवक्ष्यामि व्याधितानां हिताय च ।
अग्निहोत्रसुखासीनां गार्ग्यः पृच्छति शौनकम् ॥

बन्धनं सन्निरोधं च व्याधीनां संप्रपीडनम् ।
कथं शांतिः भवेत्तेषां साध्यासाध्यं ब्रवीमि ते ॥

End:

एताः प्रधानदेवताः गायत्र्याष्टोत्तरसङ्ख्यया दूर्वाभिश्च यथासम्भवघृताक्ततिलव्रीहि-द्रव्येण स्विष्टकृज्जपप्रभृतिमेवमारम्भकर्मत्यादि सर्वेषां नक्षत्राणां तत्तन्मन्त्रैरेव नामभिर्जुहुयात् ॥

Colophon :

इति शौनकोक्तनक्षत्रशांतिविधिः ॥

760

No. 12095 रोगनक्षत्रशांतिः **Ms. No. P. 2914/34**

(वृद्धगार्ग्यमतानुसारिणी)

Beginning :

वृद्धगार्ग्यः—

अश्विन्या होमरात्रं दिनानि दशैव । अश्विनौ देवता । क्षीरान्न कृशरोपहारम् । पुष्पं नीलोत्पलम् । धूपं सघृतगुग्गुलम् । देवस्य त्वेति पूजामन्त्रः ॥

End:

अष्टोत्तरशतं सौम्यां सक्तनां जुहुयात्ततः ।
गायत्र्या चैव होतव्यं ब्राह्मणेन विपश्चिता ॥

गामेकां च सवत्सां च हिरण्यं च स्वशक्तितः।
ततः शीलविधिर्ज्ञेयो आचार्याय कुटुंबिने ॥(?)

Colophon :

इति वृध्दगार्ग्यमते रोगनक्षत्रशांतिः ॥

761

Sl. No. 12096 रोगनक्षत्रशांति Ms. No. P. 3023/121

(गार्ग्यमतानुसारिणी)

Begining:

× × × × × × × पूर्वासु शक्रे ?
रोगोत्पत्तिर्जायते यस्य पुंसः ।
तद्भैषज्यं व्याधिनो निष्क्रयः स्यात्
स्यादुर्ध्वेर्लब्धजन्मा ऽपि वैद्यः ॥

End:

अन्यानि चैव दानानि गोभूम्यादीनि शक्तितः ।
ब्राह्मणान् भोजयेत्पश्चात् प्रणिपत्य क्षमापयेत् ॥
एवं कृते रोगशांतिः भवि × × × × × ॥

Colophon :

इति गार्ग्यमते रोगनक्षत्रशान्तिः ॥

762

Sl. No. 12099 रोगनक्षत्रशांतिः (ज्योतिषार्णवीया) Ms. No. P. 5587/36

Beginning :

अथातो रोगयुक्तनक्षत्रशान्तिविधिरुच्यते—

अस्मिन्नक्षत्रे पीडपरिहारो भवत्विति । तदधिदेवताप्रतिमां सुवर्णेन स्वशक्त्यनुसारेण कारयेत् ॥

End:

संपूषन्निति पूजामन्त्रः । जगति छन्दः । वामदेव ऋषिः । पूषा देवता । चन्दनगन्धः । मन्दारपुष्पम् । गुग्गुलु धूपः । तिलतण्डुलं नैवेद्यम् । अखण्डितफलानि होमः ॥

Colophon :

इति ज्योतिषार्णवे शतसहस्रिकायां शांतिकर्मणि रोगयुक्तनक्षत्रशांतिः समाप्ता ॥

763

Sl No. 12106 रोगनाशहोमविधिः Ms No. P. 3023/142

Beginning :

पुण्याहं वाचयित्वा उपलेखनाद्यग्निप्रतिष्ठापनपूर्वं पात्रसादनान्तं कृत्वा निर्वापप्रोक्षणं स्थालीपाकक्रमेण चरुं श्रपयित्वा ॥

End :

व्याधिग्रस्तमभिषिच्य आचार्याय गोभूहिरण्य × × × × × × जयित्वा स्वयं सर्वाज्यशेषं प्राशयेत् ॥

Colophon :

इति रोगनाशहोमविधिः ॥

764

Sl. No. 12108 रोगमुक्तिशांतिहोमः Ms. No. P. 1343/6

Beginning:

योज्योगामयावी स्यात् इति सर्वायुषामिहोत्तरेया यजेत चिरोगमुक्त्यर्थं शतायुष्य-मिति वा फलनिर्देशः ॥

End :

तेनात्वायुषा युष्मन्तं करोमि इत्यनुषङ्गः । स्विष्टकृदादि सिद्धमिष्टिः । अन्वार्य-दक्षिणा ॥

Colophon :

-- -- -- --

765

Sl. No. 12109 रोगमुक्तिशांतिहोमः Ms. No. P. 9428/102
(शौनकीया)

Beginning :

शौनकः—

अथाहं सर्वरोगाणां शांतिं वक्ष्यामि शौनकः ।
× × × × × × स्यां कुर्यादितत्रिजन्मसु ॥
अथाज्यभागपर्यन्तं कृत्वा × × मादिकं ततः ॥

End

यक्षनामा ऋषिः ; राजयक्ष्मणो देवता; त्रिष्टुप् छन्दः; सौविष्टकृलिमारभ्य होमशेषं समापयेत् × ब्राह्मणान् यथाशक्ति भोजयेत् ॥

Colophon:

इति शौनकीये रोगशांतिविधिः अष्टदशः खण्डः ।

766

Sl. No. 12110 रोगमुक्तिशांतिहोमः Ms. No. P. 2914/4[8]

Beginning :

रोगनाशहोमविधिरुच्यते—

पुण्याहं वाचयित्वा, उपलेपनाद्यग्निप्रतिष्ठापनपूर्णपात्रनिधानान्तं कृत्वा निर्वापणप्रोक्षण-स्थालीपाकक्रमेण चरुं श्रपयित्वा अग्निमुखान्तं कृत्वा अवधानधर्मेण चरुमवधाय—॥

End :

मुञ्चमित्वेति पञ्चभिः चरुं हुत्वा स्विष्टकृतादि होमशेषं समापयेत्। प्रणीता पात्रोदकैः व्याधिग्रस्तमभिषिच्य, आचार्याय गोभूहिरण्यादीनि दद्यात्। ब्राह्मणान् भोजयित्वा स्वयं चर्वाज्यशेषं प्राशयेत् ॥

Colophon :

इति रोगनाशहोमविधिः ॥

आचार्याय वस्त्रप्रतिमां दत्वा ऋत्विग्भ्यो दक्षिणां ददाति । ततो दोषात्प्रमुच्यते; ततो दोषात्प्रमुच्यते; इत्याह— भगवान् बोधायनः ॥

Colophon :

श्वानशांतिस्समाप्ता ॥

Extra information:

ग्रन्थस्यास्योपलब्धिक्रमसंख्या तावत् विषयविवरणपट्टिकायां P. 3087/68 इति । अशुद्धः निक्षिप्तः । स चात्र P. 3085/68 संख्यात्वेन ग्राह्यः ॥

986

Sl·No· 12730 श्वानारोहणशांतिः Ms· No· P· 7970/120

Beginning :

अथ × × × गारेश्वानारोहणावरोहणे । × × × वायसो वा गृहं × × गृहमारोहे तथा ॥

End :

ब्राह्मणान्सपूज्यआशिशो वाचयित्वा शिवं शिव इति × × × व्याख्यात इत्याह.भगवान्बोधायनः ॥

Colophon :

इति शूनारोहणशान्तिः ॥

987

Sl· No· 12[]31 शुक्रप्रीतिदानविधिः Ms· No· P· 8889/1

(यामलोक्ता)

Beginning :

पृथगष्टोत्तरञ्चैव अष्टविंशतिमेव वा ।
त्रियम्बकेति मन्त्रेण तिलहो× × माचरेत् ॥

End

एवं यः कुरुते मर्त्यः शांतिकर्मविधानतः ।
सद्यो मृत्युभयं × × × युर्लभते नरः ॥

Colophon :

इति यामळोक्ता श्वानारोहणशांतिः समाप्ता ॥

988

Sl.No. 12732 श्वासहरादानविधिः Ms. No. C. 3662/2

Beginning :

अथ श्वाशहरजपाराधनम् पद्मपुराणे वोधायनः—

× × × × पलेनैव कुर्यात् × × × × ।
× × × × × पुतर्जतेनवा × × × ॥

End :

यदा तु श्वासहरण ×××××××× । तत्प्रतिमापूजाविधानं जातं × × प्रतिमादानमुक्तम् ॥

Colophon:

– – – –

989

Sl. No. 12733 श्वासहरदानविधिः Ms. No. C. 3611

Beginning :

श्वासखासहरध्वजपा × × दानं—

. . . . नो नरकस्यांते जायते श्वासखासवान् ।
. . . .तं तेन प्रदातव्यं सहस्रफलसं . . न् ॥

उद्यन्नथ जपः कार्या होमश्चर्वाज्ययोरपि ।
फलस्वरूपं उ . . . नर्वा त्रिचश्च परिमाप ,.नत् ॥

End :

एतत्प्रतिमापूजाविधानं तु मातङ्गो देवतातन्त्रेत्यारभ्य . . . . न्मालिप्रतिमादानमुक्तम् ॥

Colophon :

-- -- --

990

Sl. No. 12734 षष्ट्यब्दपूर्तशांतिः Ms. No. P. 3085/45

Beginning :

शौनकोऽहं प्रवक्ष्यामि षष्टीशांतिमनुत्तमाम् ।
पुनःप्राप्ते च जन्माब्दे जन्ममासे च जन्मर्हे ॥

षष्टिशांतिं प्रकुर्वीत आयुरारोग्यसम्पदः ।
मार्कण्डेयमुनेश्चापि कुर्यात् ब्राह्मणभोजनम् ॥ (?)

End:

एवं यः कुरुते शांतिं जीवेद्वर्षशतं नरः ।
शौनकोक्तन मार्गेण स . . . . जीवदम्: ॥

Colophon :

इति षष्टिपूर्तिशांतिः समाप्ता ॥

991

Sl. No 12735 षष्ट्यब्दपूर्तशांतिः (शौनकीया) Ms. No. P. 5293/66

Beginning :

षष्ट्यब्दे जननमासे च जन्मार्हे तु च लग्नके ।
आयुरारोग्यवृध्यर्थं शांतिं कुर्याद्विचक्षणः ॥

\+ + + + +

षष्ट्यब्दे आयुरारोग्यमीष्टसिध्यर्थं नित्यकर्म कृत्वा षष्टिवर्षशांतिकर्म करिष्ये इति सङ्कल्प्य + + + प्रदानकलशं चैव मध्ये संस्थाप्य पूजयेत् ॥

End :

सवस्त्रप्रतिमामाचार्याय दद्यात् । अथः पिण्डकार्पासतिलदाननिरीक्षण-आज्यदानदश-दानानि दद्यात् ॥

Colophon :

इति शौनकीये षष्टिवर्षशांतिः समाप्तः ॥

992

Sl. No. 12736 षष्ट्यब्दपूर्तशांतिः Ms. No. P. 5314

Beginning :

अथातः सम्प्रवक्ष्यामि षष्टिपूर्त्याख्यकर्मणि ।
षष्ठ्यब्दपूर्तौ कुर्वीत तन्नक्षत्रे विशेषतः ॥

षष्टिश्च सप्ततिश्चैव अशीतिर्नवतिस्तथा ।
नराणां मृत्युदस्सद्यः तस्माच्छांतिं समाचरेत् ॥

+ + + मै +
स्तित्यकर्म समाप्याथ यमुनां सम्प्रपूजयेत् ।
गीतवाद्यादिमिश्चैव वेदविद्ब्राह्मणैस्सह ॥

ब्रह्मा × × × पुण्याह वाचयित्वा सङ्कल्प्य + + + + शान्त्युक्तकलशस्थापनाख्यं कर्म करिष्यमाणः + + + शोभनदेवंताप्रीत्यर्थं नान्दीपूजाञ्च करिष्ये ॥

End:

कृष्णपक्षदेवता । समिधाज्यमद्वान्नमादाय इन्द्रक्षत्रा समातिषु रथप्रोष्टेषु धारय । दिवीव सूर्यं क्षरे स्वाहा । दिनाधिदेवता । पुनाति ते परिस्रुतं सोमं सूर्यस्य दुरिता वारेण शरद . . . . तना स्वाहा । वाराधिदेवतायेदम् ॥

Colophon :

— — — —

993

Sl. No. 12737 षष्ट्यब्दपूर्तिशांतिः Ms. No. P. 7935/16

(मार्कण्डेयपुराणान्तर्गता)

Beginning

- - - क्षणः ।

चतुर्धा वरुणे तानिन्द्रादीन् स्थापयेत्क्रमात् ॥

\+ + + +

चतुर्थ्यन्तेन मन्त्रेण वारान् सम्पूजयेत्सुधीः ।

तिथीनामपि सर्वासां चतुर्थ्यन्तेन पूजनम् ॥

End:

एवं यः कुरुते शांतिं अपमृत्युहरं परम् ।

उग्रपीडानिवृत्तिस्स्यात् राजाराष्ट्रविवर्धनम् ॥

\+ + + + +

पुत्रपौत्रादिवृद्धिं च ग्रहपीडानिवारणम् ।

धनधान्यसमृद्धिं च सम्पदायुर्विवर्धनम् ॥

Colophon:

इति श्रीमार्कण्डेये पुराणे षष्टिपूर्तिशांतिः समाप्ता ॥

994

Sl. No. 12742 षष्टिसंवत्सरशांतिप्रयोगः Ms. No. C. 4254/1

(नारदपुराणांतर्गता)

Beginning :

अथ षष्ठिसंवत्सरशांतिः—

येन दृष्टः षष्टितमो वर्षतोऽर्षायुरुच्यते ।

तत्र षष्टिशरद्रूपां शांतिं कुर्यात्प्रयत्नतः ॥

End :

अश्वत्थामो बलिव्यसी: हनूमांश्चबिभीषण: ।
:कृप: परशुरामश्च सप्तैते चिरजीविन: ॥
सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमं ।
जीवेद्वर्षशतं शांत: अपमृत्युविवर्जित: ॥

एतानष्टौ स्मृत्वा यस्य स्मृत्येति कर्मश्वरार्पणं कृत्वा ब्राह्मणान् भोजयित्वा + + +
विहरेत् ॥

Colophon :

इती नारदपुराणोक्तषष्टिवर्षसंभव-पुनर्जन्मात्मकवत्सरसंक्रमरुपापमृत्युपरिहारक-षष्टिवर्षशांति प्रयोग: समाप्त: ॥

995

No. 12743 | षष्ठयार्तवशांति: (रुद्रयामळीया) | Ms. No. P. 2239/3

Beginning:

अथ षष्ठ्यां रजस्वलाशान्ति:—

षष्ठयां रजस्वलां चैव दरि × × छंप्रय ।
षष्ठी भक्तिविहीना च सुतहीना सुदु:खिता ॥
तस्य शान्ति प्रवक्ष्यामि शुणु पुत्र समाहित: ॥

End:

महासेन महासत्व तारकासुरमर्दन ।
तव मूर्तिप्रदानेत पीडां दहतु मे गुह ॥
× × धं × × र्तौ प्रकुर्वीत सर्वसौभाग्यसंपद: ।
आयुरारोग्यमैश्वर्यं सज्जीव शरदां शतम् ॥

Colophon:

इते रुद्रयमळे षष्ठ्यार्तवशांतिः ॥

996

Sl. No. 12748 षष्ठ्यार्तवशांतिः Ms. No. P. 7970/42

Beginning :

षष्ठ्यां रजस्वला नारी दरिद्राकलहप्रिया ।
पतिभक्तिविहीना च तस्माच्छांतिं समाचरेत् ॥

End :

होमांते × × अभिषेकादिपूर्ववत् ।
आचार्याय ततो दद्यात् सवस्त्रप्रतिमां च गाम् ॥

Colophon:

इति गार्ग्योक्तषष्ठीरजस्वलाशांतिः ।

997

Sl. No. 12751 षष्ठ्यार्तवशांतिः Ms. No. P. 10041/99

Beginning:

षष्ठ्यां रजस्वलां चैव दारिद्र्यां कलहप्रदाम् ।
षष्ठीभक्तिविहीना च सुतहीना सुदुःखिता ॥

तस्य शांतिं प्रवक्ष्यामि श्रुणु पुत्र समाहितः ।
कलशस्थापनादीनि पूर्ववत्सकलं गुरुः ।
स्कन्दस्य प्रतिमां कुर्याद्यथाशक्ति सुवर्णतः ॥

End :

इत्थं शांतिं प्रकुर्वीत सर्वसौभाग्यसंपदम् ।
आयुरारोग्यमैश्वर्यं जीवेच्च शरदां शतम् ॥

Colophon:

इति रुद्रयामळे षष्ठीरजस्वलाशान्तिः ॥

998

Sl No. 12753 सकलदानमन्त्राः **Ms. No. P 8487**

Beginning :

गो-भू-तिल-हिरण्य-आज्य-वासो-धान्य-गुडानि च ।
रौप्यं लवणमित्याहुः × × × ॥
× × × गेषु तिष्ठंति भुवनानि चतुर्दश ।
तस्मादस्य प्रदानेन अतश्शांतिं प्रयच्छ मे ॥

End :

शम्भुप्रतिमादानमन्त्रः—

शम्भो प्रसिद्ध देवेश सर्वलोकेश्वर प्रभो ।
तव रूप-प्रदानेन सर्वं सन्तु मनोरथाः ॥

Colophon :

- - - - -

Extra information:

ग्रन्थान्ते मुकृष्णाजननं धनिष्ठामूडो(?) पादं इति दृश्यते ॥

999

Sl. No. 12754 संक्रान्तिजननशांतिः (पुष्कलाचार्यमतानुरोधेन) **Ms. No. P. 2239/61**

Beginning :

अथ संक्रांतिजननशांतिः....

संक्रांतावपि सम्प्राप्ते कुमारो यस्य जायते ।
मातापित्रोस्तस्य मृत्युः अथवा व्याधिपीडनम् ॥
\+ + + +

तस्य शांतिं प्रकुर्वीत ग्रहर्षिचानुसारतः ।
पुण्याहवाचनं कुर्यात् मंगलस्नानपूर्वकम् ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणाश्चैव भोजयेत् ।
इमां शांतिं प्रकुर्वीत गण्डदोषप्रशान्तये ॥

Colophon :

इति पुष्कलाचार्यमते संक्रांतिजननशांति

1000

Sl. No. 12760 संक्रांतिजननशान्तिः Ms. No. P. 7401/27

Beginning :

सम्प्राप्ते चापि संक्रान्तौ यस्य पुत्रश्च जायते ।
तस्य शांतिं प्रकुर्वीत नात्र कार्या विचारणा ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् यथाविचानुसारतः ।
इमां शांतिं च कृत्वा × × ण्डदोषात्प्रमुच्यते ॥

Colophon:

– – – –

1001

Sl. No. 12762 संक्रांतिदानविधिः (अयनदानविधिः) Ms. No. P. 2584/1[6]

Beginning

अथसंक्रांतिदानम् । अत्र विश्वामित्रः—

मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥

End

घृतपूर्णेन भाण्डेन सच्छिद्रेण अहर्निशि ।
गव्येनाच्येन वा शम्भोः प्रदद्यात् घृतकम्बलम् ॥
सर्पिषा रूषितं रम्यं कृत्वा श्रेयोविवृद्धये ॥

इति अयनदानम् ॥

Colophon :

– – – –

1002

Sl. No. 12763 संक्रांतिव्यतीपातवैधृतिजननशांतिः Ms. No. P. 2239/62

Beginning :

अथातसंप्रवक्ष्यामि शौनकीं शांतिमुत्तमाम् ।
वैधृतौ च व्यतीपाते महादोषोभिजायते ॥

+ + + +

गोमुखप्रसवं कुर्यात् शांतिं कुर्यात्प्रयत्नतः ।
ज××पेकं दाने ग्रहे × × × × विषेशतः ।
नवग्रहमखं कुर्यात् तस्य दोषोपशान्तये ॥

End :

एवं यः कुरुते मर्त्यः महत्सुखमवाप्नुयात् ।
+ + + + +
सर्वान् कामनवाप्नोति सुखी माता चिरायुषी ॥

Colodhon :

इति शौनकीये वैधृतिव्यतीपातसंक्रांतिजननशांतिः ॥

1003

Sl. No. 12764 संक्रांतिव्यतीपातवैधृतिजननशांतिः Ms. No. P. 996५/3

(शौनकीया)

Beginning :

अथातः सम्प्रवक्ष्यामि शौनकीं शांतिमुत्तमाम् ।
वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥

\+ + + +

शांतिर्वा पुष्कला कार्या सर्वदोषो न कश्चन ।
गोमुखप्रसवं कुर्यात् शांतिं कुर्यात्प्रयत्नतः ॥

End :

जापकेभ्यस्तथा दद्यात् ब्राह्मणान् भोजयेत्ततः ।
दीनानां कृपणेभ्यश्च प्रदद्यात् भूरि दक्षिणाम् ॥

Colophon

इति श्रीशौनकीये वैधृतिव्यतीपातसंक्रांतिजननरजोदर्शनादिशांतिकल्पः समाप्तः ॥

1004

Sl. No. 12766 संक्रान्तिशांतिः Ms. No. P. 60/18

(बोधायनीया)

Beginning :

यस्य त्रिजन्मनक्षत्रे पार्श्वे वार्कस्य संक्रमे ।
तस्य शांतिं प्रवक्ष्यामि सर्वसम्पत्समृद्धये ॥

स्नात्वा नित्यादिकं कृत्वा गोमयेनोपलिप्य च ।
स्थण्डिले स्थापिते कुम्भं धान्योपरि सवस्त्रकम् ॥

End :

गोभूतिलहिरण्यादि द्विजेभ्यश्च प्रदापयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् ततश्शांतिर्भविष्यति ॥

इत्याह भगवान् बोधायनः ॥

Colophon:

इति संक्रमणशांतिः ॥

1005

Sl. No. 12773 संक्रान्तिशांतिः Ms. No. P. 5635/68

Beginning :

संक्रमे जन्मनक्षत्रे महादोषाद्धि बाध्यते ।
तद्दोषशमनार्थाय शांतिं वक्ष्यामि ×××र ॥

End:

ब्राह्मणान् भोजयेत्पश्चात् यथाविचानुसारतः ।
गोभूहिरण्यदानानि कुर्यादायुष्यवृद्धये ॥

Colophon :

इति ××× सं ××× न्तिः ॥

1006

Sl. No. 12733 संक्रन्तिशूलदानविधिः Ms. No. P. 4180/59

Beginning:

अथातः सम्प्रवक्ष्यामि ब्रह्मयामिलनिर्मितम् ।
संक्रान्तौ शूलचक्रं च सद्यः प्रत्ययकारणम् ॥

त्रिकोणभं लिखेच्चक्रं शूलाढ्यं च त्रिकोणकम् ॥

End:

सर्वग्रहर्क्षतारेश सर्वसन्ततितारक ।
संक्रांतिशूलदोषं मे निवारय विभाकर ॥

Colophon

इति ब्रह्मप्रोक्ते संक्रांतिशूलदानविधिः ॥

1007

Sl No. 12784 संक्रांतिशूलादिशांतिः Ms. No. P. 9764/7
(शौनकोक्ता)

Beginning:

शौनकोऽहं प्रवक्ष्यामि संक्रान्तावभिषेचनम् ।
यस्य स्वजन्मराशौ च नक्षत्रे जननं भवेत् ॥

+ + + + +

तस्य शांति प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥

पुण्याहवाचनं कृत्वा ब्राह्मणैः पञ्चभिस्सह ॥

End :

एवं विधानतो मर्त्यो यः करोति समाहितः ।
सर्वदोषात्प्रमुच्यते चिरंजीवी भवेद्ध्रुवम् ॥

Colophon :

इति शौनकोक्तसंक्रांतिशूलादिशांतिः ॥

1008

Sl. No. 12785 संक्रांतिशूलादिशांतिः Ms. No. P. 9764/19

Beginning :

शौनकोऽहं प्रवक्ष्यामि संक्रान्तावभिषेचनम् ।
यस्य स्वजन्मराशौ च नक्षत्रे वात्र जन्मनि ॥

भवेत्सक्रमणं तत्र राशौ राश्यन्तरं भवेत् ।
तेन तस्यायुषो हानिः रोगायुर्वृद्धिहानिदः ॥

End:

एवं विधानतो मर्त्यो यः करोति समाहितः ।
सर्वदोषात्प्रमुच्येत चिरंजीवी भवेद् ध्रुवम् ॥

Colophon :

इति शौनकोक्तसंक्रांतिशूलादिशन्तिविधिः ॥

1009

Sl. No. 12786 संक्रात्यार्तवशान्तिः (रुद्रयामळीया) Ms. No. P. 2239/28

Beginning :

अथ संक्रांतिरजस्वलाशांतिः—

सङ्क्रान्तावपि सम्प्राप्ते नारीणां प्रथमार्तवे ।
तस्या मृत्युर्न सन्देहः वैधव्यं च भवेद्ध्रुवम् ॥

+ + + + + ।

तद्दोषपरिहाराय शांतिंकुर्याद्यथाविधि ।
सूर्यमूर्तिम् मृत्युमूर्तिं सुवर्णेन प्रकल्पयेत् ॥

End:

एवं यः कुरुते शांतिं सर्वगंडोपशांतये ।
दम्पत्योस्सुखमाप्नोति (?) पुत्रपौत्र × × ॥

Colophon

इति रुद्रयामळे संक्रान्त्यार्तवशान्तिः ॥

1010

Sl. No. 12793 **संतानगोपालप्रतिमादानविधिः** **Ms. No. P. 9428/58**
(कालिकापुराणीया)

Beginning:

कौतूहलयुतास्सर्वे ऋषयश्च तपोधनाः ।
× × × × नमस्कृत्य नमपृच्छंत संशयाः ॥

अपुत्राणां मनुष्याणां पुत्रावाप्तिकरं शुभम् ।
यत् व्रतं परमं लोके भुक्तिमुक्तिफलप्रदत् ॥

तत् व्रतं ब्रूहि + + + + + ।

न्यासः—

तत्र दानं प्रवक्ष्यामि पुत्रावाप्तिकरं परम् ॥

End :

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं - - - - शरणं गतः ॥

× × न सं × × × × × ।
× × × × पुत्रो जायते नराधिप ॥

Colophon :

इति कालिकापुराणोक्तसन्तानगोपालदानं समाप्तम् ॥

1011

Sl. No. 12794 संतानगोपालप्रतिमादानविधिः **Ms No. P. 9428/97**

Beginning :

रचनाप्रकारः–

मलमा × × × चतुस्थाने दिने देवालयादिपुण्यदेशेषु गोमयेनानुलिप्य + + + + T ...कृष्णप्रीतिं कामयमानः यामलोक्तप्रकारेण सन्तानगोपालदानं करिष्ये ॥

End :

नैवेद्यार्थं प्रकल्पितानि कदलीफलानि पूर्वाभिमुखस्सन् (?) बालगोपालसकृष्णं × × × × हं कदलीफलं भक्षयेत् । यस्येत्यादि । दम्पती मधुमन्त्रं भोजयेत् । यथाशक्ति × × × × भोजनं कुर्यात् । तद्रात्रौ र × × × म् ॥

Colophon:

इति सन्तान × × × × × × ॥

1012

Sl. No. 12795 सदन्तजननशांतिः (पद्मपुराणीया) **Ms. No. P. 60/15**

Beginning :

अथ दन्तजननशांतिविधिरुच्यते । तत्र पद्मपुराणेविष्णुधर्मोत्तरकण्डे परशुरामं प्रत्याह पुष्करः––

दन्तजन्मनि बालनां लक्षणं तानि बाधत (?) ।
उपरि प्रतिमं यस्य जायते विवशो द्विजाः (?) ॥

End :

ततस्त्वलंकृतं बालं आसनेषूपवेशयेत् ।
पूज्याश्च विधिनार्या वा ब्राह्मणासुहृदस्तथा ॥

इति ॥

Colophon :

इति पद्मपुराणे दन्तजननशांतिः ॥

1013

Sl. No. 12796 सदन्तजननशांतिः Ms. No. P. 60/59

Beginning :

सदन्तजन्मबालानां लक्षणं तन्निबोध मे ।
उपरि प्रथमं यस्य जायन्ते शिशोर्द्विजाः ॥

+ + + + +

तत्र शांतिं प्रवक्ष्यामि तन्मे निगदतः श्रुणु ।
गजपृष्ठगतं बालं गौम्यं वा स्थापयेद्द्विजाः ॥

End:

सदन्तजननदोषपरिहारार्थं शांतिहोमं करिष्ये ; तदंगं इत्याधारावज्येनेत्यन्तमुक्त्वा विष्णुं + + + पालशसमित्परमान्न आज्यद्रव्यैश्च शेषेण स्विष्टकृतमित्यादि । इदं विष्णुः इति विष्णु , + + + तव वायुमिति वायुम् ॥

Colophon:

ऊर्ध्वदन्तजननशांतिः ॥

1014

Sl. No. 12797 सदन्तजननशांतिः Ms. No. P. 604/43

Beginning :

शिशूनां दन्तसहितजातानां दोषशान्तये ।
जन्तूनां द्वित्रिशिरसां शांतिं वक्ष्यामि सुव्रत ॥ ।

अभयङ्करमिन्द्रं च वरुणं पूजयेद्विधिम् ।
गोभूस्वर्णान्नदानांश्च ग्रहतिथ्यादिकं यथा ॥

End :

गोभूहिरण्यदानाद्यैः तिलाज्यभवनादिभिः ।
इत्थं शांतिं प्रकुर्वीत सर्वोत्पातप्रशान्तये ॥

Colophon :

इति शिशुदन्तोद्भवशांतिः ॥

1015

Sl. No-12802 संदन्तजननशांतिः Ms. No. P. 3085/58
(बोधायनीया)

Beginning :

अथातो जातदन्तशांतिं व्याख्यास्यामः—

जन्मलग्ने पूर्वपक्षे जन्मनक्षत्रे जन्मांशे शिशोर्मातुलस्य गण्डदोषनिवृत्त्यर्थं शान्तिं प्रकुर्वीत ॥

End

ततः पञ्चगव्यं प्राश्नीयात् । शिशोर्मातुलः गण्डदोषात् प्रमुच्यते ; अक्षयफलमाप्नोति इत्याह भगवान् बोधायनः ॥

Colophon:

- - - -

1016

Sl. No. 12803 सदन्तजननशांतिः Ms. No. P. 3128/25

Beginning

दन्तैश्चसहजातानां लक्षणानां निचो × × × ।
× × परि प्रथमं × × × च शिशोर्द्विजाः ॥

दन्तैश्च सह यस्मा ... श्रुणु भार्गवसत्तम ।
मातरं पितरं × × × × × चान्मानमेव च ।
तत्र शांतिं प्रवक्ष्यामि तन्मे निगदतः श्रुणु ॥

End :

वासस्तु पुत्रमूर्धानं बीजैस्संस्नापयेत्तथा ।
स्वस्ति .... शङ्कर .... नां × × यैं च पूजयेत् ॥
पूजाश्च विधिना कार्याः ब्राह्मणान् सुहृदस्तथा ॥

Colophon:

इति सदन्तजननशांतिः समाप्तः ॥

1017

Sl. No. 12817 सदन्तजननशांतिः Ms. No. P. 9764/2

Beginning :

दन्तैश्च जातः कुलनाशकाले
मासे तृतीये यदि दन्तदर्शनम् ॥
हानिः पितुस्तस्य सुतस्य नष्टे
उक्ते सकाले च अभीष्टमेति ॥

End:

ब्राह्मणान् भोजयेत्पश्चात् तेभ्यो दद्याच्च दक्षिणाम् ।
एवं यः कुरुते शांतिं तस्माद्दोषात्प्रमुच्यते ॥

Colophon :

इति सदन्तजननशांतिः ॥

1018

Sl. No 12822 संततिस्तम्भशांतिः Ms. No. P. 4180/39
(क्रियाकल्पलतान्तर्गता–ब्रह्मपुराणीया)

Beginning:

अथातः सम्प्रवक्ष्यामि सन्ततिस्तम्भकारणम् ।
पार्वत्याः परिपृच्छन्त्याः यथोक्तं शम्भुना पुरा ॥
प्रायश्चित्तं विधायादौ विपत्नीनां च कर्मणाम् ।
सुवर्णधेनुदानाति विना कर्मण्ययोग्यता ॥

End

प्रतिबद्धमहश्चापि त्रिरावृत्तिर्निवर्तते ।
ब्राह्मणान् भोजयित्वा तु यथावित्तानुसारतः ॥

Colophon :

इति क्रियाकल्पलतायां ब्रह्मपुराणोक्तसन्ततिस्तम्भशांतिः ॥

1019

Sl. No. 12825 सपत्नीयुद्धशांतिः (शौनकीया) Ms. No. P. 6951/112

Beginning :

सपत्नीपंक्तिभेदे हपछेते (?) सपत्नीयुक्तबाधते (?) ।
व्यवहारे क्रियाहीने उद्वाहे कण्टके तथा ॥
सपत्नीबाधमानाय शांतिकर्माणि कारयेत् ॥

End :

दिने दिने शांतिहोमं दशांशेन च होमयोः (?) ।
पूर्णाहुतौ समाप्ते तु ब्राह्मणान् भोजयेत्ततः ॥

Colophon :

इति शौनकीये सापत्नियुद्धशांतिः ॥

1020

Sl. No. 12826 समानवर्णगोदानम् (भारतांतर्गतम्) Ms. No. P. 6528/3

Beginning :

अथ समानवर्णगोदानफलम् । महाभारते---

रोहिण्यां तुल्यवर्णां तु सवत्सां च पयस्विनीम् ।
प्रदत्वा वस्त्रसंवीतां सर्वलोके महीयते ॥

End

वत्सोपपन्नां नीलां गां सर्वरत्नसमन्विताम् ।
गन्धर्वाप्सरसो लोकात् दत्वा प्राप्नोति मानवः ॥

इति । सकल्पे तु तत्कालं सङ्कीर्त्य दद्यात् ॥

Colophon :

इति समानगोदानफलम् ॥

1021

Sl. No. 12827 सवटपल्लीपतनशांतिः Ms. No. P 3083/84

Beginning :

सरटस्यापि पल्याः वा पतने जायते भयम् ।
अङ्गाङ्गेषु च सर्वत्र स्थानानुगुणतो भवेत् ॥

+ + + + +

तत्र शान्तिविधानेन दुष्फलं नश्यति ध्रुवम् ।
गोचर्ममात्रं भूदेशं गोमयेनोपलिप्य च ॥

End:

एवं कृत्वा विधानेन दुष्फलं × × × किल ।
× × × सर्वापद्भ्यो × × × व ॥

Colophon :

-- -- -- --

1022

Sl No. 12829 सरटपल्लीपतनशांतिः Ms. No. P. 5635/101
(वृद्धगार्ग्यीया)

Beginning :

वृद्धगार्ग्य उवाच—

शृण्वन्तु ऋषयस्सर्वे पल्याः पतनजं भयम् ।
सरस्यापि चाङ्गाङ्गे यथा शान्त्या विनश्यति ॥
सङ्कल्पं च ततः कृत्वा कृत्वा पुण्याहवाचनम् ।
होमं पुरुषसूक्तेन कुर्यात् × × ×सि:द्धये ॥

End

ब्राह्मणान् भोजयित्वा च:दक्षिणां दापयेत्ततः ।
शांतिमेवं विधानेन सर्वापद्भ्यो विमुच्यते ॥

Colophon

-- -- -- --

1023

Sl. No. 12833 **सरटारोहणशांतिः** Ms. No. P. 604/30

(यामलोक्ता--सरटारोहणपतनशांतिः)

Beginning :

अथातः सम्प्रवक्ष्यामि सरटारोहणस्य च ।
अङ्गस्पर्शनमात्रेण रोगमृत्युभयोद्भवः ॥

सरटस्याप्यपतने स्पर्शनारोहणे तथा ।
फलमेवं विजानीयात् धर्मशास्त्रोक्तमार्गतः ॥

End:

सरटारोहणस्पर्शतत्तद्दोषा लयं ययुः ।
सुधीः श्रीमान् भुवि ख्यातः नीरोगी नात्र संशयः ॥

Colophon :

इति यामलोक्तसरटारोहणपतनस्पर्शनशांतिः समाप्ता ॥

1024

Sl. No 12837 **सवटारोहणशांतिः** Ms. No. P. 9254/122

(यामलोक्ता–शौनकीया–आरोहणं फलशांतिश्च)

Beginning :

अथातः सम्प्रवक्ष्यामि सरटारोहणस्य च ।
अङ्गस्पर्शनमात्रेण रोगदश्च भयोद्भवः ॥

\+ + + + +

अथ शांतिं प्रकुर्वीत गृहस्येशानभागतः । + +
आचार्योक्तविधानेन होमं पूजां समाचरेत् ॥

End :

सरटारोहणं स्पर्शदोषपाता लयं ययुः ।
श्रीमान् भुवि च विख्यातो नीरोगी नात्र संशयः ॥

Colophon :

इति यामलोक्तसरटारोहणस्पर्शशांतिः ॥

1025

Sl. No. 12840 सरस्वतीप्रतिमादानपद्धतिः (यामलोक्ता) **Ms. No. P. 9428/107**

Beginning :

रचनाप्रकारः—

भाद्रपदचैत्रपौर्णमास्यादि .... मलमासे + ·|· + ·|· गोमयानुलेपितरंगवल्यादिरचितभू-भागोपरि ·|· + + ·|· कामयमानः यामलोक्तप्रकारेण सरस्वतीमूर्तिदानं करिष्ये । तत्र प्रतिमापूजां + + करिष्ये ॥

End :

स्वर्णनिर्मितां × × प्रतिष्ठितां सर्वलक्षणलक्षितां + + + सरस्वतीप्रति मां मम पूर्वोक्तफलकामः × × × × सदक्षिणां दद्यात् ॥

Colodhon :

इति यामलोक्तप्रकारेण सरस्वतीप्रतिमादानपद्धतिः ॥

1026

Sl. No. 12841 सर्पपतनशांतिः **Ms. No. P. 4180 101**

Beginning :

अथ सर्पपतनशांतिः—

सर्पप्रपतनायां तु फलं वक्ष्ये पृथक् पृथक् ।
राजद्वारे सभामध्ये गृहद्वारे विशेषतः ॥

\+ + + + +

एवमादीनि यः पश्येत् शान्ति वक्ष्ये यथाक्रमम् ।
गृहशुद्धिं प्रकुर्वीत होमशालां प्रकल्पयेत् ॥

End :

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।
अभिषेकं तु पूर्वोक्तं ब्राह्मणान् भोजयेत्ततः ॥

Colophon :

\- - - - - -

1027

Sl. No. 12842 **सर्पबलिशान्तिविधिः** **Ms. No. P. 2972/3**

(शौनकीयः)

Beginning :

शौनकोऽहं प्रवक्ष्यामि बलिं सार्पं कथं भवेत् ।
इह जन्मनि चाहन्यात् जन्मजन्मान्तरेष्वपि ॥ +

तद्दोषशमनार्थाय बलिं सार्पं च कारयेत् । + +
शुभेवारे शुभर्क्षे च कृत्यां वा विशेषतः ॥ (?)

End :

इतरेषां तु × × × × मृत्युञ्जयजपं तथा
होममन्त्रं ततः कुर्यात् शौनकोक्तमुदीरितम् ॥

Colophon:

इति शौनकोक्तसर्पबलिशान्तिः सम्पूर्णा ॥

1028

Sl. No. 12844 सर्पबलिशान्तिविधिः Ms. No. P·8023/10

Beginning :

सर्पबलिविधिरुच्यते—

सर्पाकारं कृत्वा, एवंगुणेत्यादितिथौ मम इह जन्मनि जन्मान्तरे कृतसर्पवधदोषादि-परिहारार्थं सर्पसंस्काराङ्गबलिप्रदानं कर्तुं मुख्याकालो भूत्वा आधिकारसम्पदस्त्विति भवन्तो ब्रुवन्तु ॥

End:

इति नवनागतर्पणं कुर्यात्, कर्ता स्नात्वा चम्य धौतवस्त्रं परिधाय, नित्यकर्म निर्वर्त्य ब्राह्मणानां दक्षिणां दत्वा गृहं व्रजेत् ॥

Colophon :

इति सर्पबलिः समाप्तः ॥

1029

Sl· No· 12845 सर्पबलिशांतिविधिः (नागबलिः) Ms· No C· 2627/2

Beginning

अथातो हतानां अनन्तादीनां नागबलिं व्याख्यास्यामः—

स च दक्षिणायने कार्यः । अमावास्यां + + + आश्लेषानक्षत्रे वा कार्यः + + + + नूतनवस्त्रे पञ्चफणं नागमूर्तिद्वयं कृत्वा + + नागमावाहयेत् ॥

End :

एवं यः कुरुते लोके सर्पसंस्कारमादरात् ।
तस्य पुत्राः प्रजायन्ते सुशीलश्च चिरायुषः ॥
पूर्वजन्मनि सर्पस्य वधपापात्प्रमुच्यते ॥

इत्याह भगवान् बोधायनः । + + + दशदानादि दद्यात् ॥

Colophon :

इति नागबलिः समाप्तः ॥

1030

Sl. No. 12846 सर्पशांतिविधिः **Ms. No. P. 2282/13**

(बोधायनीया)

Beginning :

अथातः सर्पशान्तिविधिं व्याख्यास्यामः-

जन्मान्तरसह × × पु गूढपाद्धननं यदि ।
पुनपुनस्तु दोषाय कल्पितं कर्मबन्धनात् ॥

End :

दशदानानि कुर्वीत × × × देव च ।
ताम्बूलफलदानानि कुर्यादभ्युदयाय च ॥

ब्राह्मणान्भोजयेत्पश्चादाशिषो वाचयेत्ततः ।
एवंकृते सर्पदोषः तत्क्षणेदेव नश्यति ॥

सुपुत्रं लभते चापि व्रती तु श्रियमाप्नुयात् ॥

इत्याह भगवान्बोधायनः ॥

Colophon :

— — — —

1031

Sl.No. 12847 सर्पशांतिविधिः **Ms. No. P. 4154/45**

Beginning :

अथ सर्पशांतिविधिः-

जन्मान्तरसह × × × हनमं यदि ।
पुन × × × दोषाय कल्पितात्कर्मबन्धनात् ॥

End :

एवं कृते सर्पदोषः तत्क्षणेन विनश्यति ।
सुपुत्रं लभते चापि व्रती तु श्रियमाप्नुयात् ।।

Colophon:

इति सर्पशान्तिविधिः ।।

– – – –

1032

Sl. No. 12850 सर्पसंस्कारनारायणबलिः **Ms. No. P. 4640/5**

Beginning :

अथ सर्पसंस्कारनारायणबलिः । कर्ता–

चतुर्थाहनि संप्राप्ते सचेलं स्नानमाचरेत् ।
पुण्याहवाचनं कृत्वा ब्राह्मणान्भोजयेदथ ।।

End :

यस्यस्मृत्येत्यादिमयाकृत-सर्पसंस्कारांगनारायणबलि-ब्राह्मणभोजनेन अनन्ताद्यष्टनागमूर्तयः सुप्रीताः सुप्रसन्नाः वरदाभवन्तु सर्वमुपवीतिना कार्यं ।।

Colophon

इति सर्पनारायणबलिविधिः समाप्तः ।।

1033

Sl. No. 12851 सर्पसंस्कारविधिः **Ms. No. P. 60/37**

(शौनकीया)

Beginning :

अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमम् ।
सिनीवाल्यां पौर्णमास्यां पञ्चम्यां कारयेत्ततः ।।

कृते सर्ववधे विप्र पूर्वजन्मनि वा इह ।
स्नात्वागत्य ततो ब्रह्मदण्डं दद्याद्द्विजातये ॥

End :

एवंकृते विधानेन सर्पसंस्कारकर्मणि ।
सर्पहिंसाकृतात् पापात् मुच्यते नात्र संशयः ॥

कुष्ठव्याध्यादिभिर्मुक्तः स सद्यो भेषजं शिवदम् ।
आयुरारोग्यमैश्वर्यं प्राप्य कामानवाप्नुयात् ॥

Colophon :

इति शौनकीये सर्पसंस्कारविधिः ॥

1034

No. 12852 सर्पसंस्कारविधिः Ms. No. P· 60/56
(प्रयोगात्मिका–प्रयोगकौस्तुभीया-संस्कारकौस्तुभीया

Beginning:

अथ नागसंस्कारप्रयोगः–

स तु शिनीवाल्यां पौर्णमास्यां पञ्चम्यां आश्लेषायुक्तनवम्यां वा कार्यः। परिषदं - - - द्विनिष्कं तदर्धं वा निधाय मम इह जन्मनि + + जातसर्वविधसर्पदोषपरिहारार्थं प्राय × × × × × ×

सर्वे धर्मविवेक्तारः गोप्तारः सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥

End:

कृत्वा सर्पस्य संस्कारं अनेन विधिना ततः ।
विरोगो जायते क्षिप्रं सन्ततिं लभते शुभाम् ॥

\+ + + + +

क्षणात् पापविशुद्धात्मा विष्णुलोके महीयते ॥

ततः ब्राह्मणभोजनम् ॥

Colophon:

इति कौस्तुभे नागसंस्कारनागबलिविधानम् ॥

1035

Sl. No. 12856 **सर्पसंस्कारविधिः** **Ms. No. P. 4640/4**

Beginning :

दक्षिणोत्तरायणयोर्वा अमायां पौर्णमायां पञ्चम्यां अश्लेषां - - - - युक्तनवम्यां - - - - सुदिने शुभनक्षत्रे चन्द्रतारावलान्विते । शुभदिने .... संस्कारं कुर्यात् ॥

End :

सर्पोनन्तस्तथा शेषः कपिलो नाग एव च ।
कालिंगः शंखपालश्च धृतराष्ट्रः प्रकीर्तिताः ॥

Colophon:

इति सर्पसंस्कारविधिः समाप्तः ।

1036

Sl. No. 12859 **सर्पसंस्कारविधिः** **Ms. No. P. 5635/13**

Beginning:

ज्ञानतोऽज्ञानतो वापि मारिते सर्पे × × × ।
तत्र शान्ति प्रकुर्वीत × × × हनि ॥

आचार्यवरणं कुर्यात् गणेशस्तवनं ततः ।
सङ्कल्प्यं च ततः कृत्वा आसने सुसमाहितः ॥

End :

ब्राह्मणान् भोजयित्वा च बहुभूरि च दक्षिणाः ।
दद्यात् गां चापि गुरवे × × × ॥

Colophon

इते मरणतन्त्रे सर्प × × × × × षः ॥

1037

Sl. No. 12866 सर्पसंस्कारविधिः Ms. No. P 7444/14

Beginning :

ज्ञानतोऽज्ञानतो वापि सर्पो यदि मृतिर्भवेत् ।
संस्कारस्तस्य कार्तव्यः ब्राह्मेण विधिना तदा ॥

End :

सर्पसंस्कारसन्तुष्टः सर्पाधीशः × × श्वरः ।
ददाति × × × कामान् × × × × मपि ॥

Colophon :

– – – –

1038

Sl. No. 12867 सर्पसंस्कारविधिः Ms. No. P. 7561/18

Beginning :

सर्पसंस्कारविधिरुच्यते–

आषाढादिपञ्चमासेषु + + वाह्यनक्षत्रयुतदुष्टतिथिषु नागसंस्कारः ।

अश्वत्थब्रह्मवृक्षयोरन्यतरवल्मीकं वा गत्वा + + गोधूमपिष्टेन सर्पमिथुनं कृत्वा, प्रार्थनमन्त्रः–

पूर्वजन्महतस्सर्प अस्मिन् पिष्टे समाविश ।
त्वत्संस्कारमहं कृत्वा प्रार्थयामि समाहितः ॥

End :

नमोऽस्तु सर्पेभ्यः – + + नमः सुलिकवासुकि-तक्षक-कार्कोटक-शंखपाल-पद्माक्ष-महाभिदः । एवं क्रमः । एवो विष्णुः + + + विश्वसुगव्ययः । अनेन ब्राह्मणसमाराधनेन भगवान् सर्वात्मकः अनन्तः प्रीतो वरदो भवतु ॥

Colophon :

– – – – –

1039

Sl. No. 12879 सर्पसंस्कारविधिः (शौनकीया) Ms. No. P. 10070/6

Beginning :

अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमम् ।
सिनीवाल्यां पौर्णमास्यां पञ्चम्यां कारयेत्ततः ॥

End :

हतसर्पं जलैश्चैव अभिषिञ्चेत्ततः परम् ।
आयुरारोग्यमैश्वर्यं प्राप्य काममवाप्नुयात् ॥

Colophon :

इति शौनकीये सर्वसंस्कारविधिः समाप्तः ॥

1040

Sl. No. 12886 सर्वकर्मवैगुण्यशांतिः Ms. No. P. 5635

ब्राह्म × य, नित्य × × र्थं स्वाचान्तः × × मण्टपे उपविश्य पत्न्या सह प्राणनायम्य एवंगुणेत्यादि सङ्कल्प्य सर्वकर्मवै × × शांतिं × ष्ये ॥

End :

ब्राह्मणान् भोजयित्वा आचार्याय बहुदक्षणाभिः सं × × यस्य स्मृत्येत्यादि × कुर्वीत ; इत्याह भगवान् बोधायनः ॥

Colophon :

– – – – –

1041

Sl. No. 12887 सर्वगण्डान्तशांतिः Ms. No. P. 9965/90

Beginning :

अथ सर्वगण्डान्तशांतिविधिरुच्यते ॥

अथातः सम्प्रवक्ष्यामि जन्मकाले विशेषतः ।
गण्डान्तानां च नामानि महद्दोषाकराणि च ॥

\+ + + + ॥
विचार्य तत्र दैवज्ञः शांतिं कुर्याद्यथाविधिः ॥

End :

अभिषेकं शङ्कराय अश्वत्थस्य प्रदक्षिणम् ।
आयुर्वृद्धिकरं चैव सर्वारिष्टविनाशनम् ॥

Colophon :

इति श्रीगार्ग्योक्तसर्वगण्डान्तशांतिः समाप्ता

1042

Sl. No. 12888 सर्वग्रहयोगशांतिः (यामलोक्ता) Ms. No. P. 2914/52

Beginning

अथातः संप्रवक्ष्यामि ग्रहाणां कूटजं फलम् ।
एकराशौ ग्रहास्सर्वे कार्तवीर्यो हतः कृते ॥

त्रेतायां रामभद्रश्च राज्यभ्रष्टो वनं गतः ।
द्वापरे पाण्डुपुत्रस्तु कलौ सर्वजनक्षयः ॥

यस्य त्रिजन्म नक्षत्रे जन्मदास्याष्टमोऽपि (?) वा ।
सप्तमे वा चतुर्थे वा व्यवस्थानेषु योगतः ॥

+ + + + ।

तद्दोषशमनार्थाय शान्तिकर्म समाचरेत् ॥

End :

एवं यः कुरुते शांतिं ग्रहदोषापनुत्तये ।
आयुरारोग्यमैश्वर्यं धनधान्यमवाप्नुयात् ॥

Colophon:

इति मामळोक्तनवग्रहयोगशांतिः ॥

1043

Sl·No·12890 सर्वज्वरहरकुम्भदानविधिः Ms. No·P· 8923/17

(पद्मपुराणांतर्गता)

Beginning :

अथ सर्वज्वरहरकुम्भदानम् । पद्मपुराणे–

आगार···ज्वरवान् जायते तत्र निष्कृतिः ।
नवकुम्भं × × × × ॥
लोहितं काष्ण्यंरहितं स्थापयेत्तण्डुलोपरि ॥

End :

सुवर्णेन यथा शक्नोति सुवर्णेन युक्तं कुम्भं निवेदयेदित्यन्वयः । महेश देवदेव इत्यारभ्य श्लोकद्वयं दानमन्त्रात्मकम् ॥

Colophon :

इति कुम्भदानविधिः ॥

1044

Sl. No. 12891 सर्वज्वरहरशांतिः Ms. No. P. 7970/76

Beginning :

अथ—

वलिकर्मप्रवक्ष्यामि सर्वज्वरनिवारणं ।
××××× ज्वरान्मुक्तो × × × ×॥

End:

दानमन्त्रः—

भस्मायुधाय विद्महे त्रिशिरस्काय धीमहि ।
तीक्ष्णदंष्ट्राय धीमहि तन्नो ज्वरहरः प्रचोदयात् ॥

Colophon :

इति सर्वज्वरहरशांतिः ॥

1045

Sl. No 12892 सर्वज्वरहरशांतिः Ms. No. P. 9254/155

Beginning :

अथ सर्वज्वरहरशांतिः—

वलिकर्म प्रवक्ष्यामि सद्यो ज्वरनिवारणम् ।
यस्मिन्वृते ज्वरान्मुक्तो जन्तुर्जीवति निश्चयः ॥

End:

× × × × सुखं दद्यात् स चामयप× × × ।

दानमन्त्रः—

भस्मा×धाय विग्दहे ; दीर्घदंष्ट्रायधीमहि ; तं नो ज्वरः प्रचोदयात् ॥

Colophon :

इति सर्वज्वरशांतिः ।।

1046

Sl No. 12894 सर्वदानमन्त्राः (दानपद्धतिः) **Ms. No. P. 8410/37**

Beginning :

गोदानमन्त्रः–

यज्ञसाधनभूताय विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ।।

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यात् अतः शांतिं प्रयच्छ मे ।।

End

तण्डुलदानम्–

तण्डुलं जायते शश्वत् प्राणिनां प्राणरक्षणम् ।
तस्मात्तण्डुलदानेन प्रीयतां वैश्वदेवताः ।।

Colophon

इति दानपद्धति समाप्तः ।।

1047

Sl. No. 12895 सर्वपापहरशांतिः (त्रिशूलदानविधिः) **Ms. No. P. 3804/77**

Beginning

अथ शूलदानम् . वायुपुराणे । ऋषयः ऊचुः–

समीरण जगत्प्राण पच्चमान . . . . . कथा विभो
वक्तुमर्हसि वो दानं येन पापं व्यपोहति ।।

End :

ब्राह्मणान् भोजयित्वा यथाशक्ति दक्षिणां दत्वा सर्वापद्भ्यो विमुच्यते; इत्याह वैदिकसार्वभौमः ॥

Colophon

-- -- --

1055

Sl. No. 12908 सर्वशांतिविधिः (पितामहोक्ता) **Ms. No. P. 9764/3**

Beginning :

अथातः सम्प्रवक्ष्यामि सर्वेषां शान्तिकर्मणाम् ।
शृणु नारद यत्नेन गण्डदोषोपशान्तये ॥

यजनं चाय × × × च विप्राणां चैव पूजनम् ।
कारयेत्प्रयतो भक्त्या दीपदानं शिवाय च ॥

End

अनेन विधिना शांतिं कुर्यात्सम्यग्विधानतः ।
आयुरारोग्यवृद्धिश्च तुष्टिपुष्टिविवर्धनम् ॥

सर्वशान्तिकरं पुण्यं सौख्यं चैव प्रजायते ॥

Colophon :

इति पितामहप्रोक्तसर्वशांतिप्रकारः ॥

1056

Sl. No. 12909 सर्वशांतिविधिः **Ms. No. P. 9786/48**
(मूलाश्लेषादिसर्वशांतिः– नारदं प्रति ब्रह्मोक्ता)

Beginning :

अथातो मूलाश्लेषादिसर्वशांतिविधिं व्याख्यास्यामः—

पुण्याहे दम्पत्योश्चन्द्रताराबलान्विते पूर्वाह्णे + + + प्राणानायम्य तस्य पत्नी दुष्टनक्षत्रे + + प्रथमरजस्वलासती यो दोषः समजनि तद्दोषपरिहारार्थं शांतिकर्म करिष्ये ॥

End :

ब्राह्मणेभ्यो दक्षिणां दद्यात् ; पङ्गुहीनानात् अन्धान् कृपणं च सन्तर्प्य नीलाञ्जनमनुह्य शतं पञ्चाशत्-पञ्चविंशतिब्राह्मणान् भोजयित्वा यस्य स्मृत्येति समर्पयेत् ॥

Colophon :

इति ब्रह्मनारदप्रोक्तमूलाश्लेषासर्वशांतिविधिः सम्पूर्णः ॥

1057

Sl. No. 12911 — सर्वशांतिविधिः — Ms. No. P 9965/1

(सर्वशांतिखण्डः)

Beginning :

अथातः शांतिकल्पविधिं व्याख्यास्यामः—

पुण्याहे दम्पत्योः चन्द्रताराबलान्विते पूर्वाह्णे + + + पुण्याहं वाचयित्वा तस्य पत्न्याः + + प्रथमरजस्वला यो दोषः समजनि तद्दोषपरिहाराद्वारा तन्नक्षत्राधिदेवताप्रीत्यर्थं शांतिकर्म करिष्ये ॥

End:

आचार्याय गां दद्यात् । ब्राह्मणेभ्यो दक्षिणां दत्वा पक्वाद्यैरन्धकृपणजडादीनां सन्तर्प्य शतं पञ्च पञ्चविंशतिर्वा ब्राह्मणन् भोजयेत् ॥

Colophon:

इति सर्वशान्तिखण्डः समाप्तः ॥

1058

Sl. No. 12912 — सर्वशांतिविधिः — Ms. No. P. 9965/104

(सर्वशांतिअभिषेक अ.ज्यावेक्षणादिमन्त्राः)

Beginning :

प्रागर्चाभिषेकार्थं मण्टपं चैव कारयेत् ।
तत्र मण्टपमध्ये च स्थापयेद्भद्रपीठकम् ॥

....

त्रयाणामभिषेकार्थं भद्रपीठे निवेशयेत् ।
आद्यपादे पितुर्गण्डे त्रयाणामभिषेचनम् ॥

+ + + + +

समुद्रज्येष्ठमन्त्रैश्च देवस्य त्वा तथैव च ।
आपोहिष्ठेति तिसृभिः पुनन्तु मामिति मन्त्रतः ॥

End :

कल्याणजनकं पुण्यं सर्वकल्मषनाशनम् ।
आयुर्वृद्धिकरं यस्मात् कुर्यादाज्यावलोकनम् ॥

Colophon :

इति सर्वशान्तिषु अभिषेकमन्त्रः समाप्तः ॥

1059

Sl. No. 12913 **सर्वाद्भुतशांतिः** **Ms. No. P 734/19**

(सर्वोत्पातशांतिः- शौनकोक्ता)

Beginning :

अथैतान्यन्तरिक्षाद्यद्भुतानि निबोधत ।
गगनं लोहितं पश्येत् पश्येद्वा काकमैथुनम् ॥

+ + + + +

एवमादीन्यसंख्यानि आकाशप्रभवानि च ।
अथ नामानि वक्ष्यामि निदर्शनविवक्षया ॥

End

अद्भुतोत्पातदोषाश्च नाशं यान्ति न संशयः ।

+ + + + +

आयुरारोग्यमैश्वर्यं वेदोक्तायुर्भविष्यति ॥

Colophon:

इति सर्वशाखासम्मते शौनकोक्ते सर्वोत्पातशांतिः समाप्ता ॥

1060

Sl.No. 12916 सर्वाद्भुतशांतिः **Ms. No. P. 5313/31**

(सर्वोत्पातशांतिः-- शौनकोक्ता)

Beginning :

अथ सर्वाद्भुतशान्तिविधिरुच्यते—

अद्भुतानां च सर्वेषां शांतिं वक्ष्यामि शौनकः ।
आश्चर्यमद्भुतं पश्येत् लक्षणेन समाहितः ॥

+ + + + +

एवमादीन्यसंख्यानि आकाशप्रभवानि च ।

+ + + + +

एतेषां शमनार्थाय होमः कार्यो द्विजातिभिः ।

तस्मिन्नहनि कर्तव्यः शांतिहोमो यथाविधि ॥

End :

एवं यः कुरुते शांतिं तस्यायुर्वर्धते सदा ।

+ + + + +

सर्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति सर्वशाखासम्मते शौनकीये सर्वाद्भुतशान्तिविधिः समाप्तः ॥

1061

Sl. No. 12024 सर्वाद्भुतशांतिः (बोधायनीया) Ms. No. P. 10083/23

Beginning :

अथातः सर्वाद्भुतशांतिं व्याख्यास्यामः—

कपोतगृध्रकाकशिरोपरोधे + + + सर्वेष्वद्भुतेषु समिदाज्यचरु .... क्ष्यमाणो महान्तं मानस्तोके प्रजापते त्रियम्बक + इति प्रतिमन्त्रं प्रधानाहुतीर्हुत्वा, ।।

End :

स आज्यावेक्षणं दश दानानि दद्यात् । ब्राह्मणेभ्यो × × × × × × दि-त्याह भगवान् बोधायनः ।।

Colophon :

– – – –

1062

Sl. No. 12926 सर्वारिष्टशांतिः. (ज्योतिषार्णवीया) Ms. No. P. 3023/61

Beginning :

प्रणिपत्य रविं वक्ष्ये प्रायश्चित्तमनुत्तमम् ।
सर्वारिष्टविनाशाय यदुक्तं ज्योतिषार्णवे ।।

आदित्य उवाच—

शृणुष्व च ततो ब्रह्मन् यन्मां त्वां परिपृच्छसि ।
बाल्यानां मूलजातानां गण्डान्ते च विशेषतः ॥

End :

ततश्शिशु × × × × दानहोमब्राह्मणभोजनरुद्राभिषेकाश्वत्थप्रदक्षिणादीनि कुर्यात् ॥

Colophon :

– – – –

1063

Sl. No. 12927 सर्वारिष्टशांतिः (बोधायनोक्ता) Ms. No. P. 5587/1

Beginning :

शान्तिप्रकरणविधिरुच्यते । तत्रादौ सर्वशाखासम्मतबोधायनोक्तसर्वारिष्टशान्तिविधि-रुच्यते । अथातः सर्वशांतिविधिकल्पं व्याख्यास्यामः—

दम्पत्योश्चन्द्रताराबलान्विते पूर्वाह्णे + + प्राणानायम्य तस्य पत्न्याः जन्मराश्यपेक्षया + + यो दोषः समजनि तद्दोषपरिहारार्थं सर्वारिष्टशांतिं करिष्ये ॥

End :

आचार्यपूजां कुर्वीत प्रतिमां गां प्रदापयेत् ।
अन्येभ्यो दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ॥

Colophon :

इति बोधायनोक्तसर्वशाखासम्मतसर्वशांतिविधिः समाप्तः ॥

1064

Sl. No. 12929 सर्वारिष्टशांतिः Ms. No. P. 7401/23

Beginning :

अथातः सर्वारिष्टशांतिं व्याख्यास्यामः—

शुभेऽहनि गोचर्ममात्रं भूदेशं गोमयेनोपलिप्य मङ्गलस्नानादि कृत्वा प्राणानायम्य मूलादिजातगण्डशान्त्यर्थं सर्वारिष्टशांतिकर्म करिष्ये ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् दक्षिणां दापयेत्तदा ।
एवं कृत्वा विधानेन सर्वापद्भ्यो विमुच्यते ॥

Colophon :

-- -- -- --

1065

No. 12933 सस्यविकारशांतिः Ms. No. P. 604/46

Beginning:

कालेषु सर्वदेशानां एकस्मिन् द्विलिसम्भवे ।
अरण्यान्ते ददीशानधर्मपुष्पपाल (?) यदि ॥

वृक्षसस्यलतादीनां अतिवृद्धिफलादिभिः ।
शत्रोरागमनं वाच्यं अचिरान्नियमेन च ॥

\+ \+ \+ \+ \+

विकारफलपुष्पाद्यैः ओषधीशं च पूजयेत् ।
सुवर्णेन यथा शक्त्या भूमिरूपं जलेश्वरम् ॥

End:

तस्य विकारं तत्क्षेत्रं दत्वा विप्राय तत्त्ववित् ।
ग्रहहोमविधानेन शेषं पूर्ववदाचरेत् ॥

Colophon:

इति सस्यविकारशान्तिः ॥

1066

Sl. No. 12935 सहस्रकलशाभिषेकविधिः Ms. No. P. 2732/13

(विधिप्रयोगात्मिका–बौधायनोक्ता)

Beginning:

अथातस्सहस्रकलशाभिषेकविधिं व्याख्यास्यामः–

जन्मर्क्षे पुण्यनक्षत्रे भूतोपसृष्टे दीर्घरोगे + + + अन्येषु मङ्गलकार्येष्वपि शांतिमेतत् समाचरेत् । राष्ट्रोत्पाते राजा कुर्यात् ।

अथ प्रयोगः– पूर्वेद्युरेकभुक्तं कृत्वा आदौ देवतीर्थे स्नात्वा उदेत्याहतं वासः परिधाय + + + + + सङ्कल्पं कुर्यात् ॥

End :

अनेन विधिना शांतिं कुर्याद्धीमान् विधानतः ।
आयुरारोग्यवृद्धिश्च तुष्टिपुष्टिफलप्रदा ॥
सर्वक्रतुफलं पुण्यं सौख्यं चैव प्रजायते ॥

Colophon :

इति बोधायनोक्तसहस्रकलशस्नानप्रयोगः समाप्तः ॥

1067

Sl. No. 12936 सहस्रकलशाभिषेकविधिः Ms. No. P. 3737/2

Beginning :

सहस्रकलशाभिषेकविधिः लिख्यते–

राज्ञो राष्ट्रस्य च क्षेमाद्यर्थं समस्तदुरितोपशान्त्यर्थं + + + श्रेयःप्राप्त्यर्थं देवदेवस्य सहस्रकलशैः अभिषेचनं कुर्यात् ॥

End :

तस्य दक्षिणतः पुनः विधितयं त्यक्त्वा पुनरेको × × × रमृज्य एवं × × × अनामेय × × × कं कोष्ठचतुष्टयं च सर्वैरपि संभूय एकोनपञ्चाशत् कोष्ठानि शिष्टानि भवन्ति । अन्यानि द्वात्रिंशत्कोष्ठानि भवन्ति ॥

Colophon:

– – – –

Extra information:

सप्तमे प्रयोगः अष्टमे च पत्रे सहस्रकलशाभिषेकविधिः अनुवर्तते ॥

1068

Sl. No. 12937 सहस्रकलशाभिषेकविधिः Ms. No. C. 2647

(शौनकोक्तः)

Beginning :

शौनकोक्तसहस्रकुम्भाभिषेकः–

शौनकोऽहं प्रवक्ष्यामि सर्वरोगनिवृत्तये ।
विधिं कुम्भाभिषेकस्य सहस्रस्य वदाम्यहम् ॥

नानारोगहतानां च दुस्स्वप्नभयशङ्किनाम् ।
बालयौवनवृद्धानां ग्रहदोष × × णाम् ॥

End:

एवं कृते सर्वरोग × × × सद्यो विनश्यति ।
+ + + +

अनेनैव विधानेन यः कुर्यात्स सुखी भवेत् ॥

Colophon :

इति शौनकोक्तसहस्राभिषेकः ॥

1069

Sl. No. 12938 सहस्रचन्द्रदर्शनशांतिः Ms. No. P.60/35

(शौनकीया-- शताभिषेकविधिः)

Beginning:

शताभिषेकं वक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।
अथोत्तरायणे पुण्ये पूर्वपक्षे शुभे दिने ॥

सिद्धियोगे सुलग्ने च गुरौ शुक्रौ प्रकाशिते । +
पुण्याहं वाचयित्वाभिमुखं पूर्ववदाचरेत् ॥

End :

पद्भिः पुनाति विप्राद्यैः षष्टिवर्षसहस्रकम् ।
स्वर्गलोकमतिक्रम्य विष्णुलोके महीयते ।।

Colophon :

इति शौनकीये शताभिषेकविधिः समाप्तः ॥

1070

Sl. No. 12939 सहस्रचन्द्रदर्शनशांतिः Ms. No. P. 21177
(शताभिषेकविधिः—बोधायनीया)

Beginning:

अथातः शताभिषेकविधिं व्याख्यास्यामः—

शतवत्सरजीविनः × × चन्द्रजीविनो वोदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे ब्राह्मणानन्येन परितोष्य पुण्याहं स्वस्ति ऋद्धिरिति वाचयित्वा, ॥

End :

एकविंशतिं पुनाति । पुत्रपौत्रैः षष्टिमतिक्रम्य ब्राह्मणः सायुज्यं सलोकतां आप्नोति इत्याह भगवान् बोधायनः ॥

Colophon:

इति शताभिषेकविधिः ॥

1071

Sl. No. 12942 सहस्रचन्द्रदर्शनशांतिः Ms. No. P. 3646/14
(जैमिनीया)

Beginning :

अथातः शताभिषेकविधिंव्याख्यास्यामः—

शता[illegible]जीवी [illegible]चन्द्रदर्शी चे....ळ वटुपनयानादि × × × × त हविष्यमन्न-मकादनमकमुक्त भुर्त्वा प्राक्त नक्षत्रे × × × × सङ्कल्प्य मम × × × × × कारे × × ॥

End :

एवंकृते राज्यराष्ट्रवृद्धिर्भवति । आयुरभिवृद्धिर्भवति । समृद्धिरभिषेकस्य सर्वपापमोक्षो ब्राह्मणस्समायुज्यं गच्छति ; इत्याह– भगवान् जैमिनिः ॥

Colophon :

– – – –

1072

Sl. No. 12994 सहस्रचन्द्रदर्शनशांतिः **Ms. No. P 5313/54**

(बोधायनीया-- शताभिषेकविधिः)

Beginning :

अथ शताभिषेकविधि व्याख्यास्यामः---

शतसंवत्सरजीवी सहस्रचन्द्रदर्शने वा उद्गयनापूर्यमाणपक्षे कल्याणे नक्षत्रे ब्राह्मणानाहूय पुण्याहं वाचयित्वा प्रणीताभ्यः कृत्वा ·|· + + चतुरस्रं स्थण्डिलं करोति ॥

End :

पुत्रपौत्रं षष्टिसहस्राणि स्वर्गलोकमभिक्रम्य ब्रह्मसायुज्यं सलोकतां आप्नुयात् ; इत्याह भगवान् बोधायनः ॥

Colophon :

इति शताभिषेकविधिः समाप्ता ॥

1073

Sl-No-12950 सहस्रचन्द्रदर्शनशांतिः **Ms. No-C. 496/8**

Beginning :

अथातः शताभिषेकविधिं व्याख्यास्यामः-

शतसंवत्सरजीविनः सहस्रचन्द्रजीविनो वा अपूर्यमाणपक्षे ब्राह्मणानन्नेन परितोष्य पुण्याहं वाचयित्वा,– ॥

End :

पुत्रैः पौत्रैः षष्ठिवर्षमतिक्रम्य ब्रह्मणः सायुज्यं सलोकतामाप्नोति; इत्याह- भगवान् बोधायनः ॥

Colophon :

इति बोधायनोक्तसहस्रचन्द्रदर्शनाभिषेकविधि ॥

1074

Sl. No. 12951 सहस्रब्राह्मणभोजनविधिः **Ms. No. P. 2282/11**

Beginning :

शुभे दिने च दम्पत्योः चन्द्रताराबलान्विते ।
इष्टप्राप्तै प्रकुर्वीत सहस्रद्विजभोजनम् ॥

आदावनुज्ञा । अशेषे .... स्वीकृत्य ·|· + + मम + ·|· + सर्वाभीष्टसिध्यर्थं लक्ष्मीनारायणप्रसादसिध्यर्थं तन्नामसहस्रैः सहस्रं ब्राह्मणान् भोजयितुं ·|· ·|· तत्पूर्वाङ्गत्वेन + + नारायणबलिकर्माणि कर्तु योग्यतासिद्धमनुगृहाण ॥

End :

सहस्रभोजनान्ते पूर्वाङ्गवदुत्तरांगं कुर्यात । + + ·|· ·|· एवंकृते सर्वपापैर्विमुक्तो जीवत्सन्ततिश्च भवति ॥

Colophon :

– – – –

1075

Sl. No. 12957 सहस्रब्राह्मणभोजनविधिः **Ms. No. P. 8178/52**
(यामलोक्ता- नाबालतन्त्रीया)

Beginning :

अथातः सम्प्रवक्ष्यामि यामलोक्तविधानतः ।
विष्णोर्नामसहस्रेण सहस्रब्रह्मभोजनम् ॥ ·|· ·|·

धर्मार्थकाममोक्षाणां पुत्रार्थी च विशेषतः ।
यथोक्तेन विधानेन कुर्यात् ब्राह्मणभोजनम् ॥
तेन × × × मानसः ॥

End :

पादुकाछत्रवस्त्राणि ब्राह्मणाय निवेदयेत् । + ⁘
सर्वाभीष्टस्य सिद्धिस्स्यात् नात्र कार्या विचारणा ॥

Colophon

इति जाबालतन्त्रे सहस्रब्राह्मणभोजनविधिः समाप्तः ॥

1076

Sl· No· 12960 सालग्रामदानविधिः (स्कान्दान्तर्गता) Ms· No·P· 8178/52

Beginning :

महाकोश × × स × स्थं चक्राद्यैरुपशोभितम् ।
देवदेवस्य दानेन अतश्शांतिं प्रयच्छ मे ॥
⁘ ⁘ ⁘ ⁘ ⁘
सालग्रामात्रिसम्भूत × × शिला पापप्रणाशिनी ।
सुव × × × गृहाण त्वं द्विजोत्तम ॥

End :

मनसा वचसा चैव × × × यदर्जितम् ।
पापक × × × लयं याति यथा सूर्योदये तमः ॥

Colophon :

इति श्रीस्कन्दपुराणे कुमारसंवादे सालग्राम × × नविधिः ॥

1077

Sl No. 12961 सिनीवालीकुहूजननशांतिः **Ms. No. P. 604/83**

(ब्रह्मसंहितान्तर्गता– कात्यायनोक्ता)

Beginning :

कात्यायनः–

सिनीवाल्यां प्रसूतिस्स्याद्यस्य भार्यापशोस्तथा ।
राजाश्वमहिषश्चैव शक्रस्यापि श्रियं हरेत् ॥

End :

आद्यपादे पितॄन् हन्ति द्वितीये मातरं तथा ।
तृतीये तु शिशुं हन्ति धनं हन्ति चतुर्थकम् ॥

Colophon :

इति ब्रह्मसंहितायां उत्तरकाण्डे सिनीवालीकुहूप्रसूतिशांतिः ॥

1078

Sl. No. 12963 सिनीवालीजननशांतिः **Ms. No. P. 604/57**

(ज्योतिषार्णवीया)

Beginning :

सिनीवाल्यां प्रसूतिस्स्यात् यस्य भार्यापशू स्तथा ।
राजाश्वमहिषाश्चैव शक्रस्यापि श्रियं हरेत् ॥

End:

शच्याः पुरो यथा स्कन्धो शुचिसंरहितः पुरा ।
यथावामष्ययं (?) बालो रहितः परिरक्षितः ॥

Colophon :

इति ज्योतिषार्णवे सिनीवालीजननशान्तिः समाप्ता ॥

1079

Sl. No. 12967 सिनीवालीजननशांतिः Ms. No. P. 2239/46

(उत्तरगार्ग्योक्ता)

Beginning :

गार्ग्य उवाच–

श्रृणुष्व भो महाभाग सिनीवलीप्रसूतिकम् ।
दोशं यच्च हरे × × × × ॥

तद्दोपशमनार्थाय × × × × ।
× × × × गोमयेनोपलिप्य च ॥

तत्रैव स्थण्डिलं कृत्वा × × × ।
× × × पुण्याहं वाचयेत्ततः ॥

End :

एवं कृत्वा विधानेन सर्वपापात्प्रमुच्यते ।
सार्वन् कामानवाप्नोति जीवेद्वर्षशतं हि सः ॥

Colophon :

× × × उत्तरगार्ग्योक्ता सिनी × × × शां × × समा × × ॥

1080

Sl. No. 12968 सिनीवालीजननशांतिः Ms. No. P. 2579/2

(रुद्रयामकीया)

Beginning

ईश्वर उवाच-

सिनीवलीप्रसूतौ तु यस्य भार्यापशुस्तथा ।
गजाश्वमहि × × सद्यः × × तु ॥

End :

सर्षपखादिरौ × तै × × × क्षजे ।
आहं पि × × × शतमष्टोत्तरं ततः ॥

Colophon :

इति रुद्रयामळे सिनी × × नशांतिः ॥

1081

Sl. No. 12975 सिनीवालीजननशांतिः Ms. No. P. 4863/131
(ब्रह्मसंहितीया)

Beginning :

सिनीवाल्यां प्रसूतिस्स्यात् यस्य भार्या शिशुस्तथा ।
गजाश्वमहिषादीनां शक्रस्यापि श्रियं हरेत् ॥

+ + + ।

कल्पोक्तशांतिः कर्तव्या शीघ्रं दोषापनुत्तये ।
नवग्रहमखं कुर्याच्छांतिकर्म विचक्षणः ॥

End :

ब्रह्मऋत्विक्-जापकानां यथाशक्त्यानुपूर्वतः ।
आचार्याय क्षमाप्येवं कुर्यात् ब्राह्मणभोजनम् ॥
आदिपादे पितरं हन्ति द्वितीये हंति मातरम् ॥
तृतीये तु शिशुं हंति धनं हंति चतुर्थके ॥

Colophon :

इति ब्रह्मसंहितायां उत्तरकाण्डे सिनीवलीकुहूप्रसूतिशान्तिः ॥

1082

Sl. No. 12977 सिनीवालीजननशांतिः Ms. No. P. 5313/51

(शौनकीया- सिनीवालीदर्शयोर्जननशांतिः)

Beginning :

अथ सिनीवालीदर्शनयोर्जननशान्तिविधिरुच्यते—

सिनीवालीप्रसूताश्च गौरश्वमहिपास्तथा ।
× × भार्यापि शक्रस्यापि श्रियं हरेत् ॥

+ + + +

तद्दोषपरिहारार्थं शान्तिं वक्ष्यामि नारद ॥

End :

अन्येभ्यो ब्राह्मणेभ्यश्च यथा शक्त्या प्रदापयेत् ।
ब्राह्मणान् भोजयेत् पश्चात् स्वस्तिवाचनमाचरेत् ॥

Colophon :

इति शौनकीये दर्शजननशांतिः समाप्ता ॥

1083

Sl. No. 12984 सिनीवालीजननशांतिः Ms. No. P. 9254/214.

Beginning :

अथ शौनकोक्तसिनीवलीजननशांतिः —

अथातः संप्रवक्ष्यामि सिनीवालीप्रशान्तिकम् ।
सिनीवालीसमुद्भूतं गजाश्वमहिषादिकम् ॥

सद्यः करोति तत्कर्तुः धनहानिं महद्भयम् ।
तस्मात्तद्दोषविच्छित्यै शान्तिं कुर्यात्प्रयत्नतः ॥

End :

स्वयं भुंजीत सप्तुतः यजमानस्समाहितः ।
.... शान्तिकं मनुजोत्तमैः ॥

सर्वसौभाग्यसंयुक्तः सर्वा....त्सरिदूर्मितः ।
धनधान्यादिपुत्रांश्च लभते नात्र संशयः ॥

Colophon :

इति शौनकीये सिनीवालीजननशान्तिः ॥

1084

Sl. No. 12988 सिनीवालीजननशांतिः **Ms. No. P. 10041/35**
(उत्तरगार्ग्योक्ता)

Beginning :

अथ सिनीवालीशांतिविधिमाह उत्तरगार्ग्यः--

सिनीवाल्यां प्रसूतस्य तस्य भार्यापशू तथा ।
राजाश्वमहिषाश्चैव शक्रस्यापि श्रियं हरेत् ॥

\+ + + + +

कल्पोक्तशांतिः कर्तव्या शीघ्रं दोषापनुत्तये ॥

End :

समुद्रज्येष्ठा इति चतुष्कस्य सूक्तस्य वसिष्ठ आपस्त्रिष्टुप् । एतैर्मन्त्रैरभिषिञ्चेयुः ॥

Colophon :

इति उत्तरगार्ग्योक्तसिनीवालीशान्तिः ॥

1085

Sl. No. 12993 सीसदानविधिः (नारदीयान्तर्गतः) **Ms. No. P. 4180/55**

Beginning :

अथ दानं प्रवक्ष्यामि राहुप्रीतिकरं सदा ।
यमप्रीतिकरं तत्र मृत्युबाधानिवृत्तिदम् ॥

सीसदानमिति ख्यातं गरलादिषु निच्युतिः ।
विपकृत्रिमरोगघ्नभयं नश्यत्यसंशयः ॥

End:

शक्त्या च दक्षिणां दत्वा तदह्नं निरीक्षयेत् ।
राहुदोषविनिर्मुक्तः पूर्वोक्तभयवर्जितः ॥

Colophon:

इति नारदीये सीसदानविधिः ॥

1086

Sl. No 12994 **सीसदानविधिः** **Ms. No. P. 5587/62**
(हेमाद्रीया—दानकाण्डान्तर्गता)

Beginning :

अथ राहुप्रीतिकरसीसदानविधिरुच्यते—

अथ दानं प्रवक्ष्यामि राहुप्रीतिकरं तथा ।
यमप्रीतिकरं चैव मृत्योः प्रीतिकरं महत् ॥

सीसदानमिति ख्यातं केवलादिविषच्युतिः ॥

End:

दानमन्त्रः—

रक्ताक्षो नीलवर्णश्च सैंहिकेयो महाबलः ।
दानेन सीसरूपस्य पात्रो भवतु मे सदा ॥

Colophon :

इति हेमाद्रौ दानकाण्डे राहुप्रीतिसीसदानविधिः समाप्तः ॥

1087

Sl. No. 12996 सीसदानविधिः (यामलोक्ता) Ms. No. P. 8178/50

Beginning :

राहुप्रीतिदान × ×—

स्वगृहे शुद्धदेशे च तिलप्रस्थं विनिक्षिपेत् ।
नीलवस्त्रेण संछाद्य मध्ये × पक्वतं न्यसेत् ॥

+ + + + +

नमोस्तु सिंहिकापुत्र चन्द्रार्कग्रहमर्दन ।
सीसदानेत सकलं प × × दहतु मे सदा ॥

End :

शक्त्या × दक्षिणां दद्यात् × × येत् ।
राहुदोषविनिर्मुक्तः पूर्वोक्तभयवर्जितः ॥

Colophon :

इति यामलोक्तसीसदानविधिः ॥

1088

Sl. No. 12999 सूतिकाशिशुशांतिः Ms. No. P. 7401/83

Beginning :

अथ शांतिं प्रवक्ष्यामि सूतिकाशिशु × ।
× × × × ॥

गोचर्ममात्रं × गोमयेनोपलिप्य × ।
तत्र × कं × कृत्वा व्रीहि × × ॥

End:

अनेन विधिना शान्ति × विधानतः ।
ऐहिकामुष्मिकीं सिद्धि × × प्रसादतः ॥

Colophon:

-- -- --

1089

Sl. No. 13000 सूर्यचन्द्रशनैश्चरप्रतिमादानविधिः Ms. No. P. 2914/64

Beginning:

गोधूमराश्युपरि वारुणकलशपूजा–

इमं मे वरुण इति षोचशैरुपचारैं अभ्यर्च्य–

तस्य पश्चिमदिग्भागे स्थण्डिलं तण्डुलेन तु ।
पद्ममष्टदलं कृत्वा प्रागादिष्वर्चयेत् क्रमात् ॥

सूर्याय नमः– ॥

रक्तवस्त्रं प्रसार्याथ प्रतिमां स्थापयेद्बुधः ।
एहि सूर्य जगन्नाथ सुस्थिरो भव विष्टरे ॥
पूजां गृहाण भगवन् कृपया रक्ष मां सदा ॥

End:

पूर्वोक्त × निर्मुक्ते यः कुर्याच्छांतिमाचरेन् ।
आयुरारोग्यमैश्वर्यं सर्वान् कामानवाप्नुयात् ॥

Colophon:

– – – –

1090

Sl. No. 13002 सूर्यचन्द्रोपरागशांतिः Ms. No. P. 5930/81
(यामलोक्ता)

Beginning :

सूर्यग्रहे सौरसूक्तं श्रीरुद्रं च विशेषतः ।
ततः पुष्पाञ्जलिं कृत्वा यजमानो गुरोस्सदा ॥

\+ + + + +

आदावाचार्थमाहूय दद्यात्तत्प्रतिमाद्वयम् ॥

End :

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मा विष्णुश्च रुद्राश्च रक्षन्तु मम सर्वदा ॥

Colophon :

इति यामलोक्तसूर्यचन्द्रोपरागविधिः समाप्तः ॥

1091

Sl. No 13003 सूर्यचन्द्रोपरागशांतिः (यामलोक्ता) Ms. No. P. 9254/83

Beginning :

अथ शान्तिं प्रवक्ष्यामि सोमसूर्यग्रहस्य च ।
फलमादौ प्रवक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥

यस्य राशिं समुद्दिश्य भवेद्ग्रहणसम्भवः ।
क्लेशायुरर्थहानिश्च व्याधिपीडाभयादयः ॥

\+ + + + +

तस्माच्छान्तिं प्रकुर्वीत सादराद्भक्तितत्परः ॥

Ets:

जन्मभे नामभे वापि त्रिजन्मर्क्षेंगपराभतः ।
सम्मातदोपं (?) दिक्पाला नश्यन्तु मम सर्वदा ॥

योऽसौ वज्रधरो देव ... . ॥

Colophon :

इति यामलोक्तसूर्यचान्द्रोपरागशान्तिः ॥

1092

Sl. No. 13004 सूर्यप्रीतिदानविधिः **Ms. No. P. 604/10**

(यामलोक्ता)

Beginning :

श्रृणु नारद तत्त्वज्ञ सर्वसिद्धिकरं नृणाम् ।
महाशान्तिं प्रवक्ष्यामि सद्यः सन्तुष्टिकारणम् ॥

\+ + + + +

सूर्यप्रीतिकरं दानं प्रवदाम्यनुपूर्वशः ।
तद्दानं पूजाविधानं च वक्ष्ये लोकोपकारकम् ॥

End:

एवं यः कुरुते भक्त्या निरोगरिपुवर्जितः ।
सर्वान् कामानवाप्नोति सूर्यलोके महीयते ॥

Colophon :

इति यामलोक्तसूर्यप्रीतिदानविधिः ॥

1093

Sl No. 13006 सूर्यप्रीतिदानविधिः Ms. No P. 3804/11

(यामलोक्ता)

Beginning :

यामले– नारदं प्रति सूर्य उवाच–

बलहीने यदा सूर्ये दिलीपो विलयं गतः ।
वनवासं गतो रामः किं पुनर्भुवि मानवः ॥

\+ + + + +

तस्माद्दानं प्रवक्ष्यामि सद्यः सन्तुष्टिदायकम् ।

जन्मर्क्षेनामनक्षत्रे कर्मर्क्षे वा त्रिजन्मसु । + + +
ग्रहदानं प्रकुर्वीत शुचिस्तद्गतमानसः ॥

End :

एवं यः कुरुते भक्त्या निरोगो रिपुवर्जितः ।
सर्वान् कामानवाप्नोति सूर्यलोके महीयते ॥

Colophon :

इति यामलोक्तसूर्यप्रीतिदानविधिः ॥

1094

Sl. No. 13010 सूर्यप्रीतिदानविधिः Ms. No P. 7970/175

(हेमाद्रीया– बलहीनसूर्यप्रीतिदानविधिः)

Beginning :

अथातः सम्प्रवक्ष्यामि सूर्यप्रीतिकरं शुभम् ।
शृणु नारद तत्त्वज्ञ सर्वसिद्धिकरं नृणाम् ॥

महाशांतिं प्रवक्ष्यामि सद्यः संतुष्टिकारणम् ।
ग्रहाणामिपि सर्वेषां प्राणिनां दोषनाशनम् ॥

End :

एवं यः कुरुते भक्त्या निरोगो रिपुवर्जितः ।
सर्वान् कामान् अवाप्नोति सूर्यलोके महीयते ॥

Colophon :

इति हेमाद्रौ दानकाण्डे सूर्यप्रीतिदानकाण्डः समाप्तः ॥

1095

Sl. No. 13015 सूर्यशांतिः Ms. No. P. 604/39

(अक्षिरोगहरशांतिः)

Beginning

अक्षिरोगहरं नृणां तिमिरं वर्णचक्षुषा (?)
+ + + + ।
सूर्यस्य मण्डलं कृत्वा सुवर्णेन प्रयत्नतः ।
कर्षादर्धं(?)न वा कुर्यात् वित्तशाठ्यम् न कारयेत् ॥

End :

सुवर्णदक्षिणां दद्यात् यथावित्तानुसारतः ।
सूर्यावलोकनं कुर्यात् न रोगी नात्र संशयः ॥

Colophon :

इति अक्षिरोगहर (सूर्य) शांतिः ॥

1096

Sl. No. 13016 | सूर्यशांतिः (यामलोक्ता) | Ms. No. P. 2239/82

Beginning :

अथ शांतिं प्रवक्ष्यामि स × + दोषापनुत्तये ।
बलंहीने यथा × × × दुष्टग्रहसमागते ॥

+ + + +

तत्तद्दोषक्षयार्थाय शांतिं कुर्यात्प्रयत्नतः ।
जन्मकर्मतथाधाननक्षत्र भानुवासरे ॥

End :

आयुरारोग्यसम्पन्नः पुत्रपौत्रसमन्वितः ।
कृपालुः स्नेहसंयुक्तो वाचा सिद्धियुतो नरः ॥

Colophon

इति यामलोक्तसूर्यग्रहशान्तिः ॥

1097

Sl. No. 13024 | सूर्यशांतिः (हेमाद्रीया--दानकाण्डान्तर्गता) | Ms. No. P. 5587/29

Beginning :

अथ शांतिं प्रवक्ष्यामि सूर्यदोषापनुत्तये ।
बलहीने यदा सूर्ये दुष्टग्रहसमागमे ॥

+ + + +

तत्तद्दोषक्षयार्थाय शांतिं कुर्यात्प्रयत्नतः ॥

End :

आयुरारोग्यसम्पन्नः पुत्रपौत्रधनान्वितः ।
नृपाग्रतेजस्सम्पन्नः वाचा सिद्धियुतं नमः ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शांतिप्रकरणे सूर्यशांतिविधिः समाप्ता ॥

1098

Sl. No. 13027 सूर्यशांतिः Ms. No. P. 7401/146

(उपनयनाङ्गभूता)

Beginning :

गायत्र्या × ङ्गं च × × पनयने × था ।
सूर्यप्रीतिकरं वक्ष्ये शांचि × × × ॥

+ + + + +

प्राणानायम्य गोचर्ममात्रं × देशं गो × नोप × × × × स्थण्डिलं × सङ्कल्प्य, ॥

End :

एवं कृत्वा विधानेन सूर्यप्रीतिकरं शुभम् ।
गायत्र्याः × माप्नोति × न संशयः ॥

Colophon :

-- -- -- --

1099

Sl. No. 13030 सूर्यशांतिः (शौनकोक्ता) Ms. No. P. 7970/74

Beginning :

गृहस्येशानदिग्भागे गोमयालेपनं ततः ।
रङ्गवल्लिकया पद्मं स्वस्तिकेन समन्वितम् ॥

\+ + + +

मार्ताण्डं च जगन्नाथं वेदाधारं त्रिलोचनम् ।
रक्तगन्धाक्षतैः पुष्पैः अम्बुजैः करवीरकैः ॥

रक्ताम्बरं प्रसार्याथ पद्ममध्येर्चयेद्दिनम् ॥

End :

आयुरारोग्यसम्पन्नः पुत्रपौत्रैः समन्वितः ।
नृपाग्रे स्नेहसंयुक्तो वाचा सिद्धियुतो नरः ॥

Colophon :

इति यामलोक्तसूर्यशांतिः समाप्ता ॥

1100

Sl. No. 13031 सूर्यशांतिः Ms. No. P. 7970/26

(यामलीया नारदसंवादात्मिका सूर्य प्रीतिदानविवरणात्मिका च)

Beginning :

यामले नारदं प्रति सूत उवाच—

बलहीने यथा सूर्ये दिलीपो विलयं गतः ।
बनवासं गतो रामः किं पुनर्भुवि मानवाः ॥

\+ + + + +

सूर्यसंस्थितकालेषु शुद्धदेशे मनोरमे ।
गोधूमराशिं कुर्वीत यथविचानुसारतः ॥

End:

एवं यः कुरुते भक्त्या निरोगो रिपुवर्जितः ।
सर्वान् कामनवाप्नोति सूर्यलोके महीयते ॥

Colophon

इति यामलोक्तसूर्यप्रीतिदानविधिः समाप्तः ॥

110/

Sl. No. 13041 सूर्यातिथ्यविधिः Ms. No. P. 3023/162

Beginning:

गोंधूमराश्या उपरि वारुणकलशपूजा—
इमं मे वरुण ' इति षोडशोपचारैरभ्यर्च्य—

तस्य पश्चिमदिग्भागे स्थण्डिलं तण्डुलेन तु ।
पद्ममष्टदलं कृत्वा प्रागादिष्वर्चयेत्ततः ॥

सूर्याय नमः ; दिवाकराय नमः; + + +

त्रैलोक्यदीपकं देवं त्रिगुणं तु त्रयोमयम् ।
स्थापयामीष्टसिध्यर्थं भास्करं ग्रहनायकम् ॥

End :

अधिदेवताप्रत्यधिदेवताप्रतिमासहितां रक्तवस्त्रवेष्टितान्वर्चितां सूर्यप्रीतिं कामयमानः तुभ्यं सम्प्रददे न मम ॥

Colophon

-- -- --

1102

Sl. No. 13042 — सूर्योपरागशांतिः — Ms. No. P. 604/9

(सूर्यग्रहणशांतिः –यामलीया)

Beginning :

अथ शांतिं प्रवक्ष्यामि सोमसूर्यग्रहस्य च ।
× × प्रवक्ष्यामि धर्मशास्त्रोक्तमार्गतः ॥

यस्य राशिं समुद्दिश्य भवेत् ग्रहणसम्भवः ॥

End :

जन्मभे नामभे वापि त्रिजन्मर्क्षोपरागतः ॥
सञ्जातदोषं दिक्पालाः नश्यन्तु मम सर्वदा ॥

पट्टदानम् ॥

Colophon:

इति यामलोक्तउपरागशांतिः ॥

1103

Sl. No. 13043 — सूर्योपरागशांतिः — Ms. No. P. 2579/32

(सूर्यग्रहणशांतिः- यामलोक्ता)

Beginning:

× × परि लिखेच्चक्रं तिशूलम् तु त्रिकोणकम् ।
संक्रांतिशूलो दोषं मे × रभ दिवाकरं ॥

End :

शूलदानमन्त्रः—

तिलोपरि लिखेच्चक्रं त्रिशूलम् च त्रिकोनकम् ।
ग्रहणे शूलदोष मे निवारय ।दवाकर ॥

Colophon:

इति यामलोक्तसूर्योपरागशांतिः ॥

1104

Sl. No 13044 सूर्योपरागशांतिः Ms. No. P. 3023/67

(सूर्यग्रहणशांतिः)

Beginning :

सूर्योपरागे सम्प्राप्ते शांतिं कुर्याद्विचक्षणः ।
यस्य राशौ च नक्षत्रे भवेत् ग्रहणसम्भवः ॥

End:

एवं यः कुरुते शांतिं × × × ते।
सर्वान् कामानवा ोति जीवेच्च शरदां शतम् ॥

Colophon :

– – – –

1105

Sl. No. 13045 सूर्योपरागशांतिः Ms. No. P.5672/70

(सूर्यग्रहणशांतिः–ग्रहणाङ्गाभिषेकविधानम्)

Beginning:

त्तिलोपरि लिखेच्चक्रं त्रिशूलं तु त्रिकोणकम् ।
संक्रांतिशूलद्दोषं च निवारय दिवाकर ॥

सूर्योपरागे सम्प्राप्ते अभिषेको विधीयते ।
तदहं सम्प्रवक्ष्यामि द्रव्यमन्त्रविधानवित् ॥

End :

जन्मभे नामभे वांशे त्रिजन्मर्क्षोपरागतः ।
गृहाणोत्पातजं दोषद्दुःखदानं हि कुत्रचित् ॥

दानमन्त्रः—

तिलोपरि ·|· + त्रिकोणकम् । सङ्क्रांति + + दिवाकर ॥

Colophon :

यामळे सूर्योपरागशान्तिः ॥

1106

Sl. No. 13048 सोत्पातजननशांतिः (नारदोक्ता) **Ms. No. P. 7970/154**

Beginning :

अथातः सम्प्रवक्ष्यामि जन्मकाले दशा नृणाम् ।
महादोषेषु शान्त्यर्थं नारदस्य वचो यथा ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् बन्धुभिस्सह संयुतः ।
तत्तदोषं हि विनिर्जित्य दीर्घायुर्जायते नरः ॥

पुत्रपौत्र समृद्धिश्च धनधान्ययुक्तं भवेत् ॥

Colophon :

– – – – –

1107

Sl. No 13050 सोमोपरागशांतिः (यामलोक्ता) **Ms. No. P. 2579/33**

Beginning :

सोमोपरागे सम्प्राप्ते शांतिं कुर्यात्प्रयत्नतः ।
यस्य राशिं समासाद्य भवेत् ग्रहणसंप्लवः ॥

तस्माच्छांतिं प्रवक्ष्यामि मन्त्रौषधिविधा× ×त् ॥

End :

चन्द्रादित्योपरागान्ते पूर्ववच्छुद्धमण्डलम् ।
- - - - - - - - - - मन्त्रेणानेन दापयेत् ॥

+ + + +

सञ्जातदोषादिकाले नश्यति मम सर्वदा ॥

Colophon :

इति याम्लोक्तसोमोपरागशांतिः ॥

1108

Sl. No. 13055 **सौम्यायनवास्तुप्रवेशशांतिः** **Ms. No. P 7401/51**

Beginning :

सौम्ये चाप्ययने × × × × ।
तद्दोषपरिहाराय शांतिं वक्ष्यामि शौनक ॥

गोचर्ममा × शं गोम × प्य च ।
त × पिंड × त्वा × वि × नतः ॥

End :

एवं कृत्वा विधानेन शान्ति × मार्गतः ।
ब्राह्मणेभ्यो धनं × × त्त्यनुसारतः ॥

× × तः × × ।
× × × लभते नात्र संशयः ॥

Colophon :

– – – –

1109

Sl. No. 13056 सौराष्टाक्षरपद्धतिः Ms. No. P. 9428/109

Beginning :

रचनाप्रकारः—

मलमूढादिवर्जितशुक्लपक्षे + + + अन्नदूपणं + + + निवृत्ति + + काममानः + + यामलोक्तप्रकारेण सौराष्ट्राक्षरमन्त्रेण पूजाहोमं + + करिष्ये ॥

End :

पञ्च ..... निष्कं पञ्चविंशतिनिष्कं दक्षिणां दद्यात् । वित्तविभवेन भूमिदानं ..... धेनुदानं दद्यात् । यस्येत्यादि ॥

Colophon :

इति सौराष्ट्राक्षरपद्धतिः ॥

1110

Sl. No. 13057 स्त्रीस्तन्याक्षरणहरम् Ms No. P.909/18

Beginning :

अथ स्त्रीस्तन्यक्षरणहरम् । कर्मविपाकसमुच्चये—

क्षीरं उष्णभिया नारी पूर्वजन्मनि सुव्रत ।
जन्मान्तरे तु तस्या वै क्षीरनक्षरतः स्तनौ ॥

End :

अत्र सुरादीनि बलिद्रव्याण्यभिहितानि । तेषु ब्राह्मणादिभिरनिषिद्धान्येव ग्राह्याणि ॥

Colophon :

इत्यपुष्पवतीत्वहराणि ॥

1111

Sl. No. 13059 स्वप्नशांतिः Ms. No P. 3128/17

(शौनकीया)

Beginning:

अथ स्वप्नानि वक्ष्यन्ते दुर्निमित्ताद्भुतानि च ।
आदित्यं वाथ चन्द्रं वा विगतद्युतिकं तथा ॥ + ÷
वीक्ष्यते मानवैः स्वप्ने मरणं शोकमाप्नुयात् ॥

End :

अनेन विधिना यस्तु शा ... कुर्यात्तु भक्तितः ।
तस्य वर्षशतायुष्यं भवत्येव न संशयः ॥

Colophon:

इति शौनकीये स्वप्नोत्पातशांतिविधिः समाप्तः ॥

1112

Sl. No. 13066 स्वप्नारिष्टशांतिः Ms. No. P. 9764/49

Beginning :

वराहः–

दक्षिणपार्श्वे स्पन्दनमभिधास्ये त . . . लक्ष्ययोर्वामे।
पृथिवीलाभः शिरसि स्थानवृद्धिर्ललाटे स्यात् ॥

End:

वृषभं दक्षिणां दद्यात् ततः सम्पद्यते शुभम् ।
ब्राह्मणान् भोजयेत्पश्चात् यथाविभवसारतः ॥

Colophon:

इति स्वस्थारिष्टशांतिः ॥

1113

Sl. No. 13067 स्वातीनक्षत्रशांतिः (गार्ग्यीया) **Ms. No. P. 5930/96**

Beginning :

स्वात्यां मृत्युः सन्देहः वा नवदितानि मासद्वयं वा पीडा भवति। अथ होम-नक्षत्रदेवताराधनं पूर्ववत्। तत्र विशेषः अग्न्यनुमत्योर्मध्ये वायुः स्वातीनक्षत्रदेवतेति भेदः ॥

End:

नक्षत्रदेवताप्रीत्ये धेनुं दक्षिणां दद्यात्। ब्राह्मणान् भोजयित्वा आशिशो वाच-यित्वा पुरारोग्यं भवति ॥

Colophon :

स्वातीनक्षत्रशान्तिविधिः समाप्तः ॥

1114

Sl. No. 13067 हनुमत्प्रीतिदानविधिः (यामलोक्ता) **Ms. No. P. 7970/147a**

Beginning :

अथ दानं प्रवक्ष्यामि लोके सर्वजनप्रियम्।
प्राणिनामुपकारार्थं पुरा शङ्करचोदितम् ॥

\+ + + +

हनुमन्तव्यकं वर्षे वर्षे प्रकारयेत्।
अष्टम्यां ×·× × × च विशेषतः ॥

End:

दक्षिणार्थं च गां दद्यात् भूमिं स्वर्णमतापि वा ।
समस्तभयनिर्मुक्तः समस्तफलसंयुतः ।।

Colophon

इति यामलोक्तहनुमत्प्रतिमादानविधिः ॥

1115

Sl. No. 13071 **हनुमत्प्रीतिदानविधिः** **Ms. No. P. 9428/81**

Beginning:

रचनाप्रकारः=

अष्टमीनवमीचतुर्दशीयुतजन्मनक्षत्र सं × × गुरुवार × × रकवामेषु गृहस्य × × दिग्भागे + + + चतुर्वेदिकां कृत्वा वे × × परि अष्टदलम् पद्मं लिखित्वा + + + हनुमत्प्रतिमां निधाय + + संकल्प उच्यते + + यामलोक्तप्रकारेण हनुमद्दानं करिष्ये ॥

End :

पक्षिणार्थं भूमिस्वर्णं वा दद्यात् । सर्वे × × यो भूमिं दद्यात् । हिरण्य गर्भगर्भस्थमिति सुवर्णं दद्यात् ॥

Colophon

इति यामलोक्तप्रकारेण हनुमद्दानपद्धतिः ॥

1116

Sl. No. 13072 **हनुमत्प्रीतिदानविधिः** **Ms. No. P 9428/101**

Beginning :

रचनाप्रकारः—

नवमीचतुर्दशी × × कार्ति × जंन × नुजं × × देवालयादिपुण्यदेशेषु + + हनुमत्प्रतिमां निधाय नववस्त्रेण संवेष्ट्य ॥

End :

तत्र हनुमत्प्रतिमापूजां ब्राह्मणपूजां चर । × × यनम् । इ × × त्व-दक्षिणहस्तम् ·|· + + श्रीहनुमत्प्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे न ममेति ; दद्यात् । यथाशक्तिदक्षिणां दद्यात् । पञ्चयेत्यादि ।

Colophon :

इति यामलोक्तप्रकारेण हनुमद्दानपद्धतिः ॥

1117

Sl·No·13073 हस्तनक्षत्रशांतिः Ms. No· P· 5930/94

Beginning :

× × सन्देहो वा । पक्षद्वयं वा एकविंशतिदिनं वा पीडा भवति । तथा होमनक्षत्राराधनं पूर्ववत् । तत्र विशेषः । अग्न्यनुमत्योर्मध्ये सविता × × वि × × वतास्वरूपम्–

वारुणवर्णं रथारूढं द्विबाहुं कमण्डलुधरं + + सपरिवारं × × × धिदैवतं ध्यायेत् ॥

End :

ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति हस्तनक्षत्रशांतिः ॥

1118

Sl· No· 13076 हिरण्यगर्भदानविधिः Ms. No. C. 542/2

(मत्स्यपुराणांतर्गता)

Beginning :

सूत उवाच–

अथातः संप्रवक्ष्यामि महादानविधिं परम् ।
दानधर्मप्रियन्त्रोक्तं विष्णुना प्रभविष्णुना ॥

तंदहं संप्रवक्ष्यामि महादानमनुत्तमम् ।
सर्वपापक्षयहरं नृणां दुःस्वप्ननाशनम् ।

End :

दक्षमुष्ट्या धर्मराजप्रतिमां वाममुष्टिना ।
धृत्वार्कप्रतिमां ध्यायन्गोविन्दं मौनमास्थितः ॥
आत्मानं तोलयित्वाथ तथादानं विधाय च ।
पूर्णहुत्यादिकं कर्म शेषं चात्र समापयेत् ॥

Colophon :

इति मत्स्यपुराणे हेमाद्रितंत्रयोगसंग्रहीततुलादानविधिसंपूर्णा ॥

1119

Sl. No. 13077 हिरण्यगर्भदानविधिः Ms. No. C. 542/3
(नीलकण्ठभट्टीया)

Beginning :

अथ द्वितीयः हिरण्यगर्भदानविधिः । मत्स्यपुराणे—

अथातः सम्प्रवक्ष्यामि महादानमनुत्तमं ।
नाम्ना हिरण्यगर्भाख्यं महापातकनाशनम् ॥

End :

इति वदति च इत्थं यः शृणोतीह सम्यक्
मधुरिपुपुरलोकेपूज्यते सोऽपि सिद्धैः ।
मतिमपि भजनानां यो ददाति प्रियार्थं
स बुधपरिजनानां वश्यकृत्यादमोघुः ॥ (?)

Colophon :

इति मत्स्यपुराणे हेमाद्रिप्रयोगादिसंग्रहीतहिरण्यगर्भदानविधिः संपूर्णा ॥

1120

Sl. No. 13078 हिरण्यगर्भदानविधिः Ms. No. C. 542/4

Beginning :

रामं हिरण्यगर्भादि दानपद्धति कारणम् ।
नत्वा हिरण्यगर्भाख्य दानपद्धतिमारभे ॥

अथ मत्स्यपुराणोक्त हिरण्यगर्भाभिधानद्वितीयमहादानप्रयोगः प्रपञ्च्यते–

End :

स्मृतिविरोधे पुराणवचनाविषय सङ्कोचस्य न्यायत्वात् । तस्माद्धिरण्यगर्भदानकर्तुरपि शूद्रस्य अमन्त्राश्चूडाकारणांता एव संस्काराः कर्तव्याः इत्यवगन्तव्यम् ॥

Colophon :

इति हिरण्यगर्भदानप्रयोगपद्धतिः ॥

1121

Sl. No. 13080 हिरण्यदानविधिः Ms. No. P.781/11

Beginning :

××पु × × × न्मा × । दी × अ जा × × ब्रह्माहं × × × जार × दं गुणोत्या ॥

End :

यजमानस्य पितु × × × शर्मणः प्रेतस्य × × × × हिरण्यदानेन .... पापानां अपनोदनार्थं हिरण्यदानेन श्रीमहाविष्णुः सुप्रीतोऽस्तु ॥

Colophon :

– – – –

1122

Sl. No. 13081 हुतभुक्पशुमूषकोपहतरोमखण्डनशांतिः Ms. No. P. 9254/19

(यामलोक्ता)

Beginning :

ह्रियते यस्य केशाग्रं हुतभुक्-पशु-मूषकैः ।
तस्याभिषेचनं कुर्यात् शांतिरेवं विधानतः ॥

End :

एतैर्मंत्रैः पुराणैश्च सुमुहूर्तोदयांशकैः ।
यः कुर्यादभिषेकं तु सोऽभोष्टफलमश्नुते ॥

Colophon :

इति यामलोक्तहुताभुक्-मूषकोपहतरोमखण्डनशांतिः ॥

1123

Sl. No. 13082 हेमशृङ्गीगोदानविधिः Ms. No. P.6528/4

Beginning :

अथ कृष्णधेनुदानं । अथेत्यादि संकल्प्य + + +

कृष्णधेनो नमस्तुभ्यं ब्रह्मविष्णुशिवात्मिके ।
त्रिजन्मार्जितपापानि ध्रुवं दानात् × × × ॥

End :

तथा सालंकृतां सवस्त्रां धेनुं संपूज्य भक्तितः × रत्नपूर्णा × संपरायमिति ॥

Colophon :

इति हेमश्रंगीगोदानम् ॥

1124

Sl. No. 13083 हेमाज्यावेक्षणदानविधिः **Ms. No. P. 3804/67**

Beginning:

अथाज्यावेक्षणदानम्—

अथ दानं प्रवक्ष्यामि नृणां सर्वार्थसाधनम् ।
अलक्ष्मीदोषानिर्मुक्तिः सर्वसौभाग्यवर्धनम् ॥

हैमदानमिति ख्यातं मृत्युरोगापहारकम् ।

End :

अस्मै ब्राह्मणाय + + दुष्टस्त्रीगमन+ + कल्पोक्तसमस्तपापपरिहारद्वारा + + अङ्गस्पन्द + + कार्यसिध्यर्थं तुभ्यमहं सम्प्रददे न ममेति दत्वा एकरात्रं नावलोकयेत् । समस्तपीडामुक्तिर्भवति ॥

Colophon :

इति हेमाज्यावेक्षणदानम् ॥

1125

Sl. No. 13084 हेमाद्रिशांतिकल्पः (हेमाद्रीया) **Ms. No. P. 3127/1**

Beginning :

यं ब्रह्मवे××× वरं परं प्रभावं
× × × × तथा मे ।
× × × × × कारणमीश्वरं वा
तस्मै नमो विष्णवि × × ॥

अष्टादश व × ×

धर्मशास्त्रप्रवर्तकाः ।
धर्मसंरक्षणार्थाय द्विजानां धर्मसाधनम् ।

End :

अयः पिण्डं च कार्पासं महया × रुणकं बलम् ।
तिलं च प्रतिमां वस्त्रं आचार्याय च गां शुभां ।।
दशदानानि कुर्वीत × × × × ॥

Colophon:

इति हेमाद्रौगृहारोणखातशांतिरिति ॥

EXTRACT-2
पूजा

1

Sl. No. 13085 अक्षरमालिकापूजा Ms. No. P. 1980/4

Beginning:

एवंगुणेत्यादि सङ्कल्प्य-- ओमित्येदस्येत्यादिना परमेशं ध्यात्वा आवाहनादि कुर्यात् ॥

End :

प्रार्थनम्--

येषा रम्यैर्मन्तमयूरा इत्यादि प्रार्थतम् । यस्य स्मृत्येत्यादि । ओमिति परिसमापयेत् ॥

Colophon:

-- -- -- --

2

Sl.No. 13085 अङ्गारकपूजा Ms. No. P. 3604/3

Beginning :

रक्ताम्बरो रक्तवपुः किरीटी
चतुर्भुजः मेषगमः गदाधरः ।
धरासुतश्शक्तिधरश्च शूली
सदा मम स्याद्वरदः प्रशान्तः ॥

इति अङ्गारक ध्यायामि; आवाहयामि; आसनं समर्पयामि + + + सर्वोपचार रजार्थे अक्षताः समर्पयामि ॥

End:

अङ्गारक प्रत्यधिदेवता ध्यानम्–

पताकिकाशक्तिघण्टा कुक्कुटाढयं मयूरगम् ।
रक्ताम्बरं पिंछभूषं स्कन्दं ध्यायेत्तु षण्मुखम् ॥

अङ्गारकप्रत्यधिदेवं षण्मुखं ध्यायामि ॥

Colophon :

-- -- --

3

Sl. No. 13087 अङ्गारकपूजा **Ms. No. P. 5930/32**

Beginning :

अथाङ्गारक पूजा—

तप्तकाञ्चनसंकाशं रक्तकिञ्जल्कसन्निभम् ।
स्थापयामि कुजम् रौद्रं रुद्ररूपमयाबलम् [?] ॥

इति कुजस्थापनमन्त्रः ॥

End :

अग्निमुखेति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितं, अङ्गारकाय नमः षोडशोपचारं कृत्वा,

अङ्गारकनमस्तुभ्य अग्नितुल्यनमोनमः ॥

Colophon :

– – – –

4

Sl. No. 13088 अङ्गारकपूजा **Ms. No. P. 8765/7**

Beginning :

ಅಂಗಾರಕಪೂಜೆ—

याम्ये गदाशक्तिधरश्च शूली
वरप्रदो याम्भमुखामिरक्तः ।

महीसुतोऽवन्तिकुजस्त्रिनेत्रो
गोत्रे भरद्वाजकुलप्रसूतः ॥

इति ध्यात्वा अग्निर्मूर्धा + + ओं भूर्भुवस्सुवः अङ्गारकं रक्तवर्णं + + सूर्यस्य दक्षिण-भागे अंगारकमावाह्य- सुप्रसन्नो भव; वरदो भव ॥

ETS:

अङ्गारकाधिदेवतां पृथ्वीं सांगां सायुधां + + + अङ्गारकस्य दक्षिणे भागे पृथ्वीमावाह्य— सुप्रसन्ना भव; वरदा भवः ओं तमो भगवत्यै पृथ्व्यै नमः; षोडशोपचारपूजां कुर्यात् ॥

Colophon ;

– – – –

5

Sl. No. 13089 अङ्गारकपूजा Ms No. P. 9254/34

Beginning

अथाङ्गारकपूजा–

तप्तकाञ्चनसङ्काशं रक्तकिञ्जल्कसन्निभम् ।
स्थापयामि कुजं रौद्रं रुद्रमूर्तिम् महाबलम् ॥

इति कुजस्थापनमन्त्रः ॥

End:

अग्निर्मूर्धेति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहिताङ्गारकाय नमः–
अङ्गारक नमस्तुभ्यं अग्नितुल्य नमो नमः ।

इति शोडशोपचारान् कुर्यात् ॥

Colophon :

– – – –

6

Sl. No. 13090 अङ्गारकपूजा **Ms. No. C. 585/14**

Beginning :

अग्निर्मूर्धा विरूपोङ्गारको गायत्री । मम अंगारकग्रहप्रसादसिध्यर्थं विनियोगः भगवान् अङ्गारक अग्न्याकृते भारद्वाजगोत्र अवन्तीदेशेश्वर ज्वालापुंजोपमांगद्युते चतुर्भुज + + आगच्छ आगच्छ ॥

सूर्यस्य दक्षिणादिग्भागे आढकराश्योपरि त्रिकोणाकारमण्डले भूः अंगारकमावाहयति ॥

End :

यस्य स्मृत्येति संपूर्णम् । होमद्रव्याखदिरादिसमिध च वाज्यम् (?) । स्त्रोत्रम्—

अंगारको यमश्चैव सर्वरोगापहारकः ।
वृष्टिकर्ता च हर्ता च काम्यमोक्षफलप्रदः ॥

एवं स्तोत्रं प्रवक्ष्यामि कृपया रक्ष मां सदा ॥

Colophon :

-- -- --

7

Sl. No. 13092 अनन्तकृष्णप्रतिष्ठाविधिः **Ms. No. P. 4154/47**

Beginning :

द्वादश्यां श्रावण्यां पुण्यनक्षत्रे + + पुण्याहं वाचयित्वा + + + बिंबमुत्थाप्य- 'उत्तिष्ठ ब्रह्मणस्पते' इति मन्त्रेण + + उपचारान् कृत्वा + + कुम्भे अनन्तकृष्णमावाह्य + + अन्यपितृमन्त्रांश्च जपेयुः ॥

End:

आसनाद्युपचारान् कृत्वा नैवेद्यं + + प्रदक्षिणनमस्कारान् कृत्वा ब्रह्मपूजे + + दक्षिणाद्युपचारान् कृत्वा ॥

Colophon:

अनन्तकृष्णप्रतिष्ठा समाप्ता ॥

8

Sl. No. 13093 अरुणपूजाविधिः Ms. No. P. 4245/22

Beginning :

मण्डलस्य मध्ये अरुणपूजां करिष्ये–

विनुतातनयो देव........अरुणाय नमः; प्रभूतासनाय नमः; + + तत्र द्वारपाल पूजां करिष्ये ॥

End :

पूर्वदले भास्कराय + + ईशाने प्रभाकराय भास्कराय उषसे नमः; सूर्यमूर्तये नमः । ध्यानम्–

आ × × × × समर्पयामि । कुसुमाक्षताः गृहीत्वा,

....कां लिङ्गग्रहमध्यभागनिलयं........

.... ।

....

... ... ॥

Colophon :

– – – – । –

9

Sl. No. 13094 हिरण्यपट्टाभिषेकविधिः Ms. No. C. 696/21B
(रुद्रयामलीया)

Beginning :

अथाश्वपट्टाभिषेकविधिः—

अथातसंप्रवक्ष्यामि ह्यश्वपट्टाभिषेचनम् ।
एवं सुलक्षणं चाश्वं राजा पट्टाभिषेचने ॥
विहितं कारयेद्बलात् मन्त्रपूर्वं यथाविधि ॥ १॥

End :

आयुष्यारोग्यसाम्राज्यसर्वसम्पत्समृद्धिदम् ।
अश्वं मन्त्राभिपूतं तु य आरोहेत्स श्रिय लभेत् ॥
पट्टाभिषेचितश्चाश्वः सर्वकामफलप्रदः ॥

Colophon :

इति रुद्रयामळे अश्वपट्टाभिषेकविधिः ॥

10

Sl. No. 13095 अश्वत्थपूजाविधिः Ms. N° P. 2914/74

Beginning:

भगवन् सर्वधर्मज्ञ × × × × द
× × × पुत्रहीनानां नारीणां विविधापदां ॥

End :

यं यं कामयते कामं तदाप्नोति न संशयः ।
× × × भोगां विष्णुसायुज्यमाप्नुयात् ॥

Colophon

इत्याध्यात्मसारे अथर्वणशाखायां सर्वोत्पातकराश्वत्थप्रदक्षिणकल्पं सम्पूर्णम् ॥

11

Sl. No 13096 अश्वत्थपूजाविधिः Ms No. P. 3023/179

Beginning :

अथाश्वत्थपूजाविधिरुच्यते–

सुवर्ण × × ष्ठ कृत्वा, तमश्वत्थमूलं गोमयेन × × हस्त × × परि लिप्य . . . . ॥

End :

पुत्रकास्तु × × × णशोभनम् ।
शङ्खचक्रसमायुक्तं पूर्णेन्दुसदृशाननम् ॥
अष्टबाहुसमायुक्तं सल × × सुव्रतम् ॥

Colophon:

– – – –

12

Sl. No. 13099 अश्वत्थपूजाविधिः Ms. No. P. 9667/141
(अद्भुतसारांतर्गता)

Beginning

अनैश्वर्याय + + + श्रीअश्वत्थनारायणाय इत्यसहलपूजाः समर्पयामि अथ द्वारपूजां करिष्ये । ओं पर्वद्वारे द्वारश्रिये भद्राय पार्वतीप्रियाय + + + ॥

तन्मध्ये सहस्रदलकर्णिकायां श्री. अश्वत्थनारायणदेवताभ्यो नमः द्वारपूजां समर्पयामि॥

End:

अदिदेर्गर्भसम्भूतत्रिमूर्त्यात्मस्वरूपिणे ।
इदमर्घ्यं प्रदास्यामि बृहद्रूपिम् नमो नमः ॥

× × × × ।

सम्पूर्णं कुरु मे देव नमस्त्रैलोक्यहेतवे ॥

Colophon :

इत्यद्भुतसारे अश्वत्थपूजाविधिः ॥

13

Sl. No. 13100 **अश्वपूजाविधिः** **Ms. No. P. 8828/6**

Beginning :

अश्वपूजा-

क्षीरसागरसंभूते लक्ष्मीचन्द्रसहोदर ।
महेन्द्रवाह त्वामस्मिन् घोटकावाहयाम्यहम् ।।

End :

उच्चैश्रवकुले जात नृपाणां जयवर्धन ।
प्रयच्छ विजयं नित्यं उद्धरस्व पितुन् मम ॥

Colophon :

इत्याश्वपूजाविधिस्समाप्तः ॥

14

Sl. No. 13101 **अश्वपूजाविधिः** **Ms. No. P. 9952/16**

Beginning :

अथ रेवन्तपूजा (?)....

पङ्कजासनसंभूत श्रीहस्तेनाभिवर्धित ।
महावाहननामा त्वं अश्वमावाहयाम्यहम् ।।

अश्वमावाहयामि ॥

End:

प्रार्थना--

सुवर्णपात्रस्थमनोध्दृतं मया
सुगीतनादोद्धृत कामिनीकरैः-।
उदर्चिरम्यं शशिमण्डमण्डितं
गृहाण नीराजनमादराद्धरे ॥

नीराजनम्--

Colophon ;

इत्यश्वपूजा ।।

15

Sl.No. 13103 अष्टमीप्रदोषशिवपूजा Ms. No. P. 3374/19
(बोधायनीया)

Beginning :

अथ लौकिकाग्निं प्रतिष्ठाप्य ईशानहोमं करिष्ये। तत्र ईशानदेवतासिद्धमन्नं हविरापूर्वकतन्त्रमित्यन्वाधानं कृत्वा- ॥

End:

एवं द्वांदशाहुतीर्हुत्वा अग्नये स्विष्टकृते स्वाहेत्युत्तरार्धपूर्वार्धे जुहुयात्। मेक्षणं प्रहृत्य + + माहादेवं पुनराराधयेत्। रौद्रं इति स्तुत्वा सर्वपाप्मानं तरतिः तरति ब्रह्म-हत्याम् अपमृत्युं जयतीत्याह भगवान् बोधायनः ॥

Colophon :

-- -- -- --

16

l. No. 13104 | अस्त्रपूजाविधिः | Ms. No C. 5563/2

(कालिकापुराणान्ततर्गा)

Beginning:

आगमार्थं त्विति घण्टानादं कृत्वा, देशकालौ संकीर्त्य एवंगुणेत्यादिशुभतिथौ + + कालिकापुराणोक्तप्रकारेण श्रीरामार्जुनादिसकलसार्वभौमाचरितमहानवमीप्रयुक्तद्वात्रिंशदायुधदेवतापूजां करिष्ये ॥

End:

अनुग्रहान्मे देवानां नश्यन्तु परिपन्थिनः ।
सौम्या भवन्तु ते सर्वे भूताबास्सुखदास्सदा ॥

Colophon :

इति कालिकापुराणोक्ताऽयुधपूजाविधानाम् ॥

17

Sl. No. 13105 | आञ्जनेयपूजाविधानम् | Ms. No. P. 709/9

(हनुमत्पूजाविधानम्)

Beginning :

यन्त्रपूजाविधि वक्ष्ये शृणु पर्वतनन्दन ।
पूजाप्रकामाहात्म्यं यन्त्रं सिन्दूररञ्जितम् ॥

आदौ भूशुध्यादि मातृक न्यसेत् । गुरुवन्दनं कृत्वा + + + अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरं ऋषयः ॥

End :

पञ्चपूजां कृत्वा + + यथाशक्ति जपं करिष्ये + + अथ हनुमदष्टाक्षरीमहामन्त्रजपे विनियोगः । अस्य श्रीहनुमदष्टाक्षरीमहामन्त्रस्य ईश्वर ऋषिः + + पञ्चमुख हनुमान् देवता + + + य कीलकम् ॥

Colophon:

— — — —

18

Sl.No. 13106 आञ्जनेयपूजाविधानम् Ms. No. C. 3698/3

(हनुमत्पूजाविधानम्)

Beginning ।

श्रीमदाञ्जनेयपूजाविधिं व्याख्यास्यामः—

आदौ। मन्त्रन्यासं कुर्यात् । ब्राह्मे मुहूर्ते उत्थाय नित्यस्नानसन्ध्यादिकं कृत्वा ततः मन्त्रस्नानमारभेत् ॥

End:

वाक्कर्मभ्यां कराभ्यां च पद्भ्यां गर्भेण गुह्यतः ॥

याकृतं च यदुक्तं च तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा; इति जलं विसृजेत् ॥

Colophon ;

इत्यष्टाक्षरविधिः ॥

19

Sl. No. 13107 आदिशक्तिपूजा Ms. No. P.10080/1

Beginning ।

ऋतुर्वसन्तः शशिपूर्वपक्षे
तिथ्यासुवागीश्वरि भानुभौमे ।
अरिक्तकक्षिप्रमृडध्रुवेषु
आराध्यकर्मा स तु कामलक्ष्मीम् ॥ (?)

End :

वर्षे ध्रुवे मार्गशीर्षेऽर्कवारे
भौमाहम . . . मध्यानिशीथे ।

स्वे स्वे गेहे निम्बशाखानिशीथे
वर्णचारादर्चयेदादिशक्तिम् ॥

Colophon :

– – – –

20

Sl. No. 13108 **आयुधपूजाविधिः** **Ms. No. P. 4235/5**

Beginning :

अयुदुधपूजा –

नक्षत्रं कृत्तिकास्तम्यं गुरुर्देवो महेश्वरः ।
हिरण्यं च शरीरं ते धारादेवो जनार्दन ॥
आहर्ता समरे हत्वा खड्ग मां पाहि सर्वदा ॥

End:

सर्वायुधानां मुख्यं च नानाशास्त्रनिवारक ।
जयसिद्धिं प्रयच्छाशु चापायुध नमोस्तु ते ॥

+ + + +

मुद्गराय पट्टसाय अङ्कुशाय मुसलाय त्रिशूलाय नमो नमः ॥

Colophon :

– – – –

21

Sl.No. 13109 **आयुधपूजाविधिः (नवरात्रनांगभूता)** **Ms. No. P. 8410/63**

Beginning :

एवंगुणेत्यादितिथौ मम सम्भावितसकलारिष्टनिवृत्तिं + + उद्दिश्य कोशागार-धभिवृद्धि + + कामयमानः + + आयुधपूजां यथासाम्भवनियमेन यथासांभ-वद्रव्यैः करिष्ये ॥

End :

ओंकार × × दिभिः कृत्वा गन्धपुष्पाक्षतादिभिः ।
एवं सम्पूज्य शस्त्रास्त्रं गजाश्वादीन् प्रपूजयेत् ॥

\+ + + + ।

महिषाघ्नि महामाये चामुण्डे मुण्डमर्दिनि ।
यशो देहि जयं देहि सर्वकामांश्च देहि मे ॥

इति त्रिवारमुक्त्वा प्रार्थनां कुर्यात् ॥

Colophon :

२९२ तमे पत्रे-इति शस्त्रास्त्रध्यानम् ।
२९५ तमे अंतिमे पत्रे इति पूजाविधानम् ॥

22

Sl. No. 13110 **आयुधपूजाविधिः** **Ms. No. P 8828/4**

Beginning :

असिर्विशस्य॰ खड्गः॰ तीक्ष्णाधारो दुरासदः ।
श्रीगर्भोविजयश्चैव दराधारास्तथैव च ॥

\+ + + + ।

इयं येन धृताक्षाणी (?) हतश्च महिषासुरः ॥

तीक्ष्णाधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥

इति गन्धपुष्पाणि ॥

End :

यथा जीमूतघोषेण॰ स्त्रीणां त्रासोपजायते ।
तथात्र तव शब्देन त्रस्यान्त्यस्मद्विषो रणे ॥

इति धूपदीपनैवेद्यताम्बूलादिभिः षोडशोपचारपूजां कुर्यात् ॥

Colophon:

— — — —

23

Sl. No. 13111 आयुधपूजाविधिः **Ms. No. P. 9077/3**

(भविष्योत्तरपुराणीया)

Beginning :

ओं पूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ लक्ष्मीनारायणप्रेरणया + + भविष्योत्तरपुराणोक्तप्रकारेण आयुधपूजां करिष्ये ॥

End :

सर्वाणि राजचिन्हानि राजवृद्धिप्रदानि मे ।
सततं सन्तु सकलसम्पत्सौभाग्यदानि च ॥

सर्वाणि राजचिह्नानि प्रार्थयामि ॥

Colophon :

— — — —

24

Sl. No. 13112 आयुधपूजाविधिः **Ms. No. P. 9952/18**

Beginning :

ध्यायामि शत्रुमथनान् सर्वशत्रुविनाशकान् ।
सर्वसम्पत्समृध्यर्थं सर्वानायुधसत्तमान् ॥

ध्यानम् ।

आवाहये महाघोर सर्वशत्रुसमर्धनान् ।
यावत्पूजां करिष्येऽहं तावदायुधसत्तमान् ॥

End :

स्वाम्यमात्यसुहृत्कोशं राष्ट्रदुर्गबलेषु च ।
उत्तरोत्तरवृद्धिं च क्रमशः सर्वदा जयम् ॥

प्रयच्छध्वं हि मे नित्यं त . . . ये भक्तिदायकम् ।। इति प्रार्थनम् ॥

Colophon :

इति आयुषपूजाविधिः समाप्तः ॥

25

Sl. No. 13113 ईश्वरार्चनविधिः **Ms. No. P. 4179/20**

(नारायणभट्टीयान्तर्गता–अश्वलायनप्रोक्ता)

Beginning :

नारायणभट्टीये आश्वलायनः

पुरुषसूक्तविधानेन विधिना चाभिषेचयेत् ।
रुद्रसूक्तैश्च लिङ्गोक्तमन्त्रैर्वापि विशेषतः ॥

यजमानास्सऋत्विग्भिः अभिषिंचेयुरीश्वरम् ॥

End :

मा प्रगामेति सूक्तेन हिरण्यगर्भ इति सूक्ततः ।
पञ्चविंशति तत्त्वानि अस्मिन् बिम्बे प्रविश्य च ॥

Colophon :

– – –

26

Sl. No. 13114 ईश्वरार्चनविधिः **Ms. No. P.4387/2**

Beginning :

× × सूर्यप्रतीकाशं त्रिनेत्रं चन्द्रभूषणम् ।
शूलटङ्कगदाचक्रकुन्तपाशधरं विभुम् ॥

+ + + ॥

सोमेश्वर समागच्छ गृह्णाणेमां मया कृताम् ।
पूजां पश्य मे कामान् प्रपद्ये सोमशेखरम् ॥

End :

अनेन विधिना कृत्वा साष्टाङ्गं प्रणमेच्छिवम् ।
क्षमाप्य द्विजमुख्यांश्च ब्रह्मचारि × × च्छिशि ॥

एवं कृते न संदेहः कंक्षितम् लभते फलम् ।
किमत्र बहुनोक्तेन स शिवो नात्र संशयः ॥

Colophon :

-- -- --

27

Sl. No. 13115 **उद्यानप्रतिष्ठाविधिः** **Ms. No. P. 4720/4**
(शौनकीया)

Beginning :

उद्यानप्रतिष्ठामाह शौनकः—

उद्यानस्थापनं वक्ष्ये सर्वप्राणिहिताय च ।
स्थापनाद्यष्टमे वर्षे द्वादशेब्दे फले तथा ॥

तस्मिन् संवत्सरे कुर्यात् स्थापनं विधिना ततः ॥

End :

सस्त्रीकामाभूपतित्वांतमा इत्यनेन ऋचा 'देवस्य त्वा' इति यजुष 'भूर्भुवस्सुव'रित्येताभि र्व्याहृतिभिः कुशाग्रैरभिषिंचेयुः ॥

Colophon :

इति शौनकीये उद्यानप्रतिष्ठा विधिः समाप्त ॥

28

Sl. No. 13116 उपचारपूजा (त्रिपुरसिद्धान्तीया) Ms. No. P. 2477/2

Beginning :

ओं रां ह्रां री ह्रीं × × × ह्रः श्रीं × × त्रिपुरामावाहयामि ॥

आवाहयामि मन्त्रेण श्रीकारेण × × ।
त्रिपुर × × नमस्तुभ्यं सन्निधत्स्व × × च ॥

End :

भक्तांश्चत्रिपुरादेव्या आराध्य × × स्वयं × × पुरुषः × × भुयात् ॥

Colophon :

इति त्रिपु × × सिद्धान्ते × × खण्डे × × उपचारपूजा ॥

29

Sl. No. 13117 उमादेवीपूजा Ms. No. P. 8307/63

Beginning :

अथ उमादेवी पूजा—

उमायै गौर्यै प्रा....ऐश्वर्यै (!) ॥

End :

शर्वायै, भैरव्यै, नन्दिन्यै, + उमाकान्तप्रियायै—पुष्पाञ्जलिं समर्पयामि ॥

Colophon :

– – – –

30

Sl. No. 13118 एकरुद्राभिषेकविधिः Ms. No. P. 90/7

(कारणागमीया)

Beginning:

अथ वक्ष्ये विशेषेण रुद्रस्नानविधिं शृणु ।
कामदं मोक्षदं चैव आयुरारोग्यवर्धनम् ॥

+ + + +

एकदशमूडानां च अभिषेकं विशेषतः ।
प्रत्येकं सर्वद्रव्याणां पृथक् पूजां विशेषतः ॥

End:

विप्रक्षत्रियविट्शूद्रा शिवपूजां महाधिकाम् ।
इह लोके सुखी भूत्वा परे सायुज्यमाप्नुयात् ॥

Colophon:

इति कारणो एकादशरुद्राभिषेकविधिः ॥

31

Sl. No. 13120 एकादशरुद्राभिषेकविधिः Ms. No. P. 1257/1

(प्रयोगात्मकः)

Beginning:

आदौ सङ्कल्पपूर्वकं गणपतिपूजां कुर्यात् । ओं नमो भगवते रुद्राय । ओं अथातः पञ्चाङ्गरुद्राणाम्--

ओङ्कारं मन्त्रसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं तस्मै नकाराय नमो नमः ॥

End :

एवंगुण.......प्रीत्यर्थं दशमवाराभिषेकानन्तरं एकादशवराभिषेकं अन्योन्यसहायेन करिष्यामः ॥ ओंनमो भगवते + + + ततः नमकचमकपुरुषसूक्तदश-शांतिघोषशान्तिभिरभिषिञ्चेत् ॥

Colophon

— — — —

32

Sl. No. 13121 कन्याकुमारीपूजाविधिः **Ms. No. P. 10475/6**

(पुराणतन्त्रीया-कुलदेवतापूजाविधिः)

Beginning :

अथ कुलदेवताऽराधनम् । कल्पोक्तप्रकारेण षोडशोपचारपूजां कुर्यात् । पूजाक्रमः पूर्वोच्चरितएवंगुणोत्यादि तिथौ सर्वेशां × × × कुलदेवताप्रीत्यर्थं कन्याकुमारीपूजां करिष्ये ॥

End:

गन्धाक्षतहरिद्राकुंकुमसिंधूरपरिमळादीनि पुष्पमालैरलंकृत्य × × देवीं कलश स्थतीर्थं × × × सर्वेषां प्रत्येकप्रद × × × भागशः दद्यात् ॥

Colophon:

इति पुराणतन्त्रोक्तांकन्याकुमारीपूजा समाप्ता ॥

33

Sl. No. 13122 कार्तवीर्यार्जुनपूजाविधिः **Ms. No. P. 9932/5**

Beginning

हृत्पुण्डरीक मध्यस्थं दिव्यतेजोमयं शुभम् ।

+ + + +

वनमालाधरं देवं ध्यायेन्नारायणं शुभम् ॥

--

सहस्रबाहुं सशरं सचापं
रक्ताम्बरं रक्तकिरीटकुण्डलम् ।
चोरादिदुष्टभयनाशनमिष्टदम् तं
ध्यायेन्महाबलविजृंभितकार्तवीर्याम् ॥

End:

कं कार्तवीर्यार्जुनाय स्वाहा आवाहनं समर्पयामि । अथावरणपूजा— अग्नीशासुरवायव्यकोणेषु हृदयादिगाः । अंगै प्रथमावरणम् । ओं नमो भगवते आग्नेयास्थितायाङ्गमूर्तये शुद्धस्फटिकसङ्काशाय विकीच [?] ॥

Colophon:

-- -- --

34

Sl. No. 13123 कार्तवीर्यार्जुनपूजाविधिः **Ms. No. C. 572/2**

Beginning :

अथ कार्तवीर्यप्रयोगः-

आसने सुखमुपविश्य प्राणानायम्य सङ्कल्प्य, श्री कार्तवीर्यपूजां करिष्ये । कलशार्चनम् कृत्वा, शंखं सम्पूज्य न्यासं कृत्वा प्राग्द्वारे धात्रे नमः ॥

End :

एवं पञ्चावरणसहितं देवं सम्पूज्य षोडशोपचारैः सम्पूजनंकुर्यात् । + + प्रार्थयेत् + + स्तोत्रं पठेत् । + + + + ॥

सप्रद्वासे (?) कनाथः सवितृसमरुचिः सर्वदुष्टान्तकोनः
पायाद्व्जायताक्षणः रथवरनिलयः स्थूलकायोऽतिभीमः ।

चापान्तेषु त्रिलोकोधृतशरधनुषो निस्वनैस्त्रायमाणः

श्रीमान् श्रीकार्तवीर्योऽखिलनृपतिनतांघ्र्यम्बुजः क्षिप्रकारी ॥

Colophon :

इति ध्यानश्लोकाः ॥

35

Sl. No. 13124 काशीगङ्गास्नानसङ्कल्पपूजाविधिः **Ms. No. C. 3583/1**

Beginning :

ಶ್ರೀ ಕಾಶೀಕ್ಷೇತ್ರದಲ್ಲಿ ಗಂಗಾಸ್ನಾನ ಸಂಕಲ್ಪ—

एवंगुणेत्यादि मेरोर्दक्षिणे पार्श्वे विन्ध्यस्योत्तरे आर्यावर्तैकदेशे अविमुक्तावाराणसीक्षेत्रे असीवरुणयोर्मध्ये आनन्दवने महाश्मशाने + + भागीरथ्याः पश्चिमे तीरे उत्तरवहिन्यां मणिकर्णिकाक्षेत्र + + अस्यां शुभतिथौ + + विश्वेश्वरादिसमस्तदेवतासन्निधौ गङ्गा स्नानमहं करिष्ये ॥

End :

योऽसौ सर्वगतो विष्णुः चित्स्वरूपी निरञ्जनः ।

स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः ॥

Colophon:

— — — —

36

Sl. No. 13125 कूपप्रतिष्ठाविधिः **Ms. No. P. 4710/3**

Beginning :

× × ण्णार्बेण × × कूपप्रतिष्ठाविधिरुच्यते-

माघफाल्गुनवैशाखे ज्येष्ठश्रावणमासयोः ।

एतानि पञ्चमासा × × प्रतिष्ठाकूपकेऽपि वा ॥

+ + + ॥

स्नानं कृत्वा + + स्वस्तिवाचनं कृत्वा × × यं × × नूतनकलाप प्रतिष्ठाकूप × × सम्य × × करिष्यमाणः + + पुण्याहवाचनम् करिष्ये ॥

End :

भूर्भुवस्सुवरिति मन्त्रेण चतस्र आहुतीर्हुत्वा × × शवस्त्रप्रतिमादानानि कुर्यात् । नीराजनादि । विप्रैराशीर्वचनम् कुर्यात् ॥

Colophon:

इति कूपशा × × × यां कूपप्रतिष्ठाविधिस्समाप्तः ॥

37

Sl No. 13127 कूपप्रतिष्ठाविधिः **Ms. No. C. 2546/1**

(सार्वजनिकस्थलीयः)

Beginning:

पुण्याहवाचनांगं सङ्कल्प्य मया कारितस्य नवकूपस्य सर्वेषां प्राणिनां उपकारार्थं जलसमृध्यर्थं कूपप्रतिष्ठाङ्गस्वस्तिवाचनकर्मकरिष्ये + वरुणमन्त्रजपं कुर्यात् ॥

End:

पञ्चरत्न-पञ्चपल्लव-पञ्चमृत्तिका पञ्चगव्यपञ्चामृताज्यसक्तुलाजाफलादीनि सम्पाद्य शांतिं कुर्यात् ॥

Colophon :

- - - -

38

Sl. No. 13128 कृष्णराजपादपूजाविधिः **Ms. No. C. 3424/15**

Beginning :

भूरिसम्पत्समृध्यर्थं भूतरक्षोनिवृत्तये ।
भूपपादार्चनविधौ कुरु घण्टारवम् सदा ॥

एवंगुणेत्यादितिथौ राजाधिराज-श्रीकृष्णराजसार्वभौमचरणारविंदपूजां करिष्ये ॥

End :

गंगास्नानेन यत्पुण्यं तत्पुण्यमिति निश्चयात् ।
करोमि मूर्ध्नि कृष्णेन्द्र पादनिर्माल्यधारणम् ॥

इत्युक्त्वा श्रीमत्कृष्णराजसार्वभौमस्य पादपङ्कजप्रासादरूपं निर्माल्यपुष्पं शिरसि धार-येत् ॥

Colophon :

इति पादपूजाविधिः समाप्तः ॥

39

Sl. No. 13129 केतुपूजाविधिः Ms. No. P. 3023/170

Beginning :

कुरुधरानृपं वारुणं कलशं निधाय इमं मे वरुणेति पूजां कृत्वा तत्पश्चिमदिग्भागे + + + पूजयेत्— केतवे नमः; चित्रांबरधराय नमः ॥

एहि केतो महातेजा सुस्थिरो भव विष्टरे ।
पूजां गृहाण मे देव शतमूर्ते नमो नमः ॥

End :

धूम्रो द्विबाहुर्वरथो गदाभृत्
गृध्रासनस्थो विकृतासनश्च ।
किरीटकेयूरविभूषिताङ्गः
सदास्तु मे केतुगणप्रशान्तः ॥

अस्मि... मां केतुप्रतिमां अधिदेवताब्रह्मणप्रत्यधिदेवताचित्रगुप्तप्रतिमासहितां सवस्त्रां × × × या अमुकराशिस्थितस्य × × केतु × × मयमानः तुभ्यमहं सम्प्र-ददे न मम दक्षिणाभागः-

ज्वलानलमूखोद्भूत मृत्युरोगभयावह ।
भागं ददामि विप्राय सर्वकामार्थसिद्धये ॥

हि × × गर्भ × × × × ॥

Colophon :

-- -- --

40

Sl. No. 13130 केतुपूजाविधिः Ms. No. P. 3504/9

Beginning :

नमोस्तु केतवे तुभ्यं प्रसीद भवनाशन ।
पूजार्थं तव देवेश विष्टरे सुस्थिरो भव ॥

End :

ब्रह्मन् गृह्णीष्व विप्रेन्द्र प्रतिमां केतुनः शुभाम् ॥
अनुगृह्णीष्व भूदेव केतुर्दोषम् व्यपोहतु ॥

Colophon :

– – – –

41

Sl. No. 13131 केतुपूजाविधिः Ms. No. P. 5930/38

Beginning :

अथ केतुपूजा—

कालमेघसमानाभं पीतवर्णं महाबलम् ।
स्थापयामि महारौद्रं केतुं × × सुखप्रदम् ॥

End :

केतुं कृण्वन्निति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितं केतुभ्यो नमः । षोडशोपचारं कुर्यात् ॥

Colophon :

– – –

42

Sl. No. 13132 केतुपूजाविधिः Ms. No. P-8765/19

Beginning:

ध्वजाननो जैमिनिगोत्रजातः
वेदीसुमध्ये सुविचित्रवर्णः ।
याम्याननो वायुदिशः सखड्गः
चर्मी शिखी चाष्टशतश्च केतुः ॥

इति ध्यात्वा, केतुग्रहं चित्रवर्णं + + जैमिनिगोत्रजातं + + सूर्यस्य वायव्यभागे केतुग्रहमावाह्य सुप्रसन्नो भव । वरदो भव । + + + + केतवे नमः; इति मन्त्रेण षोडशोपचारपूजां कुर्यात् ।

End :

एवम्प्रकारेण अधिदेवताप्रत्यधिदेवतानवग्रहाणां पृथक् पृथक् शोडशोपचारपूजां कुर्यात् ॥

Colophon :

– – – –

43

Sl. No. 13136 क्षीराब्धिपूजाविधिः Ms. No. P. 4212/12

Beginning :

नान्दीश्राद्धं तु कर्तव्यं भार्यायाः प्रशमाय वै ।
सीमन्ते जननी नाम्ना पुत्रस्य मुखदर्शने ॥

End :

क्षीराब्धि × × विस्मा महापातनाशनी ।
तस्मात्काले × यः पूजां तुलसी सन्निधौ हरेः ॥

Colophon:

– – – – । –

44

Sl. No. 13136 गजपूजाविधिः **Ms. No. P. 8828/9.**

Beginning:

ऐरावतादिसुरनागकुलप्रसूतं
सल्लक्षणाढ्यमहो भुवि राजपूज्यम् ।
राज्यप्रदं शत्रुबलावमर्दिनं
प्रजापतिप्रीतिकरं गजं भजे ॥

End:

यूयं बलानां प्रवरा नृपाणां
महाबलादेव गजप्रसूताः ।
इहैव चामुत्र च पूज्यमानाः
नागाः प्रयच्छन्तु नृपाय तुष्टिम् ॥

Colophon :

– – – –

45

Sl. No. 13138 गजपूजाविधिः Ms. No. B. 545/7

(कार्तिकपूर्णिमासम्बन्धिनी)

Beginning :

नारायणं गजारूढं शंखचक्रगदाधरम् ।
श्रीभूनीळादिभिर्युक्तं पीतवाससमच्युतम् ।।

अर्चयेत्कार्तिके मासि पौर्णमास्यां निशामुखे ।।

End :

ततश्च दक्षिणां दत्वा ताम्बूलानि च दापयेत् ।
रात्रौ देवस्य सांनिध्ये निर्वाणं दीपमाचरेत् ।।

Colophon :

— — — —

46

Sl. No. 13141 गयास्नानसङ्कल्पपूजाविधिः Ms. No. C. 3583/3

Beginning :

ಗಯಾಕ್ಷೇತ್ರದಲ್ಲಿ ಸ್ನಾನಸಂಕಲ್ಪ–

एवङ्गुणेत्यादि + + + विन्ध्यस्योत्तरदेशे आर्यावर्तान्तर्गतमगधदेशे चम्पकारण्ये मधुवने कोलाहलपर्वते + + फल्गुनीतीर्थस्नानमहं करिष्ये ॥

End:

फल्गुनीतीर्थे विष्णुजले करोमि स्नानमादृतः ।
आत्मनां च पितृणां च भुक्तिमुक्तिप्रसिद्धये ।।

Colophon:

-- -- --

47

Sl. No. 13142 गरुडार्चनविधिः Ms. No. P. 4894/2

Beginning:

गरुडार्चनस्य काश्यप ऋषिः ; पंक्तिः छन्दः ; + + + गरुडार्चने विनियोगः + + देहे अनन्तदिन्यासप्रकारः-

अनन्तो वामकटकः यज्ञसूत्रं तु वासुकिः ।
× × कः कटिसूत्रं तु हारः कार्कोटकस्ततः ॥

End :

हृदयकमले स्वानन्दधामनिष्ठस्य चतुरात्मनो देवस्य सङ्कर्षणा × × × ड मवतार्य मन्त्रमन्त्रन्यासादीनां × × × अर्चयेत् ॥

Colophon :

-- -- --

48

Sl. No. 13143 गीतापूजा Ms. No. P. 9197/13

Beginning :

गीतापूजाङ्गभूतकृष्णस्तुतिः—

प्रपन्नपारिजाताय वेत्रतोत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीत मृतदुहे नमः ॥

End :

योन्तःप्रविश्य मम वाचमिमां प्रसुप्तां
सञ्जीवयत्यखिलशक्तिधरस्य धाम्ना ।
अन्यांश्च हस्तचणश्रवणत्वगादीन्
प्राणान्नमो भगवते पुरुषाय तस्मै ॥

यस्य स्मृत्येत्यादि । कायेन वाचा + + । + + समर्पयामि ॥

Colophon :

— — — —

49

Sl. No. 13144 गुरुग्रहपूजाविधिः (गुरुपूजाविधिः) Ms. No. P. 3504/5

Beginning :

गुरुग्रह नमस्तुभ्यं देवानां मन्त्रिसत्तम ।
ध्यायामि त्वां जगन्नाथ सर्वकामार्थसिद्धये ॥

End :

ब्राह्मणान् भोजयेत्पश्चात् आशिषो वाचयेत्ततः ।
सर्वान् कामान् अवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon:

— — — —

50

Sl. No. 13145 गुरुग्रहपूजाविधिः (गुरुपूजाविधिः) Ms. No. P. 5930/34

Beginning :

हिरण्यै पुष्परागं च पूर्वपु × × फलं तथा ।
श्वेतवस्त्रेण संवेष्ट्य तत्त्वायामीति पूजयेत् ॥

End:

ब्राह्मणान् भोजयेत् पश्चात् भुञ्जीतेष्टजनैस्सह ।
गुरुमुद्दिश्य यः पूजां कुर्यात्सेष्टमवाप्नुयात् ॥
गुरुणा × × × सर्वाणां नाशमयान्त्यसंशयः ॥

Colophon:

— — —

51

Sl. No. 13146 | गुरुग्रहपूजाविधिः (गुरुपूजाविधिः) | Ms. No. P. 8765

Beginning :

ಗುರುಪೂಜೆ—

याम्ये सुदीर्घे चतुरस्रपीठे
रथाङ्गिरा सौम्यमुखः सुपीतः ।
दण्डाक्षमालाजलपात्रधारी
सिद्धास्यदेवो वरदः सुजीवः ॥

इति ध्यात्वा वृहस्पतिं + + + नित्यं मेरुं प्रदक्षिणीकुर्वाणं + + आङ्गीरसगोत्रं + + परिवारसहि आवाहयामि ॥

End :

गुं गुरवे नमः इति मन्त्रेण पूजां कुर्यात् + + अधिदेवता + + शोडशोपचारपूजां कुर्या.। + + प्रथधिदेवतां + + आवह्य + + पूजां कुर्यात् ॥

Colophon :

– – – –

52

Sl. No. 13150 | गृहार्चनविधिः | Ms. No. P. 3645/44

Beginning:

गृहार्चनविधिं वक्ष्ये × × × मार्गतः ।
स्नात्वा च कृत्वा नित्यकर्म कौसल्येत्यादिमन्त्रतः ॥
उद्घाट्य द्वारं देवस्य निर्माल्यानि व्यपोह्य च ।
शुद्धं तीर्थं च सरसः कूपाद्वा चानयेत्सुधीः ॥

End :

शिवं चेत्यादि द्राविड्या मङ्गलाः पद्ममालिकाः ।
वदन् तीर्थं प्रसादं च गृह्णीयात् गृहिणस्तदा ॥

Colophon :

– – – – – –

53

Sl. No. 13153 गृहदेवतासम्प्रोक्षणविधिः (शौनकीयः) **Ms. No. P. 60/33**

Beginning

सम्प्रोक्षणविधिं वक्ष्ये × × × × ।
× × स्थापितबिंबस्य न पुनस्स्थापनं स्मृतम् ॥

स्थापयेत्तु महादोषः तस्य सम्प्रोक्षणं स्मृतम् ।
खनने चाग्निदाहे च चिरलुप्ते च पूजने ॥

End :

विष्वक्सेनं च सम्पूज्य देवा . . . . गुरुमर्चयेत् ।
ब्राह्मणान् भोजयित्वा तु दक्षिणाभिः समर्चयेत् ॥

Colophon :

इति शौनकीये गृहदेवतासम्प्रोक्षणविधिः समाप्तः ॥

54

Sl. No. 13154 गृहदेवतासम्प्रोक्षणविधिः (भगवत्संहितान्तर्गतः) **Ms. No. P. 262/7**

Beginning :

गृहार्चनविधौ विष्णुगृहार्चन × × × विधिरुच्यते—
येन सम्प्रो × × × सदा ।
चण्डालसूतकोदक्या शवखरादिदूषिते । + +
विधिना × × × र्चयेत् ॥

End :

पूर्वस्थानमलंकृत्य देवं त ×नि × च ।
अर्चयेत्तं तथा पूर्वं भोगत्रैकल्यसिद्धये ॥

Colophon :

इति श्रीभगवत्संहितायां गृहार्चनप्रोक्षणविधिः समाप्तः ॥

55

Sl. No. 13156 गोपूजाविधिः Ms No. P. 903/4

Beginning :

एवङ्गुणेत्यादिशुभतिथौ मम समस्तफलसिध्यर्थं × × ।

सर्वदेवमयीं देवीं सर्वलोकैकमातरम् ।
सर्वपापक्षयकरीं नित्यं ध्यायामि गां गुरुम् ॥

सवत्सां गां ध्यायामि ॥

End :

विष्णोर्वक्षसि या लक्ष्मीः स्वाहायाश्च विभावसोः ।
चन्द्रार्कशक्रशक्तिर्या सा धेनुर्वरदास्तु मे ॥

Colophon :

इति गां प्रार्थयित्वा प्रदक्षिणत्रयं कुर्यात् । सवत्सायैः नमः; षोडशोपचारपूजाः समर्पयामि ॥

इति गोपूजाविधानं सम्पूर्णम् ॥

Extra information :

ग्रन्थान्ते — " गोग्रासमन्त्रः–

सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता ।
गोग्रासं हि मया दत्तं रक्षेतां पतितां सदा ॥

गवां कण्डूयम × × सर्वक × × ल्मपनाशनम्।
गवां ग्रासप्रदानेन स्वर्गलोके महीयते ॥ "

इति गोग्रासमन्त्र-तद्रक्षण-तद्ग्रासप्राशस्त्यविषया: वर्णिता: ॥

56

Sl. No. 13159 गोपूजाविधिः Ms. No. P. 5587/95
(ब्रह्माण्डपुराणान्तर्गतः)

Beginning :

सर्वदेवमयीं देवीं सर्वलोकैकमातरम् ।
सर्वपापक्षयकरीं नित्यं ध्यायामि गां शुभाम् ॥

सवत्सां गां ध्यायामि ॥

End :

नमो धेनो नमो दोग्ध्रि नमो गौरि पयस्विनि ।
नमस्ते सर्वसौख्यानां कारणायै नमो नमः ॥

नमस्कारम् । यस्य स्मृत्येति: पूजासमर्पणम् ॥

Colophon :

इति ब्रह्माण्डपुराणोक्तगोपूजाविधिः समाप्तः ॥

57

Sl. No. 13161 गोपूजाविधिः Ms. No P. 6856/20

Beginning :

गोमयेनोपलिप्योर्वीं रङ्गवल्यादिधातुभिः ।
समलंकृत्य तत्रैव गोपूजां सम्यगाचरेत ॥:

End :

एवं गोपूजां कृत्वा आचार्यं च पूजयित्वा गोदानं कुर्यात् । आचार्यं प्रार्थयेत-

मया च भक्तितो दत्तां गां पालय सुधर्मतः ।
पयसा प्रीणनं कार्यं देवर्षिपितृदेवताः ॥

Colophon :

इति गोपूजाविधिः ॥

58

Sl. No. 13165 ग्रहपूजाविधिः (गुरुपूजाविधिः) **Ms. No. P. 5476/2**

Beginning :

अथ वक्ष्यामि × × श गुरुपूजां समाहितः ।
यस्य प्रसादात् × × पि शुभ प्राप्नोति × × ॥

गोचर्ममात्रे × × गोमयेनोपलिप्य स्थण्डिलं कृत्वा कलशं निक्षिप्य अर्चयेत् ॥

End :

एवं कृत्वा विधानेन गुरुपूजामनुत्तमाम् ।
स प्राप्नोति परां सिद्धिं चान्ते मोक्षमवाप्नुयात् ॥

Colophon :

— — —

59

Sl. No. 13167 ग्रहपूजाविधिः (गृहस्थकार्यनवग्रहपूजाविधिः) **Ms. No. P. 3924/5**

Beginning:

गोधूमास्तण्डुला खल्वा मुद्गाश्चणककङ्कवः ।
तिलमाषकुलित्थाश्च × × चाक्षताः स्मृताः ॥

End:

सूर्यज्ञशुक्राः प्राग्वक्त्राः प्रत्यङ्मन्देन्दुकेतवः ।
राहारौ दक्षिणावक्त्रौ बृहस्पतिरुदङ्मुखः ॥

Colophon:

-- -- -- --

Extra information:

ग्रन्थोऽयं महाराधनाविषयकः । गृहपूजाविधित्वेनात्रास्य निर्देशः प्रामादिकः ॥

60

Sl. No. 12935 ग्रहपूजाविधिः **Ms. No. P. 3992/3**

(गृहस्थकार्यग्रहपूजाविधिः)

Beginning :

यस्यायुर्दायाष्टकवर्गभिन्नाष्टकवर्गप्रतिविन्दुफलसहितनक्षत्रायुर्दाय + + दशादिवशात् + + यो दोषः समजनि तद्दोषपरिहारार्थं + + नवग्रहदेवताप्रीत्यर्थं + + + ग्रहपूजां कलशपूजां च करिष्ये ॥

End :

य × × गुप्तं महाप्राज्ञं लेखनीपत्रधारणम् ।
रक्तं रक्ताम्बुजधारं मध्यस्थं सर्वदेहिनाम् ॥

सचित्रचित्रं + + केतुषटप्रत्यधिदेवतां चित्रगुप्तं वामभागे आवाहयामि ॥

Colophon :

-- -- --

Extra information :

ग्रहपूजाविषयकस्यास्य ग्रन्थस्य गृहपूजाविषयनिरूपणाभिप्रायेण गृहपूजाविधिः इति शिरोलेखः in tabulour form प्रमादिकः ॥

61

Sl. No. 13170 ग्रामप्रतिष्ठाविधिः Ms. No. P. 4180/77

Beginning:

ग्रामप्रतिष्ठां वक्ष्यामि शौनकौ ग्रामखण्डनात् ।
पुर्याश्चापि नगर्याश्च पट्टनस्य द्विजन्मनाम् ॥

End :

सर्वान् कामानवाप्नोति पुण्यलोकमवाप्नुयात् ।
विष्णुलोकमवाप्नोति सुखसौख्यमथाश्नुते ॥

Colophon :

इति शौनकीये ग्रामप्रतिष्ठाविधिः ॥

62

Sl. No. 13174 चण्डिकापूजा Ms. No. P. 4590/8

Beginning :

अथ चण्डिकापूजां करिष्ये—

पीठपूजा । नवशक्तिपूजा । मेध्यायै, प्रज्ञायै, विद्यायै, श्रियै, + + श्री चण्डिकायै सुवर्णपीठं कल्पयामि ॥

End :

रुद्रायै रुद्रतरायै, रुद्रप्रियायै, + + महाघोरायैः, इति पञ्चमावरणम् । अङ्ग-पूजादि सर्वं पूर्ववत् ॥

Colophon :

इवि चण्डिकापूजा ॥

63

Sl. No. 13175 चण्डिकापूजा Ms. No. P. 4980/14

(देवीमाहात्म्यान्तर्गता

Beginning :

पुनस्त्वां परिपृच्छामि चण्डिकापूजनादिकम् ।
नित्यं काम्यं च जाप्यस्य विधानं तद्‌द्विजोत्तम ॥

ऋषिरुवाच–

परिपृच्छसि यत्नेन चण्डिकापूजनादिकम् ।
तदहं ते प्रवक्ष्यामि यथावदनुपूर्वशः ॥

End:

जैमिनिरुवाच–

मार्कण्डेय महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रोतुमिच्छाम्यहं शेषं देवीमाहात्म्यमुत्तमम् ॥

मार्कण्डेयः—

सावर्णिस्सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥

Colophon ;

– – – –

64

Sl. No. 13177 चन्द्रपूजा Ms. No. P.3504/2

Beginning :

धूर्जटेर्मस्तकारूढ महालक्ष्म्यास्सहोदर ।
आवाहयामि देवेश नित्यं सन्निहितो भव ॥

चन्द्रमावाहयामि ; ध्यायामि ; + + सर्वोपचारपूजार्थे श्रीपुष्पं चन्द्रमल्लिकां समर्पयामि ॥

End :

प्रार्थनम्–

देवदेव जगन्नाथ शीतांशो भास्करप्रभ ।
अनुगृह्णीष्व देवेश सर्वाभीष्टान् प्रदेहि मे ॥

Colophon :

– – – –

65

Sl. No. 13178 चन्द्रपूजा Ms. No. P 5930/31

Beginning :

अथ चन्द्रपूजा–

शान्तं नक्षत्रनाथं च रोहिणीवल्लभं प्रभुम् ।
कुन्दपुष्पोज्वलाकारं स्नापयामि निशाकरम् ॥

इति चन्द्रस्नापनमन्त्रः ॥

End :

सोमाय अमृतोद्भवाय दिव्यमूर्तये धवलाभरणाय यज्ञोपवीतमालाधराय ममार्चनकं गृहाण ; गृहाण ; शान्तिं कुरु ; कुरु ; स्वाहा ; इति चन्द्रमन्त्रः । आप्यायस्वेति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितसोमाय नमः; इति षोडशोपचारपूजां कुर्यात् ॥

Colophon :

– – – –

66

Sl. No. 13183 चरदेवताप्रतिष्ठाविधिः Ms. No. P. 2914/70

Beginning :

अप्रतिष्ठितबिम्बं यदलङ्कार× × × पूजनम् ।
मोहादज्ञानतो वापि × × × × पञ्चभिः ॥
. . . . पञ्चगव्यैः स्नानं पृथक् पृथक् । +
एकविंश× × × × ।
घर्षयित्वा ततो गव्यैः पञ्चभिः स्नानमाचरेत् ॥

End :

आप्याया × × तु नी × तीयं वैदिकः स्मृतः ।
गुरवे दक्षिणां दद्यात् ऋत्विग्भिश्चैव पूर्ववत् ॥

Colophon:

इति चरदेवताप्रतिष्ठा ॥

67

Sl. No. 13184 चरदेवताप्रतिष्ठाविधिः Ms. No. P. 3023/175

Beginning:

अप्रतिष्ठितं च यद्बिम्बं अलङ्कारं न पूजनम् ।
मोहादज्ञानतो वापि कुर्यात्कतृक्षयं भवेत् ॥
+ + + + ।
अभिषिच्य महेशानं विष्णुं वा पल्लवोदकैः ॥

End

आचार्यायान्तनियमं इतीयं वैदिकी स्मृतिः ।
गुरवे दक्षिणां दद्यात् ऋत्विजां चैव पूर्ववत् ॥

Colophon :

इति चलप्रतिष्ठा ॥

68

Sl No. 13191 चामुण्डीपूजाविधिः **Ms. No. C. 3491/1**

Beginning

नमस्ते विघ्नराजाय + + । + परां गतिम् ॥
प्रणम्य, अपसर्पन्तु + ताः । ये भूता + या ॥ +

प्राणानायम्य सङ्कल्प्य चामुण्डेश्वरीदेवतामुद्दिश्य चामुण्डेश्वरीदेवताप्रीत्यर्थं षडासन-प्रकारेण + + षोडशोपचारपूजां करिष्ये ॥

End :

पुनरुत्तरनीराजनम् । यस्य स्मृत्येत्यादि । श्रीचामुण्डेश्वरीचरणारविन्दयोः समर्पयामि । पर्याप्त्या अनन्तगायायेति नीरजनम् । पुष्पाञ्जलिं व्यजनवस्त्रोपचारादीन् कृत्वा पर्यङ्कासनं समर्पयामि । + + + +

मुक्तकेशि विरूपाक्षि लम्बोदरि महोदरि ।
महादेव्याः प्रसादेन सर्वे गृह्णन्तु सात्विकाः ॥

बलिहरणं निवेदयामि ॥

Colophon :

पूजाविधिः ॥

69

Sl. No. 13192 सूर्यप्रीतिदानविधिः **Ms. No. P. 2151/74**

Beginning :

पूर्वोक्तएवङ्गुणविशेषणविशिष्टायां शुभतिथौ अनन्तकोटिजन्माद्यवस्थापापकर्मनिवृत्यर्थं + + चिन्तामणिपार्थिवेश्वरपूजां करिष्ये ॥

End:

आधारमुख्यनलिनै विविधैस्सवर्णैः
सन्मध्यभास्वरतरैः सुमनोभिरङ्ग ।
नानाविधस्सगुणनिर्गुणभावपुष्पैः
श्रीरङ्गमूर्तिमनिशं हृदि पूजयस्व ॥

Colophon

— — :

70

Sl. No. 13193 चिरञ्जीविपूजा Ms. No. P. 5930/64

Beginning:

आयुप्रद महाभाग सोमवंशविवर्धन ।
महाव्रत मुनिश्रेष्ठ मार्कंडेय नमोऽस्तु ते ॥

मार्कंडेयाय नमः ॥

End:

रेणुकेय महावीर्य कार्तवीर्यकुलान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ॥

परशुरामाय नमः ॥

Colophon:

इति चिरंजीविपूजा ॥

71

Sl. No. 13197 जातवेदसदुर्गापूजा Ms. No. C. 3503/4

Beginning:

एवंगुणविशेषणविशिष्टायां + + + जातवेदसदुर्गायन्त्रार्चनं करिष्ये । प्राणप्रतिष्ठांपन कृत्वा मूलमन्त्रेण न्यासं कृत्वा पीठपूजां कुर्यात् ॥

End:

शंखं चर्मधनुश्च चारु दधतीं रज्वलसत्तर्जनीं
वामैश्चक्रमसिं च शेशमितरैस्तिर्यक्तिशूलाम्बुजैः ।

सन्नद्धां विविधायुधैः परिवृतां मन्त्रीकुमारीजनैः ।
ध्यायेदीप्सितसिद्धिदां त्रिनयनां सिंहाधिरूढांशिवाम्॥

Colophon :

-- -- -- --

72

Sl. No. 13198 तटाकप्रतिष्ठाविधिः **Ms. No. P. 60/26**
(ब्रह्माण्डपुराणान्तर्गता)

Beginning :

तटाकस्यार्चने वापि विधिं विधिवतां वर ।
कथयस्व महाभाग वद देवकिनन्दन ॥

श्रीकृष्णः—

साधु साधु महाबाहो यन्मां त्वं परिपृच्छसि ।+ +
निष्पन्ने च तटाके च सर्वभेदविवर्जिते ॥ + +

विधिः कार्यस्तथा तत्र सिद्धनक्षत्रयोगतः ॥

End :

तासामभावे गां दद्यात् सवत्सां दोहिनीं तथा ।
एष राजन् तटाकस्य विधिस्तु परिकीर्तितः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे विष्णुरहस्ये तटाकप्रतिष्ठा समाप्ता ॥

73

Sl. No. 13199 तटाकप्रतिष्ठाविधिः Ms No. P. 2117/8

Beginning :

कूपवापीपुष्करिणीनदीसेतुतटाकादिषु प्रपादेवगृहादिषु च ग्राम्यौषधिवृक्षादिपूत्पातेषु × × × दानां × × होमः + + तस्य पुरस्तात् .... पावटं खात्वा तियर × × × पालाशखादिरं वायूपमध्वर्युर्यमा . . . सह स्थापयतः ॥

End :

सर्वपापहरं स्वर्ग्यं ह्येतत्कर्मानुष्ठानं पुनरुत्पादात्मने च कर्तुश्चोदितं भवति ॥

Colophon:

इति तटाकादिविधिः ॥

74

Sl. No. 13200 तिरुवाराधनक्रमः(आराधनक्रमः) Ms. No. P. 7281/1

Beginning :

स्वाचान्तः सोर्ध्वपुण्ड्रः प्रणमननजिनाद्यासनं चासुयाम-
साधन्यासो जपस्स्यात् (?) हृदयकमलके मानसी देवपूजा ।
वामस्थं वारिपात्रं कुसुममितरतश्चान्यद . . . धर्मपाद्य
स्नानीय . . . . शुद्धा . . . . तनुकुसुमस्वात्मना प्रोक्षणं स्यात् ॥

End :

आह्वानं चासनार्घ्यं पदसलिलमथाचामपुंसूक्तयुक्त
स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादे पर्क आदावुपरि च सुशलपायसाद्यन्नजात (?)
पानीयाचमपूगं परिगतिनमनोद्वासनं विष्णुपूजा ॥

Colophon :

– – – –

Extra information :

ग्रन्थान्ते—

"श्रीश्च वागीश्वरीकान्तिक्रियाशक्तिविजि × × × ।
इच्छाप्रीतिरती चैव मायाधी- र्महिमेति च " ॥

इति दृश्यते ॥

75

Sl.No. 13201 तिलाक्षतापूजाविधिः Ms. No. P. 8307/60

Beginning :

अथ तिलाक्षतापूजा—

भवन्य नमः । पशुपतये नमः ।
शर्वाय नमः । उमापतये नमः ।।

End:

रुद्राय नमः । महते नमः ।
भीमाय नमः । श्रीपरमेश्वराय नमः ।।
ईशानाय नमः ।

तिलाक्षतापूजां समर्पयामि ।।

Colophon : ... ...

76

Sl. No. 13202 तीर्थयात्रादानविधिः Ms. No. P. 64/6

(विष्णुयामलीया— यात्रादानविधिः)

Beginning :

अथातः सम्प्रवक्ष्यामि दानानि विविधानि च ।
तीर्थयात्राप्रयुक्तानि सर्वपापहराणि ॥

+ + + ।

उद्दिश्य पुण्यतीर्थानि पुण्यक्षेत्राणि वा पुनः ।
इयासुर्मनुजः पूर्वदिने प्रयतमानसः ॥

End :

प्रविश्य शोभने लग्ने स्वग्रामं ग्रामदेवताम् ।
नत्वा गृहं प्रविश्येष्टदेवं च क्षेत्रपालकम् ॥

+ + + + ।
अनेन विधिना यस्तु तीर्थयात्रां समाचरेत् ।
पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥

+ + + +
क्रमेणेन्द्रादिदिक्पाललोकान् प्राप्य यथासुखम् ।
रमित्वाप्सरसां संघैः सकामाकल्पमादरात् ॥
ब्राह्मं पदं ततः प्राप्य तत्रैव वसति ध्रुवम् ॥

Colophon :

इति श्रीविष्णुयामले तीर्थयात्राद्दानविधिः ॥

77

Sl. No. 13203 **तीर्थस्नानविधिः** **Ms. No. C. 3583/7**

Beginning :

तीर्थस्नानविधिं वक्ष्ये सर्वपापप्रणाशकम् ।
भुक्तिमुक्तिपदं नृणां सर्वेष्टार्थप्रदायकम् ॥

End :

नमो नारायणायेति जपन् मन्त्रं सुधीस्ततः ।
स्नानं कुर्याद्विशेषेण स्वाचार्यचरणौ स्मरन् ॥

Colophon :

-- -- -- --

78

Sl. No. 13204 तुलसीपूजाविधानम् Ms. No. P 5395/1
(वामनपुराणान्तर्गतम्)

Beginning :

- - - ह्वे वाथ सायाह्वे पूजयेत्प्रयतो नरः ।
सर्वोपचारैरथवा चातुर्मास्ये विशेषतः ॥

पूजयेत्तुलसीं देवीं अपूपफलपायसैः ।
एकादश्यां × × × खस्था तदोपोष्य व्रती नरः ॥

तद्रात्रावेव कुर्वीत तुलसीपूजनं सदा ॥

End :

इदं तु पूजमहात्म्यं श्रुणु यात्स्रायेन्नरः ।
सकृद्वापि पठन्नित्यं स गच्छेद्वैष्णवं पदम् ॥

Colophon :

इति श्रीवामनपुराणे तुलसीमाहात्म्ये तुलसीपूजाविधानं नाम एकादशोऽध्यायः ॥

79

Sl. No. 13207 त्रिपुरसुदन्रीपूजाविधिः Ms. No. P. 3160/1

Beginning :

शुक्लम्बरधरं + । प्रसन्न वदनं + शान्तये ॥

+ + + +

अपक्रामन्तु भूताद्य + । सर्वेषां + समारभे ॥

इति वामपातपार्ष्णिघातत्रयेण भूतान्यु × य + अं क्षेत्रपालाय नमः ; + ।
ततः स्वशरीरं निष्कल्मषं तेजोरूपं देवताराधनयोग्यं विभाव्य प्राणप्रतिष्ठां कुर्यात् ॥

End :

तत्पात्रं संशोध्य पुनस्तत्पात्रे अमृतं पूरयित्वा पूर्वस्थाने संस्थाप्य यथाशक्ति मूलं जप्त्वा अन्तर्यागं पूरयेत् ॥

Colophon :

-- -- -- --

80

Sl. No. 13208 त्रिपुरसुन्दरीपूजाविधिः **Ms. No. P. 4197/10**
(यौवनोल्लासतन्त्रान्तर्गतः)

Beginning :

नत्वा श्रीसुरानन्दनाथपादाम्बुजद्वयम् ।
. . . नक्यमानन्दतो यौवनोल्लासमद्भुतम् ॥१॥
महात्रिपुरसुन्दर्या म . . . तोत्र यजनक्रमः ।
कीर्त्यंते गणपत्यादिक्रमयादुपजीवितः ॥२॥ (?)

End :

श्रीचक्राभिषेकं तीर्थेन शिरसि प्रोक्षणं पानं च ब्रह्माण्डोदरगतं गङ्गादितीर्थसहस्र-कोटिस्नानपानफलं लभते; कृत्वा भक्त्या श्रीचक्रमित्यलं विस्तरेणेति शिवम् ॥

Colophon:

इति यौवनोल्लासे सपर्याप्रकरणं सम्पूर्णम् ॥

81

Sl. No. 13211 त्रिपुरसुन्दरीपूजाविधिः **Ms. No. C. 1138/2**

Beginning :

योनिमुद्रया जुष्टं भवति । संक्रामन्ति सर्वाणि छन्दांसि । चक्राणि देवचक्रं श्रीचक्रं तस्य नाम अग्निमण्डले सूर्यचन्द्रमसा तन्त्रोङ्कारपीठं पूजयित्वा, तत्राक्षरबिन्दुरूपं + + विद्यां + स्मृत्वा महात्रिपुरसुन्दरीमावाह्य–

क्षीरेण स्नापिता देवि चन्दनेन विलेपिते ।
विश्वपत्रार्चिते देवि दुर्गेऽहं शरणं गतः ॥

+ + महात्रिपुरसुन्दरीमन्त्रेण पूजयेत् ॥

End:

महामहेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते + + महामहाश्रीचक्रनगर-साम्राज्ञि नमस्ते नमस्ते नमः । तस्यै देव्यै नमो नमः ॥

Colophon :

सम्पूर्णम् ॥

82

Sl. No. 13214 त्रिवेणीस्नानविधिः **Ms. No. C. 3583/5**

Beginning:

पूर्वोच्चरितएवंगुण विशेषविशिष्टायां शुभतिथौ जन्मजन्मान्तरपापक्षयार्थं समस्तदुरित क्षयार्थं गङ्गा-यमुना-सरस्वतीसंक्रमणस्नानं प्रयागक्षेत्रे करिष्ये ॥

End :

इमं मे गङ्गे यमुने सरस्वति इत्यादि सूक्तादीन् पठित्वा गुरुचरणौ स्मरन् सङ्गमे स्नायात् ॥

Colophon :

— — —

83

Sl. No. 13215 त्र्यम्बकन्यासः **Ms. No. P. 5672/118**

Beginning:

ओं अस्य श्री त्रियम्बकमहान्यासमहामन्त्रस्य मैत्रावरुणपुत्रो वसिष्ठो ऋषिः ; अनुष्टुप् छन्दः ; त्रियम्बकरुद्रो देवता ॥

End :

ततः चन्द्रमण्डलोपरि बद्धपद्मासनस्थं चन्द्रवर्णवदमृतपूर्णचन्द्रकलाधरं + + बद्धपिङ्ग-जटाजूटम् + + श्रीरुद्र ध्यात्वा + + पूर्वोक्तमार्गेणार्चयित्वा शरणं व्रजेत् ।

मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥
त्वावतस्त्वद्गतप्राणः सच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियम्बकम् ॥

उत्तरन्यासं कुर्यात् ॥

Colophon :

- - - -

84

Sl. No. 13216 दम्पतिपूजाविधिः Ms. No. P. 903/3

Beginning :

ದಂಪತಿಪೂಜೆ-

सङ्कल्प्य, एवङ्गुणेत्यादिशुभतिथौ ईशदेवताप्रीत्यर्थं दम्पतीपूजां करिष्ये ।

सर्वदेवमयौ दिव्यौ सर्वलोकैकपूजितौ ।
सर्वपापप्रशमनौ मङ्गलौ विप्रदम्पती ॥

End :

नमस्कुर्मियुवां प्रीत्या × × × त्मकावुभौ ॥
नमस्कार्यौ जगत्पूज्यौ देविदेवात्मकवुभौ ॥

नमस्कारम् । अथ प्रार्थना—

प्रार्थयामि युवां देवौ ग्यनिल्यौ सदा ।
× व्यां प्रजा × तं मम ॥

प्रार्थना । यस्य स्मृत्येत्यादि ॥

Colophon :

इति दम्पतीपूजाविधिः ॥

85

Sl. No. 13218 दम्पतिपूजाविधिः **Ms. No. P. 8828/2**

Beginning :

सर्वदेवमयौ दिव्यौ सर्वाभीष्टफलप्रदौ ।
ध्यायेत्सर्वादिकौ नृणां मङ्गलौ विप्रदम्पती ॥

दम्पती ध्यायामि ॥

End :

आयुर्बलं यशः पुष्टिं पुत्रपौत्रप्रवर्धनम् ।
दिशतां दम्पती प्रीत्या सर्वमङ्गलदायिनौ ॥

इति प्रार्थना ॥

Colophon :

दम्पतीपूजाविधिस्समाप्तः ॥

86

Sl. No. 13220 दत्तात्रेयपूजा **Ms. No. P. 7701/6**

Beginning :

× × × × ।
× × × × ॥
× बालां तद्वर्णविशाले शिवशान्ते पीतवर्णे
आपणरमणैर्दुहिणं दत्तात्रेयं श्रीपत्तिपद्मं प्रणतोऽस्मि।२।

श्रीसरस्वतीसहितब्रह्मणे नमः ॥

End:

हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यम् ।
हरिगुरुशिवयोगं सर्वभूतस्थमेकं
सकृदपि मनसा मां ध्यायते यस्समुक्तः ।।

Colophon:

- - - -

87

Sl. No. 13225 दत्तात्रेयमङ्गलमूर्तिपूजा Ms. No. B. 934/4

Beginning :

एवंगुणसकलविशेषणविशिष्टायां शुभतिथौ श्रीमदादिगुरुदत्तात्रेयमुद्दिश्य ·/· ·/· श्रीमदादिगुरुदत्तात्रेयमूर्तिपूजां करिष्ये ।

भो देव देवदेवेश दत्तात्रेय जगद्गुरो ।
दीनानाथपते स्वामिन् त्राहि मां शरणागतम् ॥ ·/·
निराकारं निराभासं करिष्ये पूजनं तव ॥

इति मन्त्रेण सम्प्रार्थ्य + ·/· मन्त्राक्षतान् विन्यसेत् ॥

End :

अनेन सायंकालदीपारधनाङ्गषोडशोपचारपूजनेन भगवान् सर्वात्मकः श्रीमदादिगुरुदत्तात्रेयः सुप्रीतस्सुप्रसन्नो वरदोऽभवतु ॥

Colophon :

मङ्गलमूर्तिपूजा सम्पूर्णा ॥

88

Sl. No. 13226 दत्तात्रेयमङ्गलमूर्तिपूजाः Ms. No. B. 934/5

(कार्तीकजयन्तीपूजा)

Beginning :

कार्तीकजयन्ती । पौर्णमी ।

श्रीमदादिगुरुषोडशार्घ्यानां प्रयोगविधिर्लिख्यते—

कार्तिकमासे पौर्णिमायां बुधवासरे कृत्तिकानक्षत्रे दिवाप्रथमयामे प्रथममुहूर्ते श्रीयोगिराजो जातः । तत्कालं विज्ञाय तस्मात् पूर्वं प्रातरुत्थाय ÷ + तत्प्रादुर्भावकाले—

अद्य मे सफलं जन्म दृष्ट्वा पुण्यदिनं तव ।
दत्तात्रेय महाराज योगिराज नमोऽस्तु ते ॥ ÷ +

अस्मिन् पुण्यदिने वर्षे मासे पक्षे तिथौ शुभे ।
वासरे पुण्यनक्षत्रे करोम्याराधनं तव ॥

End:

अपरदिने नवम्यां सर्वज्ञजयन्ती । तत्कालं विज्ञाय + ÷ तत्प्रादुर्भावकाले ÷ ÷ आदिगुरुजयन्त्युक्तकर्म आचरणीयम् । श्रीगुरुकमलनयनक्षेत्रगमनं जातम् ॥

Colophon:

-- -- --

Extra information :

वर्षे वर्षे कार्तिकशुद्धपौर्णमीमारभ्य तदागामि संवत्सरसम्बन्धिकार्तीकशुद्धदशमीपर्यन्तं दत्तात्रेयाभिमतेष्टतिथिषु तदनुग्रहादिसम्पादनाय आचरणीयाराधनक्रमः विस्तारतोऽत्र प्रयोगरूपेण विधिरूपेण च वर्णितः ॥

89

Sl. No. 13227 दर्शद्वादशदेवयजनम् Ms. No. P. 8000/33A

Beginning :

दर्शद्वादशदेवेभ्यः तिलसर्पिगुडोदकम् ।
शार्ङ्गधन्वाय स्वाहा । गरुडध्वजाय स्वाहा ।
यज्ञपुरुषाय स्वाहा । पुण्डरीकाक्षाय स्वाह ।
गोवर्धनाय स्वाहा । + +
श्रवणाधिदेवता सापूपघृतेन . . . . . .
शुक्लद्वादशदेवेभ्यः जुहुयात् घृतपायसम् ॥

End:

चतुर्भुजाय स्वाहा । -गदापाणिने स्वाहा । + सुलोचनाय स्वाहा + + सुरान्तकाय स्वाहा । दर्शद्वादशदेवेभ्यः तिलसार्पिगुडोदनम् ॥

Colophon :

- - - -

90

Sl. No. 13228 दुर्गापूजाविधिः Ms. No. P. 2130/

(नवरात्रीयमहानवमींछत्रादिपूजा)

Beginning :

पुष्पम्—

जयन्ति मङ्गळ × ळे भद्रकाळि कपालिनि ।
दुर्गे × धात्रि स × हे नमोऽस्तु ते ॥

प्रदक्षिणमन्त्रः—

महिषासुरसंहारविधात्रि वरदे नमः ॥
रूपं देहि बलिं देहि यशो देहि द्विषो जहि ॥

End :

चण्डिकायां प्रदत्तानि सर्वदुष्टनिबर्हिणि ।
क्षुरिके रक्ष मां नित्यं × य च स्तु ते ॥

क्षुरिकाया नमः । षोडशोपचारपूजां कुर्यात् ॥ सर्वायु- ॥

Colophon :

– – – – – –

91

Sl. No. 13229 दुर्गापूजाविधिः **Ms. No. P. 8410/36**

Beginning :

विद्युद्दानसमप्रभां मृग × स्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
इति गौरसर्षपशमीपत्राणि च साक्षतान् विकीर्य आपोहिष्ठादि अबलिङ्गैः मन्त्रैः + मण्टपशालाभूमिं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मन्त्रद्वयं जपेत् ॥

End :

आचार्यस्तु ऋत्विगादीन् नियोज्य अग्निप्रतिष्ठानं विधाय एकोत्तरशतदेवतापूजां कुर्यात् ; इति क्रमः ॥

Colophon

इति मण्टपपूजाविधानं समाप्ता ॥

197

Sl No. 13434 मन्त्रपुष्पाञ्जलिः Ms. No. C 3639

Beginning :

सर्वदेशदशाकालेष्वव्याहतपराक्रमा ।
रामानुजार्य दिव्याज्ञा वर्धतामभिवर्धताम् ॥

+ + + +

मां मदीयं च निखिलं चेतनाचेतनात्मकम् ।
स्वकैंकर्योपकरणं वरद स्वीकुरु स्वयम् ॥

End :

श्रीमाधवांघ्रि जलजद्वयनित्यसेवा
प्रेमाविलाशयपरांकुशपादभक्तम् ।
कामादिदोषहरमात्मपदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥

Colophon :

इति मन्त्रपुष्पाञ्जलिस्समाप्ता ॥

Extra information :

भगवदाराधनानन्तरं स्वस्वसम्प्रदायानुसारेण पठनीयानां नानास्तोत्रादि संगृहीतानां पद्यानां संग्रहात्मकोऽयं ग्रंथः श्रीवैष्णवानां नित्योपयोगी वर्तते ॥

198

Sl. No. 13435 **मन्युसूक्तविधानम्** **Ms. No. C- 627**

(प्रयोगार्णवीयम्)

Beginning:

अथ मन्युसूक्तविधिर्लिख्यते । तत्रादौ भूशुद्धि-भूतशुद्धिर्लिख्येते ।

नित्यविधिं समाप्य प्राङ्मुखासीनः कर्म कुर्यात् + + देशकालौ सङ्कीर्त्य पूजामारभेत ॥

End :

इति पञ्च खाद्यं समर्प्य पुनर्मन्युसूक्तवर्गद्वयपठने + + अन्तर्मातृकाभूशुद्धि भूतशुद्धि बहिर्मातृकान्यासं कुर्यात् ॥

Colophon ·

१६ तमे पत्रे—

इति प्रयोगार्णवे ऋग्विधानप्रयोगपटले मन्युसूक्तविधानं समाप्तम् ॥

199

Sl. No. 13436 महागणपतिपूजापद्धतिः Ms No. P. 2210/1

(रुद्रयामलीया)

Beginning :

मेरुकूटे सुखासीनं महादेवं त्रिलोचनम् । + +
पार्वती प्रणता भूत्वा वचनं समभाषत ॥

श्रीदेव्युवाच —

भगवन् सर्वतत्वज्ञ सर्वधर्मप्रकाशक ।। + +
विघ्नं यत्र भवेद्देव संशयं छिन्दि शङ्कर ॥

शङ्कर उवाच—

देवि वक्ष्ये रहस्यं ते प्रश्नोत्तरमिदं महत् । +
विनायको गणाध्यक्षः गणेश इति विश्रुतः । +
तस्य भक्तस्य देवस्य + + ।
न विघ्नो बाधते जंतुं यस्यं सम्पूजयेत्सदा ॥
अथाहं पद्धतिं वक्ष्ये महागणपतेः पराम् ।

End :

इति श्रीनित्यपूजायाः पद्धतिः गद्यरूपिणा ।
महागणपतेर्दिव्यं सर्वदा देवि गोपयेत् ॥

Colophon :

इति श्रीरुद्रयामले तन्त्रे महागणतिपूजापद्धतिः

200

Sl. No. 13437 महात्रिपुरसुन्दरीपूजाविधिः Ms No. G-3909/2

Beginning :

भूशुद्धि-भूतशुद्धि-प्राणप्रतिष्ठान्तमातृकां-बहिर्मातृकाः कृत्वा नवधाचम्य मूलेन प्राणायामत्रयं कृत्वा + + + महात्रिपुरसुन्दरीप्रसादसिध्यर्थं द्रव्यसंस्कारमहं करिष्ये ॥

End:

सर्वे स्वीकृत्य सामयिकान् यथोपदेशं पूजयन् सूर्यार्घ्यं दत्वा सुखं विहरेत् ॥

Colophon:

-- -- --

201

Sl. No. 13438 महादेवप्रतिष्ठाविधिः Ms No. C. 4179/19

(शौनकोक्ता-देवस्थापनपद्धतिः)

Beginning :

नमस्कृत्य गणाधीशं शारदां च वरप्रदाम् ।
भुक्तिमुक्तिप्रदातारं शङ्करं गिरिजापतिम् ॥

भद्र कश्यपपुत्रोऽहं नरसिंहाग्रुधामणिः ।
सम्यग्विचार्य वक्ष्यामि देवस्थापनपद्धतिम् ॥

तदाह नारायणमुनिः---

नवमूर्तिप्रतिष्ठां च कुर्याद्वै चोत्तरायणे ।
नमस्यूर्जेऽथवा केचित्प्रवदन्ति महर्षयः ॥

End:

हृदयं संस्पृशन् सम्यक् प्राणमन्त्रं समुच्चरेत् ।
मा प्रगामेति सूक्तेन हिरण्यगर्भ इति सूक्ततः ॥

पञ्चविंशतितत्वानि अस्मिन् विम्बे प्रविश्य च ॥

Colophon :

-- -- --

202

Sl. No. 13439 **महादेवसम्प्रोक्षणविधिः** **Ms. No. P. 4179/21**

(शौनकोक्तः)

Beginning :

शौनकोऽहं प्रवक्ष्यामि द्विजातीनां हिताय च ।
कारणाद्यागमोक्तेन शैवसम्प्रोक्षणं स्मृतम् ॥

End

सर्वशान्तिकरं पुण्यं भुक्तिमुक्तिफलप्रदम् ।
सर्वान् कामानवाप्नोति शिवलोके महीयते ॥

Colophon:

इति शौनकीये शैवागमसारे तान्त्रिकवैदिकसाम्ये शिवसम्प्रोक्षणविधिः ॥

Exttra information :

ग्रन्थान्ते–

सम्प्रोक्षणे प्रतिष्ठायां विरामे विधिनार्चयेत् ।
तत्पूर्वे तत्क्रियां कुर्यात् अभिषेकादिकं न हि ॥

उत्सवेषु च सर्वेषु अभिषेकं विशेषतः ।
तत्तत्कालवरणादेव विशेषार्चनमाचरेत् ॥

इति श्लोकद्वयं दृश्यते ॥

203

Sl. No. 13440 महानद्यर्घ्यविधिः Ms No C.4972/3

Beginning :

नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ॥

माघे मासि महापुण्ये गौतमस्याबवाशिनि ।
गोयावरि गृहाणार्घ्यं त्र्यम्बक .... द्भवे ॥

कुलीन्यशैलभवने पृथक् सागरगामिनि ।
गृहाणार्घ्यं मया दत्तं यमुने फलदा भव ॥

End :

आवाहनार्घ्यं विकिरं प्रदक्षिणपितृस्तुतिः ।
विसर्जना ... दने .... हेमस्य × द्धे विसर्जयेत ॥

Colophon :

– – – –

204

Sl No. 13444 महाविषेकविधिः Ms. No. P. 7096/3

Beginning

अथातो महाभिषेकविधिं व्याख्यास्यामः– × × × × पञ्चगव्यं गृहीत्वा + + देवालयं प्रविश्य देवस्य पुरस्तात् सङ्कल्प्य अष्टैश्वर्याभिसिध्यर्थं देवताप्रीत्यर्थं महाभिषेकं करिष्ये; इति सङ्कल्प्य– ॥

End :

अवभृथसाम वामदेव्यं च गायेत् । ब्राह्मणान् भोजयित्वा आशिषो × × षां भवति ; स्वस्ति हैषां भवति ॥

Colophon :

इति महाभिषेकविधिस्समाप्तः ॥

205

Sl No. 13445 महाभिषेकविधिः (बोधायनोक्तः) **Ms. No P. 10041/83**

Beginning :

कृत्वा सरत्नैरक्षीर्णाहतेन वाससा प्रच्छाद्य गन्धपुष्पधूपदीपैरलंकृत्य मध्ये प्रधानकलशे ब्रह्मणमावाहयामि । + + + आयुर्दा इति द्वाभ्यां अथैनमभिषेकं करोति ॥

End :

ब्राह्मणान् सम्पूज्य आशिशो वाचयित्वा दशपूर्वदशापरात्मकं चैकविंशतिपांकिं च पुनाति पुत्रपौत्रैश्च षष्टिर्वर्षसहस्राणि स्वर्गलोके महीयतेत्यथ ब्रह्मणस्सायुज्यं सलोकतामाप्नोतीत्याह भगवान् बोधायनः ॥

Colophon:

-- -- --

206

Sl. No. 13446 महारुद्रप्रयोगः (महारुद्रकल्पः) **Ms. No. P. 2282/8**

Beginning :

महारुद्रप्रयोग उच्यते—

महारुद्रो द्विविधः- केवलमहारुद्रः, रुद्रैकादशिन्येकादशावृत्या महारुद्रश्चेति । तत्पक्षमाश्रित्य प्रयोग उच्यते—

अनुज्ञा । अशेषे .... स्वीकृत्य + + मम + + श्रीपरमेश्वरप्रीत्यर्थं + + महारुद्राख्यं कर्म करिष्ये ॥

End :

रुद्रस्यैकादशावृत्या रुद्रकादैशिनिर्णिता ।
एकादशभिरेताभिः महारुद्रस्तु कथ्यते ॥

इति वाचनात् । वस्त्रदानम्, निरीक्षा, आज्यदानम्, इतरदानानि कृत्वा ऋत्विग्भ्यः प्रतिदिनं गां दद्यात् । आचार्याय द्विगुणं गां दद्यात् । एवं कृते कृतार्थो भवति ॥

Colophon :

इति महारुद्रकल्पः समाप्तः ॥

207

Sl. No. 13447 **महारुद्राभिषेकविधिः** **Ms. No. P. 8160/1**

Beginning :

" आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम् । भवावाजस्य सङ्गथे । " क्षीरेण स्नापयामि ॥

End:

ऋतग सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

\+ + + +

सहनाववतु + + माविद्विषावहै ॥ शान्तिश्शान्तिः ॥

Colophon:

\- - - -

208

Sl. No. 13448 **महालक्ष्मीपूजाविधिः** **Ms. No. P. 4218/64**

Beginning :

पूर्वोक्ततिथौ मम अस्मिन् गृहे महालक्ष्म्याः स्थैर्यतासिध्यर्थं + + महालक्ष्मीप्रीत्यर्थं कल्पोक्तप्रकारेण + + आवाहनादिषोडशपूजां करिष्ये ॥

End:

आयुर्देहि यशो देहि सौभाग्यं देहि × × ।
सर्वलोकमता त्व हि दास्यामि च हरिप्रिये ॥
गृहीत्वा तु सुविप्रेन्द यथोक्तफलदो भव ॥

इति वायतम् ॥

Colophon :

इति × × पूजाविधानं समाप्ता ॥

209

Sl. No. 13449 महालक्ष्मीपूजाविधिः Ms. No. P. 4218/82

Beginning:

अथ महालक्ष्मीपूजा—

प्राणायामत्रयं कृत्वा एवङ्गुणविशेषण विशिष्ठायां शुभतिथौ मम + ·+· + कल्पोक्तप्रकारेण + + + महालक्ष्मीपूजां करिष्ये । ·+· ·+· प्राणप्रतिष्ठां करिष्ये ॥

End :

पुष्पाञ्जलिं प्रकुर्वीत महालक्ष्मै यथाविधि । ·+·
पुत्रान् देहि यशो देहि सौख्यं सौभाग्यमेव च ॥
जयारोग्यं वळं देहि देवि त्वां × × तः ॥

पुष्पाञ्जलिं कुर्यात् । सर्वमङ्गलमाङ्गल्ये इति प्रार्थनम् । यस्य स्मृत्या च नामोक्त्या ॥

Colophon :

इति श्री × × लक्ष्मीपूजाविधानम् ॥

210

Sl. No. 13450 महालिङ्गार्चनविधिः Ms. No. P. 5808/4

(शैवेशिवरहस्यान्तर्गतः)

Beginning:

सूत उवाच—

अथातः सम्प्रवक्ष्यामि महालिङ्गार्चनक्रमम् ।
पुरा भगवता प्रोक्तं शङ्करेणोपमन्यवे ॥

+ + + ।

उपमन्युः—

अथ केन प्रकारेण कर्तव्यं पूजनं तव ।
किं द्रव्यं कश्च तन्मन्त्रः तन्ममाचक्ष्व शङ्कर ॥

श्रीशङ्करः-

प्रतिमासु च लिङ्गेषु तथैव स्थण्डिलेषु च
समंष्टं पूजनं विप्रः सर्वत्रागमचोदितम् ॥

End:

उपमन्युर्महायोगी महालिङ्गार्चनं भुवि ।
ततः प्रवर्तयामास सर्वलोकतितीर्षया ॥

पठेद्य इममध्यायं पाठयेच्छ्रावयेदपि ।
सोऽपि तत्फलमाप्नोति सत्यं सत्यं वदाम्यहम् ॥

Colophon :

इति शैवपुराणे शिवरहस्ये शिवधर्मानुकीर्तने महालिङ्गार्चनयोगो नाम षड्विंशोऽध्यायः ॥

211

Sl. No. 13451 महालिङ्गार्चनविधिः Ms. No. C. 597

Beginning:

आचम्य ' आगमार्थं तु देवानां ' इति घण्टानादं कृत्वा + + ⋅|⋅ तत्पुरुषायेति रुद्रगा-यत्र्या प्राणानायम्य ⋅|⋅ ⋅|⋅ ⋅|⋅ एवङ्गुणविशेषणविशिष्टायां शुभतिथौ तत्तत्कामनासिध्यर्थं महाकैला-साय श्रीमहालिङ्गार्चनविधौ महागणपतिपूर्वकत्रिशूललिङ्गान् + ⋅|⋅ आत्मलिङ्गं त्रिपुरसुन्दरीसहित-कामेश्वरलिङ्गामि ⋅|⋅ ⋅|⋅ सम्भवद्द्रव्यैः ⋅|⋅ + महाकैलासयन्त्रेच पूजां करिष्ये ॥

End :

ततः उत्तरपूजां कृत्वा पुजासाद्गुण्यार्थं अष्टोत्तरशतसंख्याकपञ्चाक्षरमन्त्रजपं कृत्वा गच्छ गच्छित्यादिना निर्याणमुद्रया शिवं स्वात्मनि समारोपयेत् ॥

Colophon:

इति महालिङ्गार्चनविधनं समाप्ता ॥

212

Sl. No. 13452 महासाम्राज्यपट्टाभिषेकप्रयोगः Ms. No. C. 3736
(स्कान्दीया)

Beginning :

अथ स्कन्दपुराणोक्तमहासाम्राज्यपट्टाभिषेकविधिस्तत्प्रयोगश्च निरूप्यते—

अथातो महासाम्राज्यपट्टाभिषेकविधिं व्याख्यास्यामः—

श्रीरामायणस्याष्टोत्तरशतपारायणानां चतुर्विंशतिपारायणानां वा कर्ता श्रीरामभक्तो यस्स + ⋅|⋅ दीक्षाविधिना महासाम्राज्यमहापट्टाभिषेकोत्सवं करिष्यमाणः ⋅|⋅ ⋅|⋅ श्रीशिवरौच्यकमुनिसंवा-दोक्तप्रकारेण मण्टपनिर्माणादिकं कुर्यात् ॥

End:

यदा जपदशांशं होमं कृत्वा होमदशांशं तर्पणं कार्यमिति पक्षः परिगृह्यते तदा लक्षहोम विधिनोक्तं द्विहस्तविस्तृतं चतुर्हस्तविस्तृतं वा कुण्डं कुर्यात् । अत्र जपदशांशं तर्पणं कृत्वा तद्- ॥

Colophon:

-- -- -- --

213

Sl· No· 13453 महिषमर्धिनीपूजा Ms· No· P· 4590/7

Beginning :

अथ महिषमर्दिनीपूजां करिष्ये । पीठपूजां कृत्वा नवशक्तिपूजां करिष्ये । प्रभायै मायायै + + महिषमर्दिन्यै सुवर्णपीठं परिकल्पयामि ॥

End :

इन्द्रादि चतुर्थावरणम् , अङ्गपूजादि सर्वं पूर्ववत्त ॥

Colophon :

इति महिषमर्दिनीपूजा ॥

214

Sl. No· 13454 माघसूर्यार्चनविधिः Ms· No· C· 36168/

Beginning :

सप्तसप्तिप्रिये देवि सर्वलोककपूजिते ।
सप्तजन्मार्जितं पा[प] हर सप्तमि सत्वरम् ॥

End:

माघमासे सिते पक्षे सप्तम्या मरुणोदये ।
सप्तार्कपर्णमादाय स्नात्वा भास्करमर्चयेत् ॥

Colophon :

– – – –

215

Sl· No· 13455 महालिङ्गपूजाविधिः Ms· No· C. 2574/2A

Beginning :

अथात × × × क्तप्रकारेण महारुद्र × × × विधानेन महालिङ्गार्चनं करि × × तदङ्गं आदौ गण × × ष्ये ॥

End :

एवं कृत्वा विशेषेण लिङ्गपूजां × × ।
सर्वान् × × ति × × शतम् ॥
× × × ।
× × × महीयते ॥

Colophon:

– – – – – –

216

Sl. No. 13457 मानसलिङ्गपूजा **Ms. No. P. 7043/3**

Beginning :

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनम् कुतः ॥

End :

याति या भावना यस्य दृढा भवति सर्वदा ।
शैवं तस्य परा पूजा सम्पूर्णफलप्रदायिनी ॥

Colophon :

इति मानसलिङ्गपूजा समाप्ता ॥

217

Sl. No. 13458 मासाधिदेवतार्चनम् **Ms. No. P. 3023/57**

Beginning :

अरुणो माघमासे तु सूर्यो वै फल्गुने तथा ।
चैत्रमासे रविः पूज्यः भानुर्वैशाख एव च ॥

End :

सुवर्चसैराश्वयुजे कार्तिके च दिवाकरः ।
मार्गे मित्रस्तु सम्पूज्यः पौषे विष्णुं यजेत्क्रमात् ॥

Colophon:

-- -- -- --

218

Sl. No 13459 मासाधिदेवतार्चनम् Ms. No. P. 4992/16

Beginning :

श्री × वाच–

देवदे × × हा × व ग्रहाणामर्चनं श्रुतम् ।
इदानीं श्रोतुमिच्छामि मासाधिदेवतार्चनं ॥

ईश्वर × –

शृणु देवि प्रवक्ष्यामि मासस्याधिपेतः पुनः ।
अर्चनाक्रम × × तवानघ ॥

End :

एवं यः कुरुते भक्त्या मासाना × × वै ।
विष्णोस्सायुज्यमाप्नोति शिवसायुज्यमेव च ॥

Colophon :

– – –

219

Sl.No. 13460 मुद्रालक्षणम् Ms. No. P. 3835/14

Beginning :

मध्यमानामिकाभ्यां च वामहस्तकनिष्ठिकाम् ।
ग्राहयेद्यो महस्तस्य (?) — — — — ॥

समध्यमोपरि प्रासात् अङ्गुष्ठं विन्यसेत्ततः ।
तर्जन्यं कुटिलं कृत्वा महांकुशमिति स्मृतम् ॥

End:

अपसव्यस्य हस्तस्य त्र्यङ्गुलं च प्रासार्य च ।
तर्जन्यङ्गुष्ठयोगेन ज्ञानमुद्रा हि सा भवेत् ॥

अर्थकाम्यार्थगदामुदा–
अन्योन्याक्षिमुखौ हस्तौ - - - ॥

Colophon :

-- -- --

220

Sl. No. 13461 मृत्युञ्जयपूजाविधिः Ms. No. P. 3308/6

Beginning :

सितै × × राधस्ख मृत्युञ्जयपाद्यम × × ४ ॥

सुगन्धपुष्पप्रकरैस्सुवासितैः
वियन्नदीशीतलवारिभिश्शुभैः ।
त्रिलोकनाथर्तिं × × मादरात्
गृहाण मृत्युञ्जय सर्ववन्दित ॥५॥

End :

दर्पणप्रतिमां शुभ्रं कौशेयं नेत्रकौतुकम् ।
धारयातीव मृदुलं मृत्युञ्जय महेश्वर ॥१२॥

Colophon

– – – –

Extra information :

चतुर्थस्य पद्यस्य अंतिमं पादमारभ्य द्वादशश्लोकान्तो भागः ग्रन्थेऽस्मिन् चकास्ति ।

221

Sl. No. 13462 यमुनापूजाविधिः Ms. No. P. 1346/9

Beginning:

शुभदिने शोभने मुहूर्ते + + भगवदाज्ञया यमुनाप्रीतिद्वारा + + + सर्वाभीष्टसिध्यर्थं यमुनामुद्दिश्य षोडशोपचारपूजां करिष्यामः ।

क्षीरोदार्णवसम्भूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि विष्णुरूपे नमोऽस्तु ते ॥

श्रीयमुनायै नमः ; ध्यानं समर्पयामि ॥

End :

अनया पूजया च भगवान् सर्वात्मकः श्रीयमुनादेवता च सुप्रसन्नो भूत्वा + + सर्वाभीष्टसिद्धिं करोतु ॥

Colophon :

इति श्रीयमुनापूजाविधानं समाप्तम् ॥

222

Sl. No 13463 यमुनापूजाविधिः Ms. No. P. 2269/2

(पद्मपुराणीया)

Beginning:

क्षीरोदार्णवसम्भूते + । + विश्वरूपे नमोऽस्तु ते ॥

ध्यानम्

यमुने ते नमस्तुभ्यं सर्वकामप्रदायिनि ।
सर्वसौभाग्यदे देवि यमुनायै नमोस्तु ते ॥

आवाहनम् ॥

End:

भवानि ते महालक्ष्मि सर्वकामप्रदायिनि ।
सर्वव्रतमये देवि यमुनायै नमोस्तुते ॥

क्षमापणम् ॥

Colophon :

इति पद्मपुराणे + यमुनापूजाविधानं समाप्तम् ॥

223

Sl. No. 13465 यमुनापूज विधिः **Ms. No. P. 3329/6**

Beginning :

पूर्वोच्चरितएवङ्गुणविशेषणविशिष्टायां शुभतिथौ यमुनापूजा करिष्ये–

क्षीरसागरसम्भूते इन्द्रनीलसमप्रभे ।
त्वत्प्रसादान्महादेवि विष्णुरूपे नमोऽस्तु ते ॥

ध्यानम् ॥

End

इमं मे गङ्गेति मन्त्रपुष्पम् । यानि कानि चेति प्रदक्षिणम् । पापऽहमिति नमस्कारम् । सर्वम × × मां × × इति प्रार्थनम् ॥

Colophon:

इति पूजविधानम् समाप्तम् ॥

224

Sl. No. 13467 यमुनापूजविधिः **Ms. No. P. 5293**

Beginning :

नित्यकर्मानुष्ठानं कृत्वा यमुनातीरं गत्वा प्राणानायम्य पूजासम्भारान् सज्जीकृत्य सङ्कल्पः

ध्यानम् ॥

क्षीरोदार्णवसञ्जाते नीलवर्णसमप्रभे ।
तव प्रसादाद्देवेशि जीवामि शरदश्शतम् ॥

End :

गङ्गासरस्वतीमध्ये प्रयागे चिरवासिनि ।
शरणं त्वा प्रपन्नोस्मि पाहि मां यमुने शुभे ॥

क्षमापणम् ॥

Colophon

— — —

225

Sl. No. 13472 यमुनापूजाविधिः **Ms. No. P. 6458/1**

Beginning :

क्षीरोदार्णव + । + नमोस्तु ते । ध्यानम् ॥

दिव्यसिंहासनारूढे दिव्यशक्तिसमन्विते ।
सर्वलक्षणसम्पूर्णे यमुने ते नमोऽस्तु ते ॥

आवाहनम्--

End :

सुरासुरेन्द्रादिकिरीटमौक्तिकैः
विराजमानांघ्रियुगे शिवेन ।
परात्परं कार्यपरं सुमङ्गलं
नमामि भक्त्या मम कार्यसिद्धये ॥

यस्य स्मृत्येति क्षमापणम् ॥

Colophon :

— — — —

226

Sl. No. 13477 यमुनापूजाविधिः **Ms. No.P. 7143/6**

Beginning :

प्राणानायम्य एवङ्गुणविशेषणविशिष्टायां शुभतिथौ अनन्तव्रताङ्गं यमुनापूजां करिष्ये– यमुनां ध्यायामि । आवाहयामि । आसनं समर्पयामि ॥

End :

गङ्गायां सङ्गता देवि यमुने × × × मे ।
अपराधान् × × × सर्वान् × × क्षमस्व ॥

इति अपराधक्षमापणम् ॥

Colophon :

-- -- -- --

227

Sl. No. 13487 यमुनापूजाविधिः (पद्मपुराणानुगुणः) **Ms. No. C. 801 5**

Beginning :

कलश-वस्त्र-चूतपल्लव-गन्ध-अक्षत-पुष्प-चणक-ताम्बूलादि गृहीत्वा + +नित्यकर्मानुष्ठानं कृत्वा + + प्राणानायम्य + + यमुनादेवताप्रीत्यर्थं + + यमुनापूजां करिष्ये + + +

क्षीरोदार्णवसम्भूते इन्द्रनीलसमप्रभे ।
मम प्रसादवरदे विष्णुरूपे नमोऽस्तु ते ॥

इति ध्यानम् ॥

End:

भवानी च महालक्ष्मीः सर्वसौख्यप्रदायिनी ।
सर्वप्रदे महादेवि यमुनायै नमोस्तु ते ॥

Colophon:

इति पद्मपुराणे यमुनापूजाविधानं समाप्तम् ॥

228

Sl. No. 13497 योगिनीपूजा **Ms. No. P 4524/13**

(चतुष्षष्टियोगिनीपूजा)

Beginning :

श्रीप× × हस्तो × × ।

योगिन्यै हांकार्यै

महायोगिन्यै ह्रांकार्यै ।

सिद्धयोगिन्यै । अर्धकेशिन्यै ।

सगुग्गुलघृतसेकयुक्तं नानागन्धसुसंयुतम् ।

धूपं गृहाण चामुण्डे भद्रकालि नमोऽस्तु ते ॥

End :

मन्त्राक्षरमं × × लक्ष्मि × : × मात् ।

× × × र्पणीयम् ॥

× दुर्गा × का स × न्याकामा × ॥

Colophon :

इति पूजाविधिः ॥

229

Sl. No. 13498 रथपूजाविधिः **Ms. No. P. 5108/22**

(रथोत्सवविधिः)

Beginning :

अतःपरं प्रवक्ष्यामि स्थानं कुर्यात्प्रदक्षिणे ।

उत्सवारम्भकाले तु रथादि कारयेत्क्रमात् ॥

End :

स्नपने .... हे वृष्णे पृष्ठापृष्ठे गृहे शुभम् ।
तस्मात्सर्वप्रयत्नेन सर्वकाले समाचरेत् ॥

Colophon :

इति आद्धता (?) रत्नावल्यां नैमित्तिकेयानुसन्धाने रथोत्सवविधिपटलः ॥

230

Sl. No. 13499 रथसप्तमीपूजाविधिः **Ms No. P.6297/16**

Beginning :

भगवन्तमथादित्यं सर्वलोकनमस्कृतम् ।
स्रष्टारं सर्वलोकानं अन्तस्संक्षयकारकम् ॥

+ + + +

माघशुक्लस्य सप्तम्यां स्नात्वाचम्य विधानतः ।
×× सङ्कल्प्य सूर्यप्रीत्यर्थं क्षीर × × नः ॥

End:

गृहाण परमान्नेन कांस्यपात्रप्रपूरितम् ।
घृतेन च समायुक्तं प्रीतो भव दिवाकर ॥
अनेनोपायनं दत्वा ब्राह्मणे कर्म चार्पयेत् ॥

Colophon :

इति रथसप्तमीपूजा समाप्ता ॥

231

Sl. No. 13500 रथसप्तमीपूजाविधिः Ms. No. P. 9317/19

Beginning :

यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
जन्मरोगं च शोकं च माकरीदं (!) सप्तमी ॥

End :

नमस्ते रुद्ररूपाय रसानां पतये नमः ।
दारुणाय नमस्तेऽस्तु हरिवासरतोऽस्तु ते ॥

इति प्रार्थनम् । यस्य स्मृत्येत्यादि ।।

Coloponh :

इति रथसप्तमीविधिः ॥

232

Sl. No. 13502 रथसप्तमीपूजाविधिः Ms. No. C. 3493/3

Beginning :

पञ्चपञ्चउपःकाले उत्थाय नित्यविधिं विधाय अर्कपुष्पाणि संगृह्य प्राङ्मुखः उपविश्य प्राणानायम्य एवंगुण + + तिथौ रथसप्तमीसम्बधि पूजां करिष्ये ॥

End :

सूर्याय × × तुभ्यं सप्ताश्च × × ने ।
नमः कमननाथाय विष्णुरूपाय ते नमः ॥

प्रार्थनम् ॥

Colophon

— — — —

233

Sl. No. 13503 राजचिह्नपूजाविधिः Ms. No. P. 9077/2

(नवरात्र्यायुधपूजाकल्पः--भविष्योत्तरीया)

Beginning :

पूर्वोक्त-एवङ्गुणविशेषणविशिष्टायां शुभतिथौ शोभनदेवतान्तर्यामिश्रीलक्ष्मीनारायणप्रेरणया लक्ष्मीनारायणप्रीत्यर्थं राजचिह्नपूजां करिष्ये ; इति सङ्कल्प्य,–

शरदिन्दुसमाभिख्ये शत्रुसङ्घभयङ्करि ।
कुण्डिके रक्ष मां नित्यं संग्रामे विजयं कुरु ॥

End :

सर्वशस्त्रास्त्ररूपेण सर्वदेववरप्रदाः ।
मम शत्रुवधं कृत्वा सन्तु मे विजयप्रदाः ॥

Colophon :

इति भविष्योत्तरपुराणे आश्वीमासे नवरात्र्यायुधपूजाकल्पे समाप्तम् ॥

234

Sl. No. 13505 रामपट्टाभिषेकविधिः Ms. No. P. 2732/15

(बोधायनीयः)

Beginning:

अथातो राजपट्टाभिषेकविधिं व्याख्यास्यामः– पूर्वपक्षस्य पञ्चम्यां + पुण्यानि नक्षत्राणि तेषु + ब्राह्मणं पुरोहितं वृणीत ॥

End :

दुन्दुभिशब्दं करोति दुन्दुभींस्समघ्नन्तीति ब्राह्मणान् × × णीकृत्य नमस्कृत्य स्वराष्ट्रमनुपालयतीत्याह भगवान् बोधायनः ॥

Colophon :

... ...

235

Sl. No. 13507 राजपट्टाभिषेकविधिः Ms. No. P. 4180/71

Beginning :

अथातः सम्प्रवक्ष्यामि क्षत्रियाणां विशेषतः ।
प्रजापालनशीलस्य कुलस्थस्याभिषेचनम् ॥

End:

ब्राह्मणान् भोजयित्वा तु यथाविध्यानुसारतः ।
विविधैर्दानमावश्यं प्रजाश्च परिपालयन् ॥

Colophon :

इति शौनकीये राजाभिषेकः ॥

236

Sl. No. 13508 राजपट्टाभिषेकविधिः Ms. No. P. 696/11
(नीतिमयुखीया)

Beginning :

नीतिमयूखे राजाभिषेकश्लोकाः—

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथः तथा संकर्षणो विभुः ॥

End :

मखा च फल्गुनी पुर्वा तथैवोत्तरफल्गुनी ।
हस्ता चित्ता तथा स्वाती विशाखा च तथा नृपं॥

Colophon :

— — — —

237

Sl. No. 13509 राजपट्टाभिषेकविधिः **Ms. No. P. 8828/5**

(राजसिंहपूजाविधिः)

Beginning :

खट्वाय नमः । वाणाय नमः ।
चापाय नमः । मालाय नमः ।
शार्ङ्गिणे नमः । कुन्ताय नमः ॥

+ + + +

यदा बुधश्छादयति शिवायेमां वसुन्धराम् ।
तथा छादय र.जानं विजयारोग्यवृद्धये ॥

End :

यदा जीमूतघोषेण स्त्रीणां त्रासोपजायते ।
तथाद्य तव शब्देन त्रस्यन्त्यसद्विषो रणे ॥

Colophon:

इति धूप-दीप-नैवेद्य-ताम्बूलादिभिः षोडशोपचारपूजां कुर्यात् ॥

238

Sl. No. 13510 राजराजेश्वरीपूजाविधिः **Ms. No. C. 8687/17**

Beginning :

श्रीसूक्ष्मप्रकारेण राजराजेश्वरीपूजां करिष्ये– हिरण्यवर्णामिति सूक्तस्य–आनन्दकर्दमचक्लितेन्दिरा ऋषयः + + + ध्यानम् —

अमलकमलसंस्थातद्रजःपुञ्जवर्णा
करकमलधृतेष्टाभीतियुग्माम्बुजा च ।
मणि मकुट विचित्रालङ्कृता पद्मजातैः
भजतु भुवनमाता सन्ततं श्रीश्रियै नमः ॥

End :

प्रसन्नाध्येयम् ।

सक्तुमिव × × ना पुनन्तो यत्र धीरा: मनसा वाचमकृता । अत्रासखाय: सख्यानि जानते भद्रैषा लक्ष्मीर्निहिताधिवाचि छत्रचामरादि । यस्य स्मृत्येति वरदा भवतु ॥

Colophon :

- - - - - - -

239

Sl No. 13511 रामपट्टाभिषेकविधिः Ms. No. P. 262/3

Beginning :

सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते ।
वाचकस्य च रामस्य शुभ × × भिषेचयेत् ॥

स्वगृहे चोत्तरे भागे यागमण्टपमारभेत् ।
चतुर्द्वारं पताकाढ्यं सुविता × × × ॥

End:

जपहोमस्तर्पणं च विप्रणामेव शस्यते ।
तदन्येषां × × चिप्र × × नम् ॥

पूजोत्सवश्चातिभक्त्या दक्षिणा च विधीयते ॥

Colophon ;

इति रामपट्टाभिषेकविधिः ॥

240

Sl. No. 13512 रामपट्टाभिषेकविधिः Ms. No. P. 262/4

Beginning :

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तद्देवताह्वादलाञ्छनम् ॥

इति घण्टानादं कृत्वा प्राणानायम्य + + + सर्वाभीष्टसिध्यर्थं रामपट्टाभिषेकं करिष्ये ॥

End

इदमर्घ्यम्—

× × × × ज्योतिषां पते ।
गृहाणार्घ्यं मया दत्तं छायया सह भास्कर ।।

वस्त्र स्मृत्येत्यादि समर्पणम्

Colophon:

— — — —

241

Sl. No. 13513 **रामपट्टाभिषेकविधिः** **Ms. No. P. 1094**

Beginning :

अथ रामपट्टाभिषेकविधिरुच्यते—

सुदिने च सुनक्षत्रे चन्द्रताराबलान्विते ।
कुर्याद्रामाभिषेकं तु यथावेत्तानुसारतः ।।

प्राणानायम्य, सङ्कल्प्य, पट्टाभिषेकाङ्गं पञ्चामृतस्नपनमहं करिष्ये ॥

End:

देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ।
रामचन्द्र महादेव रक्ष मां शरणागतम् ।।

इति प्रार्थनम् ॥

Colophon :

— — —

242

Sl. No. 13515 रामपट्टाभिषेकविधिः Ms. No. P. 1299/34

Beginning :

आदौ पञ्चामृतस्नानम् ; फलोदकस्नानम्; + + पुरुषसूक्तम् ; सहस्रशीर्षा - - - - - साध्यास्सन्ति देवाः ॥

End:

ब्राह्मणान् भोजयेत्पश्चात् आशिषो वाचयेदथ ।
एवं कृत्वा विशेषेण सर्वान् कामानवाप्नुयात् ॥

Colophon :

\- - - -

243

Sl. No. 13516 रामपट्टाभिषेकविधिः Ms. No. P. 3329/23
(हिरण्यगर्भसिद्धान्तान्तर्गतः)

Beginning:

अथातः पट्टाभिषेकविधिं व्याख्यास्यामः—

दम्पती मंगलस्नानं कृत्वा पूर्वोच्चरितएवंगुणेत्यादितिथौ श्रीरामपारायणाङ्गपट्टाभिषेकाङ्गभूतं नान्दीपूजाख्यं कर्म करिष्येमाणः + + आदौ + + स्वस्तिपुण्याहवाचनं करिष्ये ॥

End :

ततः रामं रत्नमये पीठे इत्यादारभ्य सर्गपारायणं कुर्यात् । उत्तरपूजां कुर्यात् ॥

Colophon:

इति श्रीहिरण्यगर्भसिद्धान्ते रामपट्टाभिषेकविधिः समाप्तः ॥

244

Sl. No. 13518 रामपट्टाभिषेकविधिः Ms. No. P. 5659/2

(विधिप्रयोगात्मक-स्कन्दपुराणोक्तःचतुर्विंशद्द्वाररामायणपारायणसमर्पणपट्टाभिषेकविधिप्रयोगः)

Beginning :

श्रीसूतः–

सुदिने शुभनक्षत्रे चन्द्रतारावलान्विते ।
पाठकस्य च रामस्य कुर्यात्पट्टाभिषेचनम् ॥

अथ प्रयोगः–

पूर्वोक्तादिशुभतिथौ यजमानस्य + + चतुर्विधपुरुषार्थसिध्यर्थं + + अस्य श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्सुग्रीवादिसमेतस्य राजाधिराजस्य पट्टाभिषेकं कर्तुकाम आदौ पुण्याहवाचनं करिष्ये ॥

End :

जपहोमस्तर्पणं च पूजापठणमेव च ।
समर्पणं ब्राह्मणानां भोजनं सप्तधा व्रतम् ॥

उक्तप्रकारेण हुत्वा तर्पयित्वा समर्पयेत् ॥

Colophon :

इति श्रीस्कन्दपुराणोक्तचतुर्विंशतिद्वाररामायणपठनसमर्पणश्रीरामपट्टाभिषेकविधिः समाप्तः ॥

245

Sl. No. 13520 रामपट्टाभिषेकविधिः Ms. No. P. 5736/3

(रामार्चतचन्द्रिकीया)

Beginning :

अथातः सम्प्रवक्ष्यामि विधिं पट्टाभिषेककम् ।

दम्पती मङ्गलस्नानं कृत्वा पुण्याहं वाचयित्वा शुचौ देशे मण्टपं विधाय + + + प्रतिमां निधाय पट्टाभिषेकमूर्तिं प्रतिष्ठाप्य + + प्राणानायम्य × × × रामपट्टाभिषेकं करिष्ये इति सङ्कल्पः ॥

End :

एवं यः कुरुते भक्त्या रामचन्द्रमहोत्सवम् ।
स सर्वपापनिर्मुक्तः सर्वान् कामनवाप्नुयात् ॥

Colophon

इति श्रीरामार्चनचन्द्रिकायां श्रीरापपट्टाभिपेकविधिः समाप्तः ॥

246

Sl. No. 13522 रामपट्टाभिषेकविधिः Ms. No. P. 6806/16

Beginning :

सुदिने शुभनक्षत्रे + + नित्यकर्माद्यनन्तरं + + प्राणानायम्य श्रीरामपट्टाभिपेचनं करिष्ये इति सङ्कल्प्य तदङ्गं आचार्यादिऋत्विग्वरणं कुर्यात् ॥

End :

असकृद्वा सकृद्वापि कुर्यादेवं विचक्षणः ।
ऐहिकामुष्मिकान् भोगान् भुक्त्वान्ते मुक्तिमाप्नुयात् ॥

Colophon :

श्रीरामपट्टाभिषेचनविधिः समाप्तः ॥

247

Sl. No. 13529 रापपट्टाभिषकविधिः (ब्रह्मसिद्धान्तीयः) Ms. No. P. 8410/57

Beginning:

सुदिने + बलान्विते । वाचकस्य + विशेषतः ।
स्वगृहस्योत्तरे भागे यागमण्टपमाचरेत् ।
चतुर्द्वारं पताकाढ्यं सुवितानं सुतोरणम् ॥

\+ + + +

ततस्सङ्कल्पयेद्धीमान् रामपट्टाभिषेचनम् ।
करिष्य इति तत्रादौ आचार्यं वरयेद्गुरम् ॥

End:

पट्टाभिषेकसर्गान्ते फलान्युक्तानि यानि वै ।
तानि सर्वाणि सिध्यन्ति क्षिप्रं रामाभिषेचनात् ॥

Colophon :

इति श्रीब्रह्मसिद्धान्ते श्रीरामपट्टाभिषेकविधिः ॥

248

Sl. No. 13535 रामपट्टाभिषेकविधिः Ms. No. P. 10367/15

Beginning:

रामायणपट्टाभिषेकविधिरुच्यते–

सुदिने + + अभिषेचयेत् । गृहस्य उत्तरभागे यागमण्टपं कृत्वा × × तोभद्रप्रकारेण नीलपीतादिभिः × × रचयित्वा तद्द्वारपालपूजां कुर्यात् ॥

End :

रामायणवक्तारं गुरुब्राह्मणान् पूजयेत् । यथाशक्ति भूहिरण्यवस्त्रधान्यादिभिः तोषयेत् ततः सहस्रब्राह्मणान् भोजयेत् ॥

Colophon :

इति श्रीरामायणपट्टाभिषेकविधिः समाप्तः ॥

249

Sl. No. 13536 रामपट्टाभिषेकविधिः Ms. No. A.753/2
(हिरण्यगर्भसिद्धान्तान्तर्गतम्)

Beginning :

अथ रामपट्टाभिषेकविधिं व्याख्यास्यामः— + + + प्राणानायम्य, एवङ्गुणेत्यादिशुभ- तिथौ + + श्रीमद्रामायणपारायणाङ्गं पट्टाभिषेकं कर्तुकामः तदङ्गं पुण्याहं वाचयिष्ये तदङ्गं गणपतिपूजां करिष्ये ॥

End :

ततः यथाक्रमं अन्तिमसर्गपारायणं कृत्वा सर्वैस्साकं पुरुषसूक्तमन्त्रेण ततश्च अभ्य-षिञ्चन्निति मन्त्रेण च लाजं अक्षताश्च पुस्तकोपरि विकिरेत् ।

ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदपि ।
एवं कृत्वा विशेषेण सर्वान् कामानवाप्नुयात् ॥

Colophon:

— — —

250

Sl No. 13542 राममहापट्टाभिषेकविधिः Ms. No. C. 3737

(स्कान्दीयः-शिवरौच्यकसंवादप्रकारोक्तः- साम्राज्यपट्टाभिषेकविधिप्रयोगः)

Beginning :

अथ स्कन्दपुराणोक्तमहासाम्राज्यपट्टाभिषेकविधिस्तत्प्रयोगश्च निरूप्यते— अथातो महासाम्राज्यपट्टाभिषेकविधिं व्याख्यास्यामः—

श्रीरामायणस्य अष्टोत्तरशतपारायणानां चतुर्विंशतिपारायणानां वा कर्ता श्रीरामभक्तः + श्रीशिवरौच्यकसंवादोक्तप्रकारेण मण्टपनिर्माणादि कुर्यात् ॥

End :

यद्वा जपदशांशं होमं कृत्वा होमदशांशं तर्पणं कार्यमिति पक्षः परिगृह्यते तद लक्षहोमविधानोक्त द्विहस्तविस्तृतं चतुर्हस्तविस्तृतं वा कुण्डं कुर्यात् । अत्र जपदशांश तर्पणं कृत्वा तद् ॥

Colophon :

— — — —

251

Sl. No. 13543 रामपूजाकल्पः Ms. No. P. 55/6

Beginning :

श्रीरामपूजाविधिरभिधीयते- पाणिपादौ प्रक्षल्य आचम्य नमो ब्रह्मण्यदेवाय इति नमस्कारं कृत्वा + प्राणायम्य ममोपात्तदुरितक्षयद्वारा श्रीरामप्रीत्यर्थं श्रीरामपूजां कर्तुमादौ द्वारा × साधयामि ॥

End

पूजायां क्रियते स्वामिन् ज्ञानतोऽज्ञानतोऽपि वा ।
न्यूनातिरिक्तं तत्सर्वं क्षमस्व पुरुषोत्तम ॥

अज्ञानयोगादपचारकर्म
यत्सर्वमस्माभिरनुष्ठितं ते ।
तद्देव सोढा सकलं दयालो
पितेव पुत्रान् प्रति नो .... ॥

Colophon :

— — —

252

Sl. No. 13547 रामपूजाकल्पः Ms. No. P. 8410

Beginning :

अथ पुजाविधिः कथ्यते— ब्रह्मोवाच—

हिरण्यगर्भसिद्धान्तरहस्ये मुनिसत्तम !
पूजाविधिं प्रवक्ष्यामि रामचन्द्रस्य नारद ॥

End :

ब्रह्मानन्दैकविज्ञानं त्वन्नामस्मरणं परम् ।
त्वत्पादाम्बुजभक्तिं च देहि मे रघुनन्दन ॥

प्रार्थनम् ॥

Colophon:

इति हिरण्यगर्भसिद्धान्ते रामपूजाविधिः ॥

253

Sl. No 13549 रामानसपूजाविधिः **Ms. No. P. 2706/7**
(अगस्त्यसंहितीयः)

Beginning:

या मानसी पूजा कीदृशी वा वद प्रभो ।
उपचारैः कतिविधैः पूज्यते रघुनन्दनः ॥

अगस्त्य उवाच— + +

विविक्तदेशमाश्रित्य ध्यानपूजां समारभेत् ।
नाभिकन्दसमुद्भूतं कदलीकुसुमोपमम् ॥

अष्टपत्रं स्निग्धवर्णं ध्यायेद्धृदयपङ्कजम् ॥

End :

एवं यः कुरुते पूजां बहिर्वा मानसेऽपि वा ।
सकृत्पूजनमात्रेण राम एव न संशयः ॥

किं पुनस्सततं कुर्यात् ब्रह्मण्येव स्थितोऽहि सः ।
सर्वान् कामानवाप्नोति इह लोके परत्र च ॥

Colophon :

इत्यगस्त्यसंहितायां राममानसपूजाविधिः समाप्तः ॥

254

Sl. No 13550 राममानसदपूजाविधिः (स्कान्दीया) Ms. No. P. 5912/1

Beginning :

श्रीशङ्कर उवाच–

अथ तस्मिन् दिने पुण्ये सुतीक्ष्णोवाच कुम्भजम् ।
हृदये मानसी पूजा कीदृशी मे वद प्रभो ॥ ÷ ÷

अगस्त्य उवाच –

रामं पद्मपलाशाक्षं कालाम्बुदसमप्रभम् ।
सितवक्त्रं समासीनं चिन्तयेच्चिन्तितार्थदम् ॥ ÷

विविक्तदेशमाश्रित्य ध्यानपूजां समारभेत् ॥

End :

सकृदपि यदि रामेत्युच्चरन् यस्तु मर्त्यः
सकलदुरितसंघैः सेवितो वापि नूनम् ।
न पतति यदि मातुर्गर्भवासे कदाचित्
निवसति यदि लोके नास्ति सन्देहलेशः ॥

Colophon:

इति स्कन्दपुराणे अगस्त्यसंहितायां परमरहस्ये श्रीराममानसपूजाविधिर्नाम षट्त्रिंशोऽध्यायः ॥

255

Sl. No. 13551 राममानसपूजाविधिः (ब्रह्माण्डपुराणीया) Ms. No. P. 9797/4

Beginning:

नारद उवाच—

देव देव जगन्नाथ जगतां × × पितामह ।
रामस्य मानसी पूजा कथं कार्या वद प्रभो ॥

ब्रह्मोवाच---

ध्यानपूजां प्रवक्ष्यामि तत्रादौ मुनिसत्तम ।
यथा च मानसी शुद्धिर्भवति × × ते ॥

End:

श्रीरामरामरामेति यो जपत्यनिशं हि सः ।
रामसान्निध्यमाप्नोति रामस्य सदृशो भवेत् ॥

Colophon:

इति ब्रह्माण्डपु × × खण्डे श्रीराममानसपूजा × × नं नाम एकोत्तरशत × × स्सर्गः ॥

256

Sl. No. 13555 रामायणजपविधिः Ms. No. P. 10067/7

(भरद्वाजकृतसुब्रह्मण्यसंहितान्तर्गतः)

Beginning:

श्री सुब्रह्मण्यसंहितायां भारद्वाजकृतायां श्रीमद्रामायणसप्तकाण्डमहामन्त्राणां श्रीमद्वाल्मीकि भगवान् ऋषिः ।अनुष्टुभादिनानाछन्दांसि । श्रीरामो दाशरथिर्देवता + + ध्यानम् । आपदामपहर्तारं । एतदाख्यानमित्युपसंहरणम् ॥

End:

उत्तरन्यासः– ह्रीं अङ्गुष्ठाभ्यां नमः ॥ + + ह्रौं अंगुष्ठाभ्या नमः ह्रः अस्त्राय फट् भूर्भुवस्सुवरोमिति दिग्विनियोगः ॥

Colophon:

- - - -

257

Sl. No. 13556 रामायणपारायणक्रमः Ms. No. P.5912/3

(सुन्दरकाण्डपारायणक्रमः)

Beginning :

कृतनित्याह्निकक्रियः प्राणनायम्य सङ्कल्प्य मम + + सर्वाभीष्टसिध्यर्थं सुन्दरकाण्ड पारायणं करिष्ये— + + ध्यानम् +

चन्द्रबिम्बसमाकारं वाञ्छितार्थप्रदायकम् ।
हनूमत्सहितं ध्यायेत् सौदरे काण्ड उत्सवे ॥

End :

ऋतवस्सागरा द्वीपा वेदा लोका दिशश्च ते ।
मङ्गळानि महाबाहो दिशन्तु तव सर्वदा ॥

कायेन + + स्वभावात् । करोमि + + समर्पयामि ॥

Colophon:

-- -- -- --

258

Sl. No 13557 रामायणपारायणक्रमः Ms. No. P. 5912/4

Beginning :

सङ्कल्प्य एवंगुणेत्यादिशुभतिथौ श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रदेवता उद्दिश्य + रामायणपारायणं करिष्ये । धर्मात्मेति मन्त्रन्यासः ॥

End:

धर्मात्मा सत्यसंधश्च रामो दाशरथिर्यदि ।
पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥

Colophon :

— — —

259

Sl. No. 13558 रामायणपारायणक्रमः Ms. No. P. 5912/20

Beginning:

अस्य श्रीरामायणपारायणमहामन्त्रस्य वाल्मीकिर्भगवान् ऋषिः; प्रायेणानुष्टुप् छन्दः; + + श्रीरामचन्द्रः देवता; + + विनियोगः। + +

ध्यानम्—

सहस्रादित्यसंकाशं सर्वशत्रुनिबर्हणम्।
रामशक्तिमहः ध्यायेत् अमोघं रामसायकम्॥

End:

लमित्यादि सर्वोपचारपूजां समपर्यामि। ओं शुक्लांबरधरं इत्यादि पठित्वा रामायण-पठणं कुर्यात्। ततः पुनः पूजा। इति दिग्विमोकः॥

Colophon:

– – – –

260

Sl. No. 13560 रामायणपारायणक्रमः (ब्रह्माण्डीयः) Ms. No. P 6259

Beginning:

वसिष्ठः—

क्रमाद्वक्ष्यामि राजेन्द्र वक्तुः पारायणे विधिम्।
बारं बारं यथा कुर्यात् तच्छृणुष्व महामते॥

हरिश्चन्द्रः—

धन्यो धन्यतरश्चाहं भूयासं द्विजसत्तम।
चतुर्विंशतिबाराणां पारायणविधिं वद॥

End:

महाभिषेकं कृत्वाथ रामाय परमात्मने ।
जीवन्मुक्तो नरो भूयात् रामसायुज्यमश्नुते ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे वसिष्ठहरिश्चन्द्रसंवादे श्रीमद्रामायणचतुर्विंशतिवरपठनक्रमनिरूपणं नामाष्टादशोऽध्यायः ॥

261

Sl. No. 13561 | रामायणपारायणक्रमः | **Ms. No. P. 6263/1**

(अग्निपुराणीयः- श्रीरामायणरहस्यविचारः)

Beginning :

श्रीशिवः—

पौराणिकं नमस्कृत्य ध्यात्वा रामं सलक्ष्मणम् ।
सीतया सहितं कल्पद्रुं च समाश्रितम् ॥

End :

रामायणीयमखिलं रहस्यमिदमुत्तमम् ।
यश्शृणोति नरस्तस्य भुक्तिर्मुक्तिस्तथा भवेत् ॥

Colophon :

इत्यग्निदेवपुराणे विंशोऽध्यायः ॥

Extra information :

ग्रन्थान्ते-

पर्युष्टकं नाम संक्षेपशारीरकभाष्ये-

" कर्मेन्द्रियाणि खलु पञ्च तथापराणि
ज्ञानेन्द्रियाणि मन आदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादिकं च ।
कामश्च कर्म च तमः पुनरष्टमी भूः ॥ "

इति वर्तते ॥

262

Sl. No. 13562 रमायणपारायणक्रमः Ms No. C. 8410/61

(उमामहेश्वरसंवादात्मकः)

Beginning :

शिवः—

प्राग्गुरुं समुपाश्रित्य रामभक्तं जितेन्द्रियम् ।
वहुधा राममन्त्राणां शोषकं वीतरागिणम् ॥

+ + + +

काण्डादौ चैव काण्डान्ते ब्राह्मणान् भोजयेद्बहून् ।
पूज्यः सीतापतिर्नित्यं सौवर्णप्रतिमाकृतिः ॥

End:

दद्याच्छक्त्यनुसारेण गां प्रदद्याच्च भक्तितः ।
वक्तारं रामवुध्या तु पूजयेदन्वहं प्रिये ॥

Colophon:

इत्युमामहेश्वरसंवादे श्रीरामायणश्रवणविधिः समाप्तः ॥

263

Sl. No. 13565 रामायणपारायणक्रमः Ms. No. A. 397/2

Beginning :

सप्तकाण्डस्य भेदेन रामायणफलं श्रुणु ।
आदौ रामं जगद्वन्द्यं चिन्मयं लोकसाक्षिणम् ॥

सम्पूज्य परया भक्त्या पुस्तके राममच्युतम् । +
पारायणैकवारस्य फलं श्रुणु हिमाद्रिजे ॥

End :

तथैवोत्तरकांण्डान्ते शत्रुघ्नप्रतिमां सुधीः ।
कारयित्वा सुवर्णेन पूजां कृत्वा विधानतः ॥

दद्याच्छक्त्यनुसारेण गां दद्याद्भक्तिसंयुतः ।
सत्कारं रामवुध्या तु पूजयित्वान्वहं प्रिये ॥

Colophon :

इत्युत्तरकाण्डविधिस्समाप्तः ॥

264

Sl No. 13567 रामायणपारायणक्रमः **Ms. No. C. 3704/5**

(मरीचिकल्पसारीयः- सुन्दरकाण्डपारायणक्रमः)

Beginning

अथ सुन्दरकाण्डविधिः मरीचिकल्पानुसारेण—

रामायणविधिं वक्ष्ये श्रुणु देवि प्रयत्नतः ।
सकामैस्सम्पुटो जाप्यो निष्कामैः सम्पुटं विना ॥

End :

अनुलोमविलोमाभ्यां सर्वकार्यं च सिध्यति । +

शुद्धानुलोमः सम्पुटितानुलोमः विलोमश्चेति यथाकार्यं ज्ञातव्यम् ॥

Colophon :

इति मरीचिकल्पसारसंग्रहे रामायणसुन्दरकाण्डपद्धतिः समाप्ता ॥

265

Sl. No. 13568 रामायणन्यासः **Ms No P.10266/3**

Beginning :

अस्य श्रीरामायणमहामन्त्रस्य वाल्माकिर्भगवान् ऋषिः । + + श्रीमन्नारायणो देवता । + + श्रीरामचन्द्रप्रसादसिध्यर्थें जपे विनियोगः । + +

सहस्रादित्यसङ्काशं सर्वेशत्रुनिबर्हणम् ।
रामशक्तिमहो ध्यायेत् अमोघं रामसायकम् ॥

इति श्रीरामं हृत्पद्ममध्ये ध्यायेत् ॥

End :

वं अमृतात्मने नमः ; अमृतखण्डनैवेद्यं निवेदयामि । सं सर्वात्मने नमः ; सर्वोपचारपूजां समर्पयामि । सीतालक्ष्मण + + रामचन्द्रपरब्रह्मणे नमः ॥

Colophon :

– – – –

266

Sl. No. 13570 **राहुपूजाविधिः** **Ms No. P.3023/69**

Beginning :

मापराश्युपरि वारुणकलशं निधाय इमं मे वरुणेति पूजा ।

तस्य पश्चिमदिग्भागे स्थण्डिलं तण्डुलेन तु ।
पद्म × दलं कृत्वा मध्ये शूर्पाकृतिं ततः ॥

कालात्मकाय नमः । राहवे नमः । उरगाय नमः । असुराय धूम्रा × य नमः ।

End:

यस्मादायसकर्माणि तदधीनानि सर्वदा ।
लाङ्गला × युधा × × शान्तिं प्रयच्छ मे ॥

Colophon :

– – –

267

Sl. No. 13572 राहुपूजाविधिः Ms. No. P. 5930/37

Beginning :

अथ राहुपूजा–

नीलाञ्जनसमानाभं नीलमेघसमप्रभम् ।
स्थापयामि महा वक्रं राहुं चन्द्रार्कमर्दिनम् ॥

End :

कया न इति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितराहवे नमः ; षोडशोपचारं कृत्वा, यस्य स्मृत्येत्यादि ॥

Colophon

– – – –

268

Sl. No. 13573 राहुपूजाविधिः Ms. No. P. 8765/17

Beginning :

ರಾಹುಪೂಜೆ

पैठीनसो बर्बरदेशजातः
शूर्पासनस्सिंहगतस्सुनीलः ।
याम्याननो नैऋतिदिक्करालो
वरप्रदः शूलिसचर्मराहुः ॥

कया नो वामदेवो राहुर्गायत्री + + + राहुग्रहमावाह्य– सुप्रसन्नो भव ; वरदो भव ॥

End :

विकृताननं खण्डधरं नैऋतं राक्षसेश्वरम् ।
रक्तवर्णं महाभीमं करालवदनं शुभम् ॥

ಪಂಚಪೂಜೆ

परं मृत्योरनुपदे हि पन्थाम् । इति मन्त्रशतं जपेत् ॥

Colophon :

— — —

269

Sl. No. 13575 राहुपूजाविधिः Ms. No. P. 585/19

Beginning :

कथा नो वामदेवो राहुर्गायत्री । मम राहुग्रहप्रसादसिध्यर्थे जपे विनियोगः + + + + शूर्पकारपीठे राहुग्रहमावाहयामि ॥

End :

स्तोत्रम्—

कालात्मकं च राहुं च उरगासनमेव च ।
धूमांगवस्त्रगं चैव सिंह्मिकातनयं तथा ॥

सततं चिन्तयेद्राहुस्तोत्रं कृत्वा पठेन्नरः ।
तस्य मृत्युभयं नास्ति राहुदोषो न विद्यते ॥

एहि दैत्यकुलोद्भूत ग्रहणोत्पातकारण ।
भिन्नाञ्जनसमानाभ राहुप्रीतिकरं शुभम् ॥

दूर्वासमिच्चर्वाज्यम् ॥

Colophon :

— — — —

270

Sl. No. 13576 राहुपूजाविधिः Ms. No. C. 3441/8

(राहुग्रहाराधनक्रमः)

Beginning :

अथ राहुग्रहाराधनक्रमः । राहुध्यानम्—

कृष्णाम्बरः कृष्णवपुः किरीटी
करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च नीलः
सिंहाधिरूढो वरदोऽस्तु राहुः ॥

राहुं ध्यायामि ॥

End

ध्यानम्—

कालं करालवदनं भजे नीलाञ्जनभीषणम् ।
पाशदण्डधरं मृत्युं सर्पवृश्चिकरोमकम् ॥

Colophon :

इति राहुग्रहाराधनक्रमः समाप्तः ॥

271

Sl. No. 13577 रुद्रजपहोमार्चनविधिः Ms. No. P. 7513/2

Beginning :

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः—

रुद्राख्यस्य समस्तमन्त्रस्य प्र ... अनुष्टुप् छन्दः ; अघोर ऋषिः ; स एष रुद्रो देवता ॥

End :

शर्वस्य देवस्य पत्नीस्तर्पयामि ; + + आयुराशास्ते । + + यदनेन हविषाशास्ते । + + वयमग्ने मानुषाः । इष्टं च वीतं च । उभे च नो द्या पृथिवी अ × × × ॥

Colophon :

– – – . – – –

272

Sl. No. 13578 रुद्रत्रिशतीनामपूजाविधिः Ms. No. P. 6507/2.

(बोधायनसूत्रीया)

Beginning:

अथ श्रीरुद्रविधानेन बोधायनसूत्रानुरोधेन नमस्ते रुद्र मन्यव इति प्रथमानुवाकगतैः षोडशभिर्मन्त्रैः षोडशोपचारान् कृत्वा नमो हिरण्यबाहव इत्यादि + + अनुवाकैः आदि-नमस्कारैः अन्त्यनमस्कारैश्च दिव्यनामपूजां कृत्वा + + अभयं प्रार्थयते ॥

End:

इति पदानि त्रिसप्तत्युत्तरद्विशतनामानि वनपतये द्राविंशतिः सद्योजातमिति पञ्च ।

Colhnopo

-- -- -- . --

273

Sl No. 13579 रुद्रपारायणविधिः Ms. No. P. 748/2;

Beginning :

× × × × दीपम् । सर्वभूतदमनाय काले नैवेद्यम् । मनोन्मनाय ताम्बूलम् । अघोराय उत्तरनीराजनम् । तत्पुरुषाय मन्त्रपुष्पम् ॥

End :

मानस्तोके, ऋतगॅ् सत्यं, यो रुद्रो अग्नौ कद्रुद्राय, ब्रह्मजज्ञानं, यः प्राणतो अत्मदा द्दगॅ् सः शुचिषत्, गन्धद्वारां, य इदं शिवसङ्कल्पमष्टात्रिंशत् ॥

Colophon :

— — — —

274

Sl. No. 13580 रुद्रपूजा **Ms. No. P. 2282/23**

Beginning :

नमस्ते रुद्र मन्यवे; सद्योजातं प्रपद्यामि आसनम् ।
यातइषु × वतमा सद्योजाताय वै नमो नमःपाद्यम्॥
या ते रुद्र शिवा तनूः भवे भवे नातिभवे भवस्वमां अर्घ्यम् ॥

End :

सहस्राणीत्यनुवाकेन + + . त्रयोदश नमस्कारान् कुर्यात् । असाविष्णूरिति + + प्रार्थयेत् ॥

Colophon ;

इति रुद्रपूजाविधिः ॥

275

Sl. No. 13581 रुद्रपूजा (पुरुषसूक्तीया) **Ms. No. P. 4380/1**

Beginning :

ओं नमः शम्भवे च मनोभवे च नमः; शङ्कराय हि मयस्कराय च नमश्शिवाय ; + + पाणिमन्त्रं पवित्रम् ॥

End:

चिरिरभिर्यजुर्भि अभिर्यजुर्भिः × नेन्द्रस्य देवस्य सुवर्ण द्विपञ्चारात् । ओ तच्छँयो राव्रृणीमहे + + ओं शांतिः शांतिः शांतिः ॥

Colophon :

— — — —

276

Sl. No. 13584 रुद्राभिषेकविधिः Ms. No. P. 1005 2

Beginning:

पूर्वोच्चरित + शुभतिथौ + अनावृष्टिदोषपरिहारद्वारा सुवृष्टिसिध्यर्थं + श्रीमहा-लिङ्गेश्वरदेवतामुद्दिश्य + अन्यैर्ब्राह्मणैस्सह महान्यासपूर्वकं + रुद्राभिषेकं करिष्यामः ।

End :

आचार्याय दक्षिणां गां दद्यात् । अश्वमेधफलमवाप्नोति इत्याह भगवान् बोधायनः ॥ ।

Colophon :

- - - -

277

Sl. No. 13585 रुद्राभिषेकविधिः Ms. No. P. 4300/3

Beginning :

वामदेवाय नमः ; स्नानं समर्पयामि ।
ज्येष्ठाय नमः ; वस्त्रं समर्पयामि ।
श्रेष्ठाय नमः ; उपवीतं समर्पयामि ।
रुद्राय नमः ; आभरणं समर्पयामि ।
कालाय नमः ; गन्धं समर्पयामि ॥

End :

देवस्य त्वा सवितुः, + हस्ताभ्यां, सरस्वत्यै वाचो × × त्रेताग्नेस्त्वा साम्राज्येनाभि-षिञ्चामि । इन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि ॥

Colophon :

- - -

278

Sl. No. 13586 रुद्रप्रतिष्ठकाल्पः Ms. No. P. 60/31

Beginning :

अथातो रुद्रप्रतिष्ठाकल्पं व्याख्यास्यामः—

चतुर्थ्यामष्टम्यां वा आर्द्रायां + + यानि शुभनक्षत्राणि तेषु पूर्वेद्युरेवायुग्मान् ब्राह्मणानन्नेन परितोष्य + + प्रतिकृतिं कृत्वाभिषिञ्चत्यापोहिष्ठेति ॥

End:

विश्वभुजे नमः ; सर्वभूजे नमः ; आत्मने नमः ; परमात्मने नमः ; इति ब्रह्मचारी गृहस्थो वा ब्राह्मणान् शतान् हरिद्रोदनं भोजयेत् ॥

Colophon :

इति प्रतिष्ठाविधिः ॥

279

Sl.No. 13589 रुद्रमहान्यासः Ms. No. P. 1216/3

(बोधायनीयः)

Beginning:

इदानीं बोधायनोक्तश्रीरुद्रमहान्यासो जपादिकृतामुपकाराय अर्थतो विव्रियते । अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः । अत्र पञ्चाङ्गरुद्रशब्दस्यायमर्थः — पञ्चप्रकारा अङ्गन्यासा येषां ते पञ्चाङ्गरुद्राः ॥

End :

अथ + + अग्निमूर्धानं + + + अस्यार्थमाह— मनो ज्योतिरिति मन्त्र × × चार्यंप गुह्याय नमः ; इत्युक्त्वा + + + नाभिहृदयकण्ठमुखशिरांसि स्पृशेदिदमेव गुह्य × × × × ॥

Colophon:

— — — —

280

Sl. No. 13590 रुद्रमहान्यासः Ms. No. P. 5685/4

(वोधायनीया)

Beginning :

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः । अस्य रुद्रस्य सन स्तस्य .... अनुष्टुप् छन्दः ; अघोर ऋषिः ; + + तस्यैव न्यासः ॥

End :

आचार्याय दश गावः सवत्साः सुवर्णरजतविभूषितवृषभैकादश तदलाभे एकां गां दद्यात् । एकादश ब्राह्मणान् भोजयेत् । अश्वमेधसहस्रफलमवाप्नोतीत्याह भगवान् वोधायनः ॥

Colophon:

– . – – –

281

Sl. No. 13592 रुद्रमहान्यासः Ms. No. P. 5788/15

Beginning :

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वक जपहोमार्चनाविधिं व्याख्यास्यामः--

+ + + +

ओङ्कारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः ।
मोकारं तु ललाटे वै भकारं मुखमध्यतः ॥

End

एवं कुर्वन् सिद्धिमवाप्नोति । आचार्याय दश गावः सवत्सस्वर्णविभूषिताः दद्यात् ; इत्याह ; भगवान् वोधायनः ॥

Colophon:

-- -- --

282

Sl. No. 13595 रुद्रमहान्यासः Ms. No. P. 6298/13

Beginning :

चन्द्रतारावलान्विते शम्भोः प्रीतिकरे शुभदिने प्राणानायम्य सङ्कल्प्य ·|· + श्रीरुद्रपारायणाङ्गं महान्यासमहं करिष्ये ; तदङ्गं आदौ गणपतिपूजां करिष्ये ॥

End:

आचार्याय च गां दद्यात् सर्वाभरणभूषिताम् ।
ब्राह्मणान् भोजयेच्चापि इहामुत्र महीयते ॥

Colophon :

इति पञ्च × × × × महान्यासः ॥

282

Sl. No. 13604 रुद्रमहान्यासः Ms No. P. 8764/20

Beginning :

ಮಹಾನ್ಯಾಸ ಬರೆವುದಕ್ಕೆ ಶುಭಮಸ್ತು-

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः-

या ते रुद्रेति शिखायाम् ; " या ते रुद्र शिवा तनू अघोरा पापकाशिनी । तया नस्तनुवा शन्तमया गीरिशंतोभिचाकशीहि । "

ओं नमो भगवते रुद्राय ; शिखायै नमः ॥

End:

श्रीविश्वनाथ करुणाकर शूलपाणे
शम्भो गिरीश शशिशेखर चन्द्रमौले ।
श्रीनीलकंण्ठ मदनान्तक विश्वमूर्ते
गौरीपते मयि निधेहि कृपाकटाक्षम् ॥

Colophon :

-- -- --

Extra information :

अन्ते पञ्चाङ्गरुद्रन्यासमन्त्राणां आनुपूर्वी विद्यते ॥

284

Sl. No. 13606 रुद्रमहान्यासः **Ms. No. C. 623/2**

Beginning :

अस्य रुद्रस्य प्रश्नस्य- अनुष्टुप् छन्दः ; अघोर ऋषिः; + + जपे विनियोगः ।

\+ + + +

ध्यानम्--

अपातालनभस्थलांतभुवनब्रह्माण्डमाविस्फुरत्-
ज्योतिस्स्फाटिकलिङ्गमौलिविलसत्पूर्णेन्दुवान्तामृतैः ।
अस्तोकाप्लुतमीश्मे क्रमनिशं रुद्रानुवाकं जपन्
ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोभिषिञ्चेच्छिवम् ॥

End :

नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥

इत्यादि नमस्कारपारायणं कुर्यात् ॥

Colophon:

\- - -

285

Sl. No. 13608 रुद्रमहान्यासः **Ms. No. G. 4300/1**

Beginning :

अथ महान्यासविवरणम्— +

आचम्य अयं मुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु । + + +

प्राणानयाम्य शुभशोभनमुहूर्तेत्यादि अस्यां शुभतिथौ + सर्वकार्यसिध्यर्थं + भवानीश-ङ्करमुद्दिश्य + महान्यासपूर्वक-एकादशवाररुद्राभिषेकं करिष्ये वा करिष्यामः ।।

End :

नमस्ते रुद्रमन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने × × × ते नमः ।।

इति नमकपारायणादि कुर्यात् ।।

Colophon

\- - -

286

Sl. No. 13609 रुद्रविधानम् Ms. No. P.5743/2

Beginning :

अस्य रुद्रस्य प्रश्नस्य अघोर ऋषिः ; + रुद्रो देवता ।

अपाताल + + । . च्छिवम् ।।

ब्रह्माण्डव्याप्तदेहो भसितहिमरुचा भासयंतो भुजङ्गैः
कंठे काला कपर्दाः कलितशशिकलाश्चंडकोदंडहस्ताः।
त्र्यक्षा रुद्राक्षभूषाप्रणतभयहरा शांभवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्ताः प्रकटितविभवा नः प्रयच्छंति सौख्यम् ।।

End :

ओं नमो भगवते रुद्राय । + नमस्ते रुद्र मन्यव + ते नमः। इति नमकचमकादयः पठितव्याः ।।

Colophon :

\- - - -

287

Sl No. 13612 रुद्रविधानम् Ms. No. C. 779/3

Beginning :

अमुकमन्त्रसिद्धिकामो भ्रासाद्विमुक्तिपर्यंतं अमुकमन्त्रस्य जपरूपपुरश्चरमहं करिष्ये ; इति सङ्कल्प्य जपेत् ॥

End :

ततः + आचार्यं दक्षिणाभिः परितोष्य प्रणम्य ब्राह्मणांश्चान्नादिभिस्तोषयेत् ; इति तृतीयो मालाशोधनप्रकारः ॥

Colopon h.

— — — —

288

Sl. No. 13613 रुद्राध्यापकल्पः Ms. No. P. 5689/2

Beginning :

एवङ्गुणविशेषणविशिष्टायां + तिथौ परमेश्वरप्रीत्यर्थं पञ्चाङ्गमहान्यासपूर्वकं एकवाररुद्राध्यायमन्त्रपठनं करिष्यामः ।

या ते रुद्र इत्यस्य मन्त्रस्य– कश्यप ऋषिः ; + शिखान्यासे विनियोगः ॥

End :

यद्भूमेः शूरं तदितो हरामि ; पराचानिरुर्ति निर्वाह × × × इदगुँ श्रेयोवसानमागन्म देवा गोमदश्वावदिदमस्तु ; प्रभूम स्योना पृथिवि भवानृक्षीरानिवेशनि (?) ॥

Colophon :

— — — —

289

Sl. No. 13615 रुद्रध्यायकल्पः Ms No. P. 7861

Beginning :

अभीप्सितार्थ + । + उपास्महे ॥

प्राणानायम्य , एवङ्गुणेत्यादि सङ्कल्प्य, या ते रुद्र इति मन्त्रस्य– कश्यप ऋषिः ; + शिखादिन्यासे विनियोगः । ध्यानम् ।

श्रीरुद्रदेव करुणाकर भक्तवन्द्य
शम्भो शिवङ्कर पार्वतीश ।
विश्वैकवन्द्य जगदीश्वर लोकबन्धो
मां पाहि × भवदीयकृपाकटाक्षैः ॥

End :

यद्भूमिः शूरं तदितो × × × ति × र्वाह × इद × देश × × प्रभूत × निवेशनानि ॥

Colophon :

– – – –

290

Sl. No. 13617 रुद्राभिषेकविधिः Ms. No. P. 3242/48

Beginning :

अथातो रुद्राभिषेकविधिं व्याख्यास्यामः–पञ्चगव्य-पञ्चामृते गृहीत्वा, देवालयं प्रविश्य, देवस्य पुरस्तात् संकल्प्य, ओत्रः रन्ति साम गीन्ना न्यासं कुर्यात ॥

End :

हरित इन्द्रश्मश्रु इति ताम्बूलम् । अथ त्रयस्त्रिंशद्ब्राह्मणान् भोजयेत् । स्वस्ति हैषां भवति स्वस्ति हैषां भवति ॥

Colophon :

इति रुद्राभिषेकविधिः ॥

291

Sl. No. 13618 रुद्राभिषेकविधिः Ms. No. P. 3374/48

Beginning:

नी .... कामः श्रीकामः पापक्षयार्थी मोक्षार्थी रुद्राभिषेकं कुर्यात् ।

शुचिस्स्नात्वा शुद्धवस्त्रधृतत्रिपुण्ड्रः देवस्य दक्षिणप्रतिदिशि स्थित्वा + + सङ्कल्प्य- ॥

End:

ततः + गीत्यादिभिर्महादेवमुद्वासयेत् । स्वर्णभूषितदशगावः दक्षिणाः वृषभैकादश गां वा अप्येकां दद्यात् ॥

Colophon ;

इति रुद्राभिषेकविधिः ॥

292

Sl. No. 13619 रुद्राभिषेकविधिः Ms. No. P. 5952/10

(भविष्योत्तरपुराणीया)

Beginning:

भविष्योत्तरपुराणे रुद्राभिषेकविधिः । ऋषयः—

सूतपुत्र महाप्राज्ञ त्रिकालज्ञानसम्भव ।
भवता सर्वमाख्यातं शम्भोराराधनं परम् ॥

इदानीं श्रोतुमिच्छामः सम्यक्रुद्राभिषेचनम् । + +

श्रीसूतः—

शृणुध्वं ऋषयस्सर्वे शिवभक्तिपरायणाः ।
रुद्राभिषेकमाहात्म्यं को वा वर्णयितुं क्षमः ॥

End :

आयुर्बलं यशस्सौख्यं पुत्रपौत्रादिसम्पदः ।
सकृद्रुद्राभिषेकेण लभते नात्र संशयः ॥

× × × × ।
× × × × ॥

सोऽपि पापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे रुद्राभिषेकप्रशंसा × × वाराभिषेकस्य ११ आवृत्तेः १२१ रुद्राभिषेकस्य १३३१ एकादशरुद्रस्य २४६४२ लघुरुद्रस्य × × रुद्रस्य २९४८७७ महारुद्राभिषेकस्य २०४३५८८८१ एवमष्टप्रकारः ॥

293

Sl. No. 13620 **रुद्राभिषेकविधिः** **Ms. No. P 7551/9**

(स्कान्दीयाः)

Beginning :

देव्युवाच–

देव देव महादेव सर्वज्ञ परमेश्वर ।
इदानीं सर्वमाख्याहि रुद्रस्याभिषेकं मम ॥

ईश्वर उवाच–

शृणुष्वावहिता भूत्वा यस्मादत्त्वमसि मत्प्रिया ।
ममाभिषेचनं × × को वा × × क्षमः ॥

End :

सकृद्रुद्राभिषेकेण सर्वं फलमवाप्नुयात् ।
सोऽपि पापविनिर्मुक्तः मत्सान्निध्यमुपैति हि ॥

Colophon :

इति स्कन्दपुरा × × रुद्रा × × × नाम अष्ट × × ध्यायः ॥

294

Sl. No. 13626 रुद्राभिषेकविधिः **Ms. No. C. 4289/1**

Beginning :

अथ महान्यासप्रयोगविवरणम्—

शुक्लाम्बर = ÷ । ÷ ÷ शांतये ॥

आचम्य, प्राणानायम्य संकल्प्य-

तदेव लग्नं सुदिनं तदेव
ताराबलं चन्द्रबलं तदेव
विद्याबलं दैवबलं तदेव
लक्ष्मीपतेरंघ्रियुगं स्मरामि ॥

End:

ततः श्रीरुद्रत्रिशती-शिवाष्टोत्तर-सहस्र-नामादिभिः यथाविभवं अभ्यर्च्य धूप-दीप-नैवेद्या-दिकं ्जाशेषम् समापयेत् ॥

Colophon :

इति समाप्तः ॥

295

Sl. No. 13627 रुद्राष्टक (पूजा) **Ms. No. P. 1638/3**

Beginning :

चन्द्रचूडा × × × भवाय च ।
असिचर्मधरायास्तु भवान्या × × नमः ॥

इति ध्यानम् ॥

End :

अशक्तेन मया दत्तां कृतं चाप्यभिषेचनम् ।
पूजां चापि गृहाणत्वं सर्वं त्वय्येव चार्पितम् ॥

इति समर्पणम् ॥

रुद्राष्टकमिदं × × यः पठेत् ।
कोटि × तं पा × र × णे × × ति ॥

Colophon :

– – –

296

Sl. No. 13628 लक्ष्मणतीर्थस्नानविधिः(स्नानाङ्गनदीपूजाविधि·) Ms. No. C· 202

Beginning:

लक्ष्मणतीर्थवपनस्नानविधिः —

लक्ष्मणतीर्थे स्नानं कृत्वा ऊर्ध्वपुण्ड्रादिकं धृत्वा, + + इमं मन्त्रं पठेत्—

मेरुमन्दरतुल्यानि पापानि विविधानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम् ॥

End :

जाम्बवन्तं हनूमन्तं सुग्रीवं चाङ्गदं तथा ।
रामं च लक्ष्मणं चैव सीतां चैव यशास्विनीम् ॥

पिप्पलादं तर्पयामि । + + + श्लोकप्रकारेण अर्घ्यं दत्वा स्नानं कुर्यात् ॥

Colophon :

इति तीर्थस्नानाङ्गतीर्थपूजाविधिः समाप्तः ॥

297

Sl. No. 13629 लक्ष्मीनारायणपूजाविधिः Ms. No. P. 4218/95
(प्रतिभार्गववासराकरणीयः)

Beginning :

पूर्वोक्तएवंगुणविशिष्टायां शुभतिथौ प्रतिभार्गववासरे ·|·+ श्रीलक्ष्मीनारायणपूजां करिष्ये । अथ ध्यानम्–

वन्दे लक्ष्मीं ·|· । + अच्युतश्रीः ॥

End :

लक्ष्मीं क्षीरसमुद्रराजतनयां + वन्दे मुकुन्दप्रियाम् ॥
प्रार्थनां समर्पयामि । पुनः पूजा । यस्य स्मृत्या च ॥

Colophon :

इति पूजाविधानं समाप्तम् ॥

298

Sl.No. 13630 लक्ष्मीपूजाविधिः Ms. No. P. 6164

Beginning :

पद्मानने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

ध्यानम् ।

सर्वमङ्गलमाङ्गल्ये विष्णुवक्षस्थलालये ।
आवाहयामि देवि त्वां सिद्धिदा भव सर्वदा ॥

End :

ततः पुष्पाणि सं × × जलिं ततो दद्यात् वरलक्ष्मीसन्तुष्टये ।

कमला प्रतिगृह्णाति वरलक्ष्मी ददाति च ।
कमल× × हम्ना × × ते ॥

वायनदानमन्त्रः ॥

Colophon

इति पूजाविधानं समाप्तम् ॥

299

Sl. No. 13632 लक्ष्मीवेङ्कटरमणपूजाविधिः Ms. No. G. 4194/30

(चतुर्वेदसमर्पणावधारणपूजा)

Beginning :

ऋग्यजुस्सामाथर्वणपञ्चास्यारुह्यपद्मजागोचरारुक्मगर्वभञ्जन रुक्मिणीप्राणनाथ सीतामनोहर पद्मिनीवल्लभ श्रीलक्ष्मीवेङ्कटरमणस्वामिन् ऋग्वेदमवधारय–

अग्निमीळे +· +· रत्नधातमम् ॥

End:

अथ कृताखिलप्रपञ्चवैभव अथर्वनिरत अरविन्दाक्ष अमराद्यभिवन्दित अनन्यश्रीवेङ्कटरमण स्वामिन् प्रदोषपूजामहोत्सवसमये अथर्वणवेदप्रिय अथर्वणवेदमवधारय ॥

Colophon:

– – – –

300

Sl. No. 13633 लघुन्यासः Ms. No. P. 7855

(बोधायनोक्तः)

Beginning:

ओं: अथातः × × × लघुन्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्याम – + शर्वाय देवाय नमः ; ईशानाय देवाय नमः ; पशुपतये देवाय नमः ; तर्पयामि ॥

End :

इत्युत्तराराधनं पापक्षयार्थी ÷ अन्नाद्यकामः × × × × अश्वमेधशतक्रतुफलसिध्यर्थ-मेव कुर्वन् सिद्धिमवाप्नोतीत्याह , भगवान् बोधायनः ॥

Colophon :

अयं ग्रन्थस्समाप्तः ॥

301

Sl. No. 13635 लघुन्यासः **Ms. No. P 3492/1**

(बोधायनप्रोक्ता–रुद्राभिषेकाङ्गभूतः)

Beginning :

अथातः पञ्चाङ्गरुद्राणां लघुन्यासपूर्वकं जपहोमार्चनमिाभेषकविधिं व्याख्यास्यामः। या ते रुद्रेति शिखायाम्। ÷

ओङ्कारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः ।
मोकारं तु ललाटे वै तकारं मुखमध्यतः ॥
गकारं कण्ठदेशे तु वकारं हृदि विन्यसेत् ॥

End :

अर्कचम्पकपुन्नागनन्द्यावर्तं च पाटलम् ।
बृहतीकरवीरं च द्रोणपुष्पाणि चार्चयेत् ॥

ओं नमो भगवते रुद्राय ; नमस्ते रुद्रमन्यवे; इति रुद्राभिषेकं कुर्यात् ॥

Colophon:

इति बोधायनोक्तलघुन्यासः ।

302

Sl No 13636 ललिताचक्रपूजा Ms. No P. 7508/3

(सौभाग्यविद्यान्तार्गता)

Beginning

ॐ ऐं ह्रां श्रीम्–

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतिक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावळीपञ्चकं
श्रीमन्मालिनिमन्त्रराजमहितं वन्दे गुरोर्मण्डलम् ॥

ब्राह्मे मुहूर्ते उत्थाय + + स्नानसन्ध्यावन्दनादिकं कुर्यात् ॥

End :

धूपं दीपं च नैवेद्य ताम्बूलं सलिलं तथा ।
उपचारैः समुद्दिष्टा कर्तव्या मनसा सह ॥

श्रीमत्त्रिपुरसुन्दरी सुप्रीता सुप्रसन्ना वरदा भवतु ॥

Colophon :

इति सौभाग्यविद्यायां ललितात्रिपुरसुन्दरीचक्रपूजाविधानं समाप्तम् ॥
ಇಕ್ಕೃಡಿಕ ಸ ಡಾ ಔಲಚಕ್ರಪೂಜ ಸವಾಪ್ತಮು ॥

303

Sl. No. 13637 ललिताम्बापूजाविधिः Ms. No. P. 7804/3

(महात्रिपुरसुन्दरीपूजा)

Beginning :

विविक्तस्थलं पुष्पमालालङ्कृतं वराङ्गनाधिष्ठित सुतापितं यागगृहं गत्वा द्वारपूजां कृत्वा + + देशकालौ सङ्कीर्त्य एवङ्गुण + तिथौ + + महात्रिपुरसुन्दरीनवावरणपूजां करिष्ये ॥

End :

हस्तपादौ प्रक्षाळ्याचम्य, अग्निरिति भस्म, वायुरिति भस्म, मन्यतां चक्षुषि भस्मनि ।।

Colophon :

– – –

304

Sl.No. 13639 लिङ्गपूजाविधिः Ms. No. P. 5108/24

(आलिङ्गचन्द्रशेखरध्यानमूर्तिपूजाविधिः)

Beginning:

अरुणकिरणनिभाङ्गं चन्द्रचूडं त्रिनेत्रं
परशुहरिणदा .... गौरीमालिंग्य वामे ।
अभयवरदहस्तं हारकेयूरभूषं
स्थितकमलदलोर्ध्वेशोरुदा × × स्वरूपम् ।।

इति ध्यानम् ।।

End :

एवं कृत्वा विशेषेण ध्यानपूजां हि यो नरः ।
स प्रा× × विष्णु × × यात् ।।

Colophon

– – – –

305

Sl. No. 13640 लिङ्गपूजाविधिः Ms No. P.7635/18

Beginning :

लिङ्गपूजाविधिं वक्ष्ये शौनकोऽहं विधानतः ।
आचम्य प्राणानायम्य सङ्कल्प्य च ततः क्रमात् ।।

आदौ तु गणनाथं च द्वारपालान् प्रपूज्य च ।
नन्दीशं पूजयित्वाथ प्रार्थयित्वा प्रवेशने ॥
गर्भं गृहं प्रविश्याथ मन्त्रन्यासं ततः परम् ।।

End :

एवं कृत्वा तु पूजां यः × स्य × प × ।
ब्राह्मणान् भोजयित्वाथ स्वयं भुञ्जीत × ।।
सर्वान् कामानवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon :

– – –

306

Sl. No. 13641 **लिङ्गप्रतिष्ठाविधिः** **Ms No P.170/4**

Beginning :

अथातः सम्प्रवक्ष्यामि लिङ्गस्थापनमुत्तमम् ।
सर्वसिद्धिप्रदं दिव्यं सर्वभीष्टप्रदायकम् ॥

End:

ज्येष्ठां चैवोरगेन्द्रं च क्षेत्रेशं वीरभद्रकम् ।
ऐन्द्राग्नेयस्य मध्यादिष्वन्तरालेषु विन्यसेत् ।।
मन्त्रप्राकृतिकं वापि तद्भद्राकृतिकं तु वा ।
नन्द्यावर्तविमानं वा सर्वेषां तु प्रकल्पयेत् ।।
मातॄणां च विशेषेण कल्पयेन्मन्दिरं क्रमात् ।।

Colophon :

-- -- --

307

Sl. No. 13642 लिङ्गप्रतिष्ठाविधिः Ms. No. C. 4146/38
(अजिताख्यमहातन्त्रार्गता)

Beginning :

अथ वक्ष्ये विशेषेण लिङ्गस्थापनमुत्तमम् ।
धन्यं यशस्करं चायुर्वर्धनं पुत्रवृद्धिदम् ॥

End:

एवं यः कुरुते मर्त्यः सर्वपापात् प्रमुच्यते ।
इहैव पुत्रवान् श्रीमान् सोऽन्ते सायुज्यमाप्नुयात् ।

Colophon :

इति × × प्रतिष्ठातन्त्रे लिङ्गस्थापनविधिपटलः ॥

308

Sl. No. 13645 लिङ्गस्थापनविधिः Ms. No. C. 3740
यजुस्मृतीया--बोधायनोक्ता शिवप्रतिष्ठा

Beginning :

बोधायनोक्तशिवप्रतिष्ठाविधिः । तत्र कालनिर्णयः विष्णुधर्मोत्तरे--

चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवेऽपि वा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥

अथ नक्षत्राण्युच्यन्ते ॥

End :

ततो मण्डपदेवताग्निं च विसर्जयेत् लिङ्गप्रतिष्ठासिध्यर्थं ब्राह्मणान् भोजयेत् । अशक्तश्चेद् दश वा भोजयेत् । वस्य स्मृत्येत्यादि ॥

Colophon :

बोधायनोक्तलिङ्गप्रतिष्ठाविधिः ॥

309

Sl. No. 13646 लिङ्गार्चनविधिः Ms. No. C. 2777/3

(शैवपुराणोक्ता–महालिङ्गार्चनविधिः)

Beginning :

अथातः सम्प्रवक्ष्यामि महालिङ्गार्चनक्रमम् ।
पुरा भगवता प्रोक्ता शङ्करेणोपमन्यवे ॥

End:

उपमन्युर्महातेजाः महालिङ्गं तथैव तत् ।
चिरमभ्यर्चयामास लोकानुग्रहतत्परः ॥

+ + + +

यः पठेदिममध्यायं लिखिता श्रावयेदपि ।
सोऽपि तत्फलमाप्नोति सत्यं सत्यं वदाम्यहम् ॥

Colophon :

इति शैवपुराणे शिवपहस्ते शिवधर्मानुकीर्तने महालिङ्गार्चनप्रयोगविधिर्नाम षड्विंशोऽध्यायः ॥

310

Sl. No. 13647 वन्दनविधिः Ms. No. P. 7515/3

Beginning :

बन्दनप्रकारः—

प्रथमं दिग्बन्धनम् । गुरुवन्दनम् । प्रार्थनगरुडासनम् , प्रदीपप्रयुक्तानि । पादग्रहणम् । पादधारणम् । जूटीनमस्कारार्थं अभ्यनुज्ञा । दण्डवन्दनम् ॥

End:

प्रार्थनागरुडम् । समर्पणमन्त्रः । आचारवि × × हः । अपराधान् क्षमस्व मे । उत्थाय दण्डवन्दनम् ॥

Colophon :

इति वन्दनक्रमः ॥

311

Sl. No. 13648 वरदेवताप्रतिष्ठाविधिः Ms. No. P. 7970/64

Beginning :

दृश्यमाने गुरौ शुक्रे शुभलग्नमुहूर्तके ।
श्रावणे कार्तिके द्वन्द्वे माघफाल्गुनसंज्ञिके ॥ + +

प्रतिष्ठासर्वदेवानां विशुद्धा चानुमोदिता ॥

End :

शिवविष्णुप्रतिष्ठायामयमेव विधिस्स्मृतः ।
तत्तत्प्रधानकैर्मन्त्रैः कुर्याच्छेषं समन्त्रयोः ॥

Colophon:

— -- -- --

312

Sl. No. 13651 वर्धनीपूजा Ms. No. P. 312/1

Beginning :

मध्ये केशवाय नमः । योगासनाय नमः । + + वामबाहौ सदाशिवमूर्तिं ध्यात्वा---

शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम् ।
पद्मासनस्थं पञ्चास्त्यं प्रतिवक्त्र त्रिलोचनम् ॥

ओं कालकण्ठाय वर्धं इति दूर्वापुष्पाक्षतां दद्यादिति प्राणप्रतिष्ठा उच्यते ॥

End :

अं हं वर्धनीमूर्तये नमः ; मूर्तये नमः इति गन्धपुष्प-धूप-दीप-नैवेद्य-ताम्बूलैरभ्यर्चयेति ॥

Colophon :

इति वर्धनीपूजा ॥

313

Sl. No. 13652 वर्धापनविधिः Ms. No. P. 9254/66

Beginning :

अथ वर्धापनविधिः । युधिष्ठिर उवाच—

देवदेव सुरश्रेष्ठ बालानां हितकाम्यया ।
वर्धापनविधिं ब्रूहि राज्ञामपि विशेषतः ॥

End:

वस्त्रताम्बूलपुष्पाणि दिने तस्मिन् प्रकल्पयेत् ।
सुवासिनीनां विप्राणां कुमुदा प्रीयतामिति ॥

Colophon :

इति वर्धापनविधिः ॥

314

Sl. No. 13653 वसन्तमाधवपूजाविधिः Ms No. P. 4541/22

Beginning :

ವಸಂತಮಾಸದಪೂಜೆ–

पूर्वोक्तएवङ्गुण + + तिथौ मम सहकुटुम्बानां + ऐश्वर्याभिवृध्यर्थं बसन्तमाधव-देवनामुद्दिश्य + + वसन्तमाधवपूजां करिष्यमाणः + तदादौ + पुण्याहवाचनं कृत्व + ध्यानावाहनादिवसन्तपूजां समर्पयामि ॥

End:

ब्राह्मणान् भोजयित्वा ताम्बूलदक्षिणां दत्वा आशीर्वादं दत्वा ವೊರವಣಿಗೆ ಮಾಡಿಸುವುದು

Colophon:

– – –

315

Sl. No. 13654 वारपूजाविधिः Ms. No. P. 4145/4

Beginning :

अथ वाराधिदेवानां पूजा वक्ष्यते–

एवंगुणेत्यादिशुभतिथौ तत्तद्वारांवाराधिपान् उद्दिश्य + सर्वार्थकार्यसिध्यर्थं वारपूजां करिष्ये ॥

End

एवं यः कुरुते भक्त्या सर्वान् कामनवाप्नुयात् ।
इह लोके सुखं चैव परत्र च सुखोत्तमम् ॥

Colophon:

-- -- --

316

Sl. No. 13655 वास्तुपूजाविधिः Ms. No. P. 3805/2

Beginning:

अथ वास्तुपूजाविधिं व्याख्यास्यामः–

प्रासादाग्रे वालनिस्थाने (?) यागमण्टपे वास्तुपूजास्थानं सङ्कल्प्य, लिङ्गस्थापन + + दीक्षाभिषेक इत्यादिकर्मणा वा वास्तुपूजामारभ्य + पश्चात् वास्त्वधिपतिं + गत्वा, ब्रह्मासनाय नमः ; + ब्रह्मणे नमः ।

ध्यानम्–

तनोः निरृतिकोणस्थं ब्रह्माणं वास्त्वधीश्वरम् ।
गौरवर्णं लम्बकूर्चं चतुर्वक्त्रं चतुर्भुजम् ॥ + +

दधानमष्टनयनं पूजयेत्सृष्टिकारणम् ॥

End :

आज्य-तिल-दर्भ-सिद्धार्थमिश्रेण कटळं बन्धयित्वा वह्नौ प्रज्वाल्य प्रासादादिमण्टपगोपुरचेरमण्टपप्राकारस्थास्त्रमन्त्रमुच्चार्य देवालयं प्रविशेत् ॥

Colophon :

इति वास्तुपूजाविधिः ॥

317

Sl. No. 13660 वास्तुपूजाविधिः (स्मृतिकदम्बीया) **Ms. No. P.8197/3**

Beginning :

वास्तूपदिष्टमार्गेण कृत्वा × × शुभम् ।
वास्तुपूजां च कृत्वैव प्रविशेन्नवमन्दिरम् ॥

End :

वास्तुपूजां विना यत्र कृतं वस्तु वितश्यतु ।
तस्माद्वास्त्वर्चनं होमं कृत्वा चेत्प्रविशेद्बुधः ॥

सर्वान् कामानवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon :

इति कंचुयल्लभट्टविरचिते स्मृतिकदम्बे वास्तुपूजाविधिः ॥

318

Sl. No. 13661 वास्तुपूजाविधिः (शौनकीया) **Ms. No. C. 3513**

Beginning :

शौनकोऽहं प्रवक्ष्यामि वास्तुपूजावि × × ।
येन त × × देवा × × × सदा ॥

प्राणानायम्य सङ्कल्प्य एवंगुण + तिथौ वास्तुशान्त्य × × पूजां करिष्ये ॥

End :

ब्राह्मणान् भोजयित्वा च आशिषः प्रतिगृह्य च ।
इह चामुत्र च सुखं विन्दते × × तः ॥

Colophon :

– – –

319

Sl No. 13662 वास्तुप्रतिष्ठाविधिः Ms No P. 5687/7

(शैवागमोक्ता)

Beginning

अथातः सम्प्रवक्ष्यामि वास्त्वर्चनविधिं गुरो।
यस्मिन् कृते सर्वसौख्यं सदा भवति सद्मनि ॥

यद् गृहस्य पतेः शस्त्रं उत्तरोत्तरवृद्धिदम् ।
तत्सवसम्पत्सुखदं सर्वापद्विनिवारणम् ॥

End :

स्तम्भद्वयेद्वयं चैकतुल्यद्वेद्वयमुच्यते ।
एवं नवशलाकाश्च रक्षार्थं पूरयेद्‌द्विजः ॥

Colophon :

-- -- --

320

Sl. No. 13663 वाहनपूजाविधिः Ms. No. C. 3563/5

Beginning :

गजरथाश्वरथगोरथान्दोलिकादिवाहनपूजां करिष्ये । कुसुमाक्षतान् गृहीत्वा, ध्यानम्—

महागजरथानश्वरथानपि च गोरथान् ।
सौवर्णान्दोलिकां छत्रचामरादिपरिष्कृताम् ॥
ध्यात्वाभिमानिदेवान् तान् पूजयेद्वाहनोत्तमान् ॥

End :

गजरथाश्वरथादिसमस्तवाहनदेवताभ्यो नमः ; ध्यायामि ; आवाहयामि ॥

Colophon :

- - - - - -

321

Sl. No. 13664 वाहनाभिषेकः Ms. No. P. 10041/85

(शौनकीया)

Beginning :

अथातोऽहं प्रवक्ष्यामि क्षत्रियस्य विवृद्धये ।
वाहनानां गजादीनां अभिषेकं विशेषतः ॥

सर्वलक्षणसम्पन्नान् गजादीन् प्राङ्मुखस्थितान् ।
अलंकृतान् स्वाभरणैः ब्राह्मणैः स्वस्ति वाचयेत् ॥

End :

ब्राह्मणान् भोजयित्वाथ अभिषेके तु दक्षिणाम् ।
अश्वं हिरण्यं धान्यं वा प्रदद्यात्सुसमाहितः ॥

एवं कृते न सन्देहः जीवेच्च शरदां शतम् ॥

Colophon :

इति शौनकीये वाहनाभिषेकः ॥

322

Sl. No. 13665 वाहनाभिषेकः Ms. No. A 47/12

Beginning :

अथ वाहनाभिषेकविधिः—

अथातः सम्प्रवक्ष्यामि क्षत्रियस्य विभूतये ।
वाहनानां गजादीनां अभिषेकं च शौनक ॥

End :

ब्राह्मणान् भोजयित्वा तु अभिषिक्तेऽथ दक्षिणाम् ।
अश्वान् हिरण्यं धान्यं वा प्रदद्यात्सुसमाहितः ॥

Colophon:

— — — —

323

Sl. No. 13666 वाहनाभिषेकः Ms. No. C. 2778/1

Beginning :

अथ क्षत्रियैः कार्यः वाहनाभिषेको व्याख्यास्यते–

सुदिने सुनक्षत्रे चन्द्रतारावलान्विते यजमानः अलंकृतं मण्डपं प्रविश्य समाहितः प्राणानायम्य सङ्कल्प्य पूर्वोक्त + तिथौ मम + . सकलकामनासिध्यर्थं वाजि अश्वादीनां वाहनानां पूजां करिष्ये ; तदङ्गं आदौ गणपतिपूजां करिष्ये ॥

End:

अभिषेकान्तं शतं ब्राह्मणान् भोजयेत् । निष्कं सुवर्णं प्रदद्यात् । एवं कृत्वा स सुखमवाप्नोतीत्याह भगवान् बो × × नः ॥

Colophon:

– – – –

324

Sl. No. 13667 विनायकपूजा Ms. No. P. 1664/9

(गणेशपूजा-- विघ्नेश्वरपूजाविनायकल्पीया)

Beginning:

विनायकल्पः । श्रीदेव्युवाच—

देव देव जगन्नाथ चिरसदानन्द शाश्वत ।
चिदाख्यानमिह श्रोतुं चिरं मि .... म्यहं प्रभो ॥
सर्वार्थसाधनोपाय तद्वदस्व दयानिधे ।

श्रीशिवः उवाच—

सर्वशास्त्रार्थसारेषु तन्त्रकोशेषु सर्वतः । + +
सर्वदेवमयः शम्भुः शिववन्द्यो विनायकः ॥
तस्माद्विनायकं कल्पं सावधानमनाश्शृणु ॥

End :

श्रीविनायकं प्रतिष्ठाप्य यागसमिद्भिः जुहुयात् । शैकार्कमूलेन सुरकामिनीव शमा .... यति । रक्तपुष्प-रक्तगन्ध-रक्तोपहार-रक्तपुष्पहारं रम्भादिजनमाकर्षयेति पुष्टिरुत्तमकाक्कतिपु-यदिक्षुद्रकर्मणा कार्यं सिद्धम् ।

अयं मनुः ओं गणाधिपतये गुलु गुलु रवं हि भग- ... वान् ... ज्ञा वियति स्वाहा ॥

Colophon :

– – – –

325

Sl. No. 13671 विनायकपूजा **Ms. No. P. 4526/30**

(विनायककल्पान्तर्गता)

Beginning :

पूजां विनायकस्याथ सर्वसिद्धिकरीं शुभाम् ।
कल्पोक्तेन प्रकारेण वक्ष्येऽहं नारदात्र तु ॥

ब्राह्मे मुहूर्ते चोत्थाय कृतपौर्वाह्णिकक्रियः ।
आलयं च प्रविश्याथ सुप्रभातं × च ॥

End :

एवं कृत्वा तु पूजां यः भक्तिमान् नियतेन्द्रियः ।
सर्वान् कामानवाप्नोति जीवेच्च शरदां शतम् ॥

Colophon

इति × × × प्रोक्ते विनायककल्पे विनायकपूजाविधिः स × × ॥

326

Sl. No. 13673 विनायकपूजा Ms. No. P. 4541/1

Beginning :

एवंगुणेत्यादि + तिथौ सकलसम्प × × र्थं विनायकपूजां करिष्ये ।

एकदन्त महाबाहो शिवपुत्र गजानन ।
ध्यायामि त्वां महादेव सर्वसिद्धिं प्रयच्छ मे ॥

ध्यानम् ॥

End:

ब्राह्मणान् शतं पञ्च वा भोजयित्वा दक्षिणाताम्बूलादिकं दत्वा आशिषो वाचयित्वा × × त ॥

Colophon :

-- -- -- --

327

Sl. No. 13680 विनायकपूजा (याज्ञवल्क्योक्ता) Ms. No. A. 47/13

Beginning :

अथ विनायकपूजा-

अथ राज्यविनियोजितस्याविनायकोपसर्गप्रतिबन्धकसिद्धिः कस्यचिद्विघ्नपरिहारार्थं अन्यस्यापि तत्तदपेक्षितकामसिध्यर्थं च विनायकस्नपनं प्रासंगिकं यथशास्त्रं याज्ञयल्क्याद्युक्तं लिख्यते ।

विनायकस्सर्वविघ्नसिध्यर्थं विनियोजितः ।
गणानामाधिपत्ये च रुद्रेति ब्रह्मणा तथा ॥

End:

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोते श्रियं चाप्नोत्यनुत्तमाम् ॥

Colophon :

इति विनायककल्पः ॥

328

Sl No. 13681 विनायकपूजा (कल्पचतुष्टयम्) **Ms No A.47/19**

Beginning :

अथ विनायककल्पः—

विद्याकामः प्रजाकामः पशुकामो भूतिकामः कृषिकामो वा विनायकमर्चयेत्--

मासि मासि चतुर्थ्यां पञ्चम्यां वा पूर्वेद्युः कृतैकभुक्तोऽग्निमुखान्तं ब्रह्मणो दक्षिणतो विनायकस्य प्रतिमां दक्षिणामुखां स्थापयेत् ; विघ्नेश्वरमावाहयेत् ॥

End :

कृतं यदि मया प्राप्तं श्रद्धया वा गणेश्वर ।
उत्तिष्ठ सगणासो .... पि याहि पादं प्रसीदताम् ॥

इति तस्य समीपे द्वादशेक्षुप्रनिध उपर्युपरि निधाय द्रे समिधौ दधिमधुपयआज्यसमित्रयं विनायकाय जुहुयात् ॥

Colophon :

इति विनायककल्पः ॥

329

Sl.No. 13685 विष्णुपूजाविधिः (विष्णुनित्यार्चनम्) **Ms No. P. 60/29**

Beginning:

अथातो महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्यामः—

स्नातः शुचिः शुचौ देशे + + प्रतिकृतिं कृत्वा अथातः पुष्पैर्यथालाभमर्चयित्वा सह पुष्पोदकेन भगवन्तमावाहयेत् ॥

End :

प्रतिमास्थानेष्वप्स्वग्नावावाहनोद्वासनवर्जं सर्वं समानम् ; महास्वस्त्यन इत्याचक्षते इत्याह भगवान् बोधायनः ॥

Colophon:

-- -- -- --

330

Sl. No. 13686 विष्णुपूजाविधिः Ms No. P 2890/3

Beginning :

प्रणम्य श्री × ति सर्वान् गुरूंश्च प्रणमाम्यहम् ।
यथाविधि हरेः पूजाविधिं वक्ष्ये सर्वसम्मतम् ॥

End :

नमो ब्रह्मण्यदेवस्य नखास्ताः श्रीशुकादयः ।
लक्ष्मीनृसिंहप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥

रमानैवेद्यं समर्पयामि ॥

Colophon :

इति पूजाविधानं समाप्तम् ॥

331

Sl. No. 13687 विष्णुपूजाविधिः Ms. No. P. 5416/2

Beginning:

श्रीपराशरभट्टार्यः + हितः । श्रीवत्साङ्कसुतः + भूयसे ॥

विष्णोर्नित्यार्चनविधिं भुक्तिमुक्तिप्रदायकम् ।
× × तः सम्यवक्ष्यामि सर्वेषां संप्रदाय च ॥

End :

स्तोत्रैः स्तुत्वा प्रणम्याथ पर्यङ्के स्वापयेद्धरिम् ।
अर्घ्यादीनि समर्प्याथ रक्षां कुर्याद्यथाविधि ॥

Colophon :

– – –

332

Sl. No. 13688 विष्णुपूजाविधिः Ms. No. P. 5982/9

Beginning :

उत्थाय पश्चिमे यामे शुचिर्भूत्वा समाहितः ।
× × पूतात्मा त्रिकालार्चनमारभेत् ॥

\+ + + +

कुर्यादाराधनं विष्णोः देवदेवस्य चक्रिणः ।
तीर्थाभिषेकपूतात्मा ऊर्ध्वपुण्ड्रो जितेन्द्रियः ॥

End :

अष्टदशोद्वासनं कृत्वा शेषकर्मणि पूर्ववत् ।
× × ने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥

स्तुतिश्चैव तथा × पुरुषसूक्तम् च नित्यशः ॥

\+ + + +

इत्येवं यः पठति केवलमेव सूक्तं
नारायणस्स शरणाभिवन्द्यवन्द्यैः ।
× × × परमेण × × याति विष्णोः
स्थाने सदा सकल × × मुक्तः ॥

पत्रेषु पुष्पेषु फलेषु तोयेषु
ये केवल × × पुरुषस्समर्थः ।
मुक्तैः किम × क्रियते न हि चापि यत्नः
नारायणं × × वि यस्सशरीरमुक्तः ॥

Colophon

— — —

333

Sl. No. 13689 विष्णुपूजाविधिः Ms. No. P. 6030
(नारदसंहितीया— समयाचाराध्यायान्तर्गतः)

Beginning :

आराधयेत् शुभे देवं दानहोमसमन्वितम् ।
अयने विषुवे चैव ग्रहणे सोमसूर्ययोः ॥

End :

× धा × न्ति सद्भक्ता × धे च वेदान्तवित्तम ।
द्विभाषाभिस्स्वस्य × र्याभिर्येतदन्धप्रबन्धकाः ॥
भक्तो× ×दि- × × × × ॥

Colophon :

— — — —

334

Sl. No. 13691 विष्णुपूजाविधिः Ms. No. P. 7198/1

Beginning :

मुदलियाण्डान् सादित्त आराधनक्रमः-
स्वाचान्तस्सोर्ध्वपुण्ड्रः प्रणमनमजिनाद्यासनञ्चासुधामः
साङ्गन्यासो जपस्यात् हृदयसरसिजे मानसी देवपूजा।

वामस्थं वारिपात्रं कुसुममितरतश्चान्यदर्ध्यादिपाद्य
चामस्नानीयमर्ध्योद्धरितनुकुसुमस्त्वात्मनां प्रोक्षणञ्च ॥

End :

आह्वानञ्चासनार्ध्यं पदसलिलमथाचामपुंसूक्तयुक्त
स्नानं वस्त्रोपवीतेमल्युजकुसुमे धूपदीपाः क्रमेण ।
मध्वादेः पर्क आदादुपरि च सलिलं पायसाद्यन्नजातं ॥
पानीयाचामपूजां परिगतिनमनोद्वासनं विष्णुपूजा ॥

Colophon:

– – – –

335

Sl. No. 13693 विष्णुप्रतिष्ठाकल्पः Ms. No. P. 60/28

Beginning :

अथातो विष्णुप्रतिष्ठाकल्पं व्याख्यास्यामः–

द्वादश्यां श्रावण्यां वा यानि × न्यानि शुभनक्षत्राणि तत्पूर्वेद्युरेव युग्मान् ब्राह्मणानन्नेन परितोष्य + + + अतो देवा इति विश्णुं स्थापयेत् ॥

End :

विश्वभुजे नमः ; सर्वभुजे नमः ; + + इति ब्रह्मचारी गृहस्थो वा द्वादश ब्राह्मणान् संयतान्न हरिद्रोदनं भोजयेत् । सन्तिष्ठते प्रतिष्ठाविधिः ॥

Colophon :

– – – –

336

Sl. No. 13695 विष्णुप्रतिष्ठाकल्पः Ms No. P. 6567

Beginning :

अथ विष्णुप्रतिष्ठा—

एकादश्यां द्वादश्यां श्रोणायां वामदेवनक्षत्रे वा ज्यौतिषोक्तकाले पुण्याहं वाचयित्वासौ कर्ता नीराजनैः प्रतिमामलङ्कृत्य अभिषिञ्चति आपो हिष्ठेति ॥

End :

घृताप्लुतपूर्णशरावं घृतौदनम् निवेदयेत् । कृसरमाज्यमिश्रं जुहुयात् वासुदेवाय स्वाहा + + विष्णवे स्वाहा । विष्णोर्नुकं तदप्रियम् ॥

Colophon :

– – – –

337

Sl. No. 13698 विष्णुप्रतिष्ठाविधिः (शौनकीया) Ms. No. P. 3642/2

Beginning :

श्रीशौनकीयगृह्यार्चनप्रतिष्ठाविधिः—

उत्तरायणवसन्तजपर्वपक्षपुण्यर्क्षतिथिवारम् × + मानानुकूलदिनेषु भोगकैवल्यसिध्यर्थं स्वकुलोद्धारणाय च भगवत्प्रतिष्ठां कुर्यात । प्रकारः ॥

End:

सर्वे ते प्रशमं यान्तु वासुदेवापमार्जनात् ।
विलयं यान्तु ते सर्वे विष्णोरुच्चारणेन च ॥

क्षयं गच्छन्त्यशेषास्ते चक्रेणाभिहता हरेः ॥

Colophon :

– – –

338

Sl. No. 13700 विष्णुप्रतिष्ठाविधिः Ms. No. P 7882

(अश्वलायनीयः)

Beginning :

अथाश्वलायनपरिशिष्टे विष्णुप्रतिष्ठाविधिरुच्यते —

अथ प्रतिमाद्रव्याणि-हेम-रौप्य ताम्र × × पित्तली-कांस्य-दारु-शिला-मृन्मौक्तिक-स्फटिक-सालिग्राम-शिला-वज्र-वैडूर्य-पुष्यराग-प्रवाळ-मरकतादीनि ॥

End :

आचार्याय ब्रा × × पुरुषसूक्तेन देवं स्तुत्वा उत्तिष्ठ ब्रह्मणस्पते इति उत्थाप्य विश्वतश्चक्षुरित्यु × दिति सूक्तपातैः तूर्यनिर्घोषैः मण्टपं प्रादक्षिण्येनोत्तरद्वारेणानीय × × × त् ॥

Colophon :

-- -- --

339

Sl. No. 13702 विष्णुप्रतिष्ठाविधिः Ms. No. C. 2539/28

(बोधायनात्रैविक्रम्योभयानुसारी)

Beginning :

अथ बोधायनत्रैविक्रमीं स्थिरविष्णुप्रतिमां करिष्ये ; इति वदेत् । सर्वं शिवप्रतिष्ठावत् कृत्वा, स्थिरविष्णौ तु विशेषः ॥

End:

विष्णोर्नुकं, तदस्य प्रियं, + + त्रिर्देव इति जुहुयात् । प्रासादमात्रे नूतने तु मत्स्योक्तजलाशयप्रतिष्ठाविधिमेव कुर्यात् । गोरुत्तारणपात्रीप्रक्षेप × दिं तु न भवति ; द्वारलोपात् । वरुणहोमस्थाने वास्तुहोमः ॥

Colophon :

-- -- -- --

340

Sl. No. 13703 वीरपुरुषपूजाविधिः Ms. No. P. 3023/188

Beginning:

अथ वीरपु××जा–

शोभने × न्विते × कलशमादाय × पुरुषमावाहयामि । पुरुषदेवताभ्यो नमः ॥

End :

ब्राह्मणान् भोजयित्वा च × दक्षिणाः ।
विष्णोः × लो × × परत्रापि विशेषतः ॥

Colophon :

341

Sl. No. 13704 वृध्याभिषेकविधिः Ms. No. C. 4363
(पारिजातसंग्रहोक्तः)

Beginning:

पारिजातसंग्रहोक्तपट्टाभिषेकषष्टितमवर्षवृध्यभिषेकविधिप्रयोगो लिख्यते–

अद्य महाराजः पट्टाभिषेकदिनादारभ्य षष्टितमवर्षपूर्णदिवसे × ह्वे पत्न्या सह + + + प्राणानायम्य + + समस्तदोषपरिहारार्थं + + षष्टितमवर्षविध्य भिषेकाख्यं कर्म करिष्ये ॥

End :

गुरून् नमस्कृत्य ; ब्राह्मणान् भोजयित्वा, बन्धुवर्गसहितस्स्वयं मृष्टान्नं भुक्त्वा यथासुखं विहरेत् ॥

Colophon :

इति परिजातसंग्रहोक्तपट्टाभिषेकादिषष्टितमवर्षवृध्यभिषेकविधिप्रयोगः समाप्तः ॥

342

Sl. No. 13705 वृषभप्रतिष्ठाविधिः Ms No P. 79/0/105

Beginning :

नन्दिनं स्थापयेत् धीमान् वृक्षमूले शिवालये ।
प्रपास्थले वस्त्रननस्थले (?) वा लक्षणान्वितः ॥
वस्त्रेणाच्छाद्य वृषभं नूतनेन बलीयसा ।
तत्पर्वताग्रे संवेश्य आचार्यं वरयेत्ततः ॥

End :

आचार्यं पूजयेत्पश्चात् वस्त्रा × × रणपूर्वकम् ।
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत बन्धुभिः ।

Colophon :

इति श्रीस्कन्दपुराणे नागरखण्डे वृषभप्रतिष्ठाविधिस्समाप्तः ॥

343

Sl. No. 13706 न्यासपूजाविधिः **Ms. No. P. 4561/145**

Beginning :

आषाढ्यां पौर्णमास्यां क्षौरस्नानानन्तरं पादौ प्रक्षाल्याचम्य + + प्रणवेन षड्ङ्गन्यासपूर्वकं न्यासपूजां करिष्ये; इति संकल्प्य सलिलं स्पृशेत् ॥

End:

आवाहनादिषोडशोपचारपूजां कृत्वा प्रदक्षिणनमस्कार × × न्यवरोहणक्रमेण कृष्णान्तं भावयेत् । पूर्वोक्तक्रमवत्या × × क्षेत्रपालाय नमः; + + × × + + × × श्रीवेदव्यासः, मध्ये अनिरुद्धः प्रद्युम्नः, सङ्कर्षणः × × ॥

Colophon:

– – –

344

Sl. No. 13708 व्यासपूजाविधिः Ms. No. P. 6469

Beginning:

धार्मिकाणां द्विजाग्र्याणां ग्रामे राजानुपालिते ।
ब्राह्मणैः प्रार्थितस्सद्भिः वसेन्मासास्तु वार्षिकान् ॥

\+ + + +

अथाषाढपौर्णमास्यां ब्राह्मे मुहूर्ते चोत्थाय विधिवत् नित्यकर्मानुष्ठानक्षौरानन्तरं + प्राणानायम्य, + + तत्र देवता स्थापनक्रमः कृष्णस्य दक्षिणपार्श्वे श्रीवेदव्यासपञ्चकम् ॥

End :

सर्वेषां ब्राह्मणानां दक्षिणताम्बूलादिक दत्वा वेदघोषैः पुरस्सरं पूजास्थानात् यतिं निवासस्थानम् प्रापयेयुः । द्वित्रिगृहे माधोकरं कुर्यात् ॥

Colopon h

इति व्यासपूजाकल्पविधिः समाप्तः ॥

345

Sl No. 13712 व्यासपूजाविधिः (विष्णुधर्मोत्तरीयीया) Ms. No. C. 1958

Beginning :

आषाढपौर्णमास्यां व्यासपूजोक्ता । तत्र त्रिमुहूर्ता चेत्– परैव ग्राह्या । तत्र प्रयोगः । + + सङ्कल्प्य प्राणानायम्य आसनदिग्बन्धादि कुर्यात ॥

End:

उपचारैः षोडशभिः पूजनीयः प्रयत्नतः ।
पौराणैर्नामभिर्वापि वेदमन्त्रैर्विशेषतः ॥

\+ + + +

सभापाण्डित्यमौदार्यं गाम्भीर्यमतुलं भवेत् ।
भुक्त्वा भोगान् यथाकामं अन्ते विष्णुपदं व्रजेत् ॥

Colophon :

इति विष्णुधर्मोत्तरे दाल्भ्यविष्णुसंवादे व्यासपूजाविधिर्नामाध्यायः । व्यासपूजा समाप्ता ॥

346

Sl.No 13713 **शक्तिप्रतिष्ठाविधिः** **Ms. No. P. 4149/42**

(कामिकेशिवार्णवेशिवप्रतिष्ठादीपिकान्तर्गतः)

Beginning:

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
शुभवारादिसंयुक्ते प्रतिष्ठां सम्यगाचरेत् ॥

End :

पश्चात् कल्याणकर्मन्तु (?) पूर्वोक्तविधिना सह ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥

Colophon :

इति शिवार्णवे शिवप्रतिष्ठादीपिकायां कामिके शक्तिस्थापनविधिः समाप्तः ॥

347

Sl. No. 13714 **शक्तिप्रतिष्ठाविधिः** **Ms No. P 5867/1**

(बोधायनोक्ता)

Beginning :

यजमानः नित्यकर्म समाप्य + + शुभतिथौ + + श्रीमहादेवीप्रसादसिद्ध्यर्थं शक्तिप्रतिष्ठां करिष्ये ; इति सङ्कल्प्य प्रतिष्ठाकर्मणि आचार्यं त्वां वृणे ॥

End :

यजमानस्य समग्रज्येष्ठा इत्यादिमन्त्रैः सम्प्रोक्ष्य, देवीं गृहीत्वा, यथास्थाने निवे-शयेत् । ब्राह्मणान् अन्नादिभिः सन्तर्पयेत् ॥

Colophon

– – – –

348

Sl. No. 13715 शनैश्चरपूजा (शनिपूजा) Ms. No. P. 3504/7

Beginning :

छायासूनुं गुणश्रेष्ठं घोररूपं सुदग्धकम् ।
पश्चिमाभिमुखं वीरं आं × महं सदा ॥

शनैश्चरावाहनम् ॥

End :

सघृतं तिलपिष्टं च मोदकान् घृतपाचितान् ।
नैवेद्यं गृह्यतां वीर उग्ररूप क्षम कुरु ॥

नैवेद्यम् । ताम्बूलम् । मन्त्रपुष्पम् । प्रदक्षिणनमस्कारौ ॥

Colophon :

– – –

349

Sl. No. 13716 शनैश्चरपूजा (शनिपूजा) Ms. No. P. 5930/36

Beginning :

इन्द्रनीलसमानाभं नीलोत्पलसमप्रभम् ।
स्थापयामि महारौद्रं सूर्यपुत्रं शनैश्चरम् ॥

End :

शनैश्चराय सूर्यपुत्राय दिवामूर्तये रौद्राय कृष्णवस्त्राभरणाय यज्ञोपवीतमालाधराय ममार्चनं गृह्ण गृह्ण शान्ति कुरु ; कुरु ; स्वाहा ; इति शनैश्चरमन्त्रः । शमाग्निभिरिति मन्त्रणम् । अधिदेवताप्रत्यधिदेवतासहितशनैश्चराय नमः ; षोडशोपचारपूजां कुर्यात् ॥

Colophon :

– – –

350

Sl. No. 13717 शनैश्चरपूजा (शनिपूजा) **Ms. No. A.8765/18**

Beginning :

ಶನಿಪೂಜೆ-

चापासने गृध्रधरः सनीलः
प्रत्यङ्मुखः काश्यपगोत्रजातः ।
सशूलचापासिवरप्रदश्च
सौराष्ट्रदेशः प्रभवन्ति सौरिः ॥

इति ध्यानम् ॥

End :

सुप्रसन्नो भव । वरदो भव । पञ्चपूजा । यमाय सोमं सुनुतेति मन्त्रं शतं जपेत् ॥

Colophon :

– – –

351

Sl. No. 13720 शनैश्चरपूजा (शनिपूजा) **Ms. No. C. 3441/7**

Beginning :

सूर्यात्मजः श्यामवपुः किरीटी
परेषुबाणासनखड्गपाणिः ।

गृध्रासनः क्रूरतरः कृपावान्
प्रसीदतां नो भगवान् स सौरिः ॥

शनैश्चरं ध्यायामि ॥

End :

तिलाः काश्यपसम्भूतः विष्णोर्देहसमुद्भवाः ।
तत्प्रदानात् प्रसन्नात्मा शनिर्मां पातु सर्वदा ॥

ततः छत्रचामराद्युत्तरपूजां कुर्यात् ॥

Colophon :

— — — — —

352

Sl. No. 13721 **शमीपूजाविधिः** **Ms No. P.4179/4**
(परिष्टोक्ता)

Beginning :

आश्वयुङ्मासि सम्प्राप्ते नवरात्रिव्रतान्तरे ।
श्रवणर्क्षे दशम्यां तु शमीवृक्षं प्रपूजयेत् ॥

\+ \+ \+ \+

शमीवृक्ष नमस्तेऽस्तु रामार्जुनसुखङ्कर ।
तद्ध्यात्वा पूजयाम्यद्य सुखं क्षेम प्रयच्छ मे ॥

वृक्षराजाय नमः ; ध्यायामि ॥

End :

य इदं शृणुयाद्वापि शमीवृक्षस्य पूजनम् ।
करोति श्रावयेद्वापि तस्य सिद्धिः करे स्थिता ॥

Colophon :

इति वासिष्ठे शमीपूजविधानम् ॥

353

Sl No. 13722 शमीपूजाविधिः Ms No P. 5574/14

Beginning :

शमीप्रार्थना : दशम्यां सायाह्ने शमीपूजां कृत्वा तदनन्तरं ध्यायेत्—

शमी शमयते पापं शमी शत्रुविनाशिनी ।
अर्जुनस्य धनुर्धारी रामस्य प्रियदर्शिनी ॥

End :

अमङ्गलानां शमनीं दुष्कृतस्य च नाशिनीम् ।
दुस्स्वप्नहारिणीं धन्यां प्रपद्येहं शमीं शुभाम् ॥

इति नमस्कारः ॥

Colophon

— — —

354

Sl. No. 13724 शमीपूजाविधिः Ms. No. P. 8828/7

Beginning :

आश्वयुजशुक्लदशम्यां शमीं पूजयेत्—

शमी शमयते पापं शमी शत्रुविनाशिनी ।
तस्मात् ध्यायामि तां देवीं लोकाभ्युदयहेतवे ॥

End :

शम्यधिदेवतायै नमः; छत्रचामरादि सकलोपचारान् समर्पयामि । शम्याधिदेवतायै नमो नमः ॥

Colophon

— — — —

355

Sl. No. 13725 शमीपूजाविधिः Ms. No. P. 9945/24

Beginning :

शमीवृक्ष नमस्तुभ्यं रामार्जुनसुखङ्करि ।
त्वां पूजयामि सद्भक्त्या सुखं क्षेमं प्रयच्छ मे ॥

End:

शमी शमयते पापं शमी शत्रुविनाशिनी ।
अर्जुनस्य धनुर्धारी रामस्य प्रियदर्शिनी ॥

प्रार्थनम् ॥

Colophon :

– – – –

356

Sl. No. 13726 शरभपूजाविधिः Ms. No. G. 3590/1
(भैरवागमा)

Beginning:

शिव उवाच—

मार्कण्डेय महाबाहो मा भीः सिंहात् हरेः पुनः ।
अहं हि शरभो भूत्वा तत्कोऽपं शमयामि च ॥

End:

एतदाख्यानमायुष्यं यः पठेत्श्रृणुयान्नरः ।
स प्राप्नोति परां सिद्धिं अन्ते शिवपदं व्रजेत् ॥

Colophon :

– – – –

357

Sl. No. 13727 | शारदापूजाविधिः (सरस्वतीपूजाविधिः) | Ms. No P. 4590/9

Beginning :

अथ सरस्वतीपूजा -

तत्र पीठपूजां कृत्वा नवरात्रिपूजां कुर्यात् । मेधायै, प्रज्ञायै, प्रभायै + + सरस्वत्यै नमः सुवर्णपीठं परिकल्पयामि ॥

End :

वज्रादि पञ्चमावरणम् । अङ्गपूजादि सर्वं पूर्ववत् । सरस्वतीपूजां समर्पयामि ; नमो नमः ॥

Colophon:

- - - -

358

Sl. No. 13728 | शारदापूजाविधिः (सरस्वतीपूजाविधिः) | Ms. No. P 7451/18

Beginning :

एवङ्गुण + + शि श्री शारदापूजां करिष्ये । पुष्पाक्षताः गृहीत्वा–

अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारैः समायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

End

नमस्कारम्–

नमस्ते शारदादेवि काशीपुरनिवासिनि ।
त्वामहं प्रार्थयिष्यामि विद्यादानं च देहि मे ॥

Colophon :

इति पूजाविधानं समाप्तम् ॥

359

Sl. No. 13729 शारदापूजाविधिः Ms. No. P. 7492/3

Beginning :

नमस्कृत्य जगत्पूज्यां शारदां विशदप्रभाम् ।
सितपद्मासनां देवीं त्र्यम्बकीं शशिभूषणाम् ॥

इति ध्यानम् ।

अथातः सम्प्रवक्ष्यामि देव्याः पूजामनुत्तमाम् ।
सर्वदा पूजयेद्देवीं नवम्या तु प्रयत्नतः ॥

End :

कविलोकचकोरवृन्दसेव्या
निखिलानामनिशं निषेवणीया ।
विदधातु मुदं सरस्वतीनः
सकलानां जननी सुरासुराणाम् ॥

प्रार्थना-छत्र-चामर-आन्दोलिकाद्युपचाराः । यस्य स्मृत्येति पूजासमर्पणम् ॥

Colophon :

इति सरस्वतीपूजाविधिः ॥

360

Sl. No. 13730 शारदापूजाविधिः Ms. No. P. 7037/5

Beginning:

पुस्तकं चाक्षमालां च वीणादण्डकमण्डलम् ।
ध्रियमाणं चतुर्दोर्भिः ध्यायेच्छ्वेतां सरस्वतीम् ॥

ध्यानम् ॥

End:

सरस्वति नमस्तुभ्यं वरदे भक्तवत्सले ।
देहि पुत्रांश्च पौत्रांश्च धनधान्यसुसंश्रितम् ॥

प्रदक्षिणनमस्कारम् । इति शारदापूजां समर्पयामि ॥

Colophon :

– – – – –

361

Sl. No. 13734 **शारदापूजाविधिः** **Ms No. P. 9668/21**

Beginning :

अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारैः समायुक्तां देवीं ध्यायेच्चतुर्भुजम् ॥

End:

अन्वहं कृपया देवि पावनात्म (?) प्रसीद मे ।
अभीष्टदायिनि देवि चतुराननवल्लभे ॥

इदमर्घ्यम् ।

सर्वमङ्गल -।- साधिके । शरण्ये -।- नमोऽस्तु ते ॥

प्रार्थनम् ॥

Colophon :

– – –

362

Sl. No. 13735 **शारदापूजाविधिः** **Ms. No. A. 9950/1**

Beginning :

नाभिम् । शारदायै उदरम् । पद्म × निभायै हृदयम् । वाण्यै स्तनौ । चतुर्भुजायै भुजौ । म्कबुकण्ठ्यै कण्ठम् । चन्द्रमुख्यै मुखम् ॥

End :

ददामि भारतीदेवि कामदा सुखदा मम ।
दानेनानेन सुप्रीत सर्वसिद्धिप्रदा भव ।।'

उपायनदानम् ।।

Colophon:

इति शारदापूजाविधिः समाप्तः ।।

363

Sl No. 13798 शिवपञ्चायतनप्रतिष्ठाविधिः Ms. No. C. 2007/2

Beginning :

शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करे
भास्ये नागसुतारवौ हरगणेशानांबिकाः स्थापयेत्।
देव्यां विष्णुहरे भव....बयो लम्बोदरे चेश्वरे
नाम्बाः शङ्करदिङ्मुखास्तु शुभदा व्यत्यस्ततो हानिदाः ।। (?)

End :

नित्यश्चैवार्चनं गौर्या पञ्चाक्षर × × × ।
× × यानारी शुश्रूषां विहाय व्रततत्परा ।
× × री × × नात्र कार्या विचारणा ।।

Colophon :

इति शैवरत्नाकरे वायव्यसंहितायां × द्र × द्वि × × तंत्रज्ञानेऽधिकारिता ।। (?)

364

Sl No. 13739 शिवपूजाविधिः Ms. No. P. 18/2

Beginning :

परं ब्रह्माहमस्मीति चिरं ध्यात्वा हृदये तन्मूर्तिं ध्यायेत् ।।

विभ्रद्दोर्भिः कुठारं मृगमभयवरं सुप्रसन्नो महेशः ।
सर्वालंकारदीप्तः सरसिजनिलयो व्याघ्रचर्मात्तवासाः ।।
ध्येयो मुक्ताकलापामृतनिधी रजताद्रिप्रभः दवक्त्रः
त्र्यक्षः कोटीघटितवामकरो मृगमौळिः महेशः ।।

एवं + + ध्यात्वा ततः + + अष्टत्रिंशत्कलान्यासं कुर्यात् ।।

End:

इदं विष्णुर्विचक्रस्य क्षेत्रस्य क्षत्रपस्तथा ।
एष ते तु नवत्रिंशत् प्रायश्चित्ताहुतीर्हुनेत् ।।

Colophon

-- -- --

365

Sl. No. 13743 शिवपूजाविधिः Ms. No. C 2705/7

Beginning :

याश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गला ।
तयोस्संस्मरात् पुंसां सर्वतो जयमङ्गलम् ।।

सुखासने समासीनाः स्वस्तिकाद्यासनाश्रितः ।
ऋजुर्बद्धमना भूत्वा नासाग्रन्यस्तलोचनः ।।

नीलकण्ठं हृदि ध्यायेत् वक्ष्यमाण × × रतः ।।

End :

साधुवासाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं भगवन् शम्भो भवदाराधनं परम् ॥

Colophon :

— — —

366

Sl. No. 13744 शिवपूजाविधिः **Ms. No. P.3618/12**

Beginning :

ओं नमो वषट्कारयुक्तं वैश्ये नियोजयेत् ।
नमो वौषट शूद्रस्य प्रणवादि विम्बितम् ॥

निर्वाणदीक्षितशूद्रान् प्रणवेन तु योजयेत् ।
न जातिदोषो वर्णश्च निर्वाणोपरि मे भवेत् ।।

\+ + + +

कर्षणादिप्रतिष्ठान्तमेकदेशिकमाचरेत् ।
भवनीस्थापनं वक्ष्ये सहितं भिन्नमेव वा ॥

End:

आगतं शिववक्त्रात्तु गतं च गिरीशोन्मुखे ।
मतं च ऋषिभिस्सर्वं तस्मादागम ईरितः ॥

तत्त्वमा × × ते येन तेनाप्यागम उच्यते ।
सर्वागमोक्तविधिना स्थिरलिङ्गाभिषेचनम् ॥

Colophon :

— — — —

367

Sl. No. 13746 शिवपूजाविधिः Ms. No P 4245/17

(रुद्रानुसारेण–शङ्कराचार्योक्ता)

अथ श्रीरुद्रप्रकारेण श्रीशङ्कराचार्योक्तशिवपूजाविधिर्लिख्यते—

श्रीं ह्रीं हुं फट तालत्रयादिदिग्बन्धनाग्निप्रका × × कृत्वा + मानसपूजां कृत्वा कलश-पूजां कुर्यात् ॥

End :

शिवाय सकलगुणात्मने शक्तियुक्ताय अनन्ताय योगपीठासनात्मने स्नानपीठे एवं संस्थाप्य पूजापीठेऽप्येवमर्चनं कृत्वा ॥

Colophon:

-- -- --

368

Sl No. 13718 शिवपूजाविधिः Ms. No. P. 5717/1

(पूजाद्रव्यादिविचारः)

Beginning

ಪೂಜಾದ್ರವ್ಯ– × × × ಸ್ವರ್ಣೋದಕಕ್ಕೆ– ಚಿನ್ನನೀರಿಗೆ ಹಾಕಿದರೆ ವರ್ಣೋದಕ ಎಂಬುದು. ರತ್ನೋದಕಕ್ಕೆ– ಕೆಂಪು ಮುತ್ತು ವೈಡೂರ್ಯ × × × ತಿಲೋದಕಕ್ಕೆ ಬಿಳಿ-ಯುಳ್ಳ ನೀರಿಗೆ ಹಾಕಿದರೆ– ತಿಲೋದಕವೆಂಬುದು.

ಮಧುಪರ್ಕಕ್ಕೆ– ಹಾಲು, ಮೊಸರು, ತುಪ್ಪ, ಜೇನುತುಪ್ಪ. ಪಂಚಾಮೃತಕ್ಕೆ ಹಾಲು, ಮೊಸರು, ತುಪ್ಪ, ಜೇನುತುಪ್ಪ.

End :

पर्णपुष्पभवे व्याधिः पर्णाग्रे पापसम्भवः ।
चूर्णपर्णविनाशाय शास्त्राणां बुद्धिनाशनम् ॥

+ + सर्वकार्यसिद्धिरस्तु ॥

Colophon:

-- -- --

369

Sl. No. 13751 शिवपूजाविधिः Ms. No. P. 9934/2

Beginning :

गौरीभर्त्रे नमः ; द्रोणपुष्पपूजां समर्पयामि ।
त्रिलोचनाय नमः ; द्रोणपुष्पपूजां समर्पयामि ।
श्रीकण्ठाय नमः ; द्रोणपुष्पपूजां समर्पयामि ।
अथ तिलाक्षतपूजा –
विशालाक्षाय नमः ; तिलाक्षताः समर्पयामि ।
पशुपतये नमः ; तिलाक्षताः समर्पयामि ॥

End

नैवेद्य परमान्नं च फलैश्च विविधैः शुभैः ।
भक्ष्यापूपसमायुक्तं सोपदं शर्करायुतम् ॥

नवेद्यम्–

नमस्ते देवदेवेश सर्वतृप्तिकरं पदम् ।
अखण्डानन्दसम्पूर्ण गृहाण जलपूजनम् ॥

करोद्वर्तनम् ॥

Colophon :

370

Sl. No. 13752 शिवपूजाविधिः Ms. No. B 918/1A
(बोधायनीया)

Beginning :

पूजारहस्यमाणिक्यमंजूषेयं महागुरोः ।
दयापङ्कशलाकिन्योद्घाट्यते पुरुषार्थदा ॥

दीक्षास्नानविशुध्या वाहनश्रीमूर्तिभावनाम् ।
पूजा"दङ्गप्र॰ि ज्ञात्वा च शिवमर्चयेत् ॥

End :

इदमहरहर्महस्स्वस्त्ययनमित्याचक्षत इत्याह भगवान् बोधायनः ।

Colophon :

– – – –

371

Sl. No. 13755 शिवपूजाविधिः Ms. No. C. 3458/1

Beginning:

गौरीभूषितवामङ्कं सच्चिदानन्दविग्रहम् ।
प्रफुल्लकमलोद्भासि पञ्चविंशन्मुखोज्वलम् ॥ १ ॥

\+ + + +

सर्वलोकान् समुद्धर्तुं महालिङ्गसमुद्भवम् ।
महादेहं प्रभुं साक्षात् ध्यायामि श्रीसदाशिवम् ॥

End

श्रीमहालिङ्गोद्भवसदाशिवमूर्तिं ध्यायामि । ध्यानं समर्पयामि ॥
सर्वदेवनमस्कृताय सर्वकामफलप्रदाये सेवंतिकापत्रं समर्पयामि । श्रीसाम्बसदाशिवस्वामिने नमः ; नानाबिल्वपत्राणि समर्पयामि । + · नानाविधपुष्पाणि समर्पयामि ॥

Colophon :

– – – –

372

Sl. No. 13756 शिवपूजाविधिः Ms. No. C. 35/32

Beginning :

शिवपूजाविधिं वक्ष्ये नानाकल्पोक्तशीतिकम् ।
देव्या प्रोक्त सुरेशाय महेन्द्रायागताय च ॥ १

संदाशिवं च ध्यायामि साम्बं लिङ्गस्वरूपिणम् ।
सर्वाधारं जगन्नाथं गणवृन्दैस्सुपूजितम् ॥

साम्बं सदाशिवं ध्यायामि ॥

End :

अपराधांश्च सर्वांस्त्वं क्षमस्व करुणामय ।
न मेऽन्यश्च शरण्योऽस्ति तस्मात्त्वां × × तः ॥

क्षमापणम् ॥

Colophon :

\- - - - - -

373

Sl. No. 13757 **शिवपूजाविधिः** **Ms. No. C 4106**

(शिवपूजासंग्रहः–सरस्वतीकृतः)

Beginning :

अथ भुषण्डः कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच । + + + +
४१तमे पत्रे—

आदाय श्रद्धया विप्रः शिवलिङ्गं समाहितः ।
तत्रैवाराध्य देवेशं प्रणवेन हृदि स्थितम् ॥

अर्घ्यं दत्वा मुनिश्रेष्ठाः ततः पूर्वोक्तमन्त्रतः ।
पाद्यमाचमनीयं च दत्वा पूर्वोक्तमन्त्रतः ॥

End :

तत्र शङ्करसान्निध्यं भवान्याश्च सदा ध्रुवम् ।
तत्रापि कृतां पूजां श्रद्धया तु शिवार्चकैः ॥

\+ + + +

यस्तु शङ्करनिर्माल्यं पादेनाक्रामते नरः ।
षष्टिवर्षसहस्राणि तिर्यग्योनिषु जायते ॥

Colophon:

इति श्रीवल्लभेन्द्रसरस्वतीविरचितशिवपूजासंग्रहे पञ्चमोऽध्यायः ॥

374

Sl No. 13758 शिवप्रतिष्ठाविधिः **Ms No. P. 9205**

Beginning :

शिवप्रतिष्ठां वक्ष्येऽहं शैवागमविधिक्रमात् ।
सदाशिवेन साक्षाच्च प्रोक्तं देव्यै स्वयं किल ॥

End :

नयनोन्मीलनान्ते च तदाराधनमाचरेत् ।
नृत्तवादित्रनिर्घोषैः शिवं संप्रीणयेदपि ॥

Colophon :

- - - -

375

Sl. No. 13759 शिवप्रतिष्ठाविधिः (महादेवप्रतिष्ठाविधिः) **Ms. No. P. 3374/45**

Beginning :

महादेवप्रतिष्ठा—

उदगयने वसन्ते पूर्वपक्षे वा चतुर्थ्यां अष्टम्यां + + आर्द्रायां + + ज्योतिश्शास्त्रोक्तकाले वा + + लिङ्गाकारं चतुर्भुजाकारं वा देवस्य प्रतिमां वास्तुशास्त्रोक्तमार्गेण शिलाभिर्निर्मितां स्नापयित्वालंकृत्य + + तीर्थान्तं अन्यतमे वाधिवासयति ॥

End:

परमात्मने नम ; इति द्वादश षड्वा वेदपारायणं कुर्यात् । ब्राह्मणान् शिव-भक्तान् हरीद्रोदनं भोजयित्वा यथाशक्ति दक्षिणां दद्यात् । प्रतिष्ठाकर्ता आचार्यांश्च सर्वोपकरणैरर्चयित्वा वृषभैकादश गां दद्यात् ॥

Colophon :

इति शिवप्रतिष्ठाविधिः ॥

376

Sl. No. 13762 शिवलिङ्गप्रतिष्ठाविधिः Ms. No. P. 2329/1

Beginning :

वैदिकागमोक्तशिवलिङ्गविग्रहप्रतिष्ठाक्रमः—

ओं प्रारीप्सितस्य कर्मणः निर्विघ्नन परिसमाप्तिद्वारा उत्तरोत्तराभिवृध्यर्थं आदौ श्रीगणाधिपपूजां करिष्ये ॥

End:

इत्युक्त्वा देवदेवस्य पुरतो निधाय साष्टाङ्गनमस्कारं कुर्यात् । शिवलोकावाप्तिः ॥

Colophon :

श्रीवैदिकागमशिवप्रतिष्ठाविधानं समाप्तम् ॥

377

Sl. No. 13762 शुक्रपूजाविधिः Ms. No. P. 3504/6

Beginning :

तपोरूपाय सत्वाय सर्वज्ञाय शुभाय च ।
भार्गव × × म्यं आस्यतां लोकपूजित ॥

शुक्रावाहनम् ॥

End:

ज्ञानाज्ञानेन संप्राप्तं मम × × न्तरेषु वा ।
तत्पाप क्षयमेष्यन्तु पुण्यवृद्धिं सदा कुरु ॥

मन्त्रपुष्पं प्रदक्षिणनमस्कारान् कुर्यात् ॥

Colophon :

— — —

378

Sl. No. 13764 शुक्रपूजाविधिः **Ms. No. P.8 8765/13**

Beginning:

शुक्रं ते भरद्वाजः । शुक्रं त्रिष्टुप् ।

प्राच्यां तु गुर्भोजकटप्रदेशे (?)
सभार्गवः पूर्वमुखासिताभः ।
सपञ्चकोणासुरथाधिरूढः
दण्डाक्षमाली वरदोम्बुपात्रः ॥ + +

शुक्रमावाह्य सुप्रसन्नो भव ; वरदो भव ॥

End:

इन्द्रं पीतं चतुर्बाहुं सहस्रनयनोज्वलम् ।
वज्रांकुशधरं ध्यायेत् अप्सरोगणसेवितम् ॥

ಪಂಚಪೂಜೆ

इन्द्रो विश्वतस्परिः । इति शतं जपेत् ॥

Colophon :

— — — —

379

Sl. No. 13767 शुक्रपूजाविधिः Ms. No. G. 3441/6

Beginning :

अथ शुक्रग्रहाराधनक्रमः । शुक्रध्यानम्—

श्वेताम्बरः श्वेतवपुःकिरीटी
चतुर्भुजो दण्डधरश्च शुक्रः ।
तथाक्षसूत्रं च कमण्डलुं च
जटाश्च वीग्रदुरदोऽस्तु मह्यम् ॥

End :

श्वेतहस्तिसमारूढं वज्राङ्कुशलसत्करम् ।
सहस्रनेत्रं स्वर्णाभं इन्द्रं हृदि विभावये ॥

Colophon :

इति शुक्रग्रहाराधनक्रमः समाप्तः ॥

380

Sl. No. 13768 शूलिनीपूजाविधिः Ms. No. P. 10344/7

Beginning :

पूर्वोच्चरित + + शुभतिथौ ममोपात्तदुरितक्षयद्वारा + + सकलाभीष्टसिध्यर्थं शूलिनी-पूजां करिष्ये ॥

आह्व × × म × × × × भव ।
शूलिनी त्वं × × वरदा भव × × दा ॥

आवाहनम् ॥

End :

ब्राह्मणान् भोजयित्वा दक्षिणां दत्वा गुरून् पूजयेत् । ततः स्वयं भुञ्जीत बन्धुभिः ॥

Colophon

-- -- -

381

Sl. No. 13769 श्रीचक्रपूजाविधिः Ms. No. P. 5946/21

(बोधायनोक्ता)

Beginning:

अथः कल्पतरोर्मूले भवान्या रत्नमन्दिरे ।
रत्नसिंहासने देव्याः श्रीचक्रं प्रणमाम्यहम् ॥

\+ + + +

तन्मध्ये तत्कलावाह्य ब्रह्माद्या देवताः क्रमात् ।
सृष्टिऋद्धिस्स्मृतिर्मेधा कांतिर्लक्ष्मीर्धृतिस्स्मृतिः ।
स्थितिसिद्धिरकारोत्था कालादशकमर्चयेत् ॥

End :

अंसद्वये च हृदये न्यसेत्कूर्परकुक्षिषु (?) ।
जान्वोरुपादगुल्मेषु × यो हृदयाम्बुजे ॥

Colophon :

\- - -

382

Sl. No. 13770 षोडशोपचारपूजाविधिः Ms. No. P. 170/6

Beginning:

एवंगुण + तिथौ मम + पुरुषार्थाभिवृध्यर्थं श्रीसदाशिवध्यानादिषोडशोपचारपूजां करिष्ये ॥

End :

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर ।
यत्कृतं तु मया देव परिपूर्णं तदस्तु ते ॥

षोडशोपचारपूजां समर्पयामि ॥

Colophon :

– – – –

383

Sl. No. 13773 **सिंहासनपूजाविधिः** **Ms. No. G-3563/1**

Beginning :

आगमार्थन्त्विति घण्टानादं कृत्वा, प्राणानायम्य + + समस्तमङ्गलावाप्त्यर्थं + + श्रीमत्सिंहासनदेवतापूजां करिष्ये ॥

End :

भक्त्याहं परिपूज्य त्वामारुहामि वरासन ।
त्वत्प्रसादाद्राज्यकोशसेनावृद्धिर्भवेन्मम ॥

ब्रह्मविष्णुमहेश्वराः, महाकालि; महालक्ष्मि, महासरस्वति नवग्रहसादृगुण्यदेवताः वास्तु पुरुषचतुर्वारुण-अष्टदीक्पाल ३ ३ ९ ६ २ २ ८ ॥ ३१ ॥

Colophon :

– – – –

384

Sl. No. 13777 **सीताकल्याणविधिः** **Ms. No. P. 5674/7**

Beginning :

शुभेहनि यजमानः पत्न्या सह मण्डपमासीनः सीतारामप्रतिकृतिं प्रतिष्ठाय सङ्कल्प्य प्राणानायम्य पर्वोच्चरित + + तिथौ सीताकल्याणमहोत्सवं करिष्ये; तदङ्गं शुद्धिपुण्याहाङ्गं आदौ गणपतिपूजां करिष्ये ॥

End :

इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैतां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥

इति ग्रन्थोपचारपूजां कृत्वा प्रतिकृतिं पूजयेत् ॥

Colophon :

-- -- -- --

385

Sl. No. 13779 सीताकल्याणविधिः (स्कान्दोक्त) **Ms. No. P. 6806/15**

Begininng :

अथ सीतकल्याणोत्सवाराधनविधिरभिधीयते —

अथ दम्पती मङ्गलस्नानानन्तरं + + + पुनः प्राणानायम्य + + आचार्यवरणं कुर्यात् । तत्रायं क्रमः—

सीताकल्याणोत्सवाख्यं कर्म कर्तुमिहोद्यतः ।
तत्राचार्यं वृणे त्वां तु श्रीरामोऽसि त्वमेव मे ॥

End:

अथ ब्राह्मणपूजां कृत्वा दक्षिणाताम्बूलादानादीनि कुर्यात् । चतुर्दिनान्ते देवं विसर्जयेत् ॥

Colophon :

इति श्रीस्कान्दोक्तसीताकल्याणोत्सवप्रयोगपूजाविधिः समाप्तमासीत् ॥

386

Sl. No 13781 सीताकल्याणविधिः (ब्रह्मयामलीया) **Ms. No. P. 8090/1**

Beginning :

अथातः सीताकल्याण × × × कल्याणोत्सवं करिष्ये ; इति सङ्कल्प्य, + + + मङ्गलस्नानं कृत्वा गृहमध्ये नवरत्नखचितमण्डपं विधाय + हिरण्याभ्युदयं कुर्यात् ॥

End:

देवस्य त्वा इति उद्वास्य सीताकल्याणार्थं सम्पादि × × ब्राह्मणैः सह भुञ्जीयात्; आशीर्वचनं गृह्णीयात् ।

एवं यः कुरुते भक्त्या सीताकल्याणमुत्तमम्
इह लोके सुखी भूत्वा अन्त्ये रामपदं व्रजेत् ॥

Colophon :

इति ब्रह्मयामळे सीताकल्याणोत्सवं × × × ॥

387

Sl. No. 13783 सीताकल्याणविधिः **Ms. No. P. 8360**

(अगस्त्यसंहिता)

Beginning:

शृणु देवि प्रवक्ष्यामि सीता × हिकीक्रियाम् ।
यस्याः स्मरणमात्रेण नरः कामानवाप्नुयात् ॥

शुभेह्नि शोभने लग्ने गुणयुक्ते सुलग्नके ।
बलतो रामचन्द्रस्य सीतायाश्च विशेषतः ॥

End :

श्रीरामं सीतासमेतं नवरत्नखचितसिंहासने निवेश्याकल्पोक्तमार्गेण आवरणदेवतासहित पूजां कुर्यात् ॥

Colophon

इति अगस्त्यसंहितोक्तश्रीसीतारामविवाहविधिः समाप्तः ॥

388

Sl. No. 13784 सीताकल्याणविधिः (उमामहेश्वरसंवादः) Ms. No. P. 8410/59

Beginning :

शृणु देवि प्रवक्ष्यामि सीतावैवाहिकीं क्रियाम् ।
यस्यास्स्मरणमात्रेण नरः कामानवाप्नुयात् ॥

\+ + + +

सीतया सहितं देवं रामं राजीवलोचनम् । +
एतास्तु प्रतिमास्सर्वाः सर्वौषधिरसैः पृथक् ॥

End :

एवं कुर्यात्तु कल्याणं सीताराघवयोर्नरः ।
सर्वान् कामानवाप्नोति रामत्वं लभते सुधीः ॥

Colophon

इति श्रीउमामहेश्वरसंवादे सीताकल्याणविधिः समाप्तः ॥

389

Sl. No. 13787 सीताकल्याणविधिः Ms. No. B 670/1

Beginning :

शृणु भद्रे प्रवक्ष्यामि सीतावैवाहिकीं क्रियाम् ।
यस्य स्मरणमात्रेण नरः कामानवाप्नुयात् ॥

\+ + +

एतान् सुप्रतिमास्सर्वांस्सर्वौषधिरसैः पृथक् ।
तत्तमन्मन्त्रैः विष्णुसूक्तैः पौरुषैश्च ततः परम् ॥

\+ + + +

रामादींश्च सदारांश्च गायत्र्या चाभिषिञ्चयेत् ।
ततः प्राणप्रतिष्ठां च असुनीतेति मन्त्रतः ॥

End :

सर्वे भवन्तस्सौम्याश्च सर्वे सुचरितव्रताः ।
पत्नीभिस्सन्तु काकुत्स्थाः माभूत्कालस्य पर्ययः ॥

Clophon:

इति सीताकल्याणविधिः ॥

390

Sl. No. 13791 सीतारामपूजा Ms. No. P. 9446

Beginning :

महाबाहो रघुश्रेष्ठ प्रद्युम्न श्रीनिकेतन ।
धूपमाघ्रापयाम्यद्य दशाङ्गं मुखदेशतः ॥

धूपम् ॥

End :

तत सीतारावयोः हरिद्राक्षत-हरिद्राचूर्णकुङ्कुमताम्बूलानि समर्पयेत् । दम्पतीपूजनं कुर्यात् ॥

Colophon

– – –

391

Sl. No. 13792 सुदर्शनार्चनविधिः Ms. No. P. 4894/1

Beginning :

अधिष्ठातृक्रमे स्वेषां कथ्यते मुनिसत्तम ।
ज्ञातव्यश्चांकुशः कामः मुसलं ना × × × ॥

ओं कालकर्त्रे चक्राय फट् ॥

End :

अत्र मण्डपद्वारे ओं छात्रे नमः ; + + इत्यभ्यर्चयेत् । अन्यत्सर्वं पूर्ववदेव सुदर्शनमन्त्रेणैव कुर्यात् ॥

Colophon:

इति सुदर्शनार्चनविशेषः ॥

392

Sl. No. 13794 सूर्यनमस्कारपूजाविधिः Ms No. P-3554/3

Beginning :

ममोपात × × च कल्पप्रकारेण सूर्यनमस्कारं करिष्ये + + ध्यानम्—

सूर्यं सुन्दरलोकनाथममृतं वेदान्तसारं शिवं
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ।
इत्यादि × × सुराधिपं सुरगुरुं त्रैलोक्यचूडामणिं
ब्रह्मविष्णुः शिवस्वरूपहृदयं वन्दे सदाभास्करम् ॥

End :

मित्ररविसूर्यभानुभ्यो नमः ; त्रिः । मित्ररविसूर्यभास्करेभ्यो नमः ॥

Colophon:

-- -- --

393

Sl. No. 13798 सूर्यनारायणपूजा Ms. No. P. 1568/2

Beginning :

पूर्वोच्चरित + तिथौ + ग्रहाधिपतिं सूर्यदेवस्य षोडशोपचारपूजां करिष्ये ॥

आदित्यस्सविता सोयं कमला × × रः ।
सुस्थिरः × स्तु × × × च ॥

गृहाधिपं सूर्यमावाहयामि ॥

End :

ब्राह्मणान् भोजयित्वाथ आशिषो × च ॥
एवं कृत्वा विशेषेण सर्वपापप्रमुच्यते ॥

Colophon:

— — —

394

Sl No. 13799 सूर्यनारायणपूजा (सौरपुराणीया) Ms No. P. 1659

Beginning

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ सौरपुराणोक्तप्रकारेण छायादेवीसमेतश्रीसूर्यनारायण देवतामुद्दिश्य ÷ ÷ सूर्यनारायणदेवतापूजां च करिष्ये ।

End:

कायेन वाचा ÷ ÷ स्वभावात् ।
करोमि ÷ + ÷ समर्पयामि ॥

प्रसन्नार्घ्यम् ।

आदित्यस्सविता सूर्यः आदिदेवो महेश्वरः ।
आरोग्यं कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

Colophon:

— — —

395

Sl. No. 13803 सूर्यनारायणपूजा (पद्मपुराणीया) Ms. No. P.7827/2

Beginning :

श्रीसूर्यनारायणाय नमः ; ध्यायामि ;

आवाहयामि देवेश ग्रहेश परमेश्वर ।
कमलनाथ लोकेश सान्निध्यं कुरु विग्रहे ॥

End :

नमस्सूर्याय भास्कराय सर्वोपचारपूजां समर्पयामि । आवाहितं देवेशं भास्करं उद्वासयामि ॥

Colophon :

-- -- -- --

396

Sl. No. 13805 सूर्यनारायणपूजाविधिः Ms No. B 8687/13

(आदित्यपुराणान्तर्गता)

Beginning :

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ छायासमेतश्रीसूर्यनारायणदेवता उद्दिश्य + ध्यानावाहनादिलिचमन्त्रेण षोडशोपचारपूजां करिष्ये ॥

End :

अरुणाग्रेसरो हेमद्युतिकुण्डलभूषण ।
तेजोराशिं श्रिया युक्तं तप्तकाञ्चनसन्निभम् ॥

अष्टबाहुं द्विषड्क्षं पद्मस्थं रविमण्डलम् ।
हृत्पद्मस्थमुदाराङ्गं स्मरेच्चन्द्रं हरेर्युतम् ॥

Colophon :

इति आदित्यपुराणोक्ततृचविधानेन सूर्यनारायणपूजा समाप्ता ॥

397

Sl. No. 13806 सूर्यनारायणपूजा Ms. No. P. 9797/1

Beginning :

सर्वदेवात्मकं भानुं ब्रह्माणं लोकरक्षकम् ।
ध्यायामि त्वां महादेवं रश्मिनं भास्करं प्रभुं ॥

सूर्यनारायणं ध्यायामि ॥

End :

एवं यः कुरुते भक्त्या सूर्यस्याराधनं नरः ।
सर्वपापैः प्रमुक्तस्सः नीरोगी सुखमश्नुते ॥

Colophon :

— — —

398

Sl. No. 13808 सूर्यपूजा **Ms. No. P. 307/5**

Beginning :

अथ सूर्यपूजा—

पूर्वाग्नेययोर्मध्ये चतुरश्रं मण्डलं विधाय सामान्यन्यासं कृत्वा +

मध्ये स्फुरत्किरणमण्डलमध्यवर्ती
भास्वत्किरीटमणिकुण्डलकङ्कणाद्यः ।
केयूरवान्विकचचडाडिमनन्निकाश- (?)
फुल्लारविन्दयुगलं करयोर्दधानः ॥

स्थापनाद्यनन्तरं अंगैः सकलीकृत्य पूर्वोक्तस्थाने पूजयेत् ॥

End :

पूर्ववद्देवस्य निर्माल्यं दत्वा विसर्जयेत् । ततः संहितां जपेत् । अं ह्रौं इति संहितां जपेत् ॥

Colophon :

— — — —

399

Sl. No. 13813 सूर्यपूजा **Ms. No. P. 8800**

Beginning :

पूर्वोच्चरितएवङ्गुणविशेषणविशिष्टायां शुभतिथौ + + छायादेवीसंज्ञासमेतद्वादशात्मकश्रीसूर्यनारायणदेवतामुद्दिश्य + + सूर्यनारायणपूजां करिष्ये ॥ + +

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ता × ज्जु × × मुजश्च सदा रविः ॥

End:

तटित्कान्तिसमं स्वच्छं दर्पणं शशिनिर्मलम् ।
समर्पयामि भद्राज्ञावलोक्य भास्कर ॥
दर्पणं । यस्य स्मृत्येति पूजासमर्पणम् ।
यां तु देवगणास्सर्वे पूजामादाय मामकम् ।
पुत्रपौत्राभिवृध्यर्थं मु.......... ॥

Colophon :

– – –

400

Sl No. 13814 सूर्यपूजा **Ms No. P. 9254/12**

Beginning

त्रैलोक्यदीपकं देवं त्रिगुणात्मत्रयीमयम् ।
स्थापयामि मदा भक्त्या भास्करं ग्रहनायकम् ॥

सूर्यस्थापनमन्त्रः ॥

End:

ओं भूर्भुवस्सुवरों सूर्यमावाहयामीत्यावन्ते दत्तपूजां कृत्वा, 'आकृष्णेन तमसा' इति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितसूर्याय नमः इति शोडषोपचारं पुनः कुर्यात् ॥

Colophon:

– – –

401

Sl. No. 13817 **सेतुस्नानविधिः** Ms No. P. 2268/2

(सेतुयात्रास्नानविधिः)

Beginning :

अथातस्संप्रवक्ष्यामि सेतुयात्राक्रमं द्विजाः ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥

\+ \+ \+ \+

सेतुयात्रां करिष्यामीति संकल्प्य भक्तितः ।
पश्चा × × राममन्त्रं जपन्नियतमानसः ॥ + +
इत्यादिनियमोपेतं सेतुमूलं ततो व्रजेत् ।
पाषाणं प्रथमं दद्यात् तत्र गत्वा समाहितः ॥
तत्रावाह्य समुद्रं च प्रणमेत्तदनन्तरम् ॥

End :

एवं वः कथितो विप्राः सेतुयात्राक्रमो द्विजाः ।
एतत्पठन् शृण्वन् वा सर्वदुःखाद्विमुच्यते ॥

Colophon:

इति सेतुयात्राक्रमो नाम एकपञ्चाशोऽध्यायः ॥